सह संज्ञीति राज्ञो य द्वित्यादौ लौकिकव्युत्पत्त्योपस्थितार्थस्य प्रत्ययेन पौर्वापर्यासम्भवात् प्रातिपदिकादित्यनेनान्वयासम्भवाच्च । तदर्थकशब्दमात्रग्रहणाप
त्तौ नियमार्थं सूत्रम् । तत्र स्वशब्द आत्मीयत्वेनार्थमाह रूपशब्देन   स्वरूपमेतदुभयं संज्ञीत्यर्थः । तत्रार्थो न विशेष्य उक्तयुक्तेः किन्तु शब्दविशेषणम् । एवञ्चा-
र्थविशिष्टः शब्दः संज्ञीत्यर्थे ग्रहणपरिभाषासिद्धा । अत्र चार्थः कल्पितान्वयव्यतिरेककल्पितः प्रकृतिप्रत्ययादिबोध्यः शास्त्रीयोपि स च मुख्यः प्रसिद्धेः अत एवार्थ-
विशिष्टरूपोपादानेऽपि वेदे सूत्रस्य न तत्रैवार्थोपस्थितेस्तत्रैवानियमप्रसक्तेश्च न तु वर्णग्रहणे इत्याकरस्य ष्टम् । दाधाघ्वदाप् इत्यस्य हल्घोरित्यादौ चारितार्थ्येनोपस-
र्गे घोरित्यादौ स्वं रूपमित्यनेन परत्वाद्घुसंज्ञाकावारणार्थमशब्दसंज्ञेति । नात्र षष्ठी तत्पुरुषः । कर्मसंज्ञाया अर्थसंज्ञात्वेन निषेधापत्तेः कर्मण्यणित्यादौ स्वरू-
पग्रहणापत्तेः । किन्तु समानतत्पुरुषः । शब्दपदेन च शब्दशास्त्रं तदाह शब्दशास्त्र इति भाष्ये तु अर्थकार्यस्य बाधेऽप्युपस्थितत्वाद्वृद्धिरेजित्यादौ तज्ज्ञस्य बोधिप्रकारस्त-
या संज्ञा समानस्वराजन् शब्दस्यैव ग्रहणं भविष्यतीत्यर्थे सूत्रम् । उपस्थितार्थस्यागमानाभावेन तस्य विशेषणतयान्वयसंभवेन चार्थवत्परिभाषापि सिद्धा । ल-
क्ष्यानुसारात् तस्मात् संज्ञाकरणज्ञानरूपप्रकरणाद्वा पानसंख्यावाचकस्य षष्शब्दस्य षट्संज्ञाकरणेन शब्दशास्त्रीयसंज्ञायां स्वरूपाग्रहणज्ञापनाच्चोपस-
र्गे घोरित्यादावदोषेणाशब्दसंज्ञेत्यपि व्यर्थमित्युक्तम् ।   ः अत एव जनपदशब्दात् पञ्चदेवनादिश-

शा॰शे॰ ॥ ब्देषु नदीर्णान एव वृक्षादिषु विशेषाणां ग्रहणं स्वेषु पुषद्द्वत्यत्र पर्यायाणां विशेषाणां स्वरूपस्य च ग्रहणं सभाराजे त्यत्र पर्यायाणामेव ग्रहणं पक्षिमत्स्यमृगान्हन्तीत्य

१२ त्र मृगपक्षिणोः पर्यायाणां विशेषाणां स्वरूपस्य च ग्रहणं मत्स्यपदेन स्वरूपस्य विशेषाणां मीनरूपपर्यायस्य च ग्रहणं सिद्ध्यति॰ अन्यथा तदर्थं यत्नः कर्तव्यः। परे

श्वश्वांकयोश्चित्यत्र शब्देन स्वरूपग्रहणं नदीपौर्णमासीत्यत्र नदीपदेन स्वरूपग्रहणञ्च सिद्ध्यति लक्ष्यानुसारिव्याख्यानेन मम सर्वेष्टसिद्धिः। ज्ञापकपक्षेपि ज्ञाप

कसिद्धस्यासार्वत्रिकत्वान्न दोषः। अत एव भगवता ज्ञापकेन सिद्धं वचनं प्रत्याख्यानमिति दिक्॰ येन विधि॰ येनेति करणे तृतीया॰ विधिरिति भावे क्तिः। कर्मात्र वि

धेयं कर्ता चाचार्यः। प्रसिद्धत्वादत एव॰ यत्तु करणं कर्तृपरतन्त्रमिति तृतीयया पारतन्त्र्यं लक्ष्यते तच्च शब्दानां विशेषणत्वेनेति विशेषणमिति लभ्यमिति तन्न

सुपविभक्तौ नेलक्षणेन्यस्य सर्वसंमतत्वात्॰ किं बहुना येषां प्रत्ययानामन्येषां शब्दानां वार्थे विधानं कृतं शास्त्रेण तेषामन्यत्रार्थे तदर्थे चान्येषां लक्षणया

पि साधुत्वाभावस्य प्रत्ययः पुंयोगादित्यादिभाष्यतो लाभात्॰ करणस्य व्यापारवत्त्वनियमादन्येषां च व्यापाराभावाद्विशेषणमेवात्र करणं तृतीयान्तेनोच्य

ते तस्य चेतस्यार्थे तिकरणमेव व्यापारः तदुक्तं भाष्ये येनेति करणे एषा तृतीयान्येन चान्यस्य विधिर्भवति यथा चैत्रस्य संग्रामं हस्त्यश्वादिभिर्विधत्ते एवम

चोयदिति॰ अचा षानोर्यतं विधत्त इति॰ अन्येन चान्यस्येत्यनेन यस्य कार्यं यस्मिन्परतश्च तयोरकरणत्वं दर्शितम्॰ अन्यस्येत्यन्यस्मिन्नित्यस्याप्युपलक्षणं

तत्र शब्दोपस्थितविशेष्यस्य तादृशं विशेषणमेव तदन्तग्राहकम्॰ क्वचित्तु तिगमकेऽतादृशं शब्दरूपं विशेष्यमादायापि तदन्तविधिः तच्चानरङ्गत्वात्समा

नाधिकरणमेवातन्त्रतदन्तविधौ सतितथा विशेषणत्वयोग्यता प्येतत्प्रवृत्तौ निमित्तम्॰ अत एव हन्तीत्यादौ नंशेत दन्तविधिर्नेहीनंगमित्यन्वयो भवति।

तदन्तस्येत्यस्य तदन्तशब्दस्येत्यर्थः। नन्वेवमेरजित्यत्र नस्यादत आह॰ स्वस्य चेति स्वमित्यनुवृत्तं षष्ठ्या विपरिणम्यत इति भावः। स्वरूपमित्यस्य प्र।

त्याख्यानेतु [illegible] तस्य चेति पाठ्यमिति बोध्यम्॰ समासप्रेति॰ विशेषणविशेष्यभावव्यत्यासेन तात्पर्यग्राहकमिदम्॰ एवञ्च द्वितीया श्रितेत्यादौ श्रिता १२

द्योऽधिकारप्राप्तसमर्थैरित्यस्य विशेष्यभूता इति न तदन्तविधिः। तस्यैतत्प्रकृतिके लक्षणया सुप्सुपेत्यनेनान्वयः। तेन कष्टं परमश्रितइत्यत्र न समासः

नडादिभ्यः [illegible] पि नडादिविशेष्यं प्रातिपदिकं विशेषणमिति सैत्रनाडिरित्यत्र न फक् उगिदिति॰ तेनातिभवतीत्यत्रोगितश्चेति ङीप् दाक्षिरित्यत्रा

तदन्तत्वसिद्धः। एवञ्चोक्तनिषेधः प्रत्ययांशे गृह्यमाणप्रातिपदिकविषये। प्रत्ययविषये तु गृह्यमाणप्रातिपदिकेन तदन्तविधिर्नास्तीत्यनेनैकवाक्यत्वलाभात्
न्। उगिदचामिति त्वेकदेशानुवाद इति बोध्यम्। अत एव वनो र चेत्यादौ प्रत्ययग्रहणे तदन्तग्रहणमित्यस्य नायं निषेध इति दिक्। विरामोऽवसानम्। शब्दानु
शासनप्रस्तावादाह वर्णानामिति। उच्चारणाभाव इत्यर्थः। स च व्याख्यानात् किञ्चिद्वर्णोच्चारणानन्तरकालिक एव गृह्यत इति। प्रदेशा वावसान इत्यादयः। अभाव
स्यापि बुद्धिकृतपौर्वापर्यं वर्णवत्। परशब्दो नान्यार्थोऽन्यत्वस्याव्यभिचरितत्वादत आह। अतिशयित इति। स्वभावसिद्धार्धमात्रातिरिक्तकालव्यवायेन रहि
तः। तेन तद्व्यवायेन वाक्योच्चारणे सन्तानसन्निकर्षश्च प्रायः परेणाक्तवित्पूर्वेण। अत एवावसानकार्याणां संहिताधिकारे पाठः। न चावसानसंज्ञया परस
त्वे सावकाशायाः संहितासंज्ञायाः सत्यपि सम्भवे बाधनं भवतीति न्यायेन विषयभेदेऽपि बाधः स्यादिति तदसङ्गतिरेवेति वाच्यम्। तदधिकारे तेषां पाठेना
कडारसूत्रस्य स्वशास्त्रीयसंज्ञामात्रविषयकत्वकल्पनात्। एतेन तु मतं तथा लोकेऽपि सत्त्वात्। न तूक्तवार्तिककृता संहितावसानयोर्लोकविदितत्वादिति
न चावसानकार्येषु संहिताधिकारासम्बन्ध एवास्तु अग्ने च मण्डूकप्लुतिरस्त्विति वाच्यम्। सत्यामुपपत्तौ मण्डूकानुवृत्तेरयुक्तत्वात्। ध्वनितश्चैवं विसर्ज
नीयस्य स इति सूत्रे भाष्ये। सन्निकर्षः सामीप्यम्। सुप्तिङ्। सुबिति सुपः पकारेण प्रत्याहारो व्याख्यानात्। यद्यपि प्रत्ययग्रहणे तदन्तग्रहणमित्युक्तेः श्वा
दृरूपं विशेष्यमादाय तदन्तग्रहणं सिद्धम्। प्रत्ययेन स्वप्रकृत्यवयवकसमुदायस्याक्षेपात्तद्विशेषणत्वेन तदन्तविधिरिति तु न युक्तम्। इयामित्यादौ तस्य
तादृशसमुदायेन व्यभिचारेणाक्षेपासम्भवात्। आक्षिप्तस्य शाब्देनान्वयाच्च। तथापि संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणाभावज्ञापनार्थमन्तग्रहणम्।
तेन घसंज्ञा तरप्तमपोरेव न तदन्तस्य। तेन गौरीब्राह्मणितरेत्यत्र न ह्रस्वः। एतन्निषेधसामर्थ्यादेव प्रदेशेष्वपि न तदन्तविधिः। न च ज्ञापितेऽपि अर्थपद
प्रदेशे प्रत्ययग्रहणे तदन्तग्रहणेनैव सिद्धेरिति वाच्यम्। पदत्वस्य प्रकृतिसाधारणतया पदग्रहणे प्रत्ययग्रहणस्यैवाभावात्। यस्मात्प्रत्ययविधि
रित्यादावनुवृत्तेः पदसमुदायस्य न पदत्वम्। इयानित्यादौ यस्मात्प्रत्ययविधिस्तदादि तद्धितान्तत्वेऽप्यपदेशिवद्भावेन बोध्यम्। तेषां शास्त्रीयस्यापेक्षा
वृत्त्वादेरिति देशान्। विशिष्टनिष्ठव्यवहारनिमित्तकार्याणि असहायेऽपि कर्तव्यानीति तदर्थादत एव यन्मात्रमित्यादेव तत्त्वं न स्वार्थे इति मात्रच्सिद्धिः।

सु॰
शे॰शो॰ ऽप्युपेक्ष्यवादेन॰ ध्वनितश्चैदं आदेच उपदेशेऽनास्यनुदात्तेदित्यादौ भाष्ये॰ तत्र हि ढौकतइत्यौकारस्य हतइत्यादावकारस्य जन्तोपदेशत्वेपि प्रकारान्तोपदेश
१३ पदे शिवद्भावेनाशंक्यार्थवतामपदेशिवद्भावइत्युक्तमयो वर्णोर्थवान्तेनव्यपदेशिवद्भावः वर्णस्यार्थवत्वञ्चैयायेत्यादावसहायएवनमुप्रक्तेनइतिनदर्थ
एवञ्चैकस्मिन्नित्यस्यार्थोऽर्थवतेत्यनेनोक्तइतिदिक् हलोनं।गर्गाः प्रातंद एङ्यन्तामित्यत्रसमुदायेशतदण्डनवदत्रसमुदायस्यैवसंज्ञानप्रत्येकम् अ
नराइत्युक्तेश्चतस्यविशेषणतायाएवौचित्यात् यत्तुसंयुज्यन्ते वर्णायत्रेत्यन्वर्थसंज्ञावलान्नप्रत्येकंसंज्ञेतितन्न॰ घटपटौसंयुज्येतेयत्रेत्यादौसंयुज्यमा
नपदार्थातिरिक्तस्यैवान्यपदार्थतयाप्रतीतेर्व्युत्पन्नत्वेनतदतिरिक्ततद्घटितपदवाक्यरूपसमुदायस्य॰ संज्ञापत्तावनिष्टापत्तेः महासंज्ञातुप्राचामनुरोधा
देवतेनसुदृषद्ज्ञानीत्यत्रसंयोगान्तलोपोनेत्यन्यत्रविस्तरः।हलइतिवहुवचनंसौत्रम्॰ यद्वाहलौ चहलश्चेत्येकशेषः।स्वरितात्संहितायामितिसूत्रेऽनुदा
त्तानामितिपदेतथैकशेषस्यभाष्येकरणात्॰ तेनद्वयोरपीतिशिक्षेत्यादौगुरोश्चहलइत्यप्रत्ययःसिध्यति।यत्रापिवहवस्तिष्ठन्ति तत्रापिद्वयोर्द्वयोर
वनवहूनां झलिपरेसंयोगादिलोपविधानात्॰ वहूनामपीत्यपिचिन्त्यमेवाफलाभावात्तत्रतत्राङ्गपदधात्ववयवसंयोगस्यैवाश्रयणेनताद
शस्यत्रयाणांसंयोगस्याभावादितिभाष्येस्पष्टम्॰ आनन्तर्यमव्यवधानाभावोव्यवधानञ्चविजातीयेनैवेत्याशयेनाह॰ अज्भिरिति॰ अत्रकुत्वन्या
य्यम्ऽतएवहयवरट्सूत्रेऽचोह्वितिभाष्यप्रयोगेकुत्वंदृश्यते।स्वैरस्वव्यवहिताइतिन्तुचिन्तावृत्तिः हलः किम्॰ तितउरेव अत्रगुरोरितिप्लुतःस्यात्॰ अ
नन्तराः किम्॰ दृषदम्॰ अत्रसकारमकारयोः संयोगत्वेस्कोरितिलोपःस्यात्॰ संयोगेगुरुः भेत्तेत्यादौगुरुत्वमुक्तौः कित्वसामर्थ्येनभूतपूर्वलघूपधग्रहणाद्बोध्यः
इतिसंज्ञेति॰ प्रथमाध्यायस्थानांसन्धिकार्योपयोगिनीनांसंज्ञानांप्रकरणमितिसमाप्त॰ मित्यर्थस्तेनाम्रेडितप्रगृह्यभसञ्ज्ञालोपसंज्ञाद्यनुपन्यासेपिनक्षा
तिः अअइत्याद्युपन्यासस्तुप्रासङ्गिकः ॥ इतिसंज्ञाप्रकरणम् ॥ ॥ इकोगुण॰ परिभाषेयंव्याख्यानात्॰ गुणवृद्धिशब्दा ॥ ॥
भ्यामिति गुणवृद्धिग्रहणानुवृत्त्यैवसिद्धेपुनर्गुणवृद्धिग्रहणसामर्थ्यादितिभावः।अनुवर्तमानञ्चसंज्ञिपरमेवस्यात्।संज्ञाकरणेनान्यत्रसंज्ञिप
रत्वात्॰ यद्वातदप्यनुवर्त्यगुणवृद्धिरितियोजनयेनलाभः।स्वादिष्वितिसूत्रेनुवृत्तपदपदस्यसंज्ञापरतायाएवदृष्टत्वात्॰ सानेतिसूत्रेसंख्यापद

स्यतदन्तत्वासम्भवादर्थपरतेति बोध्यम्· लक्षणप्रतिपदोक्तपरिभाषयानुनात्रनिर्वाहः। तत्र प्रतिपदोक्तस्येत्यस्य साक्षादुच्चरितस्येति साक्षात्तच्छब्दानुवादे
न विहितस्येति वार्थात्· ध्वनितञ्चेदमत्रैव भाष्ये। अस्याश्च विधेयसमर्पकगुणवृद्धिपदश्रुतिर्लिङ्गं तदाह· विधीयेतेइति· अत एवातो गुणो वृद्धिर्यस्येत्यादौ नेदोषः
एतेन भाव्द परयोः पूर्वयोर्गुणवृद्धिपदयोरेवानुवृत्त्यायत्रस्यर्थेन पदेत त्रेदमुपतिष्ठतेइते त्यदादीनामइत्यादिमावृत्तौ सिद्धायामिह गुणवृद्धी तित्यर्थमित्यपास्तम्· एतन्मू
लकएव विधौ परिभाषोपतिष्ठतेनानुवादेइत्युद्घोषः। एवञ्चोपदेशपस्थापकपरिभाषाविषयेविधीयंतइत्यस्यैवाध्याहारो बोध्यः। एवञ्च तस्मिन्निति निर्दिष्टे षष्ठी
स्थानेइत्यादि रनुवादेपि प्रवृत्तिः। तेन प्रत्ययस्थात्कात्पूर्वस्यादात्तस्वरितयोर्यणइत्यादौ न दोषः। उदीचामातस्थानेइति स्थानेग्रहणन्तु स्पष्टार्थमेव तत्रविधिर्वा
क्यश्य मायाविधेयविभक्तित्वेन तदन्तस्य विधेयसमर्पकत्वनिर्णयः। अत एव गुणादिपदानामिकूपदोपस्थापनेन चरितार्थानामपि वाक्यार्थान्वयिता। तदर्थे
स्यतदन्वयित्वे विधेयत्वाभावेन उपस्थापकत्वस्यैव भङ्गापत्तेः। इयञ्च एधितेत्यादौ व्यञ्जनानां गुणवृद्धिव्यावृत्त्यर्थे भिन्नमित्यादौ निषेधप्रवृत्त्यर्थे इग्लक्षणत्व
संपत्त्यर्थं चेति दिक्। पुनःशब्देरिति· ऊकालइति सूत्रादुःस्वदीर्घप्लुतइत्यजिति चानुवर्त्तते ह्रस्वेत्यादि पदञ्च तृतीयया विपरिणतमिति भावः। तेन दिव उदवनआ
विभक्ताविव्यादौ वितदनुपस्थितिः शेषप्राग्वत्· आद्यन्तौ· यद्यप्यत्रमिलितस्यैकत्रान्वयइतिद्वन्द्वेन प्राप्तो तिनयापि समूहयोरन्वयबोधोत्तरं यथासंख्यमिति
सूत्रारम्भसामर्थ्यात्पुनः प्रत्येकमन्वयः। लोकेत्ववैरीत्वाप्रयोगोसाधुरेवेति भाष्ये स्पष्टम्· अत्रैव यथासंख्यसूत्रोपन्यासोयुक्तः· द्वन्द्वेनश्रूयमाणस्य चद्वस्य
प्रत्येकंसम्बन्धः। पुरस्तादपवादन्यायेन स्थानेयोगत्वस्यापवादः· प्रत्ययपरत्वंतुपरत्वादमुंबाधन्तेनेन च रेष्ठादयः परा एव भवन्ति· अत एव यत्रैतदभावे स्थान षष्ठी
सम्भावना तत्रैवेदं प्रवर्त्तते तदाह· यस्योक्ताविति· आद्यन्ताक्षिप्तावयवीयच्छब्दार्थः· यथासंख्यसिद्धमर्थमाह· क्रमादिति· इत्ताविति किम्· इकूपर्यायेणा
द्यन्तयोर्माभूत्· मिदचो· अयं बाध्यसामान्यचिन्तया स्थानेयोगत्वप्रत्ययपरत्वयोरपवादः। तृणहइति निर्देशात्· निर्धारणेइति· यस्य समुदायस्य मिद्विहित
स्तस्याचामन्त्यइत्यर्थः· सोन्तमेकवचनमिति भावः। तस्यैवेति· यस्य विहितस्तस्यैवेत्यर्थः· अत एव समुदायभक्तोसौ नोत्सहते वयवस्यगन्तुं विहन्तुमिति भाष्ये सं
गच्छते। अत्रावयवइति· पूर्वसूत्रात्समस्तमप्यत्र पदमेकदेशस्वरितत्वप्रतिज्ञावलादनुवर्त्तत इति भावः। मुञ्चतीत्यादिविषये तुफलाभावादयाम्यत्वाच्चानावय

शे· शे·
१४
वइत्यंशांप्रवृत्तिः परिभाषाणामनियमे नियमकारित्वादाह· अनिर्धारितेति· तेनोदुपधाया गोहइत्यत्र स्थानेयोगत्वम्। उपधापदसन्निधानेनावयवषष्ठीत्वनि
श्चयात्तु· स्थानेयोगेत्यस्य स्थानपदार्थनिरूपितसम्बन्धार्थिकेत्यर्थः। स्थानेनयोगोयस्या इति विग्रहे निपातनात्साधुत्वस्य भाष्ये उक्तत्वात्· अन्तरमन्तरइत्यादेरपि
अन्तरादिनिरूपितसम्बन्धे इत्येवार्थः। षष्ठीमात्रोच्चारणे स्थानपदाध्याहार इत्यन्यत्र विस्तरः। प्रसङ्ग इति दर्भाणां स्थाने शरैः प्रस्तरितव्यमित्यादौ तथा दर्शना
त्· भावेत्युक्तेः स्थानशब्दो प्रसङ्गश्च सति सम्भवे ऽर्थवत एवार्थप्रत्यायनार्थं शब्दप्रयोगात्· इकोयणित्यादिरप्येकारघटितशब्दस्यार्थबोधनाय प्रसङ्गे तत्परयका
रघटितः प्रयोक्तव्य इत्यर्थः। एकारीत्यादेश्चानेस्तु रीति अतो न शब्दनित्यताहानिः। किन्त्वीकारवृद्धिप्रसङ्गे यकारवृद्धिरित्यप्यर्थः अत एवाचः परस्मिन्नित्यादि सङ्ग।
च्छतोस्य एकत्रिंशद्दाथाधिति सूत्रस्थानिवत्सूत्रयोर्भाष्ये· स्थानेन्तः षष्ठ्यपि अनुवृत्त्या यत्र स्थानषष्ठी तत्रैदमुपतिष्ठते इति विध्येकवाक्यतयैवास्य नियामकत्वं न
तु विहितानां नियमः भुक्तवन्तमिति न्यायविरोधात्· फलितमाह· प्रसङ्ग इति· सदृशतम इति· अर्थात्प्राप्यमाणानां मध्ये एव अत एव गङ्गोदकमित्यादौ त्रिमात्रे
ण तमपूर्किम्· वाग्घरिरित्यादौ महाप्राणत्वसाम्येन जायमानः पूर्वसवर्णो वर्गद्वितीयो मा भूत्। किन्तु नादवान्महाप्राणश्चतुर्थो घ एव यथा स्यादिति· स्थानेन्तरतमे
इति सप्तम्यन्तपाठस्तु दीर्घ पुयणासिद्धा दुष्ट इति भाष्ये स्पष्टम्। यत्रानेकेति· स्थानेग्रहणे एकदेशानुवृत्त्यानुवर्त्तमाने पुनः स्थानेग्रहणं तृतीयया विपरिणामेन वा
कामेदमास्त्विप्रसङ्गे सति सम्भवे स्थानत एवान्तरतम इत्यर्थकमिति भावः। स्थानतइति· स्थानेनेत्यर्थः। तत्र स्थानत इकोयणचीति· अर्थतस्तु वल्कोवृरिति· इ
हकोष्टुशब्दस्थाने पङ्क्तृशब्दादेशः। गुणतस्तु वाग्घरिरित्यादौ। प्रमाणतो ऽदसोसेरित्यादौ। नृस्मिन्निती ति· अत्रान्स्मिन्निति उत्तरत्र तस्मादि
ति सप्तम्यन्तपञ्चम्यन्तपदार्थकः स्वतन्त्रस्य सर्वनाम्नो निर्देशः। व्याख्यानात्· वहुलस्य संस्कारानुरोधाच्चानन्तरतत्पदपरम्। अन्यथा तस्मिन्नणि च तस्मात्तु ङसि तस्माच्च
सानइत्यत्रैव प्रवर्तीयाताम्· सप्तमी तु सप्तम्यन्तानामेव तत्त्वञ्चान्यत्वमिति बोधनाय तद्व्याख्यार्थस्य निर्दिष्ट इत्यनेन सामानाधिकरण्याय च इतिशब्दः। पुनस्तस्य तत्त्वं १४
प्रत्यं बोधयतीति· शब्दो नैरन्तर्यं दिशिरुच्चारणे एव च सप्तम्यन्तार्थे ऽव्यवहितोच्चारिते उपश्लिष्टस्य पूर्वस्य कार्यमिति वाच्योर्थः। एवञ्चेन्नपरिभाषाद्वयोपस्थितौ
सप्तम्यन्तपदस्य पञ्चम्यन्तपदस्य चार्थो लिङ्गम्· अत्र सूत्रे उपश्लिष्टपदाध्याहारेण निर्दिष्ट इति औपश्लेषिके ऽधिकरणे सप्तम्येव विधिता उपपदविभक्तेरिति न्याय

स्मा नन्तर्यनिसप्तमी तत्र चदीयमे इति सूत्रे कैयटे स्पष्टम्· स्वक्रमो रिति सूत्रे च कैयट आह तस्मिन्निति परिभाषायामसत्यामिति सप्तम्याश्रयणमशक्यमिति उपश्लेषः समी
परुमिति तचवर्णयोर्वौ इं द्रष्टव्यम्। एवमिको यणचीत्यादावपीयमेवेति संहितायामिति सूत्रे भाष्ये। तत्रोपश्लेषः पूर्वस्यैव परस्याव्यवहितस्यैवाव्यवहितस्य चेति नि
र्वस्यैवेति नियमार्थमिदं अव्यवहितएवेति च। अतएव लक्ष्यानुसारात्क्वचित्सतीत्यध्याहारात्सति सप्तम्याश्रयणेनास्याः प्रवृत्तिरिति श्नान्नलोप इत्यत्र भाष्ये उक्तम्·
अतएव कर्तृकर्मणोः कृतीत्यत्र नास्याः प्रवृत्तिः। कृतिसतिप्रत्यासत्त्या तत्प्रकृत्यर्थकर्तृकर्मणोः षष्ठीति तदर्थेन तस्मादिति सूत्रे निर्दिष्ट इति निर्दिष्टाद्दिग्यर्थकविभ
क्तिविपरिणामात् सचोत्तरस्येति दिग्योगलक्षणेति दिग्योगलक्षणपञ्चम्यामेवतत्प्रवृत्तिः। उदः स्थास्तम्भोरित्यादौ दिग्योगलक्षणा पञ्चमी। तत्रानियतदि
क्कत्वस्याध्याहारे प्रसक्ते परशब्दस्यैवाध्याहार इति तस्मादित्यनेन नियम्यते। अव्यवहितोच्चारितात्पञ्चम्यन्तात्परस्येति तदर्थः तत्फलितमाह सप्तमीनिर्देशे
नेत्यादि। व्यवहिते तु अर्द्धमात्राधिककालेन वर्णान्तरेण वा व्यवधाने उपश्लेष एव नेत्युच्यते तदा निर्दिष्टपदं संहिताधिकारश्च विफल इति संहितायामिति सूत्रे भाष्ये
स्पष्टम्· अवग्रहे च संप्रदाय एव शरणमिति आनङ्विधिविषये आदेशान्तरमेवावग्रहेऽन्यत्र तु ततः प्राक्। अत ऊहपरिभाषात्वनित्यतास्येत्यवा न लक्षणेन
पदकारा अनुवर्त्याः पदकारैर्नाम लक्षणमनुवर्त्यमिति भाष्येण तदनुरोधेन शास्त्रासंकोचस्य शास्त्रकरणाभावस्य च स्पष्टमुक्तत्वाच्च· एतेन संहिताधिकारस्त
द्बहिर्भूतानामर्द्धमात्राधिककालव्यवाये प्रवृत्तिसंपादनार्थं तेनाग्नाविष्णू इत्यादाववग्रहे आनङादिसिद्धिरित्यपास्तम्· प्रत्ययः परश्चेत्यादौ तूत्तरांशविकलानस्मा
दिति परिभाषा प्रवर्त्तते सौन प्रत्ययाव्यवहिताः। अतएव कुन्दस्तिपोरपि व्यवहिताश्चेति सूत्रं सार्थकम्· आगमविधावप्यानेमुगित्यादौ तस्मिन्निति परिभाषयापू
र्वसम्बन्धित्वनिर्णयः। अतएवात्र पूर्वस्येत्यादिनस्थानषष्ठीतन्त्रादिभिरेवसम्बन्धस्य निर्णीतत्वेन षष्ठी स्थानइत्यस्याप्रवृत्तेः। गाङ्कुटादिभ्य इत्यादावपि
षष्ठ्यर्थस्य विकल्पेन तस्यपरिभाषाप्रवृत्तिर्वोध्या परिभाषाणां नियमत्वन्तु यदि परिभाषासूत्रं न स्यात्तदाव्यवहितादावपि प्रवृत्तिः स्यादित्येतावन्मात्रेणेति दिक्· अलोन्त्यस्य
षष्ठीस्थाने इत्यनुवर्त्तते तदाह षष्ठीत्यादि· स्थानेविधीयमानः स्थानषष्ठीनिर्दिष्टान्त्यस्येत्यर्थः। स्थाने इत्यादि किम्· इट्टच्चकाराणान्पूर्वो मा भूदिति· अन्त्यस्येति
साहचर्यादलइति षष्ठ्यन्तमन्त्यस्यालइत्यर्थः। अलइति किम्· पदस्येति विधीयमानं वसुस्रंसुध्वंस्वनडुहां द इत्यादावन्त्यस्य पदस्य माभूत्। स्थानेविधीयमा

सु॰
प्र॰ शे॰ नइति प्रत्यासत्तिलभ्यम्॰ एवञ्चाल एवेति अन्त्यस्यैवेति नियम इयमत्र अलसमुदायोत्तरस्यानषष्ठ्यस्यालिङ्गम्॰ अत एवेतोऽदित्यादौ नोत्सर्गः प्रवृत्तिः पथ्यादी
१५ नामित्यस्यावयवषष्ठीत्वादितइत्यस्यालसमुदायोत्तरत्वाभावाच्च॰ ङि॰च्च॰ अनेकालर्थमिदम्॰ आदेरिति॰ आदेरलइत्यर्थः तेन द्वीपमित्यादौ पान्तसमुदायस्यने
त्वम्॰ अत्र परस्येत्यावर्तते॰ तेन परबोधकशब्देन यत्र परस्य स्थाने विधानं तत्रैवेदं तेन नित्यं ङि॰ तइत्यादौ न दोषः। तत्र विकरणाव्यवधाने प्रवृत्तये धातोरित्यस्य वि
हितविशेषणत्वात्॰ अनेकाल्शित्॰ शित उदाहरणमिदमइश्॰ ननु शकारोच्चारणसामर्थ्याद्भूतपूर्वानेकालत्वमादाय सर्वादेशत्वसिद्धेः शिदिति व्यर्थम्॰ किञ्च
सानुबन्धकनिर्देशे यथा नानः स्थानित्वं भोभगोइति सूत्रे भाष्ये उक्तं तथा देशत्वमपि सूत्रोपात्तस्यैवेति तद्व्यर्थम्॰ विधौ निर्दिष्टो योनेकाल् स सर्वस्येति सूत्रार्थः।
उद्देश्यत्वविधेयत्वाख्यविषयतयाविधिविषयता तु अनुबन्धविनिर्मुक्तस्येति नाणुदित्सूत्रभाष्यविरोधः ष्वसोरिति लोपस्य लोपो यीति प्रकृते पुनर्लोपग्रहण
सामर्थ्यात्सर्वादेशत्वसिद्धिः। अनुबन्धानामेकान्तत्वमेव न्याय्यमित्युक्तमिति चेन्न नानुबन्धकृतमनेकालत्वमिति ज्ञापनेन चारितार्थ्यात्॰ तेन दिव औत् इत्यादौ न
न्त सर्वादेशत्वम्॰ अस्य च यथेसंज्ञा तथा वक्ष्यते नानेकाल्शिदिति तु नोक्तम् अनन्तरस्येति न्यायेनादेः परस्येत्यस्यैव निषेधापत्तेः। परत्वादिति॰ आदेः परस्ये
त्यस्यावकाशः द्व्यन्तरुपसर्गेभ्योऽप ईत्॰ द्वीपम्॰ सर्वस्येदमइश्॰ एवमतो भिस इत्यादिविषयेऽनेकाल्त्वेनादेः परस्येति परत्वाद्बाध्यते॰ एतेन ङिच्चेत्यत्र ङिदेवाने
कालन्त्यस्येति नियमेन सिद्धेऽनेकाल्ग्रहणं व्यर्थमित्यपास्तम्॰। स्वरितेन॰ इत्थंभूतलक्षणे तृतीया। स्वरितत्वज्ञाप्योऽधिकारो विनियोग इत्यर्थः। स्वरितत्वञ्चेदं दे
षविशेषरूपमेव हल्साधारणं स्वरूपमधिक्रियमाणपदघटकाज्विषं वा। तच्चानुनासिकवत्प्रतिज्ञागम्यम्॰ विनियोगश्च प्रायेणोत्तरत्रोपस्थितिः क्वचित्पूर्वत्रा
पि क्वचिद्दूरमधिकार इत्यत्रास्मतिगमके व्याख्यानमेव शरणम्॰ किञ्च स्वरितेनाधिकारगति तेन गोस्त्रियोरित्यादौ अधिकारस्य प्रत्ययग्रहणमित्याद्याकराद
वसेयम्॰ एतेन व्याख्यानादेव निवृत्तिवदनुवृत्तिरपि भविष्यति॰ आकांक्षायां तु सत्यामश्रुतकल्पनाया अन्याय्यत्वात्॰ श्रुतानपेक्षणस्यान्याय्यत्वाच्च किं सूत्रेण। १९
त्यपास्तम्॰ स्वप्रस्वेदं भाष्ये॰ परनित्येति॰ परं विप्रतिषेधसूत्राद्बलवत्॰ नित्यं कृताकृतप्रसङ्गि तद्विपरीतमनित्यम्॰ तत्राकृतप्राप्त्याभावकस्याभावकल्पनापेक्षास्यात्॰
प्राभाकृतकल्पनेव तत्कल्पनं युक्तमिति तस्य बलवत्त्वे बीजम्॰ अन्तर्मध्ये बहिरङ्गशास्त्रीयनिमित्तसमुदायमध्ये अन्तर्भूतान्यङ्गानि निमित्तानि यस्य तदन्तरङ्गम्॰ नदी।

यन्निमित्तस्समुदायान्तर्भूताङ्गकं बहिरङ्गमन्तरङ्गबलवत्त्वे बीजमाह · असिद्धमिति · इयञ्च वाह ऊठ्सूत्रे ज्ञापिता · यद्यपि प्रत्यङ्गवर्त्ती लोको दृश्यते मनुष्योयं प्रातरुत्थाय प्र
थमं शारीरकार्याणि करोति ततः सुहृदां ततः सम्बन्धिनामिति न्यायमूलकत्वमस्या अत्र · परस्मिन्निति भाष्ये उक्तम् · तथापि तेन न्यायेन युगपत्प्राप्तिविषयत्वे वस्तुतः ज्ञा
पके न तु सर्वविषयता बोध्यते इति वाह ऊठ्सूत्रस्थकैयटे स्पष्टम् अन्यथा वाहः सम्प्रसारणे पूर्वरूपे च कृते एत्येधत्यूठ्स्विति गुणे वृद्धिरेचीति वृद्धौ प्रष्ठौहः इत्यादिसिद्धौ वृद्धिवि
धानं व्यर्थं स्यात्; नाजानन्तर्ये परिभाषानुत्थापनीयेति नायं ज्ञेयः इन्द्रमित्यादौ दोषः इति परिभाषेन्दुशेखरे विस्तरः · अपवादस्तु वचनप्रामाण्यादेव [illegible] अकृतेति · व
कृते विशिष्ट उहलक्षणे निमित्तविनाशेपि कार्यस्थितिरूपः यथा दण्डनाशेपि घटस्थितिः सर्वेत्ते इत्यर्थं तदाह · निमित्तमित्यादिना · तत्पूर्वं कार्यं जातमपि न
कुर्वन्निनो व्यारूपनीत्यर्थ इति कैयटादयः । अन्ये तु व्यूढोरस्क नान्तरङ्गशास्त्रं बहिरङ्गापोहनरूपत्वान्न निमित्तविनाशे दृष्टापूर्वमपि न कुर्वन्नीत्यर्थ इत्याहुः · इयं परिभा
षा निष्फला निर्मूलेति परिभाषेन्दुशेखरे निरूपितम् · ॥ ॥ इति परिभाषाप्रकरणम् ॥ आह आस्थानेमेऽन्ताः कलात्सादिति · कार्यशब्दवादिदम् · संहितायां
विषय इति · कार्यनिमित्तयोः संहितायां विषयभूतायामित्यर्थः । स्थानत इति · इदं यथासंख्यसूत्रे भाष्ये स्पष्टम् · जातिपक्षे यथासंख्येनापि निर्वाह इति ध्या
न्यान्तरतमसूत्रे भाष्ये स्पष्टम् · अनुनासिकस्थाने विनिरनुनासिक एव विधीयमानत्वेन सवर्णाग्राहकत्वात् गुणाभेदकत्वपक्षेपि न विधेयाणि विषये · दीर्घा
दीनामिमादिपरे ह उपस्थितये प्रत्याहारेषु जातिपक्ष एव त्वणुदित्सूत्रभाष्ये स्पष्टम् अत एव सर्वतकारादीनां [illegible]कत्वादि सिद्धिर्ल्वादिभ्य इत्यादिनिर्देशाद्यत्वा
न्याग्रपणे मानमिति दिक् व्याकरणस्य साध्वनुशासनत्वं शब्दनित्यतापक्षे शब्दानां सिद्धत्वेन शास्त्रं वै पर्यायोपस्थानमार्जिप्रसङ्गे मार्जिः साधुर्भवतीत्यादि व्य
द्विसंज्ञासूत्रादिस्थभाष्यप्रामाण्येन यदिह परिनिष्ठितेन तत्तांप्यं तत्साध्वित्यर्थोपत्तिकल्प्य वाक्येन बोध्यम् · कार्यशब्दवादे तु पूर्वभाष्योक्तीनानादितात्पर्येव
शान्तकल्पनं बोध्यम् · एतेन स्थानप्रमाणोभयान्तरतमे ह्रस्वे कारे चरितार्थो यण् दीर्घे कथं स्यादित्यपास्तम् · स्थानत आन्तर्यस्य सर्वेभ्यो बलवत्त्वात्स्थानेनान्तर
तम इति सूत्रस्यान्तपाठस्य चैतद्दूषणेनैव भाष्ये दूषितत्वादिति भावः । चो विध्यर्थः · ध्वनितं चेदमोऽमे ओ ङिति सूत्रे भाष्येन तदाह · दैवात्त इति · सूत्रकृता शाकल्य
स्य मते सर्वत्र द्वित्वाभावोक्तेरिति भावः । अवसाने द्वित्वसिद्धये अनचीति प्रसज्यप्रतिषेधस्तदाह · नत्वचीति इदं द्वित्वं प्राप्तद्विलवनारद्धिः प्रयोग एव परं ह्रस्वादर

सु॰
शा॰शे॰ ष्यादेशोच्चारणक्रियानिरूपितकर्मषष्ठीत्वौचित्यात् इति ध्येयमिति॰ ननु द्वित्वे पूर्वे धस्थाने जश्त्वनिष्पन्नदस्यापि लक्ष्ये लक्षणस्येति न्यायात्। विकारान्यत्वे
१६ न वलत्वस्य भेदहेतुत्वमन्यत्र प्रपञ्चितम्॰ स्थान्यादेशयोर्भेदात्स्वरूपमित्युक्तेश्च तत्स्थानापन्नस्तद्धर्मं लभते यथा गुरोः स्थाने शिष्यो याज्यकुलानि गत्वाऽग्रासनादी
नि लभते इति लौकिकन्यायेन स्थानिकार्यमादेशेन स्यादतः स्थानिवत्सूत्रम्॰ ननु स्थान्यले इति॰ प्रत्यासत्तिन्यायलभ्यमिदम्। आदेशस्य स्वस्थानिभूतायोऽल्तत्स्थानि स
म्बन्धी च योऽल्तद्वृत्तिधर्माश्रयेणेत्यर्थः अत एव रेफस्थानिकविसर्गस्य रुशब्दत्वं न स्थानिवत्त्वेनेति भो भगो इत्यत्र भाष्ये स्पष्टम्॰ क्ष्णुधातोर्द्वित्वेऽभ्यासस्यारुत्वे
ऽनित्यस्य हलादिः शेषस्तु अनित्यस्य पुनः पूर्वोऽभ्यास इत्यनेनाभ्यासत्वात्। तस्यापि द्विरुक्तधातुपूर्वभागत्वात्। प्रक्रियाज्ञानवतां तथाज्ञानस्य सुलभत्वात्। अत ए
व धिन्वतीत्यादावित्येन। उकारस्य ऊर्णोर्धातुकत्वस्य वकारेऽनतिदेशात्। यत्त्वत्रैणिवृत्तेर्यस्वविधावपि स्थानिवत्त्वमपरविधावितिन्यासे न साधितं भाष्ये सात्वेक
देशस्तु तिः असिद्धवत्सूत्रेणासिद्धत्वात् यमाऽऽसन्नित्यादेशात्फलत्वेनोपन्यासात्॰ अस्यापि अचः पूर्वत्वविज्ञानात् क्षितिवार्तिके पञ्चमीसमासेन सिद्धेः कैयटेनो
क्तत्वाच्च। प्रदीव्ने इत्यादौ वलादिलक्षणइट्। स्थान्यलित्युक्तेर्वे भूविवेत्यादौ वलादिलक्षणेट्सिद्धिर्नहि तत्र वलादित्वं स्थानिनो लभ्यं किन्तु स्वाश्रयमेव यन्नि
मित्तवैकल्पप्रयुक्तोपदेशाप्रवृत्तावतिदेशो मृग्यते तस्य स्थान्यलसाधारणधर्मत्व एव निषेधप्रवृत्तेः। प्रकृते त्वार्द्धधातुकत्वं वैकल्पप्रयुक्तम्। प्राप्तिर्नै
नस्थान्यलसाधारणीयं च ताद्रूप्यावस्त्वघटितं वलादित्वं न तद्वैकल्पप्रयुक्तम्। प्राप्तिरिति निबोध्यम्॰ प्रत्यासत्त्या च शास्त्रीयकार्य एव स्थानिवत्त्वं तेन नायकासि
द्धिः। प्राधान्यात्कार्यातिदेशोऽयम्॰ शास्त्रातिदेशस्तु कार्यातिदेशादभिन्नरूपः तस्यापि कार्यफलकत्वादिति तत्त्वं स्वस्वरूपे कैयटः। भाष्येऽपि नत्राङ्गशास्त्रातिदेशात्।
सिद्धमाङ्गं च कार्यमिति दृश्यते इत्युक्त्या नयोरभिन्नरूपत्वं सूचितम्। तत्रानपेक्षितार्थसन्निधानस्तन्निमित्तरूपकार्यव्यवहार एवाभेन कार्येणत्वशास्त्रे
णैवेति अत एव रामायेत्यादौ स्थानिवत्त्वेन सुप्त्वात्सुपि चेति दीर्घ इति संगच्छते परिवीरित्यादौ परत्वाद्दीर्घ इति च संगच्छते। यत्तु किञ्चिन्निमित्तवैकल्येऽपि १६
दीर्घादिकार्यमनेन न क्रियते तेन च कार्यं किमित्याकाङ्क्षायां तत्स्वरूपनिर्णयस्य विधिशास्त्रमूलकत्वेनैतद्देशेनैव परशास्त्रविहितत्वरूपं परत्वं तेषां बोध्यम्॰
एतद्देशाभिन्नत्वात्तद्दिश्यमानकार्याणामुत्पत्तिदेश एव देश इत्यभियुक्ताः। अत्राद्यपक्ष एव भाष्यसंमतः अत एव स्थान्यलविधिप्रतिषेधे कुरुवधपिबां प्रतिषेधो

वक्ष्यमाणत्वेन तदुपपादनावसरे स्थानिवद्भावादङ्गसंज्ञा तदाश्रयश्च लघूपधत्वादि तत्र लघूपधगुणादि प्राप्नोतीत्यादिभाष्योक्तेरिति बोध्यम्। एवं यन्निमित्तत्वैक
ल्यप्रयुक्तोपदेशप्रवृत्तिस्तन्निमित्तानतिरिक्तसर्वनिमित्तकत्वमतिदेशस्यापि। अत एव ष्ठिवद्भावेनातिदिष्टधत्वस्य वर्णाश्रयत्वमित्यादिव्यवहारः सर्वातिदेशे त्विदं
तुल्यमाय यन्निमित्तत्वैकल्पप्रयुक्तोपदेशप्रवृत्तिस्तन्निमित्तं शास्त्रीयमेव प्रत्यासत्तेः। स्थानिवदित्युक्ते सम्बन्धिशब्दमहिम्नैवादेशलाभे आदेशग्रहणं श्रौतस्थान्यादे
शाभावस्यैव ग्रहणमिति शंकावारणद्वारा एकः रित्यादौ शब्दानित्यत्ववारणाय सर्वे सर्वपदादेशा इति न्यायेन कल्प्यमानस्य तेरुत्त्विप्यानुमानिकादेशस्यापि संग्रहार्थं तेन
पचति स्याः पदत्वसिद्धिरिति भाष्ये स्पष्टम्। ननु नोत्तित्वमपि च्छिन्नपुच्छे शुनि श्वत्वव्यवहारवल्लोकसिद्धन्यायेनैव सिद्धम्। तदुक्तं प्राग्दीव्यतोऽणिति सूत्रे भाष्ये
दीव्यतिशब्दैकदेशदीव्यच्छब्दानुकरणमिदमित्युक्त्वा किमर्थं विकृतनिर्देश एतदेव ज्ञापयत्याचार्यो भवत्येषा परिभाषैकदेशविकृतमनन्यवदिति। अत एवात्र विका
रोऽशास्त्रीयोऽपि। अत एव श्वायसशब्दादणन्ताद्द्विर्वचने श्वायसावित्यत्र वृद्धौ कृतायां सान्तसंयोगित्वेनानेन न्यायेनाङ्गतया प्राप्तो नुम् पूर्वसम्बन्धित्वेनाचः परस्मिन्निति
स्थानिवत्त्वेन वार्यते अचः परस्मिन्निति सूत्रे भाष्ये। एतन्न्यायानाश्रयणे तद्भूत्वमेव दुर्लभम्। अनादिवत्सूत्रे भाष्ये यटपोरपि गुडोदकमित्यादौ विकारदेशे कृते दक
शब्दस्यानेन न्यायेनोदकशब्दत्वमाश्रित्यादकेकवले इति पूर्वपदान्तोदात्तत्वमुक्तम्। शब्दानां नित्यत्वं तु रेखागवयन्यायेन समाधेयम्। अनन्यवदित्यस्य अन्यव
त्त्वेत्यर्थः। तत्रान्यसादृश्यनिषेधे अन्यत्वाभावः सुतरामिति चेन्न। अङ्गस्यान्यथात्वे जातिव्यञ्जकभूयोऽवयवदर्शनाभावेन तोस्तित्वप्रतीतेर्न्यायेनानुपपादनात्। किञ्च
नित्यं संज्ञायां स्त्रियां दिसूत्रोपात्तपरिच्छिन्नपरिमाणनिष्ठतयापरिच्छिन्नपरिमाणार्थवाचकशब्दानां न्यूनेऽधिके वा शास्त्रव्यापारं विनाऽप्रवृत्तेर्येन विधिरिति सू
त्रेऽङ्गसंज्ञासूत्रे च भाष्ये उक्तन्यायानदभावात् न्यूनाधिकत्वञ्च वैरूप्यस्योपलक्षणं न च तंडुलानित्यादौ स्थानिवद्भावेन प्रत्ययान्तत्वेऽपि स्वतः प्रत्ययान्ताभिन्नत्वा
न्नातिप्रसक्तिरूपापत्तिरिति वाच्यम्। अतिदेशस्वभावेनातिदिश्यमानधर्मविरुद्धस्वाश्रयकार्याभावात्। अत एव जहीत्यादौ जादेशस्यासिद्धवत्त्वेन स्वाश्रयो
हेर्लुङ्नेति सिद्धत्वासिद्धत्वयोर्विरोधात्। असिद्धवत्सूत्रे शाधीत्यादौ स्थानिप्रयुक्तधिभावसंपादनेन चरितार्थम्। न चाप्रत्यय इत्यस्य पर्युदासत्वे शास्त्री
यकार्याभावात्स्थानिवत्त्वं दुर्लभमिति वाच्यम्। वेः स्कन्देरनिष्ठायामिति षत्वविधायके तिङन्तेषु षत्वाभावायावश्यके नञ्प्राप्ये न चानिष्ठायामिति पर्युदासेन

बृ॰
श॰ शे॰ इत्यादि सेमतेन पर्युदासलभ्याशास्त्रीयेपि शास्त्रतात्पर्यविषयेशास्त्रीयवदतिदेशबोधनात्॥ विस्कन्न इत्यादौहि निष्ठानत्वस्य नित्यत्तयास्थानिवत्वेनैवनि
१७ ष्ठात्वस्यवंक्रमत्वात्· नत्वप्रसज्यप्रतिषेधत्वेतुलक्ष्यानुसारिण्याख्यानादेवोक्तार्थसिद्धिरिति बोध्यम्। केचित्तु भाष्येतत्थ्यानापन्नेतद्धर्मलाभस्य न तत्कार्यस्य च
लोकन्यायेनैव सिद्धेरयमतिदेशः स्वरूपमित्यतत्काल्मसत्वाद्भुतेः कार्यैवधोनस्यादित्युक्तम्। एवं च स्वरूपमिति शास्त्राविषये तेनसिद्धिरिति सूचितम्॥
एवं च शास्त्रीयस्यापि धर्मस्यातिदेशो भवत्येवातिप्रसङ्गस्तु लक्ष्यानुसारेणक्वचिल्लोकन्यायानाश्रयणेन परिहरणीयो यदि प्राप्नोति एवं च न कश्चिद्दोषः
नपदान्तेति सूत्रे ब्राह्मणकंडूतिरित्युदाहरणाच्च क्वचित्तदनाश्रयणं तत्र हि कंडूयतेः क्विपि तत्र्यालोपतस्य स्थानिवत्वादुवङ्यणिवाऽऽनादिष्टादचः पू
र्वत्वे स्थानिद्वारके गृह्यमाणे ऊएनस्यादित्याहुः। अतएवार्थवत्सूत्रशेषे प्रत्यय इत्यस्य पर्युदासत्वमेवोक्तं भाष्ये· अलग्व्यवहाराभाववोधनद्वारेतिशेषः
ध्वनितञ्चेदं क्विति च गाङ्कुटिहलः स्यइति सूत्रेषु भाष्ये तत्राद्ययासुटोङित्वनात् ङि· दादेशाङितोनेति ज्ञाप्यत इत्युक्तम्· द्वितीयेगाङोङित्त्वस्य सानुबन्धका
देशत्वकार्याभावज्ञापकतोक्तातिवाद्यादेशेषु पित्वासिद्ध्या दूषितं च ज्ञापकं अंत्ये शानचः शित्वस्य सार्वधातुकादेशे अनुबन्धानां स्थानिवत्त्वज्ञापकत्वमुक्तं
तत्र दूषणैरेव दूषितञ्च। अन्यथानल्विधाविति निषेधेनतत्त्वाप्राप्त्या ज्ञापकत्वासंगतिः। तिवाद्यादेशेषु पित्वाद्यसिद्धेश्चेति बोध्यम्· अचः परा आदेश
ग्रहणमनुवर्ततेतदनुरोधाच्च इति स्थानषष्ठी। परस्मिन्नित्यादेशविशेषणं तदाह· परनिमित्त इत्यादि· अचएवादेश इत्यर्थः तेन मरुतमाचष्टे मारयतीत्या
दितिद्धिः। अत्र सूत्रे प्रयोगेण्यच्स्थानिक इत्यर्थोनस्तु स्थानित्वेनोपात्ताच्स्थानिक इत्यर्थस्तेन णिलोपादेरनेन स्थानिवत्त्वं सिध्यति· अतएवचङ्परनि
र्ह्रासेण्यंतात् चिअवीवददित्यादि सिध्यर्थो निषेधःसार्थकः। अच इति किम्· आगत्यामलोपस्य स्थानिवत्वाद्धस्वस्येति तुङ् नस्यात्· परस्मिन्निति किम्
युवजानिः निङ्स्थानिवत्त्वेनयलोपो नस्यादिति· पूर्वविधाविति किम्· नैधेयः। निपूर्वाद्धाञः किप्रत्यये आतोलोपेतस्य स्थानिवद्भावात् स्यचत्वस्यपदे १७
शविशिधात्स्वाश्रय इच्चत्वनिवृत्तौ ठगनापत्तेरितिदिक्· अत्रस्थानिनिसतियद्भवतितदादेशेपिभवति स्थानिनि यन्नभवति तदादेशेपि नेति भावाभा
वयोरुभयोरप्यतिदेशः तत्र भावोदाहरणं निगाल्यते इति· अन्योदाहरणं पटयतीत्यादि स्थानिनिमित्तकं भवत्यादेशनिमित्तकं नेति च तदर्थः लघूपध

लपैप्पदनद्यरालोपनिमित्तिकाद्वद्विरित्याहुः। स्थानिभूतादच इति· सूत्रेऽवर्णाद्याख्यानोच्चारितस्यैव पूर्वत्वेऽवधित्वमिति भावः पूर्वविधावित्यस्य पूर्वसम्बन्धि
न्यवशास्त्रविधेयकर्त्तम्येरित्यर्थस्तेन पूर्वपरयोर्विधौ न। तेनारत्नुरित्यादौ क्रच्छ्रस्तृतामिति गुणस्य सवर्णदीर्घेन स्थानिवत्त्वम्· वस्तुतोऽत्र पूर्वविधिशब्देनात्र
सेकस्योक्तोऽर्थः। द्वितीये भावे किः। सम्बन्धसामान्यषष्ठ्यन्तपूर्वशब्देन समासः। विधिर्भावः। पूर्वसंबन्धिभावेन तन्निमित्तो स्थानिवदित्यर्थः। अत एवैनेयइत्या
दौ यस्येति लोपेन तस्य स्थानिवत्वात्तं नियोगशिष्टन्यायप्राप्तनिवृत्तिप्रतिबन्धेन नकारस्थितिः। अत एवमपदान्तसूत्रे पञ्चेन्द्राण्यो देवता अस्य पञ्चेन्द्र इत्यत्र
कि न स्थानिवदित्यस्योदाहरणं दत्तं भाष्ये अन्यथा पूर्वत्वेन दृष्टस्य सम्बन्धिनः कस्यचिद्विधेयस्याभावात्स्थानिवत्वाप्राप्तिरेवेति न तदसङ्गतिः स्पष्टैवा प्रकृ
तसूत्रेऽपि भाष्ये कर्मसाधनस्य विधिशब्दस्योपादाने नैसर्वमिष्टं संगृहीतमिति भावसाधनो विज्ञास्येते पूर्वस्य विधानं प्रति पूर्वस्य भावं प्रति स्थानिवदित्युक्त
म्· तत्र भावसाधन इत्यस्य सोपीत्यर्थः। पूर्वत्वञ्चाव्यवहिताव्यवहितसाधारणमव्यवहितग्रहणे मानाभावात्स्वरेनिषेधांश्च तेन पटपतीतिसिद्धम्· प्रकृते
च द्वित्वनिषेधे स्थानिवत्वप्राप्तिः न पदान्त अत्र द्विर्वचनसवर्णादिग्रहणं वतिघटितान्यातिदेशानां त्रिपाद्यामपि प्रवृत्तिबोधनार्थं तेन रामइत्यादौ विसर्गो।
दि सिद्धिः। अत्र विधिशब्दो भावसाधनः। पदान्तेत्यत्रान्तशब्दश्चरमावयववाची। कर्मषष्ठ्या समासः। तेनैषा यन्हसतीत्यादावेमन्नदोमिति सुलोपो न। इणः श
तरिरूपं। तत्र यणः स्थानिवत्वात्। उत्वे च न स्थानिवद्भेन निषेधात् स्पष्टञ्चेदम्भाष्य इति भाष्यप्रदीपोद्योतेनिरूपितम्। अत्र पदेऽन्त इति सप्तमीसमासो
भाष्ये उक्तस्तेन प्रत्यासत्त्या परपदस्याजादेशस्यैवानेन स्थानिवद्भावनिषेध इति वेन स्वानित्यादौ न दोषः। न चैवमपि पूर्वत्रासिद्धीये न स्थानिवदिति निषेधे
ऽत्र द्वारः पदे न इत्यर्थेन तत्र स्थानिवत्त्वनिषेधव्यावृत्तिपरभाष्यप्रामाण्येन पूर्वत्रासिद्ध इत्यत्र पदचरमावयवविधायकातिरिक्तस्यैव त्रैपादिकस्य ग्रह
णात्· अत एव महिष्मानित्यत्र जश्त्वं ना सूत्रे जश्पदेन फलाञ्जशित्यस्यैव ग्रहणं। चरसन्निहितस्यैव ग्रहणौचित्यात्। कार्यकालपक्षेपि त्रिपाद्यामन्त
रङ्गपरिभाषा न प्रवर्त्तत इति वक्ष्यत इति न तयाऽस्य सिद्धिः। गोचेत्यादौ गतिकारकोपपदानामित्यस्यानित्यत्वेन सुबुत्पत्त्यनन्तरमेव समासः उत्तरपदत्वे
चेति प्रत्ययलक्षणप्रतिषेधश्च प्रत्यासत्त्योत्तरपदस्य कार्यित्व एवेति न दोषः। पदेऽन्त इति· पदत्वयोग्योपलक्षणं वा। अत्रेदम्भाष्यमपि मानम्· अत्र पदचरमावयवा

मु.
श. शे. दिसाधकः प्रतिबन्धकश्च स्थानिवद्भावो निषिध्यते विनिगमनाविरहात्। एतत्सूत्रभाष्ये कमेर्णिङि· त्यादिसूत्रभाष्ये: पूर्वत्रासिद्धे न स्थानिवदित्यवष्टभ्य वेर
१८ पलोपस्वरदीर्घग्रहणवर्जं द्विर्वचनादि प्रत्यास्म्यातमिति लभ्यते। निषेध इति। द्विर्वचनग्रहणात् पूर्वत्रासिद्ध इति निषेधादिति भावः। दकार इति· स्थानत आन्त
र्यादिति भावः। अदर्शनं। स्थाने इति वर्तते प्रसंगे सतीति तदर्थमुदाह। प्रसक्तस्येति· शास्त्रतोऽर्थतो वेति भावः। अत्र दृशिर्ज्ञानसामान्ये तत्र ज्ञानस्यावर्जनीय
त्वेन तस्योभयत्रान्तर्गततदुच्चारणाकृतासत्ता निषिध्यते· तत्र प्रत्ययलोपे शास्त्रतोऽर्थतश्च प्रसक्तोच्चारणस्य लोपविधानेन तस्य तस्मिन्नविषयेऽनुत्पन्नेऽ।
वान्वाख्यानं प्रत्ययलक्षणार्थमिति बोध्यम्· अर्थस्यैषा संज्ञा व्याख्यानात्। यत्तु प्रसक्तस्येति किम् ग्रामे तिष्ठतीत्यादौ ल्यब्लोप इति पञ्चम्यापत्तेः। अस्ति वा
त्र लोपो दर्शनं शास्त्रतोऽर्थतश्च न तत्प्रसक्तिरिति न दोष इति तन्न· तेन प्रत्यासत्त्या ल्यबन्तार्थकर्माधिकरणयोरेव पञ्चमीविधानेन तस्यात्राप्राप्तेः। तत्त्वेन
अन्त्येवार्थतोऽप्यवंतस्य प्रसक्तिः। तस्मात्प्रत्ययत्र क्विपो दर्शनसत्त्वेन प्रत्ययलक्षणेन तुगापत्तिर्दोषः। कृत्प्रत्ययेन प्रकृत्याक्षेपस्तु न अत्रैव प्रकृतिं विनातिदेश
तः प्रत्ययज्ञानसत्त्वेन व्यभिचारात्तदाक्षेपासंभवात्। इति पक्षे इति। विनिगमनाविरहादिति भावः। द्वित्वस्यत्रैपादिकत्वात्तत्र न यणो बहिरङ्गासिद्धत्वम्·
अत एव दध्यत्रेति भाष्ये उदाहृतम्· धकारयकारयोरिति· तेन विसर्गादिद्वित्वेनाधिक्येऽपि न क्षतिः। द्विधमिति· द्विधत्वप्रक्रियायां बोध्यम्। न चैका
त्वा आकृतेश्चरितः प्रयोगो न द्वितीयस्यात्तृतीयस्याश्च भविष्यतीति कृत्वानुप्रयुज्यत इति सूत्रभाष्योक्तन्यायेनैकस्य द्वित्वे परस्य तदभावोऽनुचित इति वा
च्यम्· सार्थकानेकविषये तन्न्यायाङ्गीकारात्। यत्रान्याकृतिकरणे भिन्नार्थत्वसंभावना तद्विषयत्वाच्च हलो यमामिति लोपद्वित्वाभावे चैतद्वैरूप्यम्· ना
दिन्या· यरोऽनुनासिक इत्यतो यर इति वर्तते। पुत्र शब्द इत्यवयवषष्ठी आदिनीशब्दे परे इति च प्राधान्याद्यरो विशेषणम्। आदिनीति ङ्यन्तानुकरणाल्लुप्त
सप्तमीकम्। अत एव तत्परे चेत्यस्यादिनीशब्दे यस्मात्परस्तत्र परे इत्यर्थं हरदत्तो व्याख्यत्। असधातौ माधवोऽप्येवमेव। ईदृशाक्रोशस्य स्त्रीत्वेवदर्शना १८
च्चाक्रोशे नित्यमुदाह·। पुत्रादिनीति। नादृशाक्रोशस्य स्त्रीत्वेवदर्शनादाह· पुत्रहतीति· अत्र चिवेति सिद्धे पुत्रस्य कानेचेद्भुत अधयोरेवाक्रोश
एवेति नियमार्थमिदम्· संयुक्तेष्विति· सूत्रे वर्णानां सजातीयानामेव ग्रहणं परस्परसाहचर्यात्। न च तथा चः संभवति। अत एवाचो रहाभ्यामिति सार्थक

मः तिर्वारणे सप्तमी। अच इत्यनुवर्तते। त्रिप्रभृति संयुक्तवर्णमध्ये चः परस्य यरो द्वित्वानस्तु इत्यर्थः। नेन्द्रो राष्ट्रमित्यत्र नकारषकारयोः प्राप्तद्वित्वस्यैव निषेधः वि
कल्पः अनचि च सर्वत्र शाकल्यस्येत्येव सिद्धे इदं सूत्रद्वयं विकल्पस्य मतं मतभेदप्राप्तव्यवस्थाबोधनार्थमिति बोध्यम्। यरोऽनुनासिकेऽनुनासिको वेत्यनुवृत्त्या न
न्वीत्येव सिद्धे तु सूत्रत्रयमपि तथेति बोध्यम्। अचो रहाभ्याम्। अच इति ङ्यन्तत्वाद्व्याख्यानाच्च रहाभ्यां सम्बध्यते। तस्मादित्युत्तरस्येत्येन लभ्यमानं अचः पराभ्या
मिति। वाक्यमीति। ऊर्योह इत्यतोऽन्यतरस्यामित्यनुवर्तते इति भावः। दीर्घादाचार्याणामित्युत्तरसूत्रस्थस्वरस्यापि वापदान्तस्येतोर्लिङ्उदात्तः ऊर्योह श ङ्क्तोऽति
षट्सूत्री पाठेत्तरं झलां जश् झशि अभ्यासे चर्च। वावसाने। अणोऽप्रगृह्यस्येति पञ्चसूत्र्याः पाठ इति भाष्यसंमताष्टाध्यायीपाठे तु वावसाने इत्यतोऽनुवृत्तिर्वि
व्याख्यानं चास्य वैकल्पिकत्वं लक्षणसूत्रे भाष्ये। आदित्यशब्दात्केपार्थे एयानादेवतापत्यर्थे ण्य ण्यस्येति चेत्यल्लोपेने न यलोपः। आपत्यस्येति तु न आपत्यत्वा
भावात्। हल इति किम्। शय्या। यमामिति किम्। आर्ध्नोत्। यमीति किम्। रामाभ्याम्। एचोऽयवायावः। इचौ च्चिंपणयवायावः। अवान्तो यि प्रत्यये इति सूत्रमपि तु मुचित
मित्याहुः। यथासंख्यसूत्रलभ्यमर्थमाह। क्रमादिति। उदात्तादिगुणयुक्तानामन्यगुणाकव्यावृत्तिस्तु स्थानेऽन्तरतमपरिभाषया बोध्या। एतदेवाभिप्रेत्य
यथासंख्यसूत्रे भाष्ये प्रकृतसूत्रे स्थानेऽन्तरतमसूत्रेणाव्यवस्थोक्ता संवृतावर्णस्य संवृतावर्णौ विवृतावर्णस्य विवृतावर्ण इति। एतद्भाष्यप्रामाण्येन एओ इत्य
नयोरकारांशे संवृतत्वमितरांशे विवृतत्वं तदुपरागाच्च न संवृतत्वस्य पृथग्ग्रहणं एओ इत्यनयोस्त्वकारांशेऽपि वि। वृतत्वमेवेति बोध्यम्। नः तस्य लोपः। उपदे
शेऽजनुनासिक इदित्यनुवृत्त्या विभक्तिविपरिणामेन च सिद्धे तस्य ग्रहणं सर्वलोपार्थम्। तेन त्रिदुडुनामंत्यस्य लोपो न। नानर्थकेऽलोन्त्यविधिपरिभाषा तु भाष्ये प्रत्या।
ख्यातैवेति दिक्। न भवतीति। फलाभावादिति भावः। वान्तो यि। येन विधिरित्यस्यापवादभूतया तस्माल्लुङ्चेत्याद्यर्थमावश्यिकया वाचनिक्या। यस्मिन्विधि
स्तदादावल्ग्रहणादिति वार्तिककृदुक्तपरिभाषया लभ्यमर्थमाह। यकारादाविति। ओदौतोरिति। ओदौतोरिति वक्तव्यमिति वार्तिकमूलात्तद्व्याख्याना।
दिति भावः। पूर्वसूत्रे वान्तो प्रतिनयोरव्यवस्थानित्वनिर्णयादिति स्थानेऽन्तरमसूत्रस्थके यदोक्तं तु न युक्तं। वान्तज्ञानार्थं पूर्वसूत्रपर्यालोचनस्यावश्यकत्वेऽपि
तद्वाक्यार्थपर्यालोचने मानाभावात् यथासंख्यसूत्रसहकारेण बोधोत्तरं तयोस्तत्त्वनिर्णयात्। अन्तरतमपरिभाषया निर्वाहे तु लक्ष्यपर्यालोचनकालेन नि

सु·
श·शे· णेयः अत एव पूर्वसूत्रेस्यानिविशेषलाभो यथासंख्यसंबंधादिह तु निमित्ताभावात्तस्याभाभाव इति षष्ठे प्रकृतसूत्रे कैयटः। गव्यमिति· भत्वाद्बलोपो न· यीति·
१९ किम्· गोभ्याम्· प्रत्यये किम्· गोयानम्· ननु गव्यूतिरित्यत्र वस्य हलि सर्वेषामिति लोपः शाकल्यस्येति वा लोपः स्यादत आह। वान इत्यत्रेति· न च विशेषविहि
तेन कार्यित्वेन लोपे वस्य निमित्तत्वबाध इति वाच्यम्· निमित्तत्वानाक्रान्ते विषये कार्यित्वस्य चारितार्थ्यात्। तक्रकौण्डिन्यन्यायश्चानवकाशविषयो विधेयवि
षयश्चेति स्पष्टं तद्धितेष्वचामिति सूत्रे यङ्विधायके च भाष्ये। अंत्ये उत्तरयोर्विग्रहेण विशेषासंप्रत्ययान्नित्यग्रहणानर्थक्यं क्रियासमभिहारे च नैतेभ्यो यङ्भ
वितव्यमिति भाष्यं चेन विशेषासंप्रत्ययादित्यनुकृष्यते। अन्यथा तक्रकौण्डिन्यन्यायेन सिद्धविशेषासंप्रत्ययादित्यनुकर्षक चकारवैयर्थ्यापत्तिः। निरूप
यिष्यते चेदं यङ्न्ते। तस्य च वार्तिके नुष्टत्यायूतौ श्रूयमाणवकारान्त आदेश इत्यर्थः सूत्रे तु न फलं गव्यादौ भत्वेन वान्तस्य पदत्वाभावात्। लव्ये स्वमएव तद
भावाल्लोपाप्राप्तेः। गोशब्दादिभ्यः क्यजादावपि नः क्ये इति नियमेन पूर्वस्य पदत्वाभावात्। एवं तर्हि वार्तिक एव प्रश्लेष उचित इत्याशयेनाह· ऊकारादिति। लो
पो व्योरिति सूत्रे वकारप्रत्याख्यानं तु लौकिकोदाहरणाभावेन तदर्थे परतया बोध्यम्। अत एव कोगुणेति सूत्रे ऽऽतो ल्लान्तस्येत्यत्र लुप्तनिर्दिष्टो वकार इत्युक्तं
भाष्ये शास्त्रीयसौत्रप्रयोगार्थं तदिति तदाशयः। न चैवं विष्वग्वे इत्यादौ तस्य लोप इति दुर्वारं गव्यूतावुच्चारणस्य चारितार्थ्यादिति वाच्यम्। गविचयुक्तेःस्या
दिनिर्देशे वारणात्· परे तु सा पूर्वपक्षयुक्तिरिति न वकारप्रश्लेषो लोपेनोचितः। किन्तु छन्दसि सर्वे विधयो व्यवस्थितत्वान्न वलोपप्रसक्तिस्तत्रत्ये गव्यूतौ।
अध्वपरिमाणेपि संज्ञाशब्दोयम्। तत्र संज्ञात्वभंगापत्त्या नैव लोपः। यथा रघुनाथेति संज्ञाशब्दे नित्यस्यापि णत्वस्याभावः सर्वनामशब्देण त्वाशंकात तस्य सं
ज्ञाविशेषे आधुनिकविनियोगात्। शास्त्रानुसारिशब्दस्यैव विनियोग उचित इत्यभिप्रायेण निरूपितं चैतत्सर्वादिसूत्रे भाष्यप्रदीपोद्द्योत इत्याहुः। निरूपयि १९
ष्यते चेदं पूर्वपदात्संज्ञायामिति सूत्रे। धातोः। धातोरित्यस्याभावे प्रातिपदिकमात्रविषयो नियमः स्यात्। तथा च गव्यमित्यत्र न स्यात्। ओयत इत्यत्र च स्या
त्। तदभावे सामान्यतो नियमापादनं तु योगविभागे वकारवैयर्थ्यापत्तेरयुक्तं तन्निमित्तस्य चेद्धातोरेवेति नियमे वाश्रव्यासिद्धस्तद्वारणायैव वकारः। लव्य।
नित्यादौ अत्र गुणवृद्ध्योर्यण्यन्निमित्तकत्वे नैवायादिप्रत्ययनिमित्तकता तन्निमित्तस्येति किम् इति। सूत्रमेव किमर्थमिति प्रश्नः ओयत इति· वेञः कर्मणि ल

ट्यिक्रियजादित्वात्संप्रसारणेऽकृतसार्वे तिदीर्घेआडसहाद्गुणः। नधातुलोपसूत्रभाष्य[illegible]बहिर्भूतधातूपसर्गकार्यस्य बहिरङ्गत्वादुक्तादेशे गुणोऽसिद्धः
इत्यरुचेराह· ओयतेति। तस्मादेवकर्मणिलङ्आडागमेवृद्धिः शेषंपूर्ववत् क्ष्यज· क्षिक्षये जिजये इत्यनयोरेवग्रहणंनतुक्षीषुहिंसायांक्षिजे क्षय इत्यनयो।
र्व्याख्यानात्। अतएवक्षिज्योरेवेच इति भाष्यउक्तम्। तस्मैप्रेति· क्रयार्थवस्तुनिक्रय्य इति निपातनत इत्यर्थो व्याख्यानात्। गुणभूतस्यापितदापरामर्शः। क्रया
र्थत्वञ्चफलोपधानरूपं तदर्थे इतिविशेषणान्तदाह· क्रेतारइति· योग्यतामात्रग्रहणे त्वव्यावर्त्तकं वस्त्वादितिभावः केचित्तुस्वीयंधान्य[illegible]द्वित्वायत्रनमूला
ग्रहणंतत्रधान्यंक्रय्यम्। यत्रतुस्वयंद्रव्यंदत्वापरकीयधान्यादिग्रहणंतत्रधान्यंक्रेयम्· द्रव्येतु[illegible]क्रय्यत्वंनापिक्रेयत्वंकिन्तुधान्यादेरेवशक्तिस्वभावात्।भा
ष्यस्वरसोप्येवमेवेत्याहुः लोपःशा· भोभगो[illegible]पूर्वेस्यतयपशीतिचानुवर्ततेतत्रौकारान्तेऔनोगार्ग्यस्येतिवाधकमित्याशंक्येनाह। अवर्णपूर्वयोरिति· व्योरित्या।
नुवृत्तावपिवर्णसमाम्नायेयकारस्यप्राक्पाठात्तत्क्रमेणाह· यवयोरिति· सतस्माआद्दरइत्यादिभाष्यप्रयोगादत्रापीत्यस्यासम्बन्धः इदंसूत्रंलघुप्रयत्नेन।
शाकटायनमतेनयोर्विधानेनशाकल्यमतेतदभावात्· अवर्णेतिकिम्· गौर्यत्र। पदान्तयोः किम्· हरये। अशिकिम्· वृक्षवेतीति वृक्षवीः क्विपूतमाचष्ट
इतिण्यन्तादिवृक्षवकरोतिक्विपितू इस्यात्· क्विनिमित्तकोलोपोव्योरितिलोपस्तुनणिलोपटिलोपयोः स्थानिवत्त्वात्। प्रातिपदिकात्सिजुत्पत्त्यापदत्वाभा
वेनपरपदस्याजादेशाभावेनचलोपस्यपदचरमावयवत्वाभावेनचनपदान्तेतिनिषेधाप्रवृत्तेः। एतेनकनिमित्तकोवलोपोत्रदुर्वारइत्यपास्तम्· किञ्च
—स्थानिवत्त्वाभावज्ञानमित्यन्योन्याश्रयस्तत्राप्रवृत्तौबीजम्· इदञ्चनपदान्तसूत्रभाष्येस्पष्टम्· नचपदसंज्ञायांटिलोपस्यस्थानिवत्त्वादस्यपदान्तत्व
मेवनास्तीत्यशीतिव्यर्थमितिवाच्यंपूर्वत्रासिद्धीयप्रतिनिषेधात्। साक्षात्पदत्वादिद्वारकपरंपरयावापूर्वत्रासिद्धीयप्रापकस्यप्रतिबन्धकस्यवातिदेश
स्यतेननिषेधादितिकेचित्· परेतुनपदान्ताहलोपः सनीतिलक्षणसूत्रस्यभाष्याद्वृक्षवादेरनभिधानमेव। भोभगोइतिसूत्रेऽ[illegible]ग्रहणमनर्थकमन्यत्रा
भावादितिवार्त्तिकाच्च। अशोन्यत्रतन्निमित्तत्वाभावेहलिसर्वेषामितिवृक्षवकरोतीत्यत्रमाभूदित्युक्तम्· अस्यचैकदेश्युक्तित्वंलक्षणसूत्रस्थोक्तभाष्यविरोधे
नस्पष्टमेवकैयटेनोक्तम्· अतएवभाष्येउत्तरार्थमित्युक्त्वाहलिसर्वेषामित्यत्रैवप्रयोजनमुक्तम्। हलिसर्वेषामित्यत्रवकारनिवृत्त्यैवात्रतदुदाहरणसंभव
पं॰ ३१ कार्यकार्यिणोरभावादिति तदर्थः। नह्यन्यत्रक्वचिदस्तीतिन व्याख्यानभाष्येरुग्रहणमुपलक्षणमेतदाशयमजानानैरेकदेशिनोक्तम्॥

मु॰
श॰ शे॰
२०

तत्रांम्यशब्दग्रहणप्रयोजनमिति तद्भाष्यमेकदेशयुक्तिरित्याहुः कानि सन्तीति · वाक्यसंस्कारपक्षेपि पूर्वोपस्थितमित्रकत्वरूपान्तरङ्गत्वमादायान्तरङ्गेण
पूर्वेकपरत्तिरिती कारादेः स्थानिभूतादचः पूर्वत्वं बोध्यम् · एकः । गुणइत्यादेर्विधेयसमर्पकत्वेन तत्रैकत्वसंख्याया विवक्षणेनोभयोः पूर्वपरयोरेकवाक्यत
येकविधेयान्वयेन चानयोः पूलयोः कटंकुर्वित्यादितइ वोभयसम्बन्ध्येकविधेयस्यैव प्रतीतेरेकग्रहणंस्पष्टार्थम् · उरण् रपरः इति षष्ठी स्थानेइति प
रिभाषालभ्यम् · उदात्तस्वरितयोर्यणइतिवत् । स्थानेन्तरतमइत्यतः स्थानेग्रहणमनुवर्तते तस्मलक्षणायाप्रसंगावस्थायामित्यर्थस्तदाह · रपरः सन्नेवे
ति · रपरइत्यवयववाचिना परशब्देन षष्ठ्यर्थे बहुव्रीहिस्तेनास्यावयवत्वात् यदागमाइतिन्यायेन विशिष्टस्य गुणवृद्धिसिन ऋकारस्य गुणवृद्धी अरा
रावेवेति नियमोपपत्तिरत एव रषाभ्यामिति सूत्रे यलिचसटीति सूत्रे च भाष्ये गुणो भवति वृद्धिर्भवतीति रेफशिरा गुणवृद्धिसंज्ञकोभिनिर्वर्तत इत्युक्तम् ·
उः स्थाने ऽण् प्रसज्यमान एव रपरो भवतीति पूर्वे भक्तश्चरेफइत्ययं गुणइति कैयटः । अवयवत्वं वाचनिकमवतत्सादृश्यबोधनपर्यवसायि । अन्यथा वर्णस्य व
र्णान्तरावयवत्वं हलन्ताच्चेतिसूत्रभाष्योक्तरीत्या ऽसंगतं स्यात् । पञ्चम्यर्थे बहुव्रीहिणानवयवत्वे तु गुणवृद्धिशब्देनाकारादेरेव रेफपरस्य तदेकवाक्यत
याविधानं स्यात् । गुणत्वादिकं त्वकारादिनिष्ठमेव स्यादित्युक्तनियमानुपपत्तिः । अत एव वृत्रेइत्यादौ हलादिःशेषसिद्धिरभ्यासावयवस्येवानदित्तेननि
वृत्तेः । एतेनाणमनूद्य रपरत्वं विधीयतइति परास्तम् । उक्तनियमानुपपत्तेः । अत्र पक्षे क्स्परत्वं क्लपरत्वमिति व्यवस्थानुपपत्तिस्तु न रेफवत्स्थानिकस्य
रेफपरत्वं लकारवत्स्थानिकस्य लपरत्वमिति व्यवस्थासम्भवात् । तत्रान्तरतम्यादिति · स्थानतइतिभावः । रेफादिद्वारादेशस्यापि मूर्धादिस्थानत्वात् । तत्र तत्रा
देशानेव रलपरानुच्चार्येदं सूत्रं न कार्यमिति तु न वाच्यम् । आपूतृप्पृधामीदृश् भृञामित्यादिदोषापत्तेः । अत्राणपूर्वेणैव प्रशास्त्रेणोमिति निर्देशात् · व
स्तुतोरप्रत्याहाराभावेन रपरइत्यस्य स्थाने ल्र परइति पठनीयमिति लपरत्वंसख्यामीति तुल्यस्य सूत्रभाष्याल्लभ्यते । करोफनऋयोहइत्यतो वावसानेइत्य २०
तो वा विकल्पोनुवर्तते हयवरट्सूत्रे भाष्ये स्पष्टमिदम् लोपइति · ऋ धधातोर्कर इति भावः । असन्तीति · द्वित्वाभावइत्यनुकृष्यते त्रिधमिति । त्रिधकार
त्वं प्रक्रियाभिप्रायेण । न च द्वित्वभिन्ने पूर्वत्र कर्तव्ये परमसिद्धमित्यर्थेकेन पूर्वत्रासिद्धीयमद्वित्वे इत्यनेन धानुधकारस्य जश्त्वे दस्य द्वित्वमिति दमयुक्त

मिति वाच्यम्· फले विशेषाभावेन तदनादरणात्· न च तत्र जश्त्वात्पूर्वमनन्तरं आदिवत्त्वरूपे विशेषोऽस्ति । तदनन्तरं जश्त्वप्रवृत्तेः तस्य परिभाषात्वेन फलविशेष
एव प्रदर्शितेरित्यन्यत्र विस्तरः । पञ्चमीति· विनिगमकाभावादिति भावः । अत एवास्य वैकल्पिकत्वम् कृष्णैकेति· कृष्णेति संबुद्ध्यन्तं पृथक् प्रदर्शितं किञ्चित्
एत्येधत्यूठ्सु अत्रादिश एव व्याख्यानात् । एचीति निर्दिष्टो विशेषणमूठस्तत्त्वासम्भवात् एत्येधत्योरिति योगं विभज्य तयोरेवैचीति विशेषणमस्य भाष्ये कृतत्वा
च्च तदाह । एजाद्योरिति· एतिरन्त्रेणोव प्रसिद्धत्वात् । उपेतीत्यादौ वृद्धिरेचीत्यनेन गतार्थत्वमाशङ्क्याह· पररूपगुणेति· । एत्येधत्योरूठि पररूपस्योठि चा
ऽऽकुणस्येति विवेकः । उपैधत इति अत्र न सवर्णदेशः एत्येधत्याद्यवयवे चीत्येवं क्रमेण सूत्राणां मर्थात् । अयमेवार्थ इति प्रत्ययलक्षणेनेत्यस्य भाष्यस्वरसं
ष्टश्लेशाद्वेति क्वचित्येधत्यूठ्स्विति सप्तमी बोध्या । प्रष्ठौह इति· प्रष्ठं वहतीत्यर्थे वहेर्ण्विः ऽस्यूठि संप्रसारणे पूर्वरूपेऽनेन वृद्धिः । प्रेदिधदिति· परत्वाण्णीकारा
दौ प्रतिषेध इति वार्तिके एधत्यनुपादानात् । न त्वेधते रव्यभिचारादिति वृत्तेः श्वास्यानभिधानमेव एत्येधत्योरचीति विशेषणमिति भाष्यस्यैधत्यंशे संभव
मात्रेणोपरञ्जकतया विशेषणमित्याशय इत्याहुः । उपैधत इत्यादावपि वृद्धिर्भवत्येव प्रकृतिभागस्यैधू पत्वात् किञ्च एत्येधत्यवयवे चीत्यर्थः प्रत्ययल
क्षणसूत्रभाष्यसंमत इति अत्र न दोषः पुरस्तादिति· पुरस्तादपवादा अनन्तरान्विधीन्बाधन्ते नोत्तरानिति न्यायः अवश्यं स्वपरास्मिन्बाधनीये ऽभेदेनापि ।
स्वाभ्यां प्रथमोपस्थितत्वेन बाधनाकाङ्क्षानिवृत्तेरिति हितं जम् असाधुरेवेति· आङि णोरकारस्य पूर्वान्तवत्त्वया ङि पररूपेण बाधादिति भावः । अर्थवद्ग्रहणाद्
ति । अस्यावीजं स्वरूपमिति सूत्रे उक्तम् पररूपे प्राप्ते इति· पूर्वधातुः साधनेन युज्यत इति सिद्धान्तादिति भावः उपसर्गादृति· तपरकरणादुपर्ककारीय
तीत्यादौ वा सुपीति न वृद्धिः । सोऽत्र ऋति सुनग्रत्यते व्याख्यानात्· आदित्यनुवृत्तेन तदन्तविधिरित्याह· अवर्णान्तादिति· यस्मिन्विधिरिति परिभाषया
आह· ऋकारादाविति· पूर्वपरयोस्तयोः समुदाययोरन्त्याद्योर्वर्णयोरेकादेश इत्यर्थः । उपसर्गावयवाकाराद्धात्ववयवे ऋकारे [illegible] पूर्वपरयोर्वृद्धिरसु
चितम्· गत इति तु नोक्तं अच्छर्छतीत्यादौ दोषात्· अन्ता· इह पूर्वपरयोरिति वर्तते यथासंख्यं च अन्तादिशब्दावुपस्थितैकदेशस्थानिपरौ पूर्वपरशब्दौ च
तद्घटितसमुदायपरौ· एवञ्च पूर्वस्य परस्य च समुदायस्यान्तादिभ्यां वर्णाभ्यां पृथगवस्थिताभ्यां ये व्यवहाराः प्रातिपदिकत्वसुबन्तत्वप्रत्ययत्वादयस्ते ।

सु. शे. २१

स्तैकादेशस्य भवतीति तु तद्वर्णमात्रवृत्तयोः स्वहस्वत्वादय इत्यर्थस्तत्फलितमाह· योयमित्यादि· तेन रामावित्यादौ परादिवत्त्वेनौ इत्यस्य सुब्वेपूर्वभा
गस्यैकदेशविकृतन्यायेन प्रकृतित्वे यस्मादिति तदादि तदन्तत्वमार्थसमाजग्रस्तमिति पदत्वसिद्धिः· तेन न तद्वर्णमात्रवृत्तिधर्मो नातिदेशात् स्वद्वाभिलि
त्रात्वनिबन्धन एष न अयं जड्ढ मित्यादौ सवर्णदीर्घश्च न। अत एव तुकासिद्ध वचनं च वित्नार्थमन्यथा धीत्येत्यादावादिवत्त्वेन [illegible] प्रयुक्त तुकसि
द्धौ न द्वेयर्थ्यं स्पष्टमेव। न द्युक्तवर्णाश्रये चानादिवत्त्वप्रतिषेधो वक्तव्यो न वा। तद्रूप्यातिदेशादिति। अन्तादिवर्णमात्रवृत्तिधर्मो नातिदेशादिति तदर्थः
स्त्री रूपेणोन्या तंवे कारविशिष्टे एकाजुत्तरपदत्वं भवत्येव स्थानिवद्भावेन तु नैतल्लभ्यम् अप्राधान्येनालाश्रयणात्। किञ्चैकादेशवर्णयो स्वस्थानिले
न समुदायस्येति भी ई भिपरत्वादावेकादेशविशिष्टे धातुत्वानापत्तिः धातुत्वस्यैकादेशस्थानिधर्मत्वाभावात्। आनुमानिकादेशकल्पकवाक्यमन्ता
द्विघटितसमुदायस्यैकादेशघटितआदेश इत्येव नतु प्रत्येकं तयोः स्थानित्वबोधकं तथा सति स्वाश्वशब्दस्य स्थानित्वेन स्वशब्दतया ततई [illegible] श
ब्दव्यापत्तेः। किञ्चोभयत आश्रयणे नान्तादिवदित्यस्यासंगतावभीयादित्याद्यसिद्धिः स्थानिवत्त्वं तूभयत आश्रयणे इष्यत एव। अन्यथा च उ
वस्मिन्नित्यस्याप्युभयत आश्रयणे प्रवृत्यापत्तौ प्लायत इत्याद्यसिद्ध्यापत्तिरिति दिक्· निर्देशादिति· न च कर्त्तरि च र्षीत्यादौ गुणस्य पदद्वयस
म्बन्धिवर्णद्वयाश्रितत्वेन बहिरङ्गत्वाद्रेफाभावेन न विसर्ग इति वाच्यम्· गुणस्य पदद्वयसम्बन्धि रेफस्वरात्मकवर्णद्वयाश्रितत्वेन विसर्ग
स्यापि तत्त्वात् परनिमित्तकत्वमप्युभयोः समम् किञ्च कार्यकालपक्षे त्रिपाद्यां तदुपस्थितावपि पूर्वप्रति परस्यासिद्धत्वादन्तरङ्गाभावेन पूर्वस्यान्त
रङ्गनिरूपितबहिरङ्गत्वाभावात्कथं तस्यासिद्धत्वप्रतिपादनम्· न चान्तरङ्गशास्त्रापूर्वस्यासिद्धत्वाद्भावेन तं प्रति परासिद्धत्वं पूर्वत्रेत्यनेन वक्तुमशक्य
मिति वाच्यम्· एवं हि विनिगमनाविरहादुभयोरप्यप्रसङ्गो विसर्गोद्भवीसं एवञ्च विरोधात् कार्यकालपक्षेपि तदनुपस्थितिरिव त्रिपादीस्थ नरङ्गाउ
चिना। अत एव विसर्जनीयसूत्रे भाष्य इमामेव युक्तिमुक्त्वा युक्तोयं परिहारो न वा बहिरङ्गलक्षणत्वादित्युक्तम्· एवञ्च तत्र वचनान्येककार्यात्तिज्ञापक
त्वमस्यावाकर्तव्यम्। अत एव निगाल्यत इत्यादौ लत्वार्थं तस्य दोष इति वचनमिवारब्धम् [illegible] आगरङ्गत्वात्· लोपात्पूर्वं वैकल्पिकलत्वे वक्त्रत्रे भाष्यकृतो

त्वादेव बहिरङ्गासिद्धत्वेन च सिद्धे तद्वैयर्थ्यं स्पष्टमेव। यत्तु लक्ष्यानुरोधात्कार्यकालपक्षेऽपि उपस्थितेनान्तरङ्गपरिभाषयानुमानिका प्रत्यक्षसिद्धस्यापि पूर्वत्रेत्यस्य
बाध इति तन्न लक्षणैकचक्षुषामादरणीयं। अतस्त्वोरणिति सूत्रे रेफस्य पूर्वान्तवत्वे विसर्जनीयप्रतिषेधो वक्तव्यो नार्कुटाद्यर्थमित्युक्तं भाष्ये इति दिक्। उप
सर्गाविति। तत्संज्ञायाः क्रियायोगनिमित्तत्वादित्यर्थः। यदर्थे क्रियायुक्तप्रादीनामन्वयस्तं प्रत्येवोपसर्गत्वमिति भावः। प्रकृते च प्रत्यासत्त्या ऋकारादिनिमित्तो
पसर्गग्रहणात् प्रगतः ऋच्छः प्रर्छ इत्यत्र न। पुनरिति। प्रकृतसूत्रे भाष्ये स्फुटमेतत्। सुब्धाताविति। सुबन्तप्रकृतिके धाताविल्यर्थः। तुल्यास्यसूत्रे उपाकीयती।
त्यादेरेतदुदाहरणत्वस्य भाष्य उक्तत्वात्। ग्रन्थे सुबन्तस्य धातुप्रकृतित्वेनोक्तत्वाद्यत्तत्प्रकृतिक इति व्याख्यानमेवोचितम्। ऋषभस्य समीपमुपर्षभं तदिच्छ।
त्युपर्षभीयतीत्यत्र तु न वृद्धिः। उपेत्यस्यानुपसर्गत्वात्। अत्रापि धाताविल्यनुवर्त्य वाक्यभेदेन व्याख्येयम्। तेन सुब्धाताविपि न प्रकृतिभावः। प्रार्षभीयतीति अ
न्तृशरोचीत्यस्यानुपन्यासे न व्यंजनात्परस्यैकस्याने कस्य वोच्चारणे विशेषाभावेनाचो रहाभ्यामित्यस्य तन्निषेधस्य चानावश्यकता सूचिता। वाक्यभेदेनेति। इदं।
वृत्तौ स्पष्टम्। भाष्ये तु न दृश्यते। एवे चेति। वार्त्तिकं। सूत्रे धाताविल्यनुवृत्तेरारब्धम्। अवधारणं नियमः। एवशब्दस्य द्योत्यमर्थद्वयमवधारणमसंभवरूपान
वक्लृप्त्यादि च तयोरन्यतरैव शब्दार्थ इत्यभिप्रेत्याह। अनवक्लृप्तावेवेति। क्वेव भोक्ष्यसे इत्युक्तिः स्थलसंकीर्णत्वादिना नाप्तिसम्भवस्तव भोजनस्येति गम्यते। अ
चोन्त्यादि। अन्त इति निर्धारणे षष्ठी। अन्ते भवोऽन्त्यः। अन्त्यादीति गमकत्वाद्बहुव्रीहिः। मार्त्तण्ड इति। मृताण्डादागतो मार्त्तण्डः। जस्विषय एव पररूपम्। ननुमा
र्त्तण्डशब्दस्याचनकाराकारः स आदिर्यस्येत्यन्यपदार्थो दुर्लभ इति चेन्न। एकस्मिन्नेव समुदायरूपत्वारोपेण तदवयवत्वारोपेण चोपपत्तेः। एतन्मूलकमेव
व्यपदेशिवदेकस्मिन्निति परिभाषितमित्यलम्। वस्तुत आरोपस्य नात्रोपयोगः। शब्दज्ञानानुपाती वस्तुशून्यो विकल्प इति पतंजलसूक्तेरर्थाभावेऽपि विकल्पात्मकज्ञा
नमंत्र तदपि लक्ष्यानुरोधाच्छास्त्रप्रवृत्त्युपयोगीति बोध्यम्। पतंजलिरिति। तु अंजलेः पतित इति विग्रहे मयूरव्यंसकादित्वात्समासेऽत्रैव निपातनादितशब्द
स्य लोपः पृषोदरादित्वाद्वा तल्लोपे साधुः। गोनर्द देशे कस्यचिद्दृषेरञ्जलेः संध्याकरणसमये पतित इत्यैतिह्यात्। आलोच्ययोः। अत्र समर्थपरिभाषा नोपतिष्ठ
ते। समसिंकुलेः सङ्ग इत्यादौ समासग्रहणेन पदविधिरिति सूत्रस्वरसेनाँच पदत्वेन सुबन्तत्वेन च यत्र समासोद्देश्यता तत्रैवैतत्परिभाषाप्रवृत्तिस्वीकारात्।

सु. श० प्र० ६२ ओत्वोऽष्ठादिमात्रस्य पदत्वाभावात्। अवर्णादोत्वोष्ठयोः कचिन्नदघटितसमास इत्यर्थात् न्योष्ठ्योवः स्मृत इति प्रयोगसिद्धिः। अन्यथा प्रत्यासत्त्या ष्ठा द्युत्तरपदक समास एवस्य वृत्तापररूपानापत्तौ तदसंगतिः स्पष्टैव ओतुर्विडालः ओमाङोः अत्रैङीति नानुवर्तते तेनैवषदर्थका ऽनसह ऋषभशब्दस्य समासे ऽपि अग्र्यर्षभ इत्यत्र पररूपेऽघर्षभसिद्धिः नचात्र परत्वाद्दीर्घप्रसंगः प्रतिपदविधित्वान्निरवकाशत्वेसत्येव बाधकत्वे प्रयोजकमिदं च मध्येऽपवादन्यायेनाकृतेहीत्यादौ वृद्धेरेवबाधकं स्यात् इति वाच्यम् लक्ष्यानुरोधेनात्र बाध्यसामान्यचिन्ताश्रयणात् अन्यत्र प्रतिपदविधित्वस्य बलवत्त्वेप्रयोजकतादर्शनेन न परदीर्घात्पूर्वं पररूपप्रवृत्तेश्च अव्यक्तशब्दार्थो ध्वनेरिति अविद्यमानकत्वादिशब्दस्येत्यर्थः तस्य चाव्यक्तत्वेनानुकरणेऽराव संभवतीत्याह अनुकरणस्येति अत्रालोन्त्यस्येति न प्रवर्तते नानर्थके इति निषेधात् आम्रेडितस्यैवेति वक्तव्ये नाम्रेडितस्येत्यारम्भात् आह अत इति किम् पटगिति नाम्रेडितः अव्यक्तानुकरणस्यात इति च वर्तते अव्यक्तानुकरणावयवीभूताम्रेडितावयवाच्छब्दस्येत्यर्थः नाम्रेडितस्यतस्यैवेति तन्मूत्रितं वैचित्र्यार्थम् फलकल्पनाभिनिवेशस्तु न युक्तो भाष्यानुक्तेः अत एवात्तदधीते तद्वेदेति सूत्रे द्विलग्रहणप्रमाद कृतमाचार्यस्येति भाष्ये उक्तम् लाघवानवधानलक्षणोऽत्र प्रमाद इति कैयटः क्व तदनवधानमिति तु भाष्यकृदुक्तप्रयोजनेतदवधानमन्यत्रान्यदिति निर्णेयम् ननु डाचो भावादेतदप्राप्तिरत आह बहुलवचनादिति तस्य परम् अवेयक्वा चिपरशब्दयोगो ऽत एव ज्ञापकात् षष्ठीतस्य प्रहणस्य स्पष्टार्थं इदं इत्यनुवृत्त्या षष्ठीविपरिणामेन सिद्धेः अन्य द्विरुक्तपरस्य तु न संज्ञा अष्टेषु सर्वेस्येत्येतत्प्रकरणसंज्ञाकरणात् फलाभ्य· ... ग्रहणं कर्तव्यमिति निवृत्त्यर्थं सर्वोपकारकतया च प्रकरणान्ते ऽस्य लेखः तेन अदित्यत्रैव लेखः उचित इत्याशयः ... सावर्ण्ये निषेधात् ... किमिति अनिष्पत्तेरिति नाकलादिनि सूत्रविषयनिर्णये ऽपवादविषयपरिहारेणान्तत्वादर्णिप्रसवर्णयदवाचकानिर्णयोत्तरं तावदर्णग्रहणस्य ग्रहणकशास्त्रबोध्यतया तद्बोधकालग्रहणकशास्त्रस्य तावद्ग्रहणबोधकत्वानिष्पत्तेरित्यर्थः सूत्रस्थसवर्णपदानुवृत्तिमभिप्रेत्याह ऋति सवर्णे इति तत्फलं दध्यकारादावेतदप्रवृत्तिः एतद्धि धर्ययो रु २२

उणा सूत्रानन्तरं पाठादनेन तयोः स्थाने प्लुते सिद्धे तयोरनन्तरपरत्वम् द्विमात्रमिति अत एवाक्सवर्णे इत्यनेनैव ऋकारद्वयस्य स्थाने रेफद्वयवताऽपगुणाकृतान्तर्येणाकदाचिद्रेफद्वयमध्यस्य विवृतत्वान्तर्येण कदाचिद्दृष्टेस्तस्य लृकारे लकारद्वयवत्ताऽन्तर्येण कदाचित् द्विलकारस्य कदाचिद्दृष्टतत्साम्येन रे

फवता साम्येन वचनाद्दृशस्य ऋकारस्य च सिद्ध्या विकल्पफलसिद्धिमाश्रित्यैतद्वचनद्वयं तुल्यास्यातसूत्रभाष्ये प्रत्याख्यातम्। द्वौ रेफावात अत्रापि तदेव भा
ष्यमानं द्विरेफत्वे हि रेफद्वयवर्त्तिस्थानिन्यर्थ्यं लकारवत्यपर इति चव्यं स्थाः सिद्ध्यति अभित इति द्वौ रेफावित्यनुषज्यते न च द्वितीयानन्वभितः प्रयोगान्त
र ओरु: सूत्रे भाष्ये मातॄणामित्यादौ णत्वविधिसिद्ध्यर्थमवश्यमङ्गीकर्त्तव्ये वर्णैकदेशा वर्णग्रहणेन गृह्यन्त इति पक्षे प्रक्लृप्स्यद्भाभिर्वा मानरत्त्या दोत्तुगे मध्ये
लक्षणं कृता शङ्कायां दीर्घादिति तुग्विधानसामर्थ्यात् परकरणसामर्थ्यं नौष्ठ्य वइति सूत्रस्य नैप्रहणसामर्थ्यैर्भेदेनाप्रतिभासमाने पुत्रवयवे पुत्रवयवस
दृशस्त्वं तत्र वर्णाश्रयकार्याभावज्ञापनरूपमुपमाधानस्य चकरणावत् प्रातम् अ्नतमित्यत्रारीरीत्यस्य त लृकार इत्यादौ तौ लीत्यस्य च शंकासमाधानाकरणेन प्र
तद्रेफान्यरभक्तेरिति हयवरट्सूत्रस्थ भाष्येण च ऋलृक् सूत्रस्थयोरर्द्धमात्राभ्यागस्याभितः ऋप्रत्वेन तथैवोचितत्वादिति भावः द्वौ लकारावित्यादि लृद्धस्य च
न्यूर्वसाहचर्यादिति भावः अत्र ह्रस्वऋकारस्य स्थानिकैकादेशस्य च पूर्वस्य साधुत्वं ह्रस्वऋकारलृकारस्थानिकैकादेश एवानरस्य स्थस्थुलमतएव लृति न ऋ
कारेणाप्युलृकारः अतएव वार्तिके ऋतीति न परकरणमुनर्वार्तिके लृतीति चरितार्थम् तुल्यास्यसूत्रभाष्ये यदेवद्वतीत्यतरद्दत इति वक्ष्यामीति
तद्वचनाश्रयणेन ऋलृवर्णयोः सावर्ण्येन कार्यमिति च संगच्छते उपस्थितेरेफोष्मप्रयत्नत्यागे मानाभावादीषत्स्पृष्टाविमौ विवृतत्वे हि विवृतऋकार
लृकाराभ्यामनयोर्विग्रहणोः अकः सवर्णे इत्यनेनैव सिद्धे वार्तिकस्यैवैयर्थ्यापत्तेः राङः पदान्तात्किम् भवति सर्वत्र विप्रकृत्यान्तः पाद्मिति सूत्रात्
कृत्यैत्यनुवर्त्तते प्रकृतिशब्दोऽत्र स्वभाववाची डुल्याजा प्रकृतिरित्यादौ तथादर्शनात्प्रकृत्या स्वभावेनावस्थानमित्यर्थः अतएव प्रकृतिभावेन न पूर्वरूपं ना
प्ययादय इति भावः नान्तः पादमि तिपठित्वनेन सूत्रेणा गोशब्दस्य यत्प्राप्तं तन्नेति व्याख्यानेन नान्तः पादमित्यनेनैव पूर्वरूपत्वादिकं विकल्पेन निषिध्यत इ
ति बोध्यम् अवङ् स्फोटायनेत्यस्य स्फोटप्रतिपादक इत्यर्थः स्फोटायन इति पाठे नडादित्वं कल्प्यं स्फोटायनो ऽवङ्ः समर्त्तान्यस्मृद्वदर्भावस्यैतिस्मृत्यनरानु
संधानदोषेणात्र विकल्पो बोध्यः निवृत्तमिति अत एवेन्द्र इति सामर्थ्यान्नित्य मिति भाष्यादावुक्तम् गवाग्रमिति सन्निपातपरिभाषायाः अनित्यत्वाद्दीर्घ
इति बोध्यम् व्यवस्थितेति देवत्रातो गलो ग्राह इति योगे च सद्विधिः मिथस्ते न विभाष्यन्ते गवाक्षः संशितव्रतस्तेन प्राप्त्यवयवेनेति शङ्कोरिति सूत्रे भा

सु.
शा.शे. ष्येस्थितं अग्नौ अपरोऽद्भुति सूत्रे अग्नीदग्नौ लिहेत्यत्र आत इत्याद्यर्थे वार्तिककृद्द्गुल ग्रहण घटितन्यासं कृतवान् तन्मस्तत्त्वानाय भाष्यकृतेन विभाषेति योगा [illegible] भज्यते
२३ विभाषेत्यस्य व्यवस्थितविभाषात्वं ध्वनितम् तथा जेर्य्य घञपोरिति च व्यवस्थितविभाषेति अजेर्वीति सूत्रे भाष्ये स्पष्टम् न च व्यवस्थितविभाषयाऽन्द्रे नित्यावङि सि
द्धे इन्द्रे चेति व्यर्थमिति वाच्यम् भाष्योक्तानि विकव्यवस्थितविभाषाणाममामाणिकत्वज्ञापनार्थं तत्सत्त्वादित्याहुः इन्द्रे च कविद्वान्व्यपुस्तके च शब्दरहितः पाठः इन्द्रा
वयवे चोत्यर्थस्तेन षष्ठीतत्पुरुषेतरपदषष्ठीतत्पुरुषे गवेन्द्रयज्ञ इत्यादावपि अवङ् सिद्धिः अन्यथा वाक्ये गोशब्दस्येन्द्रशब्दपरत्वासंभवेन समासासंभवादिन्द्रशब्दस्योत्तरप
दत्व एव तत्प्रवृत्तिः स्यात् प्लुतप्रगृह्या इत्येतस्य प्रकृत्येति पाठे एव सामंजस्यं मत्वाहाऽथ प्रकृतीति न चैतद्घटकपदार्थज्ञानाय प्रगृह्याधिकारस्य पूर्वं युक्तमिति वाच्य
म् इन्द्रे चेत्यत्र प्राचीनपठितनित्यग्रहणस्य प्रामादिकत्वं बोधयितुं तदव्यवहितमेतत्सूत्रलेखनात् तत्र नित्यग्रहणे तदव्यवहितोत्तरेत इत्यर्थस्य स्पष्टमेवेत्याशयेनाह
प्लुताः प्रगृह्याश्च वक्ष्यन्त इति अचीत्यनुवर्त्तमाने पुनरज्ग्रहणमन्यासत्याय तत्राच्येतयोः प्रकृतिभावस्तदजनिमित्तककार्यस्यैवतेनाभाव इत्यर्थलाभार्थम् तेनगा
नुउ अस्य रूजतिजानुअस्येत्यादौ सवर्णदीर्घरूपसंधिर्भवत्येव एहिकृष्णेति दूराद्धूते चेति प्लुतः अत्र प्लुतस्याश्रयात् सिद्धत्वं बोध्यम् नित्यमिति किमिति विभाषा
ग्रहणनिवृत्त्यैव तल्लाभात् इति प्रश्नः माभूदिति नित्यग्रहणसामर्थ्येन पुनर्विधानाद्बाधकविषयेऽप्ययमेवेति भावः इकोऽसवर्णे इत्यतः पदान्तादित्यनुवृत्तं प्रथम
याविपरिणम्यत इत्याह पदान्ताः स्थितिवेति ह्रस्वयणोर्विधानसामर्थ्यान्नु न विकल्पसिद्धिः अपदान्तादीयणाश्चरितार्थत्वात् सामर्थ्यादेवेति चेन प्रकृतिभावाप
कर्षणोऽप्युत्पकदूस त्र चानुकृष्टत्वेन तदसम्बन्ध इति तदर्थे ह्रस्वविधानसामर्थ्यस्यावश्यकत्वेन च कारोऽव्यर्थ इति भावः भाष्यस्थितमिति प्रकृतसूत्रे इति शेषः ए
तेन ह्रस्वाभावे प्रकृतिभावार्थश्चकार इति न्यासाद्युक्तमपास्तम् चक्री अत्रेति तु संहितायाम् अविवक्षायां बोध्यम् न समासे सितीति चेति वार्तिकम् पार्श्वमिति पर्श्वो
णां समूहः इति णस् सितिचेति पदत्वम् अत्यंकः सवर्णार्थमनिगर्थं चेदम् होतृ ऋकारः ब्रह्म ऋषिः आच्छेदिति आटो धात्ववयवत्वेनापदान्तत्वादिति
भावः एतेनाट इति पुनर्वृद्धिविधानार्थेन चेनोस्योमाङ्क्षुपररूपबाधवत्प्रकृतिभावस्यापि बाधेनेष्टसिद्धिरित्यपास्तम् समासेऽपीति व्याख्यानादिति भावः सप्त
र्षीणामिति द्विकं त्वेति समासः प्रकरणात्सुद्धये प्रकृतिभावविधायकसूत्रद्वयमुपन्यस्य प्लुतप्रगृह्या इति सूत्राकांक्षितप्लुतप्रगृह्ययोर्मध्ये प्रथमोपजनत्वात् प्लु

तमकरणमारभते वाक्यस्यटेः वाक्यस्येत्यस्याभावे पदस्यटेरित्यर्थः नन्वस्यापिपदस्यटेः प्लुतःस्यात् नत्वस्मिंस्तुवाक्यस्यटिरन्त्यपदस्यैवसंभवतीतिनदोषः ग्रहणाभा-
वेप्लुतश्रुत्योपस्थितावृपरिभाषयाजंतस्यैवस्यादितिग्रहणेनुतत्सामर्थ्यादिनाचोविशेषणात् व्यञ्जनान्तस्यापिभवति प्रत्यभि० प्रणामादिभिराशीर्वाच्यमानो गुर्वादि-
र्येनप्रतिसंभाषतेतत्प्रत्यभिवादः नत्वाशीर्वेन्नतं मूद्रेआशीर्वादरूपप्रत्यभिवादाभावेनाशूद्र इत्यस्यवैयर्थ्यापत्तेः अतएवभाष्येऽशूद्र इति किं कुशल्यसितुषजके-
न्तुकम् अभिवादयइति नमस्कारपूर्वकमाशीरादिवाचयामीत्यर्थः आयुष्मानित्यायुष्मत्वस्यविधेयत्वात्सम्बोधनविभक्त्यभावः राधीविभवेत्यस्याप्युपलक्षणम्
प्रत्यभिवादेशर्मादिप्रयोगोननियतः राचोप्लुतस्येतिसूत्रेप्रत्यभिवादेनास्येचः प्लुतविधानात् आयुष्मानेधि अग्निभूता इतिभाष्ये तदुदाहरणाच्चशर्मादिप्र-
योगेतुनदेवप्लुतः शर्मान्तनामब्राह्मणस्येत्यादिस्मृत्यातस्यनामावयवत्वबोधनात् स्त्रियामेति स्त्रियाअपिनाम्नाभिवादप्रत्यभिवादइत्यर्थस्यभाष्यसंमतत्वा-
दितिभावः नामगोत्रेवेति अभिवादप्रत्यभिवादयोर्नामगोत्राभ्यामेवस्मृतिषुप्रसिद्धेः तत्राधिकृतस्यपदस्येत्यस्यप्रत्यभिवादइत्यनेनविशेषणात्प्रत्यासत्त्याप्र-
त्यभ्युद्यमानार्थवाचकस्यैवप्लुतइतिभावः तत्रनामशब्देनद्वादशेऽह्निपित्रादिकृतंगृह्यते अतएवायुष्मान्भवदत्तडिनित्यादौप्लुतोनेतिस्पष्टंभाष्ये भोराजन्यविशि भोश-
ब्दस्यराजन्यविश्यवाचकनाम्नश्चटेः प्लुतइत्यर्थः भोशब्दस्याप्राप्तेरुतस्यो नामत्वात्प्राप्तेविभाषेयम् दूराद्धूते यावतिदेशेप्राकृतप्रयत्नोच्चारितंसम्बोध्यमानोन
शृणोतिकिंत्वधिकंप्रयत्नमपेक्षतेतावद्दूरमदूरात्तदाह्वानञ्चदूराद्धूतसम्बोधनस्योपलक्षणम् ननुसंबोधनविभक्तिनियामकस्याभिमुखीकृत्यबोधनरूपस्यसंबोधनस्योप-
लक्षणम् आगच्छभोभवान्देवदत्त इत्येवमाह्वानस्यापिसम्भवात् अतएवाकडारसूत्रेनदीगुरुसंज्ञयोः समावेशवान्तीवन्धु इत्यत्रगुरोर्निवृत्तामदीवन्धुनीतिपूर्व-
पदान्तोदात्तत्वंचफलमुक्तंभाष्ये अन्यथाऽत्रसम्बोधनाभावेनगुरोरित्यस्याप्राप्तावितदसंगतिस्स्पष्टैवइत्युपलक्षणत्वादसत्यप्याह्वानेभवतिनद्याह सक्तुमित्यादि अत्राभि-
दूराद्धूतइत्येतस्तुक्तस्यपदस्येत्यस्यविशेषणाम् तेनहूयमानार्थवाचिनः पदस्यैवटेः प्लुतस्तद्वृद्धेयो निकंचेत्यन्यदेतत् हैहेप्र० हैहयोः सम्बोधनद्योतकत्वेनकेवलो-
भ्यामपितात्भ्यांसंबोधनदर्शनेनचतयोरपिहूयमानार्थपदत्वात् गुरोरनृतइत्येवसिद्धेनियमार्थमिदमित्याह हैहयोरेवेति० हैहेऽग्ने इत्येवसिद्धेप्रयोगप्रदर्शनादनेनन्य-
योरपीतिदाहहेरामेतिकेचित्तुराकंहैहेग्रहणमनर्थंन्यार्थम् अन्यथावाक्यस्यटेरित्यधिकारादन्ययोरेव [illegible] पौनःस्यादतआ हेरामतिप्रयोगइतित्वेवसम्बोधनेऽस्तु

ष.
प्र. टी.
२४

यो: प्रयोगमस्त्वनेनैवाभिमुख्यस्य द्योतितत्वेन घोत्याभावादनर्थकयोरपि तयोः प्लुतार्थेन तदाह रामहेइति अन्यथाऽप्रगृह्यकयोः प्लुतासंभवात् है यथैव स्यात् [illegible] यो
र्हूयमानार्थपदत्वाभावादप्राप्ते विध्यर्थमनियमेन तु न मानम् तेनात्र प्लुतसमावेशः सतत्सर्वं भाष्यकैयटयोरस्पष्टमित्याहुः यत्त्वयं हूयमानार्थपरस्सटेः प्लुतः [illegible]
के कौण्डिन्यन्यायादिति नन्वशिवहे इत्यादौ तस्याप्राप्तत्वान्न्यायविषयाभावात् गुरोरः दूराद्धूत इत्यनुवर्तते तेन दूराद्धानरावप्रवृत्तिस्तदाह दूराद्बोधने [illegible] प्लुतश्चा
त्राविवक्षितप्लुतेन प्रत्यभिवादे भोराजन्येत्यस्य विषयेप्यस्य प्रवृत्तिः नहि विषयेप्युपलक्ष्य बोधनसत्वात् सर्वं प्लुतप्रकरणस्य तु दशेषः तथाहि सातबूक[illegible]रित्यनेनसहे
वास्याप्यधिकारत्वमेव कुर्यात् एतच्चयविषय एवेदमिति प्रकृतसूत्रे ऽनुदात्तं प्रश्नान्तेति सूत्रे च वृत्तौ स्पष्टम् अपिशब्दो यथाप्राप्तटिसमुच्चयार्थः अगुरोर्गुरोः सन्निधा
नादन्त्यो गुरुरेव समुच्चीयते तेन दाऽन्त्यलघुमति अनन्त्यगुरावेन तस्यान्त्यलघो दूराद्धूते चेत्यादीनां दुर्वारत्वेन प्लुतसमावेशापत्तिः एकैकग्रहणं त्वेनहि ह्रिगानामेवप
र्यायार्थं स्यात् तेन यथाऽन्त्योपि गुरुरनन्त्यश्च स्यादिर्वा तत्रैव पर्यायः स्याद्व्याख्यानाद्वेनदर्थलाभः अनन्त्यस्यापीति अपिनान्त्यगुरोरगुरोश्चेत्यर्थः पर्यायार्थमिति।
अन्यथा समावेशः स्यादिति भावः अनुदात्तं पदमिति तु त्रिपाद्यां न प्रवर्तत इति तत्रैव वक्ष्यते प्राचामिति तु पक्षे सर्वेषां प्लुताभावार्थम् विकल्प्यत इति सा च व्यवस्थितेन
विभाषानेनाग्नीदग्ने त्विहेत्यादावग्नीत्प्रेषण इति न भाष्ये तु विभाषा पृष्टेति सूत्रे विभाषेति योगविभागो दर्शितः सा विव्यवस्थितविभाषेति कैयटः अत एव श्रौ
आवयेपरस्येति वक्तव्यमिति वचनस्याग्नीदग्नीनित्यादौ प्लुतनिषेधाय कृतस्य विभाषेति योगविभागेन प्रत्याख्यानं भाष्योक्तं संगच्छते सर्वं च भाष्यसम्मतेषाऽव्यव
स्थितभाषेत्याहुः अप्लुतवदित्युक्त्याप्लुत इत्यध्याहारस्तदाह प्लुतोऽप्लुतवदिति प्लुत एव निषिध्यतेति नत्वयानेप्लुतविधानेन स एव निवर्त्यत इति भावः प्रसज्यप्रतिषेधे
नव्याख्यानञ्च तु न युक्तं गौरवात् किञ्च तथा सति प्लुतप्रकरण एव नोपस्थित इति वदेत् न च पर्युदासे अग्नीइतीत्यादौ प्रगृह्याश्रयप्रकृतिभावस्याधिकापरत्वात् प्लुतव २४
द्भावे दीर्घादिकं स्यादिति वाच्यम् शब्दत इति शब्दस्यापेक्षा वर्णमात्रापेक्षप्रकृतिभावस्यान्तरङ्गत्वात् अप्लुतवदित्यस्य प्लुतकार्यं नेत्यर्थे प्लुतशब्दमर्यादाल
भ्यः प्लुतः प्लुतसादृश्यविधानस्यैव शब्दतो लाभात् नाप्येप्लुतकार्यप्रतिषेधार्थमित्युक्तिस्तु फलितार्थाभिप्रायेणैवेति बोध्यम् प्रगृह्याश्रये इति प्लुते कृते वापि तस्य
सिद्धत्वाद्दीर्घत्वं वृद्धिवत् तदन्तस्य गृह्यत्वमनुकार्यं सुलभम् अनुकरणे तु प्रकृतिवदनुकरणमित्यतिदिष्टत्वमिति भावः किं मयात्र कर्तव्यमिति [illegible] आह वि

३ प्लुतवद्भावापेक्षया॥

नुहीदमिति विभाषापृष्टप्रतिवचनेहेरितिप्लुतः इदमशब्दोऽत्रवाक्यानुकरणपरइति हेरिकारस्यवाक्यटित्वम् उभयत्रविभाषेयमिति उपस्थिते प्राप्ते अनुपस्थितेऽप्राप्ते
इत्यर्थः विभाष्यतेविकल्प्यतेइतिविभाषा गुरोश्चहलइत्यप्रत्ययेटाप् नवेतिविभाषायामितिभाष्यप्रयोगात् भाष्येनुकि मर्थमिदमुच्यते अनुपस्थितार्थम् तत्र
ईग्रहणेननार्थः अविशेषेणचाकर्मणस्याप्लुतवदित्येवेदमपिसिद्धमत्रशाइयंवशेयम् इत्युक्तम् तत्फलेनोपस्थितेपूर्वविप्रतिषेधेनईग्रहणेऽपिनित्याप्लुतत्व द्वेव
रवेष्टः प्रत्याख्याने नित्यप्लुतवद्भावस्यपेननाप्राप्तिन्यायेनवैकल्पिकतद्बोधिताभावांशस्यबाधकत्वात् उपस्थितइत्यस्यनिवृत्त्यापरविप्रतिषेधादुभयत्रविभाषे
तिकैयटस्यप्रमादः मूलंत्वितिशब्दभिन्नेवैदिकइतिशब्देचेत्येवंपरतयाकथंचिद्व्याख्येयमित्यन्ये उद्देश्यप्रतिनिर्देश्ययोरैक्यमादायपर्यवसन्नसर्वनाम्नापर्यायेण तन्त्रस्थि
गभागितायमितिनिर्देशः विशेषणेनतदन्तविधिमाश्रित्याह ईदूदेदन्तमिति द्विवचनमिति सप्तम्यन्तविशेषणत्वग्रहणेतदन्तविधिनिषेधादितिभावः एदन्तमिति।
व्याख्यानेफलमाह पचेवहइति निपातएकाजनाङ् निपातइतिकिम् चकाराग्रप्रत्ययस्यशास्त्रकृत्विनार्थवत्वात् एकाजिति कर्मधारयोवर्णपदार्थप्रधान
त्वेनानुरक्तत्वात् आहरतिमृगइत्यादिनिर्देशाच्चतेनप्रेदमित्यादौनदोषस्तदाह एकोजिति आङ्वर्जइति पर्युदासस्योचित्यात् अनरावैकाज्जाङितिनासूत्रितवा
मुदेववाचकस्याऽऽशब्दस्याङासहाव्ययीभावे आऽऽस्मात् आमित्यादौसत्यभिधानेस्वतआङ् भिन्नत्वेनपूर्वोक्तत्वेननिपातत्वेप्रगृह्यत्वंनपूर्वान्तत्वेनाङ्त्वातिदेशाति
दिश्यमानधर्मविरुद्धत्वाच्चपधर्मप्रयुक्तकार्येनिवृत्तेरनिदेशस्वभावसिद्धत्वात् प्रादित्वेनाङ्भिन्नत्वंतुनलभ्यमशास्त्रीयत्वात् ओदितिसूत्रेआउओ अप्रमाना
ङितिप्रतिषिद्ध्यर्थोयमारम्भइतिभाष्यन्तुपर्युदासेपिगम्यस्यप्रतिषेधस्यसत्वान्नानुपपन्नम् अनाङितिपर्युदासादेवनिपातैकाच्त्वेनलब्धेनिपातैकान्यग्रहणंस्पष्ट
र्थम् स्याङ्सर्वस्यापेक्षयाङ्त्वाभाववदनुदायेऽप्यत्वाभावादजित्येवानुदायग्रहणाभावेसिद्धेएकग्रहणमन्यत्रवर्णग्रहणेजातिग्रहणप्रयोजनायपशूनीन्यारि
सिद्धिरितिभाष्यस्यतत्त्वम् जातिग्रहणार्थमित्यस्योपात्तजात्याश्रयेकानेकव्यक्तिग्रहणार्थमित्यर्थस्तेननितउशब्देएकदेशस्य तत्स्यानुकरणेअनुम्काराद्विभु
तुकरणेप्यनितीतिनिपातत्वेपिप्रगृह्यत्वाभावएवएकग्रहणाकलंबोध्यम् ननुउंकारस्यक्काप्यश्रवणान्नङिदङिद्वित्वेकोद्देश्यइत्यतआह वाक्यस्मरणेयामिति
वाक्यशब्देनवाक्यार्थगतमनभिमतत्वम् स्मरणाविष्करणस्यस्मृतिविषयताएवंकिलतदितिस्मृतार्थनिर्देशः निपातइत्यनुवृत्तमोसित्यनेनविशेष्यतेत्यर्थः

सु॰ प्र॰ निपातसंज्ञा चादिपदोपस्थितचादीनां सन्निसंभवे यथेतामेव निसार्थकनिपातानां निपातपदेन तन्न दृष्ट्यैव शिष्टानमेवोपस्थितिरिति निगोरामुक्षय ... त्यिन प्रकृतेषु
२५ त्र स्थनिर्दिष्टात्पदेन गोणार्थानान्न ग्रहणमिति गोभवदित्यादौ अनेनास्य प्रवृत्तिः एवं च कार्यकालपक्षे अन्नानिपातादत्यस्यानुपस्थितिरेतत्परिभाषावैयान अव्ययसंज्ञा
देतु नैतस्य परिभाषाप्रवृत्तिरिति सत्वादन एवानर्थकेपि निपातेन तत्संज्ञा सिध्यति अयोरुतीत्यादौ प्रगृह्यत्वायाह सम्बुद्धि निमित्त इति सम्बुद्धि ... निमित्तस्याने लो
लुंकालुप्तत्वेनैत्स्य रत्वाभावान्नस्यात् नलुमतेति निषेधानित्यत्वं त्वगति कगतिः इत्यादि विकिमपर्गेत्र अनार्थेकि म ... एवं धोरुत्य ... नैमित्तिनि पातिवक्षाया
मप्यवादिरहितप्रयोगार्थमिदन्न द्विवक्षाचे वर्णोच्चारणो नियतेना ईमात्राकालव्यवाये नोच्चारणेच्छा तद्धि का ईमात्राकालव्यवाये नोच्चारणेच्छा चेत्तदविव
क्षेतिवाच्यम् उञः अश्रोञ् निपात एव उञ ऊँ इत्येकसूत्रत्वे तु शाकल्यग्रहणानुवृत्तौ ऊँ इत्येकमेवस्यात्प्रगृह्यसंज्ञाकरणेन प्रगृह्यस्य आदेशस्य च सहविधा
नात् उ इति विती ति च न स्यात् आदेशे प्रगृह्यकार्यं नु स्यानि वद्भावेन वोध्यम् प्रगृह्यत्वस्य साक्षादुद्देश्यसंवन्धस्य ... तयात्र विधेयविशेषणत्वमानाभावा
त् शाकल्य ग्रहणानुवृत्तावपि प्रगृह्यत्वस्य ऊँ आदेशस्य च विकल्पत्वेऽऊँ इति विती ति सिध्यति न तु उ इतीति प्रगृह्यत्वविकल्पे तु पक्षे तदभावेपि अस्य तात्पर्यान्तर
तदभावे निपातादेकाजित्यस्याप्रवृत्तेः तदुक्तम्भाष्ये योगविभागं प्रदर्श्य किमर्थो योगविभागः शाकल्यस्य मते ऊँ विभाषायथा स्यात् ऊँ इति उ इति अन्येषामाचा
र्याणां मते विती ति अनेन हि योगविभागस्य उ इतिरूपसिद्धिः फलमिति स्पष्टमेव लभ्यते तो योगविभागेन व्याचष्टे उञ इति उञोवाचकं प्रगृह्य पदमिति अ
र्थः शाकल्यस्येतौ प्रगृह्यमित्यनुवर्त्य तदाहो ऊँ इतौ वेत्यादि विकल्पाननुवृत्तौ हि निपात एकेत्येव सिद्धे इदं व्यर्थमेव स्यादेव त्वप्राप्तविभाषेयम् ऊँ इत्यत्र शा
कल्यप्रगृह्यपदयोरसंबन्धे उञ इत्यधिकारात् प्रगृह्यस्यैवादेशे तस्यैकोपगणितिऊँ इतीत्यस्य सिद्धिः दीर्घोच्चारणावैपथ्यापत्तिश्च विकल्पमात्रसम्वन्धेपि ऊँ
इतीत्यस्यासिद्धिरिति विधानसामर्थ्यात् प्रगृह्यपदसंबन्धः प्रगृह्यमात्रसंबन्धेर्थाधिकारादप्रगृह्यस्य नित्ये ऊँ आदेशे ऊँ इतीति प्रगृह्यस्य उ इतीति सिद्धे पि वितीति
नसिध्येत् तदाहोञ इतौ दीर्घो ऽनुनासिकेत्यादि अत्र विशिष्टस्य विधिरिति न वाक्यभेदः न च प्रगृह्यत्वमादेशश्च शाकल्यमते इति तयो रेकयोग एव प्रवृत्तिः स्या २५
दितिवाच्यम् योगविभागसामर्थ्येन शाकल्यमते एवभावाभावकल्पनात् वस्तुत उञः नुवर्तिमसस्याऽऽदेशयोः सहविधानमेव न्याय्यमादेशे स्थानिवद्भावात्र ...

ह्यकार्यमभाव्यप्रगृह्यसंज्ञकस्येत्यपिस्थानिवद्भावलभ्यार्थस्वरूपकथनमिति न्यायविदो विचारपन्नु मपद्गो व्याख्यानादत्र मयप्रत्याहारः अत्र प्रादि
कत्वेनासिद्धत्वान्न प्लुतप्रगृह्या इत्यनेन बाधः नानुस्वार इति किं विवीत्यादौ प्रगृह्यसंज्ञाभावेऽस्यासिद्धत्वादिको यणिति यणाऽनुस्वारो भवत्येव ननु [illegible]
तेसंलुप्यमानार्थाभिधायीति न्यायेन गौरीशब्दस्य सप्तम्यर्थवृत्तित्वेऽपीकारस्य तत्त्वाभावोऽस्मादेः ईदूदिति शब्दस्वरूपस्य विशेष्यत्वात्तदन्तविधिरिति भा
वः मामकीतनू इति प्रगृह्योऽयमिति शब्दप्रयोगस्य यदकारैर्नियमितत्वात्पदपाठे प्रगृह्यत्वफलमवसेयम् ईदूतौ किम् अत्राभवाति सप्तम्यादेशः तपरत्व
मुसंदेहायम सप्तमीति किम् धीती मतीकृस्वान्तात्तृतीयैकवचनस्य पूर्वसवर्णे सवर्णदीर्घः अर्थग्रहणं किमिति नच तदभावे ईदूदेदिति वदीदूदन्तायास
प्तमीत्यर्थापत्तिः तथाच पपीत्यादावेव स्यात् एकादेशस्य पराद्विवद्भावेन सप्तमीत्वात्तु गौरीत्यादाविति तत्सिद्ध्यर्थनदावश्यकमिति वाच्यम् ईदूतौ सप्तमीप्र
गृह्यम् अदसः एद्द्विवचनमित्येव सिद्धे गुरुभूतन्यासकरणेन तत्प्रकरणापेक्षयावैजात्यबोधनादकारांशे संभवाच्च सेऽपर्यंधाविति तदन्तग्रहणनिषेधा
मकृत्वार्थस्य [illegible] सप्तम्यन्तमित्यर्थेन [illegible] सिद्धेरिति प्रश्नः पपीत्यादेरनभिधानमेवेति परे वृत्ताविति अर्थग्रहणसामर्थ्यात्सप्तम्यर्थमात्रपर्यवसन्नमित्यर्थेनात्रतत्संदृष्ट
ध्यर्थेपि वृत्तेर्न दोषः संज्ञायामिति समासे जहत्स्वार्थायां तत्पूर्वपदस्यानर्थकेपि सुप्सुपेति समासे जहत्स्वार्थायां प्रसक्तदोषस्योक्तरीत्यैव वारणमिति भावः गौरी।
अधिश्रितः [illegible] अधिश्रयणक्रियायामेव गौरीपदबोध्याधिकरणत्वान्वयः इति गौर्यधिकरणकेलक्षणायामुमानाभावः इति न तत्र दोषः वाप्यामश्व इति सुप्सुपेति
समासः संज्ञायामिति वा मनुसंज्ञायामिति समासे वाक्येन संज्ञाऽनवगमान्नित्यसमासत्वेन विग्रहोऽनुचित इति चेन्न तेषु समानार्थकवाक्याभावेन नित्यसमासत्व
[illegible]त्वेपि नित्यस[illegible]साभावात् विभाषाधिकारबाधमानाभावात् नित्यसमासे हि वृत्तिघटकपदानां पृथक्प्रयोगाभाव एवात्र तु पृथक्प्रयोगेपि तद्बोध्यविशिष्टार्थाप्रती
तिमात्रमित्याहुः ओतोऽप्रः अण इति किम् अकर्तृ हर्तृ अत्राऽपूर्वेणेव व्याख्यानात् आगच्छत मश्री इत्यादौ प्लुतस्यासिद्धत्वात्तत्र प्राग्वयथोद्देशत्वाज्जातिपरत्व[illegible]
स्वात्प्लुतः [illegible] अपि अनुनासिकपतिबन्धार्थम् पुनः संज्ञेति नानुनासिकः संज्ञायाः कार्यार्थत्वात्पुनः प्रकृतौ कार्यमेव बीजम् स्थानिवत्त्वं नु नेष्टुं न स्यान्यत्र [illegible]तिधर्मत्वेनाल् विधि
त्वात्पूर्वस्यैवोक्ते द्विवचनत्वमनुपरादिवद्भावेनतेनतादृश्यानतिदेशेपि तद्धर्मातिदेशादीकारान् अत एव रामौ विश्वेदीपरादिवद्भावे [illegible]

सु.
श. शे. व्येइतिसूत्रे माकरे अच्चान्विरिति सिद्धमनच्चादिति वार्तिकप्रयोगेण अल्पाच्तरमिति सौत्रप्रयोगेण कथमनच्कमिति भाष्यप्रयोगेण च वृत्तिघटकानादेपदान्तकार्य
२६ स्य नतस्मिन्निषेधेन अनुत्वस्य चाभावो बोध्यत इति केचित् ॥ ॥ स्वरसन्धिः ॥ ॥ स्तोः श्चुनेति शिति चलुप्तविभक्तिके भिन्ने पदे योगदृति संयोगइति तदर्थे तेन चिन्तामित्यादौ न
दोषः अन्यपरसैत्यधिकृतमपिन सम्बध्यते शादिति ज्ञापकेन तेन याच्ञा सिद्धा शात्परस्य तो श्चुत्वनिषेधकात् खादिति लिङ्गकृत्निमित्तकार्ये णोपेथा संख्यकृतास्य
रसूत्रेपिताः षोडशापकान्ततन् शकारचवर्गोलइति यथार्थस्यमितिशेषः हरिश्शेतेइति वाशरीति विसर्गाभावेशः सचितिति चुत्वस्यासिद्धत्वज्ञश्नोनदत्वेतस्य चु
त्वेनजकारेचवर्गोतिबोध्यम् तयोरत्रा ऽलेखस्तुवेचिश्याथेः विश्नइति यजयाचयतविच्छ प्रच्छरक्षोनङितिनङि को ङित्शादेशेङित्वानुपपत्ताव अश्नेचासन्नका
लइतिनिर्देशान्नसम्प्रसारणाभावः नपदान्ता पदाद्धरित्येवसिद्धे ऽन्नग्रहणांस्पष्टार्थम् टोःकिमिति षकारस्यापिपदान्तेजश्त्व विधानात्प्रश्नः ह्रस्वात्तादाविति षत्वस्यासि
द्धत्वाज्जश्त्वाभावइत्युत्तरम् षस्मवतिरिति षडधिकानवतिरितिविग्रहः षसगयेइति पृथक्पदे परोनु पञ्चमस्येति किम् वक्ष्वि वधाति स्पशेचरितार्थइति उपल
क्षणमिदं लयोरपिप्रवृत्तेः शतचजातिपक्षेस्पष्टमेव व्यक्तिपक्षेपितादृशमन्तोचरितार्थस्य एतद्व्यक्तिविषयतयोपपन्नत्वादनेनेति बोध्यम् स्पष्टञ्चेदमिकोयणचीत्यत्रकैयटे
परेतु स्थानेऽन्तरतमस्सूत्रे सत्रम्यन्तपाठस्यभाष्यकृताद्दूषितत्वेनैतदुक्तेः फक्तिसम्भवरावन तस्मादनुस्वारस्येतिमनुनासवर्णग्रहणमप्यकृत्स्न पक्षसवर्णोनुनासिकोभवती त्यर्थो
न दोषः नतुकं भाष्येरेफेऽनुनासिकपरसवर्णत्वयोः प्रतिषेधोवक्तव्योन वक्तव्योरेफोष्मणांसवर्णानसन्तीति चिन्मयमिति स्वार्थिकमन्तकृतेवचनेऽरतिमयट्सूत्रनादिति
वाक्यभेदेनकृचिन्मात्रुर्यरूपकृतवचनाभावेपिमयडर्थम् अतएवचिन्मयंब्रह्मेतिसामानाधिकरण्यम् चिन्मात्रमिति क्वाचित्कोपपाठः मात्रचे अन्ययस्यात्रोपपत्यभा
वातमुपूर्व्यंसकादिष्वेवार्थेमात्रशब्देनात्रसमासस्यवक्ष्यमाणत्वात् निपातनादिति पृषोदरादिगणोककुद्मानितिप्रकृतिप्रत्ययसमुदायः पक्षन्तरीतिमतेनेदम् उदः राम
स्था तस्मादित्युत्तरस्येतिपरिभाषालभ्यमर्थमाह उदः परयोरिति अत्राघोषस्येति समनियतत्वेनाप्यन्तमग्रहणेबाधकाभावेनश्वासविवारयोरन्यतरोपिनन्यूनतेनेति बोध्य २६
म् यस्यासिद्धत्वादिति त्रिपा परत्वादितिभावः हलोयमामितिसूत्रोक्तभाष्यसंमताष्टाध्यायीपाठेतुयस्यासिद्धत्वाभावेनचत्वम्भवत्येव अतएवोमूर्वस्कदेशोमेऽपर्णसत्वा
न त्वं देरोगइतिभाष्यं सङ्गच्छतेमूलन्तुप्राचामनुरोधेनेतिपरे नचेदं सूत्रं व्यर्थमज्झलोझलीत्यनेनसस्यलोपेउत्थानस्यासिद्धेरितिवाच्यम् झलाधोषदृश्नितिमलोप

इत्यर्थस्यानेन ज्ञापनात् उदस्थादित्यत्र तु निर्दिश्यमानपरिभाषया निर्दिश्यमानादेशेनैव स्थानित्वान्न दोषः झय इति पञ्चमीत्याह झयः परस्येति पूर्वस्य सवर्णमुत्पन्नेन—
घोषवत इति समनियतत्वेऽपि विनिगमनाविरहात् स्वरूपप्रतिपादनाय चरित्रपग्रहणाम् झय इति पदान्तादित्यविशेष्यम् तेन विद्युत्प्रश
मित्यादौ कत्वं न जकारे कृते इति कुत्वमिति शेषः पूर्वोक्तभाष्यसम्मताष्टाध्यायीपाठे चर्त्वस्य कुत्वं प्रत्यसिद्धत्वात् मोनुः परस्येत्यधिकृत ममर इत्येव न विशिष्यते ।
त्याह मान्तस्येति हलि सर्वेषामित्यतो हलीत्यनुवर्त्तते हलि किम् राममाश्रय नश्चा चेन मोनुकृष्यते अपदान्तस्य किम् राजन्याहि प्रशंसीति प्रशास्त्रशब्दे जसः शे
नपुंसकस्येति नुमि सान्तेति दीर्घः आक्रंस्यत इति क्रमेर्लृट् स्याउ उद्गमनेत ङस्यः अनुस्वारस्य परेति लुप्तषष्ठीकं पृथक् पदम् अत एवाह स्याद्यादौ सवर्णनुदत इति ये
ऽनुनासिक इत्यत्र तदपकर्षश्च सिद्धः प्रयीतिस्य स्पष्टार्थम् दंशानमित्यादौ न दोषः शकारस्य सवर्णासिद्धेः प्रयत्नभेदेनाच्छलोः सावर्ण्याभावात् अच्यनुस्वाराभावात् मो
राजि नेति सिद्धे म इत्युक्ति हे मपरे इत्येन ह्विपेषु प्रशाम्सलपतीत्यादौ मो नो धातोरिति नत्वबाधनार्थं निषेधस्तन नरत्वादनुस्वारश्चेत्स्यात् ध्वनितं चेदमेतदोरमो
मशिविसूत्रयोर्भाष्ये हे मपरे मपर इति वहुव्रीहिः ननु तत्पुरुषोऽसम्भवात् मोनुस्वार इत्यतो म इत्यनुवर्त्तते यथासंख्यं सम्यक् इत्यत्र संख्याक्रमवैशिष्ट्येन ज्ञानम् प
सांख्येः प्राप्यतिस्थानेमित्यत्र संख्याशब्दस्य ज्ञानार्थतया दृष्टत्वात्तामनतिक्रम्य यथासंख्यम् अनुदेशः पश्चादुच्चरणाय बोधकालिकः सम्बन्धः साम्यं सख्यया
योग्यत्वात् स्थानानामादेशानां च समसंख्यानां सम्बन्धो येन क्रमेण पदज्ञानं पदादुपस्थितिर्यौ तेनैव क्रमेण वाक्यार्थबोधविषयः संबन्धस्तेषामित्यर्थः फलितमाह स
मसम्बन्धीति यद्यपि स्थानानामलौकिकप्रमाणादेव सिद्धस्तथापि परस्मैपदानामिचो पवायावस्थारोशब्दतः स्थानानरसाक ममादायसम्बन्धबोधार्थमाघनीटकि
त्वाविति सौसम्भूय निर्दिशे साहित्येद्वैद्व विधानादप्राप्तक्रमान्वयबोधनार्थं चेदम् एवञ्च तत्र यथासंख्येनान्वयबोधकवाक्यकल्पनेन त्वामाणान ततस्तद्बोध इति बो
ध्यम् अत्र स्वरितेनेत्यपकृष्यते इति स्वरितत्वात् इत्यादौ नातिप्रसङ्गः तत्र प्रतिपत्तिकालिकमेव संख्यासाम्यमेनच्छालप्रवृत्त्युपयोगीति समभ्यानमिति सूत्रे भाष्ये स्पष्ट
एतेन यथासंख्यं पिरनुनासिका एव विधीयमानत्वेन सवर्णाग्राहकत्वात् जातिग्रहणप्राप्तस्य वगुणाभेदकत्वप्राप्तस्यापि अप्रत्यय इत्यनेन निषेधाच्च एवं यवलपरे यत्रापि
अत एव तनोमस्यनानुनासिको वकारः अन्यथा तद्वाप्सामित्यादौ नित्यानुनासिकापत्त्यान निर्देशासंगत्यापत्तिरित्याहुः चयो द्वितीयाइति नोत्पाकोऽर्स इत्यत्र भे

मु.
शा. शे.
२७ यद्यदमुत्तरान्तसामर्थ्यादित्युक्तं तद्द्वितीयस्य न चर्त्वम् ऊष्मोदयं प्रथमं स्पर्शमेके द्वितीयमाहुरयवहान्तभाजमिति प्रातिशाख्ये पदान्तभाजमिति चर्त्वासिद्धत्वलब्धो
र्थानुवादः पदान्ते जश्त्वप्रसङ्गाच्चर्त्वं विना चयोऽलाभाच्च अत्र तु — इति न जश्त्वप्राप्तिस्तस्यासिद्धत्वात् अकृतसन्धयः स्युरिति भाष्यादावूदृते छान्दसत्वाच्चर्त्वस्यासिद्धत्वा
एवं च प्रातिशाख्ये पदान्तभाजमित्युत्सर्गः यद्वा तयोरन्यतरेण चर्त्वम् न त्वपूर्वोत्सर्गैरसिद्धेः सोऽवेत्यन्यत्र विस्तरः ङः सि धुडिति सप्तमीपञ्चम्यर्थे व्याख्यानात्तदाह सस्येत्यत्र
ति पदस्येत्यनुवर्तमानस्य वैयधिकरण्येनान्वयात्पदावयवस्य सस्येत्यर्थः षट् सन्त इति धुटि धस्य चर्त्वे लक्ष्ये भेदात्तु नईसश्चर्त्वम् नश्च नकारान्तादिति पदस्येत्यनु
वृत्तं पञ्चम्या विपरिणम्यत इति भावः वैयधिकरण्येनैवान्वय इति ङ्मुट्सूत्रभाष्यस्वरसः नस्य पदान्तस्येति अपदान्तेन कारोऽनुस्वारप्रकृत्याफलितार्थप्रदर्शनमि
दमुत्तरान्तस्य पदस्येत्युचितं चतुष्टयमिति वक्ष्यमाणविकल्पैरिति भावः तेन तुक् श्चुत्वे कृतस्यासिद्धत्वाच्चयो द्वितीया इति पक्षे चस्य छत्वेन छकार छकार शकार
घटितरूपद्वयाधिक्येऽपि शानुस्वारविसर्गाणां द्वित्वविकल्पेनाधिकोऽपि न क्षतिः ङ्मो पदस्येत्यनुवृत्तं सामानाधिकरण्यानुरोधात्पञ्चम्या विपरिणम्यत इत्याह तदा
न्तं पदं तस्मादिति तत्र ङ्मश्च पदस्त्वादिति विशेषणसम्बन्धमनुभूपपदविशेषणत्वेन तदन्तपर इति भावः ङमः इति पञ्चमीबलादचीति सप्तमी पञ्चम्यर्थे न दाह अत्र
इति सप्तमीनिर्देश सुलाघवार्थः ङमः आरस्याच इति तस्मिन्निति सूत्रस्थभाष्यात् ङमन्तं यत्पदमिति किम् अनिती त्यादौ ङमुण्णसुद्दिति भाष्ये तु विभक्तिव्यत्यय
कल्पने गौरवात् पदावपवङमः परस्येति वैयधिकरण्यमेवोक्तमुदाहृतेनेत्यत्र ङमुडभावो मणङ्कष्टुन्नाउन्निचपदे इत्यतः पदङ्गनुवर्तमानाजादिः पदस्य ङमुडित्यर्थेन
बोध्यः पदस्येत्यस्यावृत्त्यापूर्वं वन्धेऽपि विशेषणविशेष्ययोरुभयोः सप्तम्यन्तत्व एवं तदादिविधि प्रवृत्त्या तल्लाभः स्यात् एतदर्थमेवाचीति सप्तमीनिर्देशः ङमन्तं पद
मित्यर्थेऽपि परमदण्डिनेत्यादावेतद्वारणोपपदे इत्यनुवृत्त्या वस्यकवोवान्तवर्तिविभक्त्यादण्डिनित्यस्य पदत्वात् उत्तरपदत्वे चेति प्रत्यलक्षणनिषेधस्तु न प्राप्यकुंभ ख्य
वार्येनेत्यादौ पदत्व बाधेऽपीति निषेधसिद्धये न स्यपत्रोत्तरपदस्यकार्यित्वं तत्र वपरत्वेः तेन निषेधेन सिद्धमित्येन सूत्रस्य माध्यानिकि स्तिकारशिव इति दिक् ङ्को पण्णी २७
ति सोत्रो निर्देशः प्रकरणादिति अत एव समः सुटीत्यादौ प्रश्लेषेण सविधानमिति भाष्य उक्तमूरोः पूर्वस्येत्यु पलक्षणं प्रकरणविधेयस्य एवमुत्तरत्र पूर्वेश्चारित्य
पि अयं मधिकारः तेनोत्तरसूत्रविषयेऽवास्य प्रवृत्तिर्न तु मनुवसोऽस्यत्र तत्सूत्रस्य वार्तिकयोश्च अग्नेतिनु रूपकरणाऽवास्य संबन्धेन तं वेदे लोपे त्यावैव स्यसूत्रना

धंस्यप्राथमेवतुराध्द्ः परस्यनित्यंहत्वंपूर्वस्यवानुनासिकइतिविशेषयोनन्वर्थीः पूर्वस्येत्यस्यचहस्थानिनः पूर्वस्येत्यर्थोबोध्यः

अनुनासिकात्परइत्यमानुनासिकादिति त्वबलोपेपश्च मीव्याख्यानात् अयमागमोनवयवइत्या
वयवत्वेमानाभावात् खरीति विसर्गाक्षिप्तस्याप्यवसानस्यनसम्बन्धोव्याख्यानात् सोवक्तव्यइति समःसुटीत्यादिसूत्रत्रयेसइत्युपसंख्यायसमः सुटीत्यत्रसकारः
प्रश्लिष्यवैते संकारणवविधेयइत्यर्थः एवञ्चास्यासिद्धत्वाद्रुत्वाभावेनविसर्गाभावेनतद्धिधीनामप्राप्तिरेवेतिभावः स्पष्टञ्चेदंभाष्ये विसर्गस्थानेनसत्वविधानेतुगी
र्वंस्कुटम् लोपस्यापीति यत्पूपधारंजनंकुर्यान्नमोरुकरणेमतिलोपप्रकृतिभावेच नोपधारंजनंमतम् १ उपधारंजनमनुनासिकानुस्वारागमरूपम् नमोनेकारमकारयोः
प्रकृतिभावेदाहरणम् न्छन्याहीति तत्प्रातिशाख्यत्वात्छान्दसमात्रविषयमितिभावः अतएवभाष्येसम्रादिषुसत्वंवक्तव्यमित्युक्तम् रुत्वपक्षेवानुनासिकाद्युपत्तिः
दीर्घत्वेमनोक्ता ननुलोपपक्षेएवद्वित्वेनद्विसकारस्यसिद्धत्वात्समःसुटीतिव्यर्थमित्यतआह त्रिसकारंकमेपीति स्कोरिति सलोपस्यनोस्यासिद्धत्वात् पुनर्द्वित्वेनत्रि
सकारस्यसिद्धिरितिनुनयुक्तम् लक्ष्येलक्षणस्येतिन्यायात् एतेनसमः सुटीत्यत्रवेतिपाठेनैवपक्षेमोनुस्वारेणासिद्धेनुनासिकान्याद्भतिव्यर्थमित्यपास्तम् ननुव्यंजना
न्तरस्यैकस्यानेकस्यवोच्चारणेविशेषाभावोनत्याह अनुनासिकवतामिति तत्रोच्चारणेविशेषाभावकल्पनेइदंवचनंव्यर्थमितिस्यादितिभावः हयवरट्सूत्रभाष्यो
क्तेःप्रायेपसंख्यानेफलमाहानुस्वारवतामिति अपिनाकस्यसंग्रहः लक्ष्येलक्षणस्यसकृदेवप्रवृत्तेराह वचनान्तरेणेति यणोमयइत्यनेनएकस्यैवशाल्लस्यपुनः प्रव
त्तो हिसन्यायइतिभावः पूर्वत्रासिद्धत्वेनपूर्वद्वित्वस्यपूर्वमप्रवृत्त्यातेनद्वितीयस्यसाधुत्वबोधितेन्तदनन्तरंपरद्वित्वप्रवृत्त्यानतयोर्मध्येपुनरन्यस्यसाधुत्वम्बोध्यतेइति
त्रितयस्यनिवोद्धेबोध्यः अनचिचेत्यत्रपणोमपरइत्यस्यापसंख्या नाद्चोरद्भ्यामित्यतस्तस्यपरत्वंबोध्यम् पुमःखय्यम्परइति बहुव्रीहिः ४कइप्यारिति कुप्वोरितिसू
त्रविधयर्योरित्यर्थः इदुदुपधस्येतिसूत्रेऽप्रत्ययस्येत्यस्य प्रत्ययावयवभिन्नस्येत्यर्थादितिभावः अप्युत्पत्तौति तत्पक्षेप्रकृतिप्रत्ययविभागाभावादितिभावः पंचमि
इदमनुनासिकपक्षेऽनुस्वारपक्षेतुकुप्वोरित्यस्यैवप्राप्तिः अनुस्वारव्यवधानेनोदुपधत्वाभावात् पुंक्षीरमिति क्षरधातोरुपधापाईत्वेऽच्प्रत्ययेक्षीरमितिभावः नृन्छ
वि अप्रत्ययेनितिषष्ठ्यर्थेप्रथमा न्हन्ये न्हनिति द्वितीयान्तानुकरणम् षष्ठ्याः सौत्रोलुक् नलोपस्तुसौत्रत्वान्नएवंकानित्यत्रापि चाद्धिसर्गइति रुपरइतिसूत्रान्नरु

स०
शू० शो०
२८

नुकर्षेऽन्नेनेतिभावः येननेति येननाप्राप्ते यो विधिरारभ्यते स तस्य बाधक इति न्यायेनेत्यर्थः येननेत्यादेर्येन कर्तेकावश्यं प्राप्ताविल्यर्थः नञ्द्वयस्य प्रकृतार्थदार्ढ्याद्बोधकत्वा त् मा भूदिति भावः कृतेत्तदप्राप्तियोग्यविषये चारितार्थ्ये हि बाधकत्वे बीजमतदुक्तम् शर्पूर्वा इति सूत्रे भाष्ये शर्पूर्वा इत्येन हलादिः शेषस्य बाधकमनवविषयभेदे क्व यम्बाधकत्वमुद्दुरं तावदयं प्रष्टव्यः पदितत्रो चेन किमिह स्यात् हलादिः शेषश्चेन्नाप्राप्ते तस्मिन्नारभ्यमाणः न हा बाधकं भविष्यतीति अजादेर्द्वितीयस्येति सूत्रभाष्ये पि स्फुटमेतत् नेनुशर्पर इति न चास्यापि विसर्गस्य ऽकऽपौ दुर्वारौ किन्त्वास्यैव तौ स्याताम् खसानयोरिति विहितस्य तु रात्रयोः सिद्धत्वात्सत्वमेव स्यादिति वाच्यम् शर्पर इति सूत्रं कुप्वोरित्यत्रानुवर्त्य शर्परयोः कुप्वोः ऽकऽपयोरपवादो विसर्गस्य विसर्ग इति वाक्यभेदेन व्याख्यानेनादोषात् स्पष्टं चेदं भाष्यवार्तिके कान्ग्रहणं शक्यमकर्तुमित्याद्य यद्वेति एवं समग्रहणमपि त्यक्तुं शक्यं पुमग्रहणं त्वावश्यकमेवानुनासिकपक्षे इणः परत्वेन षत्वापत्तेः रुष्विणाइति णत्वे कृते सत्व षत्वानामेव पादादिति भावः। ऽकऽपयोरपवाद इति तद्विहितविसर्गस्यापीत्यपि बोध्यम् कांस्कानिति वीप्सायां द्वित्वम् संहितायाम् संहिता च स्वारसिकार्धमात्राकालव्यवायेनोच्चारणम् नतोधिकार्धमात्राकालेनोच्चारणे अवग्रहे तु तदधिककार्यं स्यात्तयेदं तदधिककालव्यवायेन तु साधुत्वं नापि बोध्यत इति वृद्धा इति नैषां शास्त्रविषयत्वेनेति भावः [illegible] च क्व इत्यकार उच्चारणार्थः तेना च्छिन्नमित्यत्र तुक ह्रस्वस्येति तुगिति च वर्त्तते जश्त्वेनेति स्वशब्द उपपद्यते कैश्चित्क्व शब्दो निर्मलैरुक्तः एवं नञ्पूर्वा च्छादयन्ते ई आङ् शब्द इति पदान्तत्वं बोध्यम् स्पष्टं चेदं ममरटिप्पणे आङ्माङः आङ् साहचर्यान्माङः ग्रहणमेव दीर्घस्यापीमिति वक्ष्यमाणाज्ञापकात् व्याख्यानाद्वा दीर्घादिति [illegible] त्वमीति भावः एओङ् सूत्रे भाष्ये ध्वनितमेतत् चेच्छियत इति तुको हलादिः शेषस्तु नाभ्याससंज्ञाप्रवृत्तिकाले स्थानिद्वारा साक्षाद्वा सन्निहितानां हलामेव भेदनिवृत्तेः अनएव मुगत इत्यादि चरितार्थम् दीर्घात्पदान्ताद्विति पदान्तस्य दीर्घस्येत्यर्थः योगविभागो ऽनर्थको ऽस्त्रो ङिति सूत्रे भाष्ये स्पष्टः दीर्घान्तस्य पदस्येत्यर्थे न सिद्धेर्ग्रापहणं पदान्तविधित्वमेवास्य न पदविधित्वमिति बाधन द्वारा समर्थपरिभाषानुपस्थित्यर्थं तेनासामर्थ्ये प्यस्य प्रवृत्तिरिति समर्थसूत्रे कैयटः ॥ ॥ इति हल्सन्धिः ॥ ॥ २०

विसर्जनीयस्य सः प्रागुक्तान्तमपि विसर्जनीयपदानुवृत्तिप्रदर्शनाय स्मारितम् शर्पर इति बहुव्रीहिः विशेष्यत्वाच्चाव्यवधिमतोः सा जात्यादि संज्ञानीया [illegible] सर्वस्य विसर्ग विधौ फलमाह नत्वन्यदिति अन्यदेव विवृणोति इहेति त्रैरूप्यमिति विकल्पद्वयसामर्थ्यादिति भावः मोप अपदाद्यो रिति सूत्रे सौत्रत्वादेकवचनम्

अनव्ययस्येति अत्राव्ययीभावादितिसूत्राव्ययस्यैव ग्रहणं व्याख्यानात्तेनोप यस्काम्यतीत्यादौ सत्वसिद्धिरिति एतच्चमव्ययीभावश्चेत्यत्र भाष्ये गीः काम्यतीति गीःकाम्यतीत्यस्या
प्युपलक्षणमिदम् इणः षः इदुदुपधस्येत्यस्यासिद्धत्वात्सर्पिष्याशमित्यादौ सत्वनिवृत्त्यर्थं गीष्पाशं दोष्कृत्यमित्याद्यर्थं चेदम् अत्रानव्ययस्येत्यपदादाविति काम्येद्रितिच।
संबध्यतेतेनोच्चैः कृत्संदोः पश्यगीः काम्यतीत्यादौ षत्वन्न अत एवात्र प्रकरणे सर्वत्र सत्वमेव विधेयमित्या उत्तरत्र विसर्गस्थानिकस्यानेन षत्वमिति भाष्योक्तपक्षान्तरं।
सङ्गच्छते विसर्जनीयस्थानिके सुतरां पुंस्पुत्र इत्यादौ न दोषः तत्र हि मस्थानिकः सः अत्र विसर्जनीयस्येत्यनुवृत्त्यैतदर्थलाभः अनव्ययस्येत्यादि च अत्र पक्षे न संबध्यते तेन
बहिष्कृतं दुष्काम्यतीत्यादौ षत्वसिद्धिः गीः काम्यतीत्यादौ सकाराभावादेव न दोषः अपदादाविति च न संबध्यते तेन दुष्करोतीति षत्वसिद्धिः परस्त्वपम्यक्षेऽसंगतः उत्तर
सत्वस्यासिद्धत्वेन निष्कृतमित्यादौ षत्वासिद्धेः प्रकरणे प्रकरणमसिद्धं नयोगे योग इति पक्षस्तु नास्त्येव ज्ञापकाभावादिति सुपर्गादस्मासेपी सत्र निरूपयिष्यामः विस।
र्जनीयस्यैव षत्वमिति मूलोक्तपक्षेतु सकारषकारयोः स्वरितत्वेपि यथायोगसम्बन्धो मण्डूकप्लुत्येत्यन्यत्र विस्तरः नमस्पु० इत अत्र त्रीपदादाविति न सम्बध्यते व्याख्याना
त् साक्षात्प्रभृतित्वान्नितिऊर्यादित्वाद्गतित्वं स्वरादिपठितस्यनुगतित्वाभावस्तेन साक्षात्प्रभृतिषु च्व्यर्थवचनेपि नक्षातिरित्यन्ये इदुदु अप्रत्ययस्येति पर्युदासोला
घवात् तत्र मत्ययदन्तसंबंधिपरं तेन —— प्रत्ययसम्बन्धिभिन्नस्येत्यर्थोऽत एवक्कविभिः कृतमित्यादौ षत्वन्नस्पष्टं चेदं भाष्ये इत्यन्यत्र विस्तरः एकादेशशास्त्रेति
एकादेशशास्त्रसंपन्नरेफस्थानिकत्वेन विसर्जनीयस्यैकादेशशास्त्रनिमित्तकत्वं बोध्यम् स्पष्टं चेदमत्रैव सूत्रे उरण्रपर इति सूत्रे च भाष्ये इत्यन्यत्र विस्तरः प्रत्ययभि
न्नसंबन्धिन इत्युक्ते तु नार्थः अग्निः करोतीत्यादावपि प्रत्ययभिन्नसमुदायसंबन्धित्वेन षत्वापत्तेः तपरकरणं किम् गीः करोतीति उपधाग्रहणं व्यर्थम् उपधाग्रहणं न का।
र्यमिति इदुद्भ्यां तु परं विसर्जनीयं विशेषयिष्यामि इतिहयवरट्सूत्रभाष्योक्तेः तिरसोऽन्य अत्र गतिग्रहणं नानुवर्त्तते पराभवेपि तिरस्काराशब्दप्रयोगात् अनर्जोवे वति
रसोमतित्वात् द्विस्त्रि कृत्वोऽर्थ इति न विसर्गविशेषणम् चतुः शब्देऽसंभवात् किन्तु द्विरादीनामित्याह वर्त्तमानानामिति इसुसोरिति सूत्रेऽवक्ष्यमाणरीत्यास्तु इति सू
त्रपि तु मुच्चितम् सुजन्तानां स्पदस्येत्यर्थात् चतुष्कपाल इति इदुदुपधस्येति निसंषः चतुः शब्दोऽप्युसन्त इति अप्रत्ययस्येति पर्युदासो न अत एव चतुष्पाद्भ्यो ढ
नित्यादिनिर्देशाः संगच्छन्ते चतुष्पञ्चाशदित्यत्रापि षत्वं भवत्येव न चेदुदुपधस्य सस्ययोर्विसर्ग इति हयवरट्सूत्रभाष्योक्तेः कथमत्र षत्वमिति वाच्यम् विसर्गस्य प

सु.
श. शे.
२९

नामिसंनेनह्विधिरेवा त्विसाशंकापुंस्कामेसत्रषत्वापादनंसंगच्छतेनचकृत्वोर्थइत्येवकृत्वोर्थेविद्यमानस्यपदस्येदुदुपधस्ययोविसर्गइत्यर्थान्नप्रसक्तकृत्वः करोतीत्या
दौदोषोनापिचतुष्करोतीत्यादावव्याप्तिरिति द्विस्त्रिश्चतुरिति कृत्वोर्थमितिवाच्यम् कृत्वोर्थेइत्यस्यासिद्धत्वेनचतुःशब्देइदुदुपधस्येतिनित्यषत्वापत्तेःप्रकरणेप्रकरस्या
मसिद्धमितिपक्षस्तूपसर्गादसमासेपीतिसूत्रेकैयटेपूर्वपदादितिसूत्रेभाष्येचदूषितएव उपसर्गादितिसूत्रेचोपपादयिष्यते किञ्चपूर्वत्रेतिपूर्वशब्देनप्रकरण
ग्रहणेऽभिहितप्रकारेणएवत्रिपाद्याअसिद्धत्वंस्यान्नतुसंपूर्णसपादसप्ताध्याय्याः किञ्चास्याधिकारत्वात्सतिसूत्रमुपस्थितस्यप्रतियोगमसिद्धत्वंदुर्वारमित्यन्यत्र।
विस्तरः इसुसोः अत्रेसुसोःप्रातिपदिकावयवयोर्ग्रहणान्नेह पेचुंःकाष्ठैः सख्युःपाकंकविभिः कृतमित्यादौषत्वन्ननित्यंसमासइतिसूत्रोदाहरणेसमासविषयेतयोरेव
संभवेनार्थाधिकारानुरोधस्तत्साहचर्याच्चइसुसन्तपदावयवविसर्गस्येत्यर्थः पदस्येत्यधिकारात् नचप्रत्ययग्रहणपरिभाषयापरमसर्पिष्करोतीत्यादौषत्वानापत्तिरवय
वस्येसुसन्तत्वेपिउत्तरपदत्वेचेतिनिषेधेनापदत्वादितिवाच्यम् अनुत्तरपदस्थस्येतिनिषेधेनक्वचिदुपात्तविशेष्यसत्वेपिशब्दरूपविशेष्यमादायतदन्तविधिज्ञाप
नेनशब्दरूपविशेष्यमादायप्रत्ययग्रहणपरिभाषयालब्धतदन्तार्थकस्यपदविशेषणात्पेसुसन्तान्तस्येत्यर्थेनादोषात् अतएववनोरश्चेत्यादौनदोषः ब्राह्मणस्यसर्पि
ष्करोतीत्यादौसापेक्षत्वेनासामर्थ्येनाशंकंतत्रैकार्थीभावसामर्थ्यविषयत्वात् अधात्वभिहितंसमानाधिकरणमसमर्थवदितिसुक्तेःसर्पिःकालकमित्यादौनषत्वम् अ
धात्वभिहितमित्युक्तेःसर्पिष्टीयतइत्यत्रषत्वसिद्धिः धातुसहचरितप्रत्ययाभिहितार्थेनसमानाधिकरणमसमर्थवन्नेतितदर्थः यदात्तुसर्पिरादिकमव्युत्पन्नंप्रातिपदिकंप
णिनेरुणादिष्वव्युत्पत्तिपक्षइति आपनेपीनोतिसूत्रेभाष्येस्पष्टमुक्तेः तत्रहिशंस्वइत्यादावादेशानाशंकोणादीनांप्रतिषेधोवक्तव्यःप्रातिपदिकविज्ञानाच्चभगवतः।
पाणिनेःसिद्धमित्युक्तम् अकमन्तात्वाप्येत्वि ष्णुष्वितिसूत्रेपाणिनेर्व्युत्पत्तिपक्षस्यापिस्वीकारइत्यस्यप्रथमकम्व्याकरणान्तरसैवसर्वनामस्थानमितिमहासंज्ञाव
त् अतएवभाष्येउणादयोऽव्युत्पन्नानीत्येवोक्तम्नत्वनेकार्था अपिधातवइति वदव्युत्पन्नान्यपीत्युक्तम् तदाइदुदुपधस्येतिनित्यषत्वेप्राप्तेऽनेनविकल्पइतिप्रत्यय।
ग्रहणाभावात्तत्परिभाषानुपस्थितेःपरमसर्पिष्करोत्या दौषत्वविकल्पःसिद्धःनित्यंसमासेइतिसूत्रमनुत्तरपदस्थस्येतिप्रतिषेधार्थंनित्यग्रहणंतुकर्तव्यमेवसमासेनि
त्यषत्वस्येत्येवसिद्धेःसर्पिषेत्यादौषत्वंत्वत्रपक्षेक्वचिदन्यदेवेत्यर्थकाद्बहुलग्रहणादितिस्पष्टंभाष्ये —— व्यपेक्षेति व्याख्यानात् एकार्थीभावसामर्थ्यग्रहणेपरमसर्पि २९

स्यादौ समासे विकल्पापत्तिः अनुत्तरपदस्थस्येति निषेधादुत्तरसूत्रस्य न प्रवृत्तिरिति भावः नन्वेवं नैव सिद्धे कस्कादिषु सर्पिष्कुण्डिकाशब्दपाठो व्यर्थ इत्यत आह कस्कादिष्विति
एतेन तत्सामर्थ्यादुत्तरपदस्थस्यापि षत्वमित्यपास्तम् व्यपेक्षाविरहे पीति आनयसर्पिष्कुण्डिकामित्यत्र त्वसादौ व्यपेक्षायामिति इदं सर्पिष्कुण्डिकाया इत्यत्र असपमिन्त्र
विसर्गस्येत्यर्थः इदुदुपधस्येत्यत्र व्याचख्याना व्याख्यादर्शकृतां मते व्यपेक्षायां तेन सिद्धेरिति भावः एतेन कस्कादिपाठस्याव्यपेक्षायां चारितार्थ्येन व्यपेक्षायां तस्यासिद्ध
त्वात्द्विकस्य स्वोचितद्दृत्यपास्तम् मसयसेवन्धिमि नविसर्गस्येत्यर्थः तदप्राप्तिरेवेति व्यपेक्षायां विकल्प एवेति बोध्यम् अतः कृकशब्देन तदादिग्रहणमुसमासाप्तिसो
त्तरपदस्य विशेष्यत्वात् तुविषयदेवयोरिति सूत्रे च प्रत्ययग्रहणेन धातौ विशेषणत्वे तदादिविधिज्ञापनात् अयस्कुंभीत्यादौ लिङ्गविशिष्टपरिभाषया सत्वं बोध्यम् भा
ष्ये इति तत्परकरणादतः कृकस्याप्राप्तिः ॥ ० ॥ इति विसर्गसन्धिः ॥ ० ॥ पन्तु स्वौजसि सत्रं ह्रेव पाठ्यः सर्वत्र सुग्रहणेन ग्रहणमेवास्त्विति तन्न यशः त्रे स्यादौ ण र
सिद्धत्वादुत्वानापत्तेः अमौ ग्रीस्त्यप्रथमैकवचने चारितार्थ्योत्तद्धुनयन्नाह स्वौजसेति पदस्येत्यनुवृत्तं ससन्नूर्ध्या विशेष्यते तेन तदन्तविधिरादेशस्त्वलोऽन्त्यस्येत्य स
न्नस्येत्यर्कुत्तमाह पदान्तस्येत्यादिना मज्जूरित्यत्र व्यपदेशिवद्भावेन सिद्धिः व्यपदेशिवद्भावोऽप्रातिपदिकेन ग्रहणवता प्रातिपदिकेन तदन्तविधिर्नेति परिभाषा
द्रूपं प्रत्ययविधिविषयमिति समासे निष्कादिष्व इत्यत्र भाष्ये स्पष्टम् इदं जश्त्वापवादः श्रेयानित्यादौ त्वस्यासिद्धत्वात्संयोगान्तलोप एवेति हि दिक् षत्वस्यापवाद इति यदीदं न
स्यात्तर्हि यत्वं मा प्राप्तौ तीत्येतावता कृते त्वस्मिन्पत्वस्यासिद्धत्वादुत्वगुणयोर्यत्वा प्राप्तिरेवेति भावः प्रथमयोः व्याख्यानात्प्रथमयोरित्यनेन प्रथमाद्वितीयाहृपसुव्विभ ॥
क्तो र्ग्रहणान्नत्याह प्रथमाद्वितीययोरिति पूर्व्वग्रहणाद्धिम् अमीइत्यत्र पक्षेपरसवर्णो माभूदिति दीर्घग्रहणात्तु त्रिमात्रस्थानिनस्त्रिमात्रो माभूदिति सवर्णग्रहणात्तु स्प
ष्टार्थम् पूर्वस्य दीर्घत्वात्पूर्व्वजातीय इत्यर्थे नेष्टसिद्धिरिति स्पष्टं भाष्ये आद्गुण इति नोसदिति निर्देशेन स्पष्टावसरन्यायस्यात्र शास्त्रेऽनाश्रयणादिति भावः देवदत्तहन्त
हतन्यायस्त्वनुनात्र प्रवृत्तिः देवदत्तहन्तृहनने हि नोज्जीवनम् देवदत्तहननप्रसक्तहनने त्वस्त्येव देवदत्तजीवनम् प्रकृते तु न हननस्थानीयं गुणात्पूर्ववृद्धिहलुः पूर्व्वस
वर्णदीर्घस्य लक्ष्ये प्रवृत्तिः किन्तु हननो धमसजातीयं प्रसक्तिमात्रम् प्रसक्तस्य निषेधे वाध्यो ज्जीवनेन वाधकमिति स्पष्टं चेदं स्वादिष्विति सूत्रे कैयटे सुस्रोत र इति
सूत्रे नसूत्रशब्दः कस्यचित्संज्ञा सम्बुद्धौ दूराद्धूते चेति प्लुतः तत्सामर्थ्यादिति प्रतियोगित्वेन तदाश्रयणसामर्थ्यादित्यर्थः आ ॥ : ॥

स्व. शा. ष्वयात्सिद्धमिति भाष्योक्तिः पयस्यतीति पयोदानीसर्वत्र आगच्छ हे पयो ३ आगच्छ हे पयो दे त्यादावेकपदस्य वर्णद्वयसापेक्षमनारङ्गमुत्वम्प्रति वाक्यसम्पादकपदा
शे. सु. न्तरसापेक्षप्लुतस्यासिद्धत्वादुत्वे प्लुतसिद्धिः अन्यथा प्लुतस्योत्वदृष्ट्यासिद्धत्वासरत्वात्प्लुते आ ये ३ प्लुतपरत्वाभावादन्ये प्लुतासरत्वाभावादुत्वं न स्यात् परिभाषा
३० दृष्ट्या बहिरङ्गासिद्धत्वेपि न क्षतिः स्वदृष्ट्यासिद्धत्वेपि परम्प्रत्यसिद्धत्वप्रतिपादनसंभवात् स्वदृष्ट्याविद्यमानस्य परम्प्रत्यविद्यमानत्वप्रतिपादनात् अन्तरङ्गस्यासिद्धत्वे
तु प्रतिपाद्याभावे इवकं प्रत्यसिद्धत्वं प्रतिपाद्येत त्रा ये वा कास्यटेरित्यद्धशब्दाकारः प्लुतो से रेफदकारसंयोगपरत्वेनाकारस्य गुरुत्वात् गुरोरिति प्लुतः आश्रयेण तु येन
नाप्राप्तिन्यायेन प्रत्यसूत्रेण च पूर्वत्रासिद्धमेव बाध्यते न त्विदं सुलोताइत्यादौ त्वेकवाक्यमात्रसापेक्षत्वात् प्लुतो न रङ्गो भिन्नवाक्यस्याकारसापेक्षत्वादुत्वं बहिरङ्गमिति
स्पष्टं भाष्ये उकारानुबन्धेति उकारेत्संज्ञकरेफस्येत्यर्थः तेन देवहहीत्यादौ न दोषः भोभगोरोः सुपी सतो रोरित्यनुवर्तते न तु रोरीत्यतो र इति प्राप्तस्त्वेत्यावतिप्रसङ्गा
त् अशब्दान्तद्वंद्वेन पूर्वशब्द एव हृग्रोहिमभिप्रेत्याह एतत्सूत्रस्येति नन्वेवं पूर्वरूपापत्तिरत आह असंधिरिति भगो अघो शब्देकारु यौ रेकाराभ्यां प्राप्तपूर्व
रूपात्मकसंधिकार्याभाव इत्यर्थः इदं प्राचामनुरोधेन वस्तुतः सूत्रे रान्तानामेवानुकरणमसंधिर्न्याय्य एवेति बोध्यं न ह्ययमिति इदमर्वाचामनुसारेण भाष्ये तु रेफ
स्य विसर्गस्थानिवत्वेन न लवृत्तित्वाश्रयमपि इदमल्विधिरेव स्यान्यल्वृत्तिधर्माश्रयत्वात् अग्रहीदित्यत्र च दीर्घलोपे चेड्नैव निवेश इति विशेषोऽतः पयः स्वि
त्यादौ दोषः तत्र हि रोः सुपीति विसर्गः नियमशास्त्राणि च विधायकान्येव वाच्य दृष्ट्या आर्थिकार्थमादायनु निषेधकानीति तत्रापि रोरेफस्य विसर्ग इत्यर्थे लक्षणप्रहत
न्यर्थमित्युक्तं नन्वेवं हे राम इत्यादौ संबुद्ध्यव्ययवत्यहलः सस्य लोपे तद्वृत्तिसुत्वस्याल्धर्मत्वेन स्थानिवत्वाभावे पदत्वासिद्धिरिति चेन्न आनुमानिकादेशस्य एव मेतस्य।
स्थानिवद्भावेन सुबन्तत्वस्य तत्संयुक्तकार्यस्य वालाभेन तत्सिद्धेः प्रत्ययलक्षणेनापि न प्रत्ययमात्रवृत्तिधर्मलाभः लक्षणपदोपादानेन प्रत्ययनिमित्तककार्यस्य तं
निमित्तकृत्तिव्यवहारस्य वातिदेशात् एवं दीर्घाहो निदाघ इत्यादौ हल्ङ्याद्विलोप उक्तरीत्या स्थानिनि जायमानस्य सुपीति रत्वनिषेधस्यादेशे दीर्घह्नृ शब्दे निर्देशो न स
हृत्स्या न रेफ इति दिक् तेषां रोरिति इदं च निपातनात्स्याय विभाषा भवदिति वार्तिकं प्रत्याचक्षाणस्य वृत्तिकृतो मतेन परे तु तेषामपि रोरित्यर्थः अपिना विभाषा भव ३०

कनिष्पन्नसंग्रहः एषामंत्यस्य रुः स्यादवस्य चौकारः संबुद्धाविति तदर्थः अवग्रहणमनुष्यादलोंत्यस्येति नेति बोध्यं वार्तिकनिष्पन्नानां त्रयाणां भोः शब्दनिपातस्य चा
वश्यकत्वमन्यत्रस्पष्टमित्याहः व्योर्लघुयद्यपिवर्णसमाम्नाये यस्य प्राथम्यात्य्वोरिति उचितं तथापि लोपो व्योरिति लोपवारणाय सौत्रत्वमाश्रयणीयं स्यादतो व्यो।
रित्युक्तं लघुतरः प्रयत्नो यस्योच्चारणे सोऽयं लघुप्रयत्नतरः अन्यपदार्थसंबंधात्तं वर्तिपदार्थप्रकर्षविवक्षायामसाधुत्वापत्तेर्लघुतरत्वं चेषाशैथिल्यजनकत्वमेव लघूच्चारणाविति लघूच्चा
रणावित्यर्थः सूत्रमात्रत्वादेकवचनं वकारोदाहरणमसमावादित्यसङ्गतमितिवृत्तिः आ तो व्योरित्यत्र यकारमात्रवयोर्ह्रकारोऽधात्वनव्ययवर्णवा त्राप्यर्थोऽभिकारो तथैव
तेनस्मृतेनाविच्युतत्वादौ न दोषः तदाह पस्येति नादृशवस्यासंभवादिति भावः भोभगो इति नानुवर्तते निवृत्त्वे एतद्भ्रनपन्नवस्यति परान्नस्यकितो प्यमिति इत्लंलघुप्रयत्नवयो।
र्गार्ग्यपश्रुते त्त्वदाह अलघुप्रयत्नस्येति पूजार्थमिनिव्याख्यानादिति भावः नादृशस्वभोस्या दिपूर्वकएवेत्याशयेनाह भोऽश्रयुतेति भाष्यानुसारिणस्तु भोइत्याद्य
नुवृत्ति. स्मृतोवित्यादौ न दोषस्तस्यानभिधानाच्च अपूर्वस्येति त्वोतइत्यनेन विरोधान्न संबध्यते लोपः शाकल्यस्येत्येव भोभगो इत्याद्यनुवृत्त्यासिद्धे नित्यत्वार्थमिदमि
त्याहुः उञिच भोइत्यादि पूर्वस्य पूर्वेणासिद्धेराह अवर्णपूर्वयोरिति एतदपि नित्यमेव अत्रापि गार्ग्यग्रहणानुवृत्त्याऽलघुप्रयत्नस्यैव लोपः एतेन भोउत्यादिपू
र्वेलघुप्रयत्नलोपार्थमत्रापि नन्वनुवृत्तिरित्यपास्तं वकारोदाहरणं तु असाउएकाग्निरितिवृत्तिः उत्तरार्थमिति ङमोहस्वादचीत्यर्थमित्यर्थः एतत्तत्रैव निरूपितं
हलिसर्वेषामित्यादौ तु न संबध्यते व्यवहितेङमुडित्यादेवप्रयोजनकथनपरभाष्यप्रामाण्यात् अत एव लिङ्वृत्विवत्वादौ धुडादयः अन्यथासादौ पदेइत्यर्थान्न
स्युः अत एव माभ्यामित्यादौ हलि सर्वेषामिति लोपसिद्धिरिति दिक् हलि सभोभगो इत्याद्यनुवर्तते तेनाकारात्परस्य लघूच्चारणस्यैवानेन लोपः अलघूच्चा
रणस्य तु ओतइत्येव सिद्धे अपूर्वेत्युभयोरपि न चापूर्वोलघुप्रयत्नेअस्यासिद्धत्वाल्लोपः शाकल्यस्येति प्राप्नोतीति वाच्यं लघुप्रयत्नस्यैवानेन लोपो व्योरिति सिद्धे
अचीति करणं हलि विधानाभावेनैव सिद्धौ अस्य सूत्रस्य वैयर्थ्यापत्यात् तद्धा धातन्न च लघुप्रयत्नयोरेव लोपः स्यात् व्योरित्यधिकारादिति वाच्यं कृपिरिमानुप्रह
णार्थस्य सर्वेषामित्यस्य वैयर्थ्यापत्तेः विकल्पस्य विच्छिन्नत्वेन नित्यत्वसिद्धेः अत्र च पकार एवानुवर्तते न वकारा वृत्तौ तथैवोक्तेः फलाभावाच्च परेङ्माङ्सिद्धे श
च अन्यथात्रापि त्रवाध्यअयणीयस्यात्तदाहलघ्वलघूच्चारणस्यस्येतिनतुसुपीति पर्युदासेहिसुसहशप्रत्ययेएवस्यादेवं च अहभोतीत्यत्र नस्यात् यदित्तु सुपभि नेष्य

ल॰ श॰ र्देस्मात्‌दीर्घो ऽनिदाघेत्यत्रापि स्यात्‌ सुबंतइत्यर्थस्तु न उत्तमे काभ्यामित्यादिनिर्देशैः स प्रमीनिर्दिष्टप्रत्ययेन तदंतविध्यभावज्ञापनात्‌ लस्यानुरोधेन कचित्प्रत्ययग्रहणे
शे॰ सु॰ शब्दस्वरूपस्य विशेषणतापामवाश्रयणाच्च अतएवस्दाभ्यांनिष्ठेत्यादौनदोषः अहरहइति नित्यवीप्सयोरितिद्वित्वं नलुमतेतिनिषेधात्सुप्त्वाभावः गृहमेहोरात्रि
३१ रिति केचित्तु भाष्ये आतिदेशिकस्यैवाहोरात्रस्योदाहरणात्‌ नलोपः प्रातिपदिकांतस्येति सूत्रे नहि रूपरात्रिरथंतरेषु रोरवा विशेषात्‌ तत्र प्रायेणास्येति पाठाच्च
दृशानामनभिधानमेवेत्याहुः अनन्यत्वादिति रात्रिशब्दांतसमासादच्चि समासांतेयस्येति चेति लोपेपि रात्रिशब्दत्वास्रतेरिति भावः अनुवादेरेफविशिष्टस्या
प्यादानात्‌ रेफविधानं व्यर्थमत आह विसर्गापवाद इति द्रलोप नायं तत्पुरुषो ऽनीपरित्वचाविन्त्यादौ च दोषापत्तेः नापि बहुव्रीहिर्व्यधिकरणत्वात्‌ अतोगिजेंता
करूप्पण्यपद समास इत्याह रेफाविस्यादि भाष्येप्युभ्यधिकरणो बहुव्रीहिरिव दर्शितः नचाऽजघीइत्यादौ सिपिधातोरिति रुत्वस्य लीढइत्यादौ ढत्वादौ चापि तू
राज्यमित्यादौ संयोगांतलोपस्यासिद्धत्वात्कथं दीर्घ इति वाच्यं ढग्रहणेन लण्सूत्रे ऽजर्घा इति भाष्योदाहरणेन च तत्त्वक्ष्यामेकवाक्यतापन्न पूर्वत्रासिद्धमिति सूत्र।
स्य पूर्वग्रहणेनैतत्सूत्राग्रहणबोधनात्‌ अणः किमिति अचइत्येवास्त्विति प्रश्नः तृंहइति पाठेन कारजावनुस्वारपंचमाविति वृद्धोक्तेः रनिदितामिति नलोपे तृ
ढइति सिद्धं अत्राणपूर्वेणैव व्याख्यानात्‌ विप्रतिषेधे विप्रतिपूर्वात्कर्मव्यतिहारे वर्तमानात्सेधतेर्घञि परस्परविरोधार्थो विप्रतिषेधशब्दः तत्र नित्यस्यावश्य
कत्वांतरंगस्य ज्ञापकादिनाऽपवादस्य वचनप्रामाण्यात्‌ बाधकत्वस्थिते तद्भिन्नोऽस्य विषय इत्याह तुल्यबलेति द्वयोः शास्त्रयोः कचिल्लब्धावकाशयोरेकत्रप्र।
योगे युगपत्संभविस्वकार्यं समर्पणेच्छः तत्र प्रायेणाएकस्य कार्यद्वयायोगकृतेऽसंभव एव तस्य प्रवृत्तिः यथा वृक्षेभ्य इति तत्र दीर्घत्वयोर्युगपत्प्रवृत्तौ स्वस्वनि
मित्तानां तयोः संभवः कचित्केवलाऽसंभवेपि यथा शिष्टादित्यादौ अहिता तङ्गाभावयोर्युगपत्प्रवृत्तौ स्वस्वनिमित्तानां तयोः संभवः यद्यपि तातङादेः स्थानिवत्त्वे
नास्त्येव तत्तथापि अतिदेशादादेशप्रवृत्त्युत्तरमेव न तु तत्प्रवृत्तिकाले इति युगपदसंभवोऽस्त्येवेति परत्वात्तातङि सत्यङ्गतिन्यायेन न शादेशः स्पष्टं चेदं प्रकृत
सूत्रे इकोगुणवृद्धी अदसोमादित्यादावाकरे तत्र युगपदुभयोः कार्ययोरसंभवात्पर्यायेणात् जादिवं व्याख्या द्रूपप्रसंगेन नियमार्थमिदं परमेवेति तेन तिसृणा राम
मित्यत्र योगपद्यासंभवेन परत्वात्त्रिसादेश पुनः स्थानिवत्त्वेन त्रयादेशो न तत्प्रवृत्तिसकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेवेति यद्वा तुल्यबलयोरेकः प्र ३१

ष्वोभवतिसतनयोः पर्यायेणकार्यंकरोतियदातमुभौयुगपल्लेषपतोनानादिस्तुवकार्येभवतस्तदोभयोर्नकरोतियौगपद्यासंभवात् तथाशास्त्रयोलेस्पप्रेष्ययोकचिल्लक्ष्ये।
योगपद्यासंभवात्प्रतिपत्तौप्राप्तौयामिदंपरंभवतीतिविध्यर्थं तत्रकृते यदिपूर्वस्यापिनिमित्तमस्तितदातदपिभवत्येवततपठ्यतेपुनःप्रसंगविज्ञानात्सिद्धमिति पथा।
भिंधीत्यत्रपरत्वात्तातङिपुनर्घिर्भवतीति अक्रतातङ्घिभावयोर्युगपदेकस्यानिसंबंधस्यत्रांगरूपनिमित्तानंतर्यस्यवानसंभवइतिभाष्येस्पष्टं कार्येपरत्वंचपरशास्त्रविहि
तत्वंकार्यकालपक्षेप्यष्टाध्यायीपाठक्रेतपरत्वमेवनियामकं अतएवङमोह्रस्वादित्या दौत्रिपादीस्थेकार्यकालपक्षेएवपरिभाषयोःप्रवृत्त्याएकदेशस्थत्वेपिपरत्वा
त्तस्मादित्युत्तरस्येत्यनेनैवव्यवस्थितिसंगच्छते त्रिपादीस्थेनशास्त्रेणाविरुद्धपरिभाषाद्वयमुख्येपरैवकालेनाकृष्यतेतेनपूर्वेतितत्वं संज्ञानांतुकार्यकालपक्षेप्रदेशदेश।
एववाक्यार्थेनतद्बोधोत्तरमेवविरोधप्रतिसंधानंकार्यज्ञानंचेतितत्रान्यपरत्वमेवैतत्सूत्रप्रवृत्तौबीजं अतएवकार्यकालपक्षेअपादिभ्यःपरैवप्रगृह्यसंज्ञेतिअद।
सोमास्तिसूत्रेभाष्येउक्तं परिभाषाणांतुतत्पक्षेतद्देशस्थत्वेपिस्वस्वदेशार्थबोधात्स्पेवेतितासांपाठक्रमेवतद्देतत्सूत्रप्रवृत्तौनियामकमितिबोध्यंयद्यपीयंप
रिभाषातथापिकार्यग्रहणेनकार्यमात्रग्रहणात्तस्मिन्निति तस्मादितिपरिभाषयोरपिव्यवस्थापिकाकार्यकालपक्षेपिनैषकुपरिभाषादिवद्विध्येकवाक्यतांगत्वा
नस्वकार्येनिष्पादिका किंतुवाक्यभेदेनैककार्यंव्यवस्थापयति यथाष्टस्वपूर्वत्वेत्सदीर्घत्वयोःप्राप्तयोःपरमेत्वंप्रवर्तयतिएवमसिद्धंवहिरंगमित्यादयोपीतिविर
तसानयोर्विप्रतिषेधेकैयटस्पष्टं एवंचविप्रतिषेधेइत्यस्य थोद्देशैवेति स्थितंत्रिपाद्यांकार्यकालपक्षेप्यप्रवृत्तेः पूर्वत्रस्थापरावस्थानाभावादित्यन्यत्रविस्तरः इति
लोपइति उत्वंनित्यमितितुनभोभगोइतिसूत्रोक्तरीत्यालोपस्याल्विधित्वात् स्थानिवत्वेनतद्धर्मातिदेशेपिउच्चारणप्रसंगरूपस्यानवस्थाभावेनलोपेतदप्राप्ते
श्च एतद्देोः अनुकार्यस्वरूपभंगभियाकोशङ्कैकदेशाभावः एतद्दोरनंतरइत्यर्थः तेनपरमसद्ददातीत्यादौनदोषः गौणात्तुनदोषः तत्रांत्यपदात्वत्वाभावेनहल्
ङ्यादिलोपस्यदुर्वारत्वात् सुइतिप्रथमैकवचनमेवव्याख्यानात् अनञ्समासेकिमिति तस्यपूर्वपदार्थप्रधानत्वादुपसर्जनत्वात्[illegible]त्वाभावेहल्ङ्यादिलोप
लोपेतुवोरइतिप्रश्नः उत्तरपदार्थप्रधानःसइत्युत्तरं सोचि समितिप्रथमांतस्यलुप्तषष्ठीकमनुकरणं समासमविहीति द्वादशास्तरपादाज[illegible]तीकेर्वः [illegible]किति
लोपेत्रैपाद[illegible]नेलोपइतिभावः अवधारणंत्विति दृष्टेर्व्याख्यानमवधारणंत्वित्यर्थः बहुलेत्यादीति गमकांतराभावादितिभावः एवंचतदेषुकृत्यैवक्वचिदप्रवृत्तौ।

त॰ शा॰ सिद्धान्तमवबोधनपरतया व्याख्यानं व्यर्थमिति भावः सर्वमेतदवधारणं त्विति तु नासूचितमित्यलं ॥ ॐ इति स्वादिसंधिः ॐ ॥ स्वादिविधौ प्रातिपादिकादिरधिका
शे॰ सु॰ ॐ णोः संज्ञामाह अर्थवदिति अधातुरित्यादिः पर्युदासो लाघवात् प्रत्ययांतमिति आवर्तितं प्रत्ययपदे प्रत्ययग्रहणपरिभाषया तदंतग्रहणं संज्ञाविधावि
३२ ति निषेधस्तु प्रत्ययं यस्मात्र संज्ञा तद्विषये इति भावः अत्र सूत्रे उत्तरसूत्रे चार्थवत्त्वमेतत्संज्ञाफलभूतविभक्तिनरसमभिव्याहारानपेक्षया लोके यदर्थविषयकबोधजनकत्वं अ
न्यथा ऽधातुरिति पर्युदासेन व्यावर्त्यानामदर्थवत्त्वेनैव सादृश्यग्रहणं न सिद्धेः तरसूत्रे कृदादीनामनर्थकानामप्रसिद्धेस्तद्वैयर्थ्यं स्यात् न च नञिवयुक्तन्यायानित्यत्वज्ञा
पनायैतत् तदनित्यत्वज्ञापने भाष्यसंमतद्वारफलाभावात् अहन्कांड इत्यादावेतत्साध्यविभक्त्यनपेक्षत्वेपि तद्विशिष्टानपेक्षत्वमस्त्येवेति पर्युदासः सार्थकः
वत्के वर्णे अन्यत्र यस्य तदुक्तं संख्यायां अतिशदंतायाः इति सूत्रे भाष्ये नहि लोके केवलेन प्रत्ययेनार्थो गम्यते केनतर्हि सप्रकृतिकेनेति केनेति हरिरप्याह धात्वादीनां
विशुद्धानां लौकिकोर्थो न विद्यते कृत्तद्धितानामर्थश्च केवलो नाम लौकिकः प्राग्विभक्तेस्तदंतस्य तथैवार्थो न विद्यत इति अत एव पदसंज्ञासूत्रे तग्रहणास्य संज्ञाविधौ
वदंतविध्यभावज्ञापकत्वे कृत्तद्धितेति सूत्रे तग्रहणं कर्तव्यं न कर्तव्यमर्थवदिति वर्तते कृत्तद्धितांतं चैवार्थवत् न केवलाः कृत्तद्धिता इति भाष्यमुपादाय कैयटेनोक्तं।
शास्त्रीयार्थग्रहणेऽर्थवद्ग्रहणानुवृत्तिवैयर्थ्येन तदनुवृत्तिसामर्थ्यात् लौकिकार्थप्रत्यासन्नोऽभिव्यक्ततरोप्यर्थः प्रत्ययांतेषु लक्ष्यते स आश्रीयते इति लौकिकार्थकं
सम्पदं तदर्थस्य प्रत्यासन्नः शास्त्रकल्पितः स्वादिप्रकृतेरर्थः प्रत्ययांतेषु सुबंतेषु योऽभिव्यक्ततरो लक्ष्यते सोऽभिः सइत्यन्वयः यत्तु प्रत्ययांतेष्वित्यस्य कृदाद्यंतेष्वित्य
र्थ इति तन्न नाममात्रेण कस्याप्यर्थस्याभिव्यक्तेरप्यभावेनाभिव्यक्ततरत्वस्य सुतरामभावात् अर्थवत्सूत्रेप्येवमेवेति अनुवृत्तिसामर्थ्यादित्यनेन सूचितं अन्य
थात त्सामर्थ्यादित्येव वदेत् पूर्वसूत्रे यादृशार्थवत्त्वग्रहोत्राप्यनुवृत्तिसामर्थ्यात्तादृशार्थस्यैव ग्रहः शास्त्रीयार्थग्रहणे तु तदनुवृत्तिर्व्यर्था स्यादिति तद्भावः किंच
पूर्वसूत्रे सामान्यतोर्थवत् अर्थवद्ग्रहणेन किंचित्फलं प्रत्ययस्य वतिव्याप्तिदानातिरिक्तं अत एव तद्धितग्रहणस्य नियमार्थत्वाश्रयणेन ह्रस्वो नपुंसके यत्तस्येति न्यासे नकांड इत्या
दौ ह्रस्वावारणात् फलाभावेन भाष्योक्ते तत्प्रत्याख्याने पंचनाविप्रिय इत्यादौ पंचनावेत्यस्यानेन न प्रातिपदिकत्वं नाप्युत्तरसूत्रेणेति प्रातिपदिकत्वे तु ङीबापत्तिः एवं चा राम॰
प्रत्ययस्य प्राप्तिरेव नेति केवलप्रत्ययपर्युदासोपि विफलः दशदाडिमा षडपूपा इत्यादिनिरर्थकपदसमुदायव्यावृत्तिरर्थवद्ग्रहणफलं तत्र हि सुपो धात्विति लु ३२

गायत्तिरिति भाष्येस्य सूत्रमिति दिक् पूर्वसूत्रेणेति प्रत्ययग्रहणे यस्मादिति प्रत्ययांतत्वाभावेपीदिति भावः नियमस्य तु स्वजातीयविषयत्वात्तज्जातीयं दर्शयितुमाह पूर्वो भाग इति
एतेन यमाच्छ अर्थयोरननुगतत्वे नशब्दानुगमस्याप्रयोजकत्वेन व्यवच्छेद्यानुगमेपि सत्यभावेन स्वपत्रसंघात इत्यादि व्यर्थमेवेत्यपास्तं पादशब्देनात्र स्वातंत्र्येणापि प्रयो
गार्हमर्थवदुच्यते अतएवार्थवत्समुदायानां समासग्रहणं नियमार्थमित्युक्तमत्र भाष्ये भाष्ये तु सुबंतानामितिमनेन भेदसंसर्गेहारकार्थवंत उपलक्ष्यंत इति कैयटेनस्य स्पष्टमेवो
क्तं तेन गावित्ययमाहेत्यादौ गोइत्यादीनां सुबंतत्वाभावेपि न समुदायस्य प्रातिपदिकत्वं अनुकरणस्यानितिपरस्यापि प्रयोगसत्वे नृतेषामपि स्वातंत्र्येण प्रयोगार्हत्वात् ब
हुपटवइत्यादौ प्रातिपदिकत्वसिद्धये स्वातंत्र्येणेति तत्र पूर्वइत्यास्मिन्परेषामपि स्वातंत्र्येण प्रयोगार्हार्थवत्तामेव ग्रहणात्तत्रकाम्येत्यादौ न दोषः अतएवागमसंज्ञास्त्र
भाष्ये प्रत्ययग्रहणे यस्मात्सविहितस्तदादेस्तदंतस्य ग्रहणमिति परिभाषाया फलनिरूपणावसरे देवदत्तो गार्ग्य इति समुदायस्य यञंतत्वेन प्राप्तप्रातिपदिकसंज्ञाया आभा
वः फलत्वेनोक्तः यथाश्रुतमूलोक्तनियमे तु नियमेनैव तदप्राप्त्या तदसंगतिः स्पष्टैव एतेन वृषण्वसुरित्यादौ पूर्वभागस्य भत्वात्पूर्वो भागः पदमित्य [illegible] पास्तं वा
कास्येनेति प्रातिपदिकत्वे हि सुपः श्रवणापत्तिः पिंडीमित्यादौ वा केवलैकदेशप्रयोगे लुक्समासचांशाधिकारवि [illegible] हितसुप्प्रत्ययनिमित्तकार्याणां सुबादेशानां
च वारितार्थ्यं विकल्पेन समासविधानं च स्वराद्यर्थमिति भावः शशशृंगादिपदानां च वौद्धे शशशृंगादौ शक्तिरिति पूर्वरीत्या प्रातिपदिकत्वं सिद्धं स्वप्नाद्यनुरोधेन च बौद्ध
पदार्थस्यापि उपपकत्वं असौ हिरणीरथं तरादिपदेषु अवयवानामत्यंतनिरर्थकानामप्यन्यत्र दृष्टार्थारोपेण प्रातिपदिकत्वसुबुत्पत्त्यादिना यथाकथंचित्साधुत्वान्वाख्यानं बो
ध्यं अधिकारोयमिति संज्ञाधिकार इत्यर्थः संज्ञात्वावगमस्तु व्याख्यानात् विकारागमानां तु न संज्ञा प्रत्यय इति महासंज्ञया स्वस्वप्रकृत्यन्यतरार्थप्रत्यायकस्यैव तत्संज्ञक
त्वात् स्वार्थ कृत्यर्थकत्वे च धातुप्रकृतौ शादेत मुच्चार्यबोधितत्वं अतएव न भवधाद्यादेशानां न संज्ञा तेषां स्थान्यर्थेनैवार्थवत्वं न तु स्वार्थोस्ति अतएव क्रोशादौ तदर्थ।
कथनं एतदर्थमेव भाष्ये स्वीयमर्थं प्रत्याययंतीति विग्रहे स्वीयपदोपादानं भाष्यप्रामाण्याच्च तदर्थांतर्भावेन प्रत्ययशब्दस्य वृत्तिः यत्तु विकारागमादेशानां देशोनिर्दे
कार्यत्वात् [illegible] स्यानुपस्थितौ तत्संनियोगशिष्टप्रत्ययसंज्ञाया अप्रवृत्तिरिति तन्न अमकचवहुच्प्रवृत्त्यापत्तेः किंच लविषयित्वं न विशेषविहितत्वात्परत्वाच्च पू
र्वसीयुट्टित्नित्वात् लादेशप्रत्ययसंज्ञासंनियोगेनेटो विधीयमानमाद्युदात्तत्वं सीयुट एव स्यादतः आगमानुदात्तत्वं वक्तव्यमित्याद्युदात्तश्चेति सूत्रस्थभाष्ये कैयटयसंगतिर्ले

ल·श· स्थानिकत्वेनरेशाशेनिराकांक्षत्वेनपरश्चेत्यस्याप्रवृत्तौ प्रत्ययइत्यस्याप्यप्रवृत्तौ तत्संनियोगकथनासंगतेरितिदिक् परश्चमुपतिजकिरभ्यइत्यादावुपादानत्वासंभवाद्दिग्योगा
शे·सु· लक्षणापंचमी तत्र परः पूर्वो वेति अनियमेनाध्याहारेप्रसक्ते परएवेति नियमार्थमिदं गापोष्टगित्यादावपिषष्ठ्यर्थे आनंतर्ये पूर्वेपरसाधारणमित्यनियमो स्त्येव अ
३३ नंतरमादिरिति परिभाषोक्तरागविकल्पाप्रवर्तेइत्यव्यवहिता एव प्रत्ययाः नचैवंषष्ठ्यंशविकलंसंपूर्णसूत्रमुपतिष्ठतां किंपरश्चेत्यनेनेति वाच्यं प्रकृत्यर्थमात्रविवक्षायां के
वलप्रकृतेः पचयदित्यादिः प्रयोगेमाभूदिति प्रत्ययः परएव भवत्येवेति नियमार्थत्वात्तेन न केवलाप्रकृतिः प्रयोक्तव्या नापिकेवलः प्रत्यय इति अनुकरणोत्तु अभेदवि
वक्षयार्थवत्त्वाभावात्सामिपरिकृतत्वाभावेन प्रकृतित्वाभावात् गवित्ययमाहेत्यादौ नानुपपत्तिः प्रकृतित्वंप्रत्ययविधावुद्देश्यतावच्छेदकाक्रांतत्वं अयंन्यायः शा
स्त्रावोधितान्यतरप्रयोगविषयोस्मन् एवलिडियात्तित्यादौ नदोषोत्रप्रकृतिविशेषोद्देशेनैव प्रत्ययानां विधानान्नापि केवल इतिन्यायमूलकं एतन्मूलकमेवप
व्यते पदंनप्रयुंजीतेति अपरिनिष्ठितमितितदर्थः परिनिष्ठितत्वंचाप्रवृत्तनित्यविध्युद्देश्यतावच्छेदकानाक्रांतत्वं निहतेतिङ्नादावव्याप्तिवारणायाप्रवृत्तेति
विकल्पिकेङागमोद्देश्यतावच्छेदकानाक्रांतेसेद्धेत्यादावव्याप्तिवारणायनित्येतिदिक् ङ्याप्प्रातिपदिकात् समाहारद्वंद्वः ननु परश्चेत्यनेन प्रकृतेरशेषात्प्राति
पदिकाधिकारोव्यर्थः तिङं तानुनदिव्तीयादिः संख्यायास्ति ओक्तत्वाच्च धातुभ्यस्तुनेतिङमपवादत्वात् तस्येत्यादिसमर्थविभक्तिनिर्देशात्तमपुविधौ तिङश्च
तित्राप्यकाच्चनतेभ्यस्तद्धितव्याप्तत्यर्थइतिचेन्न तदभावेस्वार्थेद्रव्यलिंगसंख्याकारकप्रयुक्तकार्यैः सुस्कृतस्य वहिर्भूतापत्त्यादियोग इतिकुत्सितसूत्रस्य भाष्योक्त
न्यायेनतस्याप्त्र्यमित्यादेस्तत्संवंध्यपत्यमित्याद्यर्थेप्रथमोच्चारितवोध्यतप्रत्ययइत्यर्थस्यसत्वेनसार्थकतद्धितानांसुवंतादुत्पत्त्यानुदात्तादेशस्यस्वप्राधान्या
दुपस्थितसुवंतविशेषणाप्तौ सर्वस्यविकारः सार्वइत्यत्रागनापत्तेः सर्वस्यसुपीत्याद्युदात्तत्वात् तदधिकारसामर्थ्यात्तु प्रातिपदिकस्यैवतद्विशेषणमितिनदो
षः स्वंगशिटेत्याद्युदात्तप्राप्तसर्वेशब्दस्यांछादिपाठेनांतोदात्तत्वात् स्पष्टंचेदमन्नभाष्ये नचांतरंगानपीतिन्यायेनलुक् निमित्तप्रत्ययात्पूर्वमाद्युदात्तप्राप्त्यात
स्यसुवंतविशेषणात्वेपिनदोष इतिवाच्यं तेनन्यायेनधर्मिग्राहकमानादंतरंगनिमित्तविनाशकलुकएवप्राबल्यबोधने — नादोषात् सर्वस्यसुपीत्यत्रसैव राम
रीत्यासप्तमीनांतत्वंतत्सप्तमीत्वात्प्रत्ययेपरतः पूर्वकार्यत्वा भावेननलुमतेतस्याप्रवृत्तेः प्रत्ययलक्षणेनसुवंतनतयातस्यांतरंगनिमित्तविनाशकत्वाभावात् अतएव ३३

वस्त्वेवं तामादिवहुव्रीहेराद्युदात्तत्वसिद्धिः नचानुदात्तादिप्रकृतिकषष्ठ्यंतादित्यर्थे नञ्स्त्रैष इति वाच्यं गर्गादिभ्य इत्यादौ सुबंतं प्रति गर्गादीनां विशेषणत्वासंभवाद्गर्गा
लक्षणायाः स्वीकारेपि प्रकृते लक्षणायां मानाभावात् वस्तुतस्तत्रापि न लक्षणा गर्गादिरूपात्प्रातिपदिकात्तत्संबंध्यपत्यमित्यर्थे प्रत्यय इत्यर्थे प्रातिपदिकात्परत्वेत
वधारणेन भविष्यति तत्त्वातिरिक्तव्यवधाने तु न मानाभावात् एतच्च मतुप्सूत्रे कैयटे स्पष्टमित्यन्यत्र विस्तरः लिंगविशिष्टस्येति इयं च प्रातिपदिकसामान्यग्रहणे तद्वि
शेषग्रहणे च अनया परिभाषया ङ्याप्ग्रहणवैयर्थ्यस्य भाष्ये शंकितत्वात् विशेषविषये वृत्तेरोदाहरणदानाच्च स्त्रीप्रत्ययसमभिव्याहारे प्राति प्रदिकत्वेन ङ्याप
धर्माः विशिष्टस्वनेनातिदिश्यंते अतएव वहुव्रीहिरूधस इति सूत्रे भाष्ये नद्युतश्चेत्यस्य नद्यंतस्य वहुव्रीहेरित्यर्थेन कुंडोध्नीत्यत्र कवापादितः अन्यथा तु ङ्यंत
स्य वहुव्रीहित्वाभावात्तदसंगतिः नद्यंतानां यो वहुव्रीहिरित्यर्थेन च परिहृत इत्यन्यत्र समासांतेषु तत्परिभाषाभावस्तु ङ्याप्सूत्रभाष्योक्तो वा समासविषय एव मु
दायविषये न तत्प्रवृत्तावपि दोषाभावेन तदंशे तत्प्रवृत्तौ न मानमित्याशयः ङ्यावंतादिति ङ्याप्ग्रहणं स्त्रीप्रत्ययमात्रोपलक्षणं तेन ब्रह्मबंधूतरा युवतितरेत्यादि
सिद्धिः जातेश्चेति निषेधान्न पुंवत्त्वं वयोवाचिनां वैकल्पिकजातिकार्यस्य वक्ष्यमाणत्वात् तद्धित इति एतच्च समासांततत्प्रत्ययाद्यतिरिक्तपरं व्याख्यानात् ए
तेन यूनीतिर्वहुगोमतीकेति स्यादिरपास्तं एवं च स्त्रीप्रत्ययेषु अस्यांतस्वार्थिकानारभ्यतद्धितेषु च ङ्याप्ग्रहणासंबंधो व्याख्यानात् अतएव लोहिनिकेत्यादिसिद्धि
पि लोहिनादिलिंगबाधनं वेति चरितार्थं अस्यांतस्वार्थिकानां सुबुत्पत्तेः पूर्वमुत्पत्तिरिति सर्वस्य द्वे इति सूत्रे भाष्ये स्पष्टं कैयटे च तत्र हि पदस्य प्रयोजनं द्विपदिकेत्या
दौ द्वित्वसंख्यायुक्तपदार्थस्य वीप्सितत्वात् वीप्सायामेकत्वं समासस्यायाम्र नंतर्भावात् समासाद्विभक्त्यभावेन पदत्वाभावात्प्राक् तद्धितोत्पत्तेः द्विर्वचनाभा
व इत्युक्तं पुंयोगादिति सूत्रे भाष्येपि स्फुटमेतत् तत्र हि गतिकारकोपपदानामित्यस्याः परिभाषायाः सांकुटिनमिति प्रयोजनमुक्तं तत्र हि अभिविधौ भाव इनुणि
कुटिनशब्दादर्शाविभक्तेः प्राप्तयोः स्वार्थिकत्वेनांतरंगत्वादणि कुटिनि तस्यैव वृद्धिः स्यादित्युक्तं तस्यापि सुबंतादुत्पत्तौ तु पूर्वं सुपि इनुणंतत्वरूपाधिकसा
पेक्षत्वेन वहिरंगतयाणः पूर्वसमासविशिष्टादणि रूपसिद्धौ भाष्यासंगतिः प्राक् सुबुत्पत्तेः समासे तु उक्तरीत्यैवांतरंगत्वात्पूर्वं समासेन ततो विशिष्टादणि सांकु
सिद्धिरित्यन्यत्र विस्तरः स्वौज सूत्रे समाहारद्वंद्वः टङ्पाश्चेत इति नच फलाभावः लोपस्यैव फलत्वात् नच तेषां त्र्व्याघटस्याचरितार्थ्यानां लोपफलकत्वस्वीकारे

वै. श. धाकाभावात्कोम्पजादौ तु लोपे सति वर्णोच्चारणवैयर्थ्यान्न तन्मात्र फलिकेत्संज्ञेति बोध्यं नविभक्तौ वितिनिषेधोपयोगिनो विभक्तिसंज्ञा इति विभक्तिश्च चकार
शे. सु. एकसंज्ञाधिकारेपि पुरुषवचनसंज्ञाभ्यां समावेशार्थो ऽन्यथा पर्यायः स्यात् सुप इति सूत्रं तिङस्त्रीणि त्रीणीति सूत्रात्तिङ इति चानुवर्त्तनेन प्रथममयोरित्यादौ व्याख्या
३४ नात्प्राचां वैयाकरणानां प्रथमाद्वितीयापदवाच्ययोर्ग्रहणं बोध्यं अन्यथा औजसोः पूर्वेत्येवं वदेत् विभक्तिप्रदेशेषु सुप्तिङि तिन वक्तुं शक्यं यत्र तत्रेत्यादौ त्यदाद्यत्वा
नापत्तेः तेषां सुप्संज्ञात्वशंकया एतर्हि इत्यादौ सुपि चेति दीर्घापत्तौ सप्तम्यंता इति स्त्रीलिंगा इति शेषः प्राचां वैयाकरणानां इहापि अस्मिन्व्याकरणेपि सुपः सुवि
त्रिपीत्याह अत्र द्व्येकयोः नियमार्थं इमे इह सूत्रे द्व्येकशब्दौ संख्यापरौ न संख्येयपरौ वहुवचनापत्तेस्तदाह द्वित्वैकत्वयोरिति लौकिकप्रयोगे त्वादृशातः संख्याः सं
ख्येयइति कोशभाष्याद्युक्तेः संख्येयपरत्वमेव प्रायः साधुत्वं क्वचित्संख्यापरत्वेपि संख्येयगतसंख्यारोपेण साधुत्वं अत एव कस्य द्वित्वमित्याद्यर्थे कयो द्वयोः केषां वहु
ष्विति भाष्यप्रयुक्तमिति बोध्यं एकशब्दो द्विशब्दसाहचर्यात्संख्यावाच्येव एकग्रहणात्पक्षे एकवचनमुत्सर्गः कर्तव्यस्तेनाव्ययेभ्यः पचति कल्पमित्यादौ
त्वव्ययैकवचनप्रयोगसिद्धिरिति तद्वितश्चेति सूत्रे भाष्ये स्पष्टं वहुषु वहुशब्दो त्रित्वादिपरो द्वौ तसंख्यानां व्यापको यो धर्मविशेषो वहुत्वं तत्परः वहुवचनं त्वा त्र
योगं तं वहुत्वं धर्मे आरोप्य कृतं तेन वैपुल्य वाचिनो ऽनयहसं दारा इत्यादौ त्वव्ययवादिगतवहुत्वस्यावयविन्यारोपो बोध्यः स च कोशरूढ्व्यवहारानुसारेणैवेति न
प्रसंगः भर्तृदारा याम् एते जसोरित्यादौ वृत्तौ तु द्विवचनमेवारोपमानाभावात् अत एव द्व्येकयोरिति संगच्छते एतेनैकस्मिन्नपि गुरवः समागता इत्यादि सम र्थितं
अन्वर्थ सज्ञयैव सिद्धे इदं सूत्रद्वयं स्पष्टार्थं एमइति एत्वे एकदेशविकृतन्यायेन सुवंततया प्रत्वा द्विसर्गः सरूपाणां वृद्धो यूनेति सूत्रादेकारोपकृष्यत इ
त्याह सरूपाण्येवेति तेन जननी परिकृत्वाचिनो मातृशब्दयोर्भ्यामिनेकशेषः नचैकविभक्तौ वितिव्यर्थं यानि सरूपाण्येवेत्युक्तौ वोक्तदोषवारणादिति वाच्यं
हरिणस्त्रीवाचकहरिणीशब्दस्य हरितवर्णविशिष्टस्त्रीवाचकहरिणीशब्दस्य चैकशेषानापत्तेः पुंवद्भावेन तद्धितादौ वैरूप्यात् हरिणीति लौकिके प्रयोग इति शे
षः एकशेषस्यायमनैमित्तकत्वेनांतरंगत्वाद्विभक्त्युत्पत्तेः पूर्वमेवेति एतद्विषये द्वंद्वप्राप्तिरेवनेति बोध्यं ननु तत्रैव सिद्धे किमर्थं यथा अक्षाः भज्यतां भुज्यं राम:
तां दीव्यंतामित्यत्राक्षा इति कारकस्य सकृदुपादानेपि सर्वत्रान्वयः तत्र कारणं तु शब्दानां तुल्यरूपता एवमक्षा भज्यंतां भुज्यंतां दीव्यंतामित्यत्रापि। तत्र ॥ ३४

द्विधा शब्दतंत्रमर्थतंत्रं च शब्दस्य पर्यायपरित्यक्तस्य सहत्वे आद्यं यथा अक्षाः इत्यादौ तत्सहत्वेऽन्त्यं यथा पटाः इत्यादौ तत्राक्षा भज्यंतां भुज्यंतामित्यादावन्वयिपदार्थभेदा
र्थभेदाद्वौ द्रुग्धक्षपैव बोधः उच्चारणं तु तंत्रेण अन्वयिपदार्थस्यैकत्वे तु एकोपस्थित्यैवान्वयो यथा अक्षा न्यश्यपटा न्यश्येत्यादावि ति चेत्सत्यं सरूपाणामेकशेषएव
वेति नियमार्थत्वात्फलं तु प्रत्यर्थं शब्दनिवेशस्यापि दर्शनेन कदाचित्तादृशप्रयोगप्राप्तद्वंद्वस्य निवृत्तिः स चायं नियमो विभक्तौ यानि सरूपाण्येव तद्विषयः सहविवक्षा
विषयश्च अत एव विभक्त्यंतानामेकशेष इति पक्षे द्वंद्वप्रतिषेधो वक्तव्य इत्याशंक्यानवकाशएकशेषो द्वंद्वं बाधिष्यते इति भाष्ये उक्तं किंचासहविवक्षायामपि
तत्प्रवृत्तौ सहविवक्षायां द्वंद्वस्येवान्यत्र कर्मधारयस्यापि बाधापत्तौ सारवसारवो मिंजइत्यादिप्रयोगविरोधापत्तिः असहविवक्षाविषयेण विभक्त्यंततंत्रेण ब्राह्म
णाभ्यां कृतं दंहि पयोजरयतीत्यादिनीलोत्पलस्पर्द्धिनौ नेत्रे तनु वो हरिरिति वो हहन्मानसहेसैति वच्चेत्थमेवेति बोध्यं न चासहविवक्षायां तत्र सत्त्वे इदित इति गु
णे निर्देशो व्यर्थः अन्यपदार्थावगतये तत्सत्त्वात् इद्यस्य धातोरिति करणे तु गौरवं एतच्च सूत्रं भाष्ये प्रत्याख्यातं अर्थाव्यर्थौ प्रति पदर्थो नर्था अनि च यत्तदपि प्र
सर्थमेवेत्याशयेन अनेकघटादिपदानां साहित्ये वृत्तिरेव नानभिधानात् एकस्यैव त्वनेकार्थस्य तत्र वृत्तिरभिधानस्वाभाव्यादिति तदाशयः द्विवचनेचौ
त्यादावेकशेषशब्दस्तु भाष्ये तत्र पाः सचोच्चारपितुर्वा दृस्त्वाद्वृत्तिरेवेति बोध्यं एकविभक्तावित्यत्रैकपदं तु स्पष्टार्थं एकस्यामपि विभक्तौ यानि विरूपाणि ने
त्यर्थबोधयितुं ध्वनितं चेदं विभक्तिसारूप्ये उपलक्षणमिति भाष्ये एकपदानुच्चारणेन समाहारद्वंद्वविषये तु नैकशेषः एकवच्चास्यान्यतरस्यामित्यनेनैकशे
षविषयपदानां समाहारे द्वंद्वस्य भावबोधनात् न ब्राह्मणं हन्यादित्यादौ तु जातिपक्षेणैव निर्वाहः अत एव तत्र व्यक्तिपक्षे यं कंचिद्ब्राह्मणमहत्वा कृतार्थः स्यादि
ति दृष्टर्णभाष्ये उक्तं एकशेषशब्दार्थश्चेतरनिवृत्तिपूर्वकमवस्थानं तदाह एक एवेति एकेति लुप्तविभक्त्यंतं पृथक्पदं अत एव तत्र सरूपाणामित्यस्यानय
न्यावस्थानस्य सिद्धं तया निवृत्तिरेव विधेया तत्र शिष्यमाणं लुप्यमानार्थाभिधायीति न्यायेन श्रूयमाणपदवृत्त्या बोधः धातुषु तु नास्य प्रवृत्तिः एकनिष्ठानो
कव्यापारणामिवानेकनिष्ठानामपि एकधातुत एव निवृत्तभेदानां प्रतीत्यानेकधातुप्रयोगाप्रसक्तेः सरूपाणां किं घटपटौ शेष इत्येतन्मात्रोक्तौ द्विवह्वोरपि शेषप्र
प्रसज्येत एक इत्येतावदुक्तौ त्वेकआदेश इत्यर्थः स्यात्तथा चाम्बश्चाम्बश्चेत्यादौ कदाचित्तु दात्तवत्व ——— दायश्चानुदात्तवत्त्वरूपैतास्यमादायोभयस्व

ल॰ शे॰ पितकादेशं प्रसज्येत नचाग्रस्यादेवनस्येति फिट्सूत्रेण शकटाक्षे आद्युदात्तस्यैवनाक्षे फिषइत्यंतोदात्तस्यैकशेषे कदाचिदंतोदात्तस्यापि शेषः स्यादिति वाच्यं स्वर
शे॰ सु॰ भिन्नानां परस्परं स्वरविधिरिति वचनेनैव निर्वाहात् एकादिद्वयंतसंख्यावाचिनामेकशेषद्वंद्वावनभिधानान्न भवतः विंशत्यादौ त्विष्ट एवैकशेषद्वंद्वावित्यलं चुटू
३५ आदिर्ञिटुडवः इत्यत आदिरिति षः प्रत्ययस्येत्यतः प्रत्ययस्येति चानुवर्त्तते तदाह प्रत्ययाद्याविति तेन वाचाटेनेत्वं प्रत्ययेति किं चाभ्रादावित्वं माभूदि।
ति चुंचुपचणपौ योदित्वात्परनिमित्तयलोपस्य बहिरंगासिद्धत्वात् प्रत्ययादित्वाभावान्नेत्वं नविभक्तौ हलंत्यमित्यस्य निषेधोयं अनित्यमिदं यमोर्मका
द्यपरित्राणार्थमुदित्करणात्तेन किमोत्केति सिद्धं प्राग्दिशीयत्वादयं विभक्तिः अत एवेदानीं मोमस्य नेत्वमिति नव्याः भाष्ये तु प्राग्दिशीये यस्य प्रवृत्तावुदित्वं ज्ञापकमि
त्युक्त्वा दानीं चेति सूत्रे लोपो व्योरिति लोपिनयकारप्रश्लिष्टेत्संज्ञावारिता अन्यत्रानित्यत्वस्य फलाभावाच्चैवमे — वोक्तं लोपस्यासिद्धत्वाच्चानांत्यत्वमिति वोध्यं विभक्तौ पि
मचोयत् अतेगुणे उस्यपदांतादित्यतोपदांतादिति एङिपररूपमित्यतः पररूपमिति चानुवर्त्तते पुरस्तादिति अत एव नादिचोतीदूग्रहणं चरितार्थं नाद्धिरमाः एमा
नित्यादौ दीर्घनिषेधाभावाय पररूपेण पूर्वसवर्णदीर्घे वाधिते हि दीर्घस्यैवमेवनोत्तरानिति — अनंतरापेक्षयोत्तरानव्यवहितानित्यर्थः एकवचनं संवुद्धिरित्युचितं संवोधनेचे
त्यतः संवोधनइत्यनुवृत्तेः सप्तमीवहुवचनेनदोषः संवुद्धावंगस्य गुणइतिव्यवहारएन्नंतदंतस्यसंज्ञा तस्मात्पारायणादावदृष्टार्थमेवंन्यास इति वोध्यं संवुद्ध्याक्षिप्तप्रत्यया
ति संवुद्धेः अयत्वेन यस्मात्सविहितस्तदादीत्यंशोपस्थितिः सचात्रयोग्यतया पंचम्यंत इतिभावः प्रत्ययेगृह्यमाणेयस्मात्सविहितस्तदादिरित्यापुपतिष्ठतइतिप्रत्ययग्रहणेयस्मात्
विहितइत्यादिपरिभाषार्थइत्यंगस्येतिसूत्रेभाष्यस्यापि अनुमानरूपाक्षेपमूलत्वात्फलाभावात् पथापीनत्वनपपत्त्यानुमीयमानरात्रिभोजनस्य पीनत्वोपपत्तिः फ
लंनतथात्र एतत्सूत्रेण तदनुमानेन संवुद्ध्युपपत्तिर्भवति किंच प्रत्ययस्योत्पत्तावंगापेक्षत्वेपि ज्ञानेतद्ग्रहसापेक्षत्वाभावेन शास्त्रेतदाक्षेपमानाभावः अत एवांगस्येति सूत्रे ता
स्यांगस्मात्प्रत्ययइत्यधिकारः कार्यइति पक्षे प्राकरणादित्यादौ उपसर्गात्पूर्वं मडादिः स्यादित्याशंक्य प्रत्ययग्रहणेयस्मात्सविहितस्तदादेरिति परिभाषोपस्थित्यासमा
हितंभाष्येनत्वंगाक्षेपेणेतिदिक् अंगस्य उक्तार्थस्य हल्ङ्याविति सूत्राद्धलित्यनुवर्त्तनेहेकतरादिति प्रकृतसकारस्य टिलोपेनापहारादिति भावः नन्वंगात्परस्याः राम
संवुद्धेरवयवस्य हल्ङ्यालोपइत्युचितं संवुद्ध्याक्षिप्तप्रत्ययसंवुद्ध्यैवान्वयस्योचितत्वादत आह कुलेनेति अत्र परत्वात्पूर्वरूपे उभयत आश्रयणे नादिवद्भावाभावात्त ३५

कारेपि ह्रस्वसंबुध्योः पौर्वापर्यव्यवहारासंभवान्नाहृष्पानतिदेशाच्च ह्रस्वान्तांगात्परसंबुद्धेरभावान्न लोपो न स्यादेवं च लक्ष्यानुरोधादन्यास्विन्न स्याप्यन्यत्रान्वय इति भावः एतद
र्थमेव हल्लुप्यते संबुद्धेश्चेदिति व्याख्यातमस्य संबुद्धित्वाभावादङ्गविकारेणैकदेशविकृतन्यायेनापि न संबुद्धित्वं एकवचनसंज्ञा संबुद्धिसंज्ञयोरेकपरिमाणनिष्ठतया तयो
स्तेनन्योर्विजालाभाच्च मकारस्यादेशाभावाच्च नात्र स्थानिवद्भावः अत एव राममित्यादौ सुपि चेति दीर्घोनेन च संबुद्धित्वस्य सकारमात्रनिष्ठत्वेन स्थानिभूतात्स्थमेत्वेनामः संबु
द्धित्वाभावे कर्थमस्य संबुध्यव्यवत मिति वाच्यं सुसंज्ञाया उकारविशिष्टसत्वेन तद्रूपस्याप्युपजायमानैकवचनसंज्ञाया विशिष्टसत्वेन संबुद्धिसंज्ञायामित्संज्ञोकारविशिष्टस्य
वोद्देश्यत्वेन तस्यैकलविधित्वात् एतेनादड्डादेशेनैव नपुंसकत्वाभिव्यक्तौ कुलेतिव्यर्थमित्यपास्तं एङ्ग्रहणं किमिति हरे विष्णो इत्यादावङ्गाधिकारस्थात्परनिमित्तापेक्षा
च्च गुणात्पूर्वं ह्रस्वान्तत्वादेव सिद्धिः सेप्रभृतीनां संबोधने प्रयोगसत्वे एङ्ग्रहणेनैव सिद्धे प्रत्याहारग्रहणं व्यर्थमिति प्रश्नः हरे इति सामर्थ्यादेवात्र संनिपातपरिभाषानगुणा
संबुद्धेरिति वक्तव्ये एङ्ग्रहणसामर्थ्याच्च अत एव हे लक्ष्मि इत्यादौ लोपसिद्धिः परत्वादिति अभ्युच्चयः नित्यत्वाच्चेति चेनानवकाशत्वसंग्रहः नपुंसकेत्र पो इत्यादावस्यापि
लुका बाध इत्यन्यत् अमि पूर्वः पूर्वसवर्णो इत्यनुवृत्त्यैव सिद्धे पूर्वग्रहणं तु राममित्यादौ ह्रिमात्रननुवारणाय लशक्कु समाहारद्वन्द्वः अतद्धिते किं करतललाटात्कन्नलं कोर
कर्णिकाकित्वफलं त्वोदितोद्धि स्यात् आदिग्रहणं ह्रांङ्खाकं नो न तस्य कित्वे गुणो न स्यात् तस्माच्छ पुंसीति पंचम्यर्थे सप्तमी पुंसो विहितस्येत्यर्थः तत्र विद्यमानादि
हितस्येत्यर्थो वा तस्मादिति किं एता आः पश्य पुंसि किम तीः अङ्कु बाधितुमिति तेन पर्याण इमित्यत्रोपसर्गादसमासेपीति णत्वसिद्धिरिति भावः अयोगवाहानामिति न
विद्यन्ते योगो येषां समाम्नाये येषां ते ऽयोगाः अनुपदिष्टत्वादुपदिष्टैरग्रहीतत्वाच्चेत्यर्थः ते च ते वाहयंति प्रयोगं निर्वाहयंतीति ते वाहाः ते चानुस्वारविसर्गजिह्वामूलीयोपध्मानी
ययमाः अत एवारः केणेत्यादौ विसर्गव्यवधानेपि णत्वसिद्धिः तदुक्तं भाष्येनार्थो नुम्ग्रहणेनानुस्वारभूतेः ऽड्व्यवायेत्येव सिद्धमिति आदेशेनेत्यादौ तु नातिप्रसंगः अडिति
त्रिसंख्याव्यापात् तस्मादित्युपस्थितं निर्दिष्टग्रहणमेतत्समभिव्याहारेऽड्डादि व्यवहितातिरिक्तपरं तदुक्तं णत्वेन्यप्रतिषेधो वक्तव्यो नवान्येनव्यावहितत्वादितियं
थनशं तदुच्चारमध्यव्यवायसत्वान्मासन्नोत्येव अट्टैकव्यवाये इत्यर्थ्या दित्यादिभाष्यमेकदेशिनो रुक्तिप्रत्युक्तिपरं चुट्टुतुलशर्व्यावायेनेति प्रतियोगिज्ञानसापेक्षनिषेधवा
कराहन्यासेन सिद्धे इकुप्वाङ्नुतपा एतैरेव व्यवाय इत्यर्थवदनात तस्मात्तदुक्तित्वधननात् एतद्वार्तिकमत भाष्ये तु रषाभ्यामिति सूत्रे ऋवर्णान्नस्येत्यस्य प्रत्याह

प॰ शे॰
शे॰ कु॰
३६

व्यवायर्यतियोगविभज्याऽऽकृपा इ॰ नु मृभिरित्येतदेतौ स्वासरसमाम्नायिकैर्व्यवायेनाम्रैरित्यर्थकं व्याख्यातं तदात्वादर्शनेत्यादौ प्राप्तिरेकेनेतिवोध्यं णत्वे णकार इत्यर्थः पू
र्वांतस्य नभाभूपूइतिसूत्रान्नानिवर्त्तते अत्र सूत्रे अनंतरस्येत्यादिव्यवस्थापकन्यायानाम प्रवृत्तिर्वोध्या अपदांतस्येत्यनुवर्त्यैतस्य भाष्ये प्रत्याख्यानात् यस्मात्प्रत्य
ययः यस्मादिति तदादीति तच्छब्दाकांक्षापूरणाय तदादीति तत्र कृतिमुपमादिर्यस्येत्यर्थः प्रत्यासत्तिन्यायलब्धार्थमाह तस्मिन्प्रत्यय इति गुणः कृतात्मसंस्का
र इति स्थानिवद्भावेनात्रापि तस्मिन्निति परिभाषाप्रवृत्तिः प्रकृतिमात्रस्यतु व्यपदेशिवद्भावेन तदादित्वं बोध्यं स्त्री इयतीति इदम्शब्दात् वतुपि वस्य किमिदंभ्यां वो घ इति घादे
शे तस्य यादेशे इदंकिमोरीश्की इतीशि यस्येति लोपे ङीपि इयती इति रूपं न च तत्र परतः स्त्रीशब्दस्ये यङाद्यापत्तिः रूपादोषो न यस्येति लोपस्याभीयत्वादसिद्धत्वेनात्र तदप्राप्ते
रिति वाच्यं व्याश्रयेणाभीयासिद्धत्वाप्राप्तेः तत्र हि समानाश्रयत्वमसिद्धत्वाश्रयशास्त्रसंबंधिनिमित्तसमुदायान्यूनानतिरिक्ताश्रयकत्वं अस्ति च यस्येति लोपा
पेक्षया स्त्रिया इति सूत्रे धिकस्य स्त्रीशब्दस्यापेक्षा मत्यासत्त्या जादिप्रत्ययनिरूपितांग एवेयङः प्रवृत्त्या स्त्रीशब्दस्यतु निरूपितांगत्वेपि न दोषः विधिग्रहणादेवभन
ञीत्यादावतो दीर्घो यञीति न तदादिग्रहणं करोमीत्यादौ विकरणस्य गुणार्थं प्रत्ययविशिष्टस्येति न चासति अंगेन प्रत्ययपरत्वलाभानापत्तौ वृश्च्येत्यस्यासिद्धिः किंच
राजपुरुष इत्यादौ न लुमतेति निषेधात्पूर्वपदे पदत्वाभावेन न लोपानापत्तिरितिभावः ततोप्यधिकस्यवेति देवदत्त ओदनमपाक्षीदित्यादौ देवदत्तादिशब्दोत्तरसुपनिमि
त्तीकृत्य लङः पर्यंतमगत्वात्तस्य लुङ्परत्वेन देवात्पूर्वमडापत्तिः अंगसंज्ञायाः प्रत्ययनिमित्तत्वाभावेन लुङादिनिरूपितांगस्य तत्पर्यंतस्य दुर्लभत्वादितिभावः टाङसि
ङसामिनात्स्याः अतो भिस ऐस् इत्यतोनुवृत्तेनात इत्यनेन पंचम्यंतेन सामानाधिकरण्यानुरोधात्पंचम्या विपरिणाम इत्याह अकारांतादिति अकारात्परेषामंगसंज्ञानिमित्त
टादीनामित्यर्थः इति पक्षांतरं भाष्ये किंचादंतादित्यर्थेपि ब्राह्मणाभिस्सेत्यादावतिप्रसंगः ब्राह्मणोत्पस्यापि युवोरनाकाविति सूत्रभाष्योक्तरीत्या तर्ववर्ति विभक्त्यांगत्वा
त् अर्थवत्परिभाषया प्रत्ययग्रहणपरिभाषया वा प्रत्ययस्यैव भिसो ग्रहणे त्वेषामंगाधिकारे पाठो व्यर्थः भिसः प्रत्ययस्यैक्यग्रहणे हि प्रत्यासत्त्यात्तन्निरूपितांगस्य ग्रह
णमिति युज्यते वक्तुं नान्यथा इदमेव हि अतो भिस इत्यत्रांगाधिकारस्य प्रयोजनं भाष्ये दत्तमित्यलं सुपि च अतो दीर्घो यञीति अनुवर्त्तनेयञीत्यनेनात्विधित्वा। राम॰
त्तदादिविधिरित्याह यञादाविति ङेर्यः चतुर्थ्येकवचनस्यैव ग्रहणं व्याख्यानादित्याह ङे इत्येतस्येति संनिपातेति उपजीव्यविरोधन्यायमूलेषा संनिपातः सश्लेषः ३६

तन्निमित्तको यो विधिस्तं संनिपातं यो विहन्ति स तद्विघातस्तस्यानिमित्तमित्यर्थः नच यञादित्वसापेक्षदीर्घस्य बहिरंगतयासिद्धत्वान्नात्र संनिपातविघात इति वाच्यं अपे
पितासिद्धत्वेपि वस्तुतस्तद्विघातस्य जायमानत्वेन तत्प्रवृत्तेः किंचांतरंगे कर्तव्ये बहिरंगस्यासिद्धत्वेपि तत्र कृतेऽसिद्धत्वे मानाभावः किंचातिदेशिकसंनिपातविघाता
भाव[illegible]येतदप्रवृत्तौ गौरीत्यादौ संबुद्धिलोपेपि स्थानिवत्त्वेन ह्रस्वनिमित्तविघाताभावात्तत्रैतस्या अनित्यत्वाप्तिपरभाष्यासंगतिः संनिपातस्यांशाशास्त्रीयत्वान्नात्र।
स्थानिवत्त्वमिति चेत्तत्रासिद्धत्वमपि कथमिति वद कार्यस्य निमित्तं ययोः संनिपातः स्तयोस्सूत्रे उपादानमिति तु नाग्रहः अतएव दासिरित्यत्राकारांतप्रकृतौ संनिपा
तनिमित्तांगसंज्ञानया परिभाषयाल्लोपस्य निमित्तेन स्यादित्याशंक्यानित्यत्वेन समाहितं भाष्ये कृन्मेजंत इति सूत्रे नह्यंगसंज्ञायामदंतस्यांगसंज्ञेत्युक्तमस्ति न च कष्टा।
येत्यस्याकृत्सार्वेति दीर्घेणोपपत्तेरनित्यताज्ञापकं कथमिति वाच्यं तस्यापि संनिपातपरिभाषयाऽप्राप्तेः विरोधाभावात्फले विशेषाभावाच्च परत्वेप्यकृदिति नोप
न्यस्तं तस्याकृदित्यादिपर्युदासेनासुप्येव प्रवृत्तिरित्यन्ये झलिकिमिति उतो वृद्धिरित्यतो हलित्येवानुवर्त्यं संनिपातपरिभाषया रामाणामित्यत्र न दोष इति प्रश्नः।
झल्ग्रहणमेत्वे संनिपातपरिभाषाया अप्रवृत्तिज्ञापनार्थं तेन सर्वेषामित्यादावेत्वसिद्धिरित्युत्तरं एतेन बहुवचने किं रामस्येति व्याख्यातं रामाभ्यामित्यपि प्रत्यु
दाहरणं बोध्यं बहुवचने झल्लोगिति तु न सूत्रितं ज्ञानयोरित्यादौ नुमापत्तेः जश्त्वमिति बाधित्वेति शेषः अवसाने च त्वे स्यपदांतजश्त्वापवादत्वात् द्वित्वे रूपेति
पूर्वत्रासिद्धमद्वित्वे इति न्यायाच्चर्त्वे जरद्वित्वे बोध्यं नादेश इति अन्यथा स्वरि चेति चर्त्वे न सिद्धाविदं व्यर्थं स्यादिति भावः ह्रस्वन ह्रस्वनद्याप इति पंचमी आमिस
वेनाम्र इत्यत आमीति वर्तते तच्च षष्ठ्या विपरिणम्यते नामीति लिंगादित्यत आह ह्रस्वांतादित्यादि आमत्र षष्ठीबहुवचनमेव न तु ङे रामादीति स्पष्टं भाष्ये यत्तु
नुडिति विभज्य सामान्येन नुड्विधेयः नद्याप इति दीर्घांताच्चेन्नद्याप एवेति नियमार्थमिति दीर्घेषु न दोषः हलंताच्चेत्षट्चतुर्भ्य एवेति नियम इति हलंतेषु न दोषः एवं
च ह्रस्वग्रहणं न कार्यमिति तन्न नद्याप इत्यस्य स्त्रीलिंगानां चेन्नद्याप एवेति नियमपरतयापि व्याख्यातुं शक्यत्वेन नदीत्वापत्वयोर्ह्रस्वेपि दृष्टत्वेन त्वदुक्तनियम
मे ह्रस्वलक्षणाभावेन च मतीनामित्यादौ नुडनापत्तेः नामि ढ्रलोप इत्यतो दीर्घ इत्यनुवर्तने अंगस्येति किं चर्मणां नन्वामीत्येवास्तु नित्यत्वात्पूर्वं दीर्घेपि ह्र[illegible]
तान्नुडित्येतत्सामर्थ्याद्भूतपूर्वह्रस्वांतत्वमादाय नुट्सिद्धेः नच नृ चेति दीर्घविकल्पान्नृणामित्यत्र नुट् चरितार्थः नृन द्याप इत्येव सिद्धेः तदुक्तं भाष्ये नैकमुदाहरणं योगारं

ल· श· संप्रयोजयतीति तिसृणामिति षट्चतुर्भ्यश्चेत्यत्र त्रेरित्यनुवृत्त्या सिद्धमिति भाष्ये स्पष्टं एतेन त्रेस्त्रय इति न्यासे भाष्यतात्पर्यमित्यपास्तं चतसृणां प्रियचतसृणामित्यत्र षट्चतु-
शे· सु· र्भ्य इति सिद्धं गौणे तु मत्तदभ्यस्तौ तु न मानं बहुवचनं तु लाघवार्थं द्विवचने हि चतुर्भ्यामिति गुरुनिर्देशः स्यात् नैकमुदाहरणमिति भाष्यविरोधश्च समाहारद्वन्द्वेन निर्देशे कार्यं बहु-
३७ वचननिर्देशस्तदर्थमिति तु न युक्तं न स्थिदधि तिसृभ्यो जसश्चेत्यादौ व्यभिचारात् नृचांमाधिकारे पंचम्याय दुच्यते वक्ष्यमाणविभक्तेस्तद्धर्वतीति सर्वादिसूत्रभाष्याद्वक्ष्यमाणाद्धि
हि तद्विभक्तेरित्यर्थकादस्य तु देगौणे ऽप्रवृत्तिः षड्भ्य इत्यत्रापि विहितविशेषणमेवेत्याशयेन परमपंचेत्यादौ लुगभावमाशंक्य षट्प्रधान एव समास इत्युक्तं समासस्य षट्प्रधा-
नत्वे न संख्याप्रकारकसंख्येयबोधजनकत्वेन षट्त्वसत्त्वान्न दोष इति तदर्थः स्मांतेत्यत्र लोके गणानायां प्रसिद्धानामेव ग्रहणमित्यत्र न मानं प्रकृतेपि तथैव षड्भ्यं इत्यादौ पं।
चम्या विरुद्धविभक्तित्वादंगस्येत्यनेन संबंधायोग्यत्वाद्विहिते त्यध्याहारेणा प्रत्ययविशेषणतैवेति भाष्योक्तेरिति गौणे नु टोऽप्रवृत्तिरिति वाच्यं नामीति सूत्रस्योक्तभाष्यप्रामाण्या-
न्नुट् विधायके विहितपदानध्याहारेण षडादिभ्यः परस्यागसंज्ञानिमित्तस्यामो नुडित्यर्थेन गौणेपि प्रवृत्तेः अतो भिस इत्यादावंगस्येत्यस्यैवमन्वयस्यैवांगसंज्ञासूत्रे भाष्य उक्त-
त्वात् अत एव परमचतुर्णामित्यादौ नुट् यद्यप्येवं षड्भ्यो लुगुतरादिभ्य इत्येतयोरपि वक्तुं शक्यं तथापि लक्ष्यानुसारात्तत्र तत्र विहितविशेषणं विरुद्धविभक्तित्वादिति भाष्या-
त्तु शक्तिस्त्वेकदेशिन इति बोध्यं अद्दुतरादिभ्यः षड्भ्यो लुगिति च अनयोरेवसर्वादिसंज्ञासूत्रे भाष्य उपन्यासाच्च षड्भ्य इत्यादेः षडर्थगतसंख्याभिधायिजश्शसोरित्यादिक्रमेणा-
र्थ इति कैयटोक्तं तु अद्दुतरादिभ्य इति सूत्रे भाष्यविरोधादिभिर्दूषयिष्यते न च पदादन्तामित्यादावतिप्रसंगः ह्रस्वत्वेनाममात्राकालिकात्वं तत्र सामर्थ्याद्विशेषणभूतमात्राकालि-
कत्वांशे भूतपूर्वगत्याश्रयणं न तु विशेष्यभूताच्त्वांशेपीत्यदोषादिति चेन्न नोपधाया इत्युत्तरार्थत्वात् तेन च मणामिति दीर्घाभावः सिद्ध इति दिक् परिभाषाविरोधादिति
सर्वत्रानित्यत्वाश्रयणमात्माभाव इति भावः कृताकृतप्रसंगित्वान्नामीति नित्यं न च विशेषाभावेन फलाभावान्न कृतेत्त्वान्निरिति वाच्यं विशेषाभावेपि पर्जन्यन्यायेन शा-
स्त्रप्रवृत्तेरिति शंक्यं क्तिति सूत्रे भाष्ये उक्तत्वात् आयादय इति सूत्रे भाष्ये स्यादिभिः परत्वादायादिबाधमाशंक्यानवकाशत्वादायादयः न च गोपायतीत्यादिरवकाशः अत्रा-
पि शपः स्यादेः प्राप्तेः न च नास्ति विशेषः अन्यदिदमुच्यते नास्ति विशेष इति यदुक्तं आयादीनां स्यादिभिर्व्याप्तेरनवकाश इति स नास्त्यवकाश इति भाष्योक्तेश्चेत्यपि बोध्यं आ- राम·
रंभेति यत्तु कर्तॄणामित्यत्र षट्चतुर्भ्य इति नुट् सिंनिपातपरिभाषाया अप्राप्तेः सावकाशत्वमस्त्येवेति तन्न न ह्येकमित्युक्तन्यायेन कर्तेनोमीत्येव सिद्धे सामान्यसूत्रारंभेत्यर्थो २

त् स्वंचनतिसच्चतस्मित्यकरणेनलाघवमितिभावः नुदीतिनुनोक्तं उणादीनां व्युत्पन्नत्वपक्षेभङ्गः किन्तुद्वेतिनिष्पन्नभंगशब्देदीर्घापत्तेः इदमेवव्युत्पत्तिपक्षेज्ञापकमिति
दिक् अपदांतस्यषइत्येवसिद्धेमूर्द्धन्यग्रहणमिणःषीध्वमित्यत्रढत्वविधानार्थं रषाभ्यामित्यत्रानुवृत्त्यर्थंचसत्त्वंचतत्रणग्रहणंपदांतस्येतिचनकर्त्तव्यमितिभाष्यस्पष्टं इण्कोः
षत्वंणत्वंचर्त्वस्यासिद्धत्वात्तस्मिन्नित्याद्यर्थं आदेश प्रत्ययशब्दस्तद वयवपरोव्याख्यानात्प्रतीतेः षत्वनिषेधात्त्रिंगाद्यत्वतदाह प्रत्ययावयवेत्यादि विवृताघोषस्येतिविवृतत्व
रूपाभ्यंतरप्रयत्नवतोऽघोषरूपबाह्यप्रयत्नवतश्चेत्यर्थःठकारोच्चारणाद्यर्थंऋकारोच्चारणायद्वितीयं रामस्येति टाङसीतिसूत्रेसकारोच्चारणंत्विण्कोरित्यनुवृत्त्यावेदतात्पर्यग्रा
हकमितिभावः सर्वादीनि तद्गुणसंविज्ञानोवहुव्रीहिः आदिशब्दोवयववाची तेनसर्वशब्दघटितउद्भूतावयवभेदःसमूहःसमासार्थइतिवहुवचनंउद्भूतावयवभेदइत्य
स्यारोपितावयवभेदस्यव्यावृत्तये सर्वादीनाम्गणस्यत्वंइत्यर्थः तत्रवैयर्थ्यादप्रवृत्तावपिअवयवेषुप्रवर्तमानाःविशेषात्सर्वशब्देपिभवति सर्वनामानीत्यत्रपूर्वपदादितिणत्वं अतएवनिपातना
न्न नाप्राप्तेणत्वेकृतस्यनिपातनस्यतद्वाधकत्वाण्णत्वसहितमसाधुइतिस्पष्टंभाष्येप्रयोजनंसर्वनामाव्ययसंज्ञाया मितिवार्त्तिकात्तत्स्वरूपंविशेष्यमादायज्ञापकात्तदंतविधि
रित्याह द्वंद्वेचेतीति प्रथमार्थेसप्तमीद्वंद्वःसर्वनामसंज्ञोमेतितदर्थः नहितदंतविधिंविनासमुदायेसंज्ञाप्रवृत्तिरस्तियान्निषिध्येतेतिभावः ननुतदंतस्यापिसर्वनामत्वेपरवं
नाम्नः स्मेइत्यादिषुसर्वनाम्नोविहितस्यङेःस्मैइत्यर्थाश्रयणेनातिसर्वादौदोषाभावादुपसर्जनप्रतिषेधोनकार्यइतिभाष्येसूचितंविरुध्येतेतिचेन्नप्रयोजनंसर्वनामाव्यय
संज्ञायामितितदंतविधिसूत्रस्थवार्त्तिकभाष्यविरोधेनास्यभाष्यस्यैकदेश्युक्तित्वात्इतरथावारुचेभाष्यपक्षांतरोपादानं नचऋक्षुक्तपक्षेषुनारुचिरितिभ्रमितव्यं वृद्धिसं
ज्ञासूत्रेऽपरितुष्यन्नखल्वपिभवाननाकृतिलिंगेनवेत्याहेतिवार्त्तिककारंप्रतिभाष्योक्तेः अकच्चेति कुत्सितइतिसूत्रोक्तभाष्यरीत्यासंख्याकारकाभ्यांपूर्णार्थस्येतरा
न्वयेसर्वसुवंतादेवतद्धितोत्पत्तेःप्रत्यासत्त्यासर्वनामप्रकृति • कसुवंतात्तदर्थगतकुत्साविवक्षायांसर्वनामाव्ययवटेःप्रागकजित्यर्थात्तदंतसंज्ञाभावेनतदसिद्धिरितिभा
वः एवमेषात्रसत्वाद्यसिद्धिर्बोध्या एतेनावयवनिष्ठसर्वनामत्वेनतत्सिद्धिरित्यपास्तं जसःशीरीर्घोच्चारणमुत्तरार्थंवारिणीति अदंतादिति परस्येत्यनेनान्वेति अतइत्यस्यां
गविशेषणंतपाऽदंतादंगादित्यर्थः सर्वनाम्नइतितुविहितविशेषणंतस्यतुनांगंविशेष्यमास्तीमानाभावात् तेनवर्णाश्रमेतरणामासपूर्वोइत्यत्रन अतएवविभाषाजं
सीतिचरितार्थं अंगसंज्ञानिमित्तस्यादंतात्सर्वनाम्नोविहितस्येत्यर्थस्तुनतेषामित्याद्यसिद्धेः अत्वविधौविषयसप्तमीतितुन तस्मिन्नितिपरिभाषावाधेमानाभावात्

स॰श॰ प्रागित्संज्ञाया इति प्रत्ययादित्वज्ञानाभावात्तज्ज्ञानाभाव इति भावः परे तु अनुबंधत्वेऽप्यतयात्रापि तन्निषेधप्रवृत्त्या शित्वादेव सर्वादेशः इत्संज्ञायोऽप्यशक्यत्वमेव तत्सूत्रे
शे॰सु॰ शित्त्वं अत एव काणोर्विषये नानुबंधकृतमसारूप्यमिति विकल्पाभावः अन्यथा कादीनां कादेर्वा क्वयो धोत्तरं प्रत्ययत्वज्ञाने इत्संज्ञादेः प्रवृत्त्या वाक्यार्थबोधरूपतत्प्रवृत्तिका
३८ लेऽनुबंधज्ञानाभावेन विकल्पो दुर्वारः पश्चादनुबंधज्ञानेऽपि जातनिवृत्त्ययोगात् यदि तत्र पश्चात्तज्ज्ञानेन तन्निवृत्तिस्तर्ह्यत्रापि पश्चात्तज्ज्ञाने सर्वादेशत्वस्यापि निवृत्त्यापत्तिः
ध्वनितं चैतदेलुकः प्रथमस्थाने कालशिदित्यादिसूत्रेष्विति प्राहुः अतः सर्वनाम्न इति अदंतादगात्परस्य सर्वनाम्नो विहितस्येत्यर्थः तेन मासपूर्वायेत्यत्र स्मैन ङसि
ङ्योः स्मात्स्मिनौ। हलंत्यमिति न नविभक्तावितिनिषेधात् यद्यपि इत्त्वप्रवृत्तिकाले न विभक्तत्वज्ञानं तथापि विभक्तावित्यस्य विभक्तित्वयोग्य इत्यर्थान्न दोषः अ
त एव नविभक्तावितिसूत्रे तुग्रहणं चरितार्थं आमिस आज्जसेरसुगित्यत आदित्यनुवर्त्तते पंचत्रिंशदिति तेन सर्वार्थप्रतिपादकत्वेऽपि कृत्स्नसकलादिशब्दानां नेति
भावः सर्वविश्वौ बुद्धिस्थानेकसंख्याकावयवान्यसमुदाये शक्तौ तस्य समुदायस्यानुद्भूतावयवभेदत्वे एकवचनं यथा सर्वो लोक इति तादृक्समुदायद्वयादिविवक्षा
यां द्विवचनादि सर्वौ व्यूहौ सर्वे व्यूहा इति यदा प्युद्भूतावयव भेदसमुदायविवक्षा तदापि बहुवचनं सर्वे घटा इति पूर्वापरावर व्यवस्थासंज्ञावृत्तिन एवेमे सर्वादय इत्यर्थः
एवमुत्तरसूत्रद्वयेऽपि नित्यं द्विवचनांत इति द्विवचनांत एवेत्यर्थः अकजर्थ इति ननु काकचोः को विशेषः प्रत्ययस्वरश्चित्स्वराभ्यामंतोदात्तत्वस्यैव सत्त्वात् न च
सुबंतात्तद्धितोत्पत्त्या चित्स्वरप्रयुक्तमंतोदात्तत्वमुभकाभ्यामित्यादौ सुबंतस्य के तु प्रकृतेरिति विशेष इति वाच्यं तद्धितविधौ प्रातिपदिकादित्यधिकारेण प्रातिपदि
कस्यैव प्रकृतित्वात् स च जायमानो न्यायात्सुबंतात्पर इत्यन्यत्र युष्मदस्मद्विषये तु वचनात्सुबंतस्यैव प्रकृतित्वं तस्यैव टेः प्रागकजिति बोध्यं न चाकचि तन्मध्य
पतितन्यायेन तस्योभग्रहणेन ग्रहणे उभकाववयवावित्यस्येत्यर्थे उभकशब्दादय च्युभकय इति रूपं के तु नेति विशेषः कश्चेदानीं काकचोर्विशेष इति भाष्यप्रामाण्येन
तेषामनभिधानादिति शंकते नचेति द्विवचनपरत्वाभावेनेति अकचि तन्मध्यपतितन्यायेनोभशब्दस्य द्विवचनपरत्वं के तु तेन तस्य व्यवधानात्तत्त्वमित्यर्थः
उभौ दुदात्त इति सूत्रे भाष्यकृता अयचः प्रत्ययांतरत्वेन व्याख्यानात् महाविभाषासंबंधस्यावश्यकत्वेन नित्यग्रहणमयोग्यसत्योगविभागे नोभशब्दो वृत्तिवि एम·
षये ऽत्यंतस्वार्थिकायज्विधानार्थं अयं च तद्विषये सुबुत्पत्तेः पूर्वमेव स्वार्थिकत्वेनांतरंगत्वात् अत एवाय ज्विशिष्टस्योभयस्य सर्वनामत्वात्सर्वनामप्रकृति ३८

कसमभ्यासाद्यन्तत्वेन त्रलाद्युत्पत्तिः अत्र नित्यशब्दस्य वाच्यार्थविरोधान्महाविभाषापाश्रसंबंधः अयमप्याद्युदात्त एवाद्युदात्तग्रहणानुवृत्तेः अयं च वार्त्तिकप्रामाण्यायत्तोऽभ्युप
ऽभ्युभयशब्दस्य वा द्विवचनविषयत्वाभावसंभावनात् तत्रैव अत एवोभयोर्वा सद्द्वयादौ शयवास्त्यलुकि नाय चूतद्ध्वनयन्वार्त्तिकमाह उभयोऽन्यत्रेति द्विवचनपरत्वाभावे इति
नत्परं त्वविषयत्वाभाव इत्यर्थः उभयोमणिरित्यादौ तु न लिट्यभ्यासस्योभयेषामिति निर्देशेन योगविभागस्येष्टसिध्यर्थत्वेन च तस्य क्वचिदप्रवृत्तेः अतो भ्यासाद्यन्तेना।
प्यच्छपावाटेरस्मादनभिधानमेव वा अपवि अकच्तु न वाच्यः उपजीव्यत्वेन कस्यैव प्राप्तेः अपवादस्त्वन्यत्र चरितार्थः अत्रेदं चिंत्यं अकचविधावेवोभयग्रहणेन।
सिद्धे संज्ञाप्रणयने किमर्थं अनभिव्यक्तपदार्थकत्वात्तज्ज्ञाव्यावृत्तिः सर्वनामसाहचर्याच्च अत एवोपसर्जनव्यावृत्तिरिति उभयोऽन्यत्रेति वार्त्तिके तयप्समासार्थिकोऽप्ययच्गृ
ह्यते उभयो मणिः उभये देवमनुष्या इति भाष्ये तदुदाहरणात् स्वार्थिकस्य च ग्रहणं तदुपक्रमणवार्त्तिकप्रवृत्तेः एवं चावयवद्वयारब्धमणिद्वयविवक्षयोद्भूतावयवभे
दविवक्षया वा द्विवचनमस्त्यासाध्वेव एतन्मूलकमेवोभयस्याप्रावृविभक्तित्वं तद्धितश्चेति सूत्रे कैयटेनोक्तं तदाह कैयट इति हरदत्त इति अत्रारुचिबीजं तु प्रागुक्त
भाष्यविरोधः भाष्ये तूभशब्दपाठः प्रत्याख्यातः कप्रत्ययस्याज्ञानाद्यर्थविशिष्टस्वार्थे विधानेन द्वित्वसंख्याप्रकारकसंख्येयविशेष्यकबोधविषयार्थानुवादकत्वरूपद्वि
वचनत्वेन वार्त्तिके द्विवचनशब्देन तस्यापि ग्रहणमुभशब्दग्रहणवत् अत एवोभयोरुभावुभौ भावित्यादौ नायचं तदुक्तं भाष्ये केऽप्यन्तरेण वचनं द्विवचनपरो भवि
ष्यति कथं स्वार्थिकाः प्रत्ययाः प्रकृतितो विशिष्टा भवंतीति प्रकृतिग्रहणेन स्वार्थिकानामपि ग्रहणं भवतीति इति हेतोः प्रकृतेः कादिप्रकृतेरुभशब्दस्य ग्राहकेण
द्विवचनशब्देन स्वार्थिकस्यापि ग्रहणमिति तदर्थः तत्तसिलौ तु विभक्त्यन्तस्य स्वार्थे विहिताविति तत्तत्कारकशक्तिप्रधानावेवेति न तयोरुक्तद्विवचनत्वमिति तौ।
स्मात् उभयशब्दात् जसीति अवयवद्वयारब्धसमुदायबहुत्वविवक्षायामित्यर्थः अंतरंगत्वादिति सर्वार्थबोधकत्वरूपार्थस्योभयत्रापि निमित्तत्वेन न तत्कृत।
नित्यसंज्ञाया बहिरंगत्वं अत एव संज्ञोपसर्जनप्रथमादिशब्देन विकल्पः अर्थकृतबहिरंगत्वस्यानाश्रयणाच्चेति भावः इदमर्वाचानुसारेण परत्वस्य पक्षे भावबोध।
कतया निषेधाश्च बलीयांस इत्यनेनास्य प्रवृत्तिः किंच नांतरंगबलीय इत्यस्यात्र विषयो युगपत्प्राप्त्यभावात् संज्ञानां बाध्यबाधकाभावेन प्रातिपदिकसंज्ञासमकाल
मेव सर्वनामसंज्ञाप्रवृत्तेः अत एवोभये इत्यत्र सर्वनाम्नो विहितत्वेन शीभावसिद्धिः पूर्वपरत्वादितु पक्षे तदभावमात्रबोधकं असिद्धं बहिरंगमित्यपि नांतरंगोऽत्र व

हिरंगप्राप्ते; अंतरंगे कर्त्तव्ये वहिरंगासिद्धत्वेपि तत्प्रवृत्त्युत्तरं वहिरंगप्रवृत्ते रनयावारयितुमशक्यत्वात्वहुशस्तस्याद्दृष्टत्वात् तदुत्तरमेत त्प्रवृत्त्यापूर्वादिष्विवपक्षेतद्भा
वविशिष्टेषाघुत्ववाधनस्यशक्यत्वात्जसीति विषयसप्तमीपक्षेपिप्रातिपदिकसंज्ञोत्तरमेवास्याःप्रवृत्तिस्तदुत्तरमेव तद्विषया तस्यानिवदतिदेशप्रापितायानिरवकाश
त्वा च अपक्षस्यस्यानिवद्भावस्यानुमानिकत्वानयावाधायोगाच्चसर्वनामसंज्ञायाअकृतयुक्त्वायथोद्देश पक्षसंयोवौचित्यात् अतएवतयादेशे उभयप्रतिषेधःतयपग्रहणे
नग्रहणाज्जसिविभाषाप्राप्नोतीति स्थानिवत्सूत्रस्थंवार्त्तिकमयच्प्रत्ययांतरमितिसूत्राशयप्रदर्शनेन भाष्यप्रत्याख्यातंनत्वंतरंगन्यायवलेन उभयोत्पत्रङ्गेपूर्वस्मिन्निति।
सूत्रेमात्रशब्दादारभ्यायचश्चकारात्मत्याहाराश्रयणे नसिद्धः अतइत्यनुवृत्त्याचकत्तीत्यादौनातिप्रसंगः तयपग्रहणांतुसूत्रेऽवयुत्यानुवादः द्वित्रिशब्दप्रकृतिकायजंत
स्यजसःशीविषयेऽनभिधानमेवपुंस्येव वानभिधानमितितत्ताशयंवदंति तथापीहेति प्रत्ययग्रहणेतदंतग्रहणमितिप्रयोजनंसर्वनामाव्ययसंज्ञायामितिचतदं
तविधिद्वयेनडतरांतात्त्याद्यर्थे परमकतरस्यव्यपदेशिवद्भावेनकतरस्यचसंज्ञासिद्धेरितिभावः तत्रमानमाहकेवलयोरिति प्रयोजनाभावात्फलाभावादित्यर्थः अदं
तादेगात्परस्यसर्वनाम्नोविहितस्येत्यवजसशीत्यादेरर्थादितिभावः ननुडतरग्रहणेनैवसिद्धेऽन्यतरशब्दपाठोव्यर्थोऽत आह अन्यतरेतिकिंयत्तदामेवनपेविधा
नादितिभावः अपुरीति पूःशब्दस्यविशेष्यत्वेनेत्यर्थः तध्वनयन्स्त्रियामुदाहरति अंतरायामिति एकोन्यार्थेप्रधानेचप्रथमेकेवलेतथा साधारणेसमानेल्पेसं
ख्यायांचप्रयुज्यतइतिकेचित्केवलेऽसहायेतत्रसंख्यान्यार्थयोसहायवाचीष्णां ताषष्ठवहुषुवहुवचनमेकादाकिनिश्चेत्यादिसूत्रस्थभाष्यस्यष्ठमुक्तःएकोगोत्रइ
तिसूत्रशेषभाष्येप्रथमार्थोप्युक्तः साधारणसमानार्थयोःसंख्यावाचिनएवार्थतःपर्यवसानं यथात्तेनैकदिक्चैत्रमैत्रयोरेकामातेत्यादौसर्वेसहेइतिसूत्रेएकेक
शइतिभाष्यप्रपादायकेचिदाहुरल्पार्थोप्येकशब्दोस्तीतिवदताकैयटेनकेचिदित्युक्त्यानदर्थकाभावोध्वनितएव एवंचप्रधानार्थेनद्वंद्वमाने स्वाभिधेयापेक्षा
वृधीति समस्तःपाठः नियमेनावधिसापेक्षेर्थेवर्त्तमानपूर्वादीनामित्यर्थःदक्षिणागाथकाइति उत्कर्षस्यावधिसापेक्षत्वादत्रव्यवस्थास्तीत्याशयः हेतुउत्तरेप्रत्य
ते र्थे चशकइतिप्रत्युदाहरणंवोध्यं उत्तराःकुरवइति सुमेर्वेवधिकपरदेशत्वरूपोपाधिविशिष्टकुरुषूत्तरशब्दःशब्दप्रवृत्तिनिमित्तीकृत्पवर्ततइतिव्यव एम
स्थाविषयत्वंवोध्यं दिग्वाचकपूर्वादिशब्दानांमध्यान्हसूर्यसंयोगिदेशावधिकोदयाचलास्ताचलसंनिहितदेशतत्कालिकसूर्यसंमुखयावद्देशसंज्ञका

लिकत्वात्तदुपस्थयावद्देशरूपोपाधिविशिष्टदिशि तत्तच्छब्दप्रवृत्तिनिमित्तीकृतप्रवृत्तिरित्युपाध्यंतर्गततयाप्यवस्थास्त्येव मध्यान्हे सूर्यस्योदङ्मुखत्वात्तद्देशवृत्तीनां
तत्तदवधिकोदयाचलसन्निहितत्वादिप्रवृत्तिनिमित्तमित्यन्यत्र विस्तरः अंतरमवकाशावधिपरिधानांतर्द्धिभेदतादर्थ्यच्छिद्रात्मीयविनावहिरवसरमध्ये
नत्र मेदिनीकोशोक्तार्थात्तद्व्युदासार्थमाह अंतरंवहिर्योगेति अयंत्विहत्याक्रियमाणाः संज्ञाविकल्पो जसाधारेणाभाव एव नत्वकजाद्युदाहृत्वादाविति वा
ध्यं न बहुव्रीहौ चिकीर्षित इत्यध्याहारलभ्यं प्राचीनवृत्तिकृद्रीत्येदं व्याख्यानं नेदं सूत्रं बहुव्रीहेस्तत्त्वनिषेधकं उपसर्जनप्रतिषेधेन सिद्धेः प्रक्रियावाक्येति अलौकिके
इत्यर्थः न चालौकिके समासप्रवृत्त्यै कार्थीभावस्यापि तत्रैव कल्पनादुपसर्जनत्वादेव समास इव तत्रापि निषेधः सिद्ध इति वाच्यं तत्रैकार्थीभावस्यारोपेपि स्वा
र्थविशिष्टार्थांतरबोधकत्वरूपोपसर्जनत्वाभावेनातिभवकानित्यत्रैव प्राप्तस्याऽकचोऽभावार्थं संज्ञानिषेध इत्यत्र तात्पर्यात् लौकिके तु नास्य प्रवृत्तिस्तत्र समासस्य
चिकीर्षितत्वाभावात् अतिक्रांत इत्यादिना पूर्वोक्तस्य लौकिकवाक्यस्य समासस्य च दृष्टांतद्वयमुच्यते अकृतव्यूहपरिभाषा तु नास्त्येवेति भावः भाष्यकारस्त्विति अ
कचूस्वरौ तु कर्तव्यौ प्रत्यंगमुक्तसंशयमिति भाष्योक्तेः वृत्तिकृद्रीत्येदं व्याख्यानमयुक्तमिति भावः ननु स्मृतिद्वयप्रामाण्याद्विकल्पोस्तु कथं प्रत्याख्यानमत आह यथोत्तरमिति
एतच्च धिन्विकृण्व्योर चेति सूत्रे भाष्ये ध्वनितं एवं च वृत्तिकृदुक्तार्थकं नेदं तस्मादुपसर्जनप्रतिषेधानुवादकं यच्च वार्तिककृतातस्य कृतत्वात्सूत्रकृते उभयस्यैव संज्ञाया आन्व
र्थ्यमपि भाष्यकृद्दूषितमेव न सूत्रकृदृष्टमिति विभाषा दिगिति सूत्रे कैयटस्य ष्टसूत्रे सप्तमीनिर्देशः प्रथमार्थ एव अत एव वृत्तिकृदुक्तः प्रक्रियावाक्ये निषेध इत्यर्थो भाष्यकृता बहुव्री
हिपदस्य तदर्थवाक्यस्य पदलक्षणायामाश्रितः अन्यथा मूलोक्तरीत्यासिद्धेः तादृशलक्षणाप्रयासो व्यर्थः स्यादिति तत्त्वं तदनुगुणानामेवेति प्राधान्येनोपस्थितिविषयप्रसिद्धसर्वोप
सर्वार्थवाचकत्वसमानाधिकरणसर्वनामपदवत्त्विनबोधकमहासंज्ञया सर्वार्थोपस्थापकसर्वादीनामनुकरणावश्यकत्वेनेतरेषामनुकरणे मानाभावः नामपदस्वारस्येन प्रा
धान्येनेत्यस्य लाभः उपसर्जनीभूतरविशेषणतयैवोपस्थापकमिति तेन न तद्व्यावृत्तिः पूर्वादिसंग्रहाय स्वोपसर्वार्थेति संज्ञाव्यावृत्तये अभिव्यक्ते तेन न्यायमूलकं प्रसिद्धेती
तिभावः सर्वादिसूत्रस्य चायमर्थः सर्वादीनि तं दत्तानि चोक्तसर्वार्थवाचकत्वसमानाधिकरणसर्वनामपदवंतीति तत्र प्राप्ताप्राप्तविवेकन्यायेन सर्वनामपदवत्त्वांश एव विधिः स
र्वार्थवाचकत्वस्य लोकतः सिद्धेः एतेनान्वर्थसंज्ञोपस्थितसर्वार्थवाचकस्य विशेष्यतया सर्वादीनीत्यस्य नहि विशेषणत्वात्तदंतविधिरित्यपास्तं एकपदोपस्थाप्ययोरर्थयोः

प्र॰ उ॰ परस्परमुद्देश्यविधेयभावेनान्वयस्याव्युत्पन्नत्वात् रूढ्यर्थयोगार्थयोरन्यतरवियोगेनान्यत्रान्वययोगाच्च तदंते सर्वार्थवाचकत्वं त्ववयवद्वारा बोध्यं एतेन तदाक्षिप्तस्य
श॰ सु॰ विशेष्यते त्यपास्तं तद्विनानुपपत्त्यभावेनाक्षेपायोगात् दाक्षिप्तस्य शब्देऽन्वये मानाभावाच्च केचित्तु आकृत्याऽकस्मोद्देश्यताऽभ्यस्य विधेयत्वे निवदंति परं त्वाद्यः पक्ष इतो ल
४० घुरिति बोध्यं संनिवेशादिति तदनुमानादित्यर्थः अत्रोपसर्जनत्वमितरविशेषणत्वेनार्थोपस्थापकत्वं तदोः स इति सूत्रे अदस एव दस्य सत्वं नान्यस्येति नियमे ह्यीय.
नि (प्र तत्र येदृ इति प्राप्नोति स्व इति चेष्यते यथा लक्षणमप्रयुक्त इति भाष्यं तु प्रकृतसूत्र न अस्य सूत्रस्यानेकभाष्यविरोधादेकदेश्युक्तिरिति न तद्विरोधः तृतीयासमासे द्वन्द्वे चेति
सूत्रस्याकरोक्तरीत्या न बहुव्रीहाविति सूत्रस्याकरीत्या च प्रथमार्थे सूत्रमप्ययमपि समासस्यैव निषेधो न त्ववयवानां समुदायस्येति अकच्स्वरौ तु कर्तव्यौ मत्यं गमुक्तसंज्ञा।
यमिति भाष्योक्तया प्रकरणविषयत्वात् एतत्प्रकरणस्य सप्तमीनिर्देशानां प्रथमार्थकत्वमिति तस्यावयवसंज्ञानिषेधकत्वाभाव उचितः किंचावयवमात्रस्य निषेधे
वर्णाश्रमेतराणामित्यत्र सर्वार्थवाचकसर्वशब्देन समुदायसंज्ञायां सुडापत्तिः नेतरसंज्ञानिषेधेपि सर्वार्थवाचकसर्वादित्वानपायात् अवयवस्य व्यपदेशिव
द्भावेन समुदायस्य च द्वंद्वे विद्यमानत्वेन निषेधे तु अवयवस्य निषेधे फलाभावः न च त्वत्कपितृक इत्यादौ त्वदस्यतांतत्वेकाकचोर्विशेषेण फलं द्वंद्वावयवमात्रे सुदरादिविशेषणान्व
याभाववत्कुत्सादिविवक्षाया अभावात् समुदाये तद्विवक्षायां समुदायोत्तरप्रत्ययेनावयवगतकुत्सादेरपि बोधेनोक्तार्थत्वादवयवेभ्यः पृथक् तदनुत्पत्तेः अन्यथा त
व प्रत्येक कप्रत्ययोत्पत्त्यापत्तिः अत एवोक्तं भाष्ये कञ्चिन्न भवतीति विभाषा जसीति सूत्रे समुदाये कुत्साविवक्षायामित्यर्थः कृताकचा समासस्तु भवत्येव तत्र सर्वा
र्थघंतत्वादनेन विकल्पो भवत्येव त्वदधरमधुरम मधूनि पिबंतमिति जयदेवप्रयोगबलेनान्यार्थकत्वच्छब्दस्य सत्वेपि तस्य सर्वनामत्वे मानाभावाच्च बहुसंमतत्वाच्च
एतेन बहुव्रीहाविति वदस्यापि द्वंद्वे चिकीर्षितमित्यपास्तं फलाभावात् जसाधारशीभाव एव विकल्पविधायकस्य विभाषा जसीत्यस्यासंगतेश्चेति भावः बहूनावयवभे
दसमूहस्य द्वंद्वविशेष्यतयोपसर्जनेन संज्ञाया अभास्याद्द्वंद्वे चेत्यपि न बहुव्रीहाविति वदितितत्वं अत एव गोस्त्रियोरिति सूत्रे कुक्कुटमयूर्यावित्यादौ ह्रस्वत्वापत्तेद्वंद्वे।
नेति वचनमारब्धमिति दिक् नाकजितित समुदायनिष्ठकुत्साबोधकोऽकज्नेत्यर्थः प्रथमचरम अत्र सूत्रे नेति न संबध्यते प्रथमादिष्वसंभवात् जसीत्यनुवृत्तेरर्थाधिकारत्वयम् राम॰
पि शीभाव एव विकल्पस्तदाह जसः कार्यं प्रतीति तयः संख्याया अवयवे तयपिति तदंतादित्यत्र हेतुरुक्तः द्वितीयतृतीयौ द्व स्तीयस्त्रेः संप्रसारणं चेति साधु अर्थ ४०

वद्धिति प्रतिपदोक्तस्येत्यपि बोध्यं तेनानंते आद्युदात्तस्य द्वितीयाय भागायेत्येवा नभावे तु स्मे भवत्येव जरया अष्टन इत्यतो विभक्तावित्यपि वर इत्यतो चेति अनुवर्तते।
तदादिविधिश्चेत्याह अजादाविति जरसावित्यादौ तु व्यपदेशिवद्भावेन विभक्तौ किं जरयाइदं जारं प्रतिपत्तिलाघवाय जरया अस्तु कृतः पदांगाधिकारे इति परम
गं च विशेष्यं विशेषणेन तदंतविधिरिति भावः पदशब्देनोत्तरपदाधिकारः केवलपदाधिकारश्च गृह्यत इति येन विधिरित्यत्राकोसुट् निर्दिश्यमानस्येति. षष्ठीस्थाने
योगेति सूत्रमावर्तते आवृत्तस्यायमर्थः षष्ठ्यंतमुच्चार्यमाणमेव स्थानेन युज्यते न प्रतीयमानमिति तेनेदं सिद्धमिति भावः नन्वयं जरशब्दो न जराशब्देन आह ए
कदेशेति स्थानिवत्सूत्रेणेति भावः जराइत्यक्तपरिमाणस्य ग्रहात् अनेन स्थानिवुद्ध्यैव कार्यप्रवृत्त्या निर्दिश्यमानपरिभाषावाधाभावो बोध्यः येन विधिस्तदंतस्येत्यस्य तु सं
ज्ञासूत्रत्वात्सूत्रस्थजराशब्दो जराशब्दांतपर इति तदंते आदेशप्रवृत्तौ परिभाषाविरोधः स्पष्ट एवेति दिक् निर्जरसेति अत्र स्वादिष्विति पदत्वेन रुत्वं न भत्वेन पदत्व
वांधात् सूत्रेषु उत्तरसूत्रस्थस्य पूर्वे त्रापकर्षवदयेलस्वावेचित्र्यायेति बोध्यं पक्षे इति जरसादेशाभावपक्षे इति भावः इदमर्वाचामनुरोधेन परे तु विभक्त्यादे
शेभ्यः परत्वाज्जरसित्यसंगतं विभक्त्यादेशानामेवं पूर्वविप्रतिषेधेनेष्टत्वात् अत एव जराया इति सूत्रे जरासीत्यत्र नुम्जरसोः प्राप्तयोर्विप्रतिषेधेन जरसि भाष्योक्तं
संगच्छते अन्यथा त्वद्रीत्या शीभावात्पूर्वमेव जरसः प्रवृत्तौ तदा सर्वनामस्थानत्वाभावात् नुमो विप्रतिषेधविचारासंगतिः स्पष्टैव ममतु पूर्वविप्रतिषेधेन जरसः
पूर्वं शीभावे प्रवृत्ते तत्संगतिः स्पष्टैव अत एव टाङसीति सूत्रे कैयटेनोक्तं भाष्यकारः संनिपातपरिभाषया जरसादेशमनभ्युपयन्नतिजरेणातिजरादिति भाव्यं न।
न्वतिजरसिनातिजरसादिति गौरवमुद्भावितवानिति भवद्रीत्या पूर्वं जरसादेशे इनाद्यप्राप्त्या तदभावपक्षे च तस्याप्राप्त्या संनिपातपरिभाषया जरसादेशमनभ्यु
पयन्निस्यस्यासंगतिः स्पष्टैव वृत्तिकारोप्याह अतिजरसिनातिजरसादिति केचिदिच्छंति यथा तु भाष्यं तथा नेतदिष्यते लक्ष्यत इति नपुंसकद्वितीयैकवचनेपि तु कुवा
धेनात्वमित्यमि संनिपातपरिभाषया जरसभावः नचतत्र नाकारांतसंनिपातकृत एवाजादिः किंतु तदभावेपि एषा तु संनिपातलक्षणाविधिविनान्यस्य प्रवृत्ति यो
ग्यतामत्रैवेति अत्र भवत्येव जरसि निवाच्यमानाभावात् टाङसीति सूत्रस्य नातिजरेणात्येतद्विषयकैयटेन विरोधाच्च ध्वनितं चेदं जराया इति सूत्रे भाष्ये तत्र हि
पूर्वपक्षिणा अतिजरसं पश्येत्यत्र लुक्कस्मान्नेति पृष्टे परेण प्रथमैकवचने प्यतिजरसं निष्ठतीत्यत्रापि कुतो लुङ् शंक्यते इति पृष्टे पूर्वपक्षिणा प्रथमैकवचने अ

 म्भावेत्तु जरमेव जरस्तत्र कृते जरसि संनिपातपरिभाषया न लुक् इति विशेष उक्तः यद्वाम्भावे कृते संनिपातपरिभाषया न जरसिति पाठभेदेन विशेष उक्तः ततः परेणायच्चे भा-
 वमतिजरसमतिजरसैरिति न प्राप्नोति अतिजरमिति द्वितीयैकवचनादौ शंकिते सिद्धांतिनाइष्टमेवैतदतिजरमतिजरैरिति भवितव्यमिति अत्रविशेषोपपादनेऽत्यपाठ
 एवंयुक्तः अन्यथालुकः प्रथमैकवचनेतेनाभावे उपपादिते द्वितीयैकवचनेपितेनन्यायेन लुको प्राप्तौ विशेषोक्तिरसंगतेति बोध्यं एवं स्त्रियांजरसादेशकृते याडा
पईत्यादौ नामाकारप्रश्लेषेणवारणं विफलमेव तेषांपरत्वात् अतिखट्वशब्दे तेषांवारणाय तु प्रश्लेष आवश्यक इत्याहुः येतु जरसादेशाद्विभक्तिसंबंधिकार्यमात्रं
पूर्वविप्रतिषेधेन तेन जराणामित्यादावामि पूर्वं नुट् जरसोऽभाव एव एवं च ह्रस्वनद्यापइत्यत्राकारप्रश्लेषे —— न फलं नापि मानं अत एव ङ्यांपग्रहणेऽदीर्घ इतिव
तजरसादेशस्य स्थानिवत्वप्रतिषेधो वार्तिककृतानारब्ध इत्याहुः परिभाषाया अनित्यत्वमिति इनातोरिकारदीर्घोच्चारणमेस्सिकर्तव्ये ऐस्करणं च तदनित्यत्वे मूलमिति तद
भिमानः षष्ठ्येकवचने इति एकसूत्रोपात्तत्वात्स्यादेशविषयेपि पूर्वविप्रतिषेध इति भावः एतच्च भाष्ये —ति इनातोरिकारदीर्घोच्चारणप्रत्याख्यानपरभाष्येत्यर्थः
इष्टमेवैतत्संगृहीतमतिजरमतिजरैरिति भवितव्यमिति जरया इति सूत्रस्य भाष्ये इति वार्थ इत्यन्यत्र विस्तरः पद्दन्नो आदेशो :स्वानुरूपाः स्थानिन आक्षिप्यंते इत्या
ह पादद्नेति अनुदात्तस्य चर्दुपधस्यान्यतरस्यामित्यनुवर्तते अत एव तुल्यास्यसूत्रादिभाष्ये आस्येन तुल्यः पादेभो पहृतं मासेन पूर्वायेत्यादिप्रयोगाः हृद
यस्य प्रिय इति सोत्र प्रयोगश्चोपपन्नो भवंति ये च तद्धित इति सूत्रस्य वा केशेष्विति वार्तिके वाग्रहणं तु तत्र —— वाग्रहणासंबंधबोधकं यद्यपि निशाशब्दस्य निश्श
ब्दप्रकृतिकत्वेन भागुरिमतसिद्धतया टापो वैकल्पिकत्वेन च वाक्यवाचे तु भयवत् निश्निशयोः सूत्रे निशग्रहणं विनापि सिद्धिस्तथापि सुटि हलंतस्यासाधुत्वबोध
नायात्र ग्रहणमिति तदनुसारिणः परेतु अनुदात्तस्येति सूत्रेन्यतरस्यामित्यस्य स्वरितत्वं नास्ति अत एव शीर्षं छंदसीति सूत्रे शीर्षन्निति प्रकृत्यंतरं द्रष्टव्यं आदे
शत्वे हि छंदसि शिरःशब्दस्य प्रयोगो न स्यादित्युक्तं भाष्ये अन्यथा विकल्पानुवृत्त्यादेशत्वेपि दोषाभावेन तदसंगतिः स्पष्टैव ये च तद्धित इत्यत्र चादेशत्वाय शिरःश
सग्रहणं कर्तव्यमित्युक्तं वा केशेष्विति च वक्तव्यमित्युक्तं तस्माच्छसादिविषयाणि प्रकृत्यंतराण्येव पदादयः एवं मांसपृत्स्नवोपि अत एव न सप्तनाः स्थानिवद्धा
वादावतत्वमादायन सांप्रतामित्यादौ न नुडादि नासिकायानस्य तत्र सुद्रेष्विति वार्तिके आदेशत्वमेव नासिकाया इत्यनुवृत्तेः अत एव तद्विषये नासिकासु

इत्यादिन अत एव पदादिषु मांसपृत्स्नूनामुपसंख्यानमिति वार्तिके स्थानिनिर्देशो न कृत इत्याहुः प्रत्याहार इति व्याख्यानादौ टष्ठकारेणेति भावः अक्लीबस्येति पूर्वे दा
सपरत्वेऽप्यस्य भाष्ये व्याख्यानाल्लघुत्वाच्चेति भावः प्रसज्यप्रतिषेधेन व्याख्याने ऽत एव ज्ञापकात्केषांचिदसमर्थसमासानां साधुत्वं बोध्यं स्वादिषु सुरत्नप्रथमैककर्म
नंत्र्यादिग्रहणेऽपि नक केवलानां ग्रहणं व्याख्यानात्तदाह क प्रत्ययावधीति तदंतेष्वित्यर्थः यद्यपि भेदसमाहारद्वंद्वे सौत्रत्वान्नटच् यचीत्यनेन स्वादेर्विशेषणात्तदादिविधिः
असर्वनामेति तेन स्नुपादावित्यादौ पादः पन्न भसंज्ञा पदत्वकार्यप्रतिबंधरूपे ऽशास्त्रीयेऽपि कार्ये भवति न पदांतसूत्रस्य भाष्यप्रामाण्यात् आकडारात् प्राक्कडारा
दिति नावधिः तत्पुरुषो द्विगुश्चेति लिंगात्समावेशार्थं हि तदित्याह कडारा इत्यादि व्याप्यर्थकाङ् आचार्यादिति वत् युक्तं एकैवेति संख्यावाच्येकशब्दोपादा
नादवधारणं संपद्यत इति भावः यापरेति द्वयोः सावकाशयोः परानिरवकाशत्वे तु सैवेत्यर्थः आभ्यामेव बाधसिद्धिस्तु न अन्यत्र तव्यदादौ कृत्कृत्यप्रत्ययसंज्ञा
दीनां समावेशदर्शनेन विरोधाभावात् विप्रतिषेधाप्रवृत्तेः लौकिकस्य तक्रकौंडिन्य न्यायस्यापि लोके संज्ञाविषयेऽदर्शनेन शास्त्रेऽपि संज्ञाविषये ऽप्रवृत्तेश्चेतिने
ति अनवकाशत्वेनेत्यर्थः परोदाहरणं तु अपादानमुत्तराणि बाधंत इत्याकरे स्पष्टं विरोधा   भावेन विप्रतिषेधस्त्राद्यप्रवृत्तावपि परत्वादेरन्यत्र बलवत्त्वेन ह
ष्टतया त्रापि तेन व्यवस्था अपादानादिसंज्ञानां समावेशस्तु तत्कार्ययोः पर्यायापत्तिदोषिः भपदसंज्ञयोः समावेशस्तु राज्ञ इत्यादौ नलोपस्यापत्तिर्बोध्या न च राजन्य
इत्यादौ सुप्तिङंतमिति पदत्वं दुर्वारं परया भसंज्ञया तु न बाधः तस्या अंतरंगत्वादिति वाच्यं समानावधिकाया अंतरंगाया अप्यनया बाध्यसामान्यचिंतया अप्र
दत्वेनैव बाधादित्याहुः आकडारस्थसंज्ञासमुच्चयपक्षे एव तत्पदग्रहणं प्राङ्शब्दे निरूपयिष्यते भपदसंज्ञाविधायकप्रकरणे भस्येत्यस्य पाठेनांगमित्यनुवर्त्या
गं सत्यंगं भवति भं भवतीत्यर्थेन ताभ्यां तस्याः समावेश एव न पर्याय इति बोध्यं पुरुषसंज्ञापरस्मैपदसंज्ञयोरपि णलुत्तमो वेति ज्ञापकात्समावेशः गुरुलघुसंज्ञे
वर्णस्य नदीघिसंज्ञे तदंतस्येति भिन्नावधिकत्वात्समाविशतः उभे पिवर्णस्येति पक्ष आकरे उपलभ्यमानोऽप्येकदेशिन एव समावेशानुपपादनादिति दिक् यलो
प इति हलि सर्वेषामित्यनेनेत्यर्थः अल्लोपोनः तपरकरणं किं अनितेः किपि आन इत्यादौ लोपाभावायानत्वं त्वत्रैकदेशविकृतन्यायेनेत्यन्यत्र विस्तरः पूर्वे।
स्यादिति अचः परस्मिन्नित्यत्र पूर्वविधावि   त्यस्यात्त्यापंचमीसमासाश्रयणाद्यमर्थो लभ्यत इति भावः तेन प्रत्येषिषन्नित्यादिसिद्धिः अन्यथा त्रुस्यात्

ल.श. अत एवोभेऽभ्यस्तमिति सूत्रे उभेग्रहणं यत्रोभे श्रूयेते तत्रैवाभ्यस्तसंज्ञार्थं एतेन्निन्त्यत्राभ्यस्तलक्षणोऽनुस्मा भूदिति उक्ते शपि कादि शस्य पूर्वे विधावितिपञ्चमीसमासेन

शे.सु. स्थानिवत्त्वात् ज्ञुतोऽप्राप्नसति प्रयोजने उभेग्रहणं सहार्थमित्युक्तं तेनोभे यत्र श्रूयेते इत्यर्थेपि प्रत्येकं षिषन्निति सिद्धये आवश्यके न पञ्चमीसमासेन तत्सिद्धावुभे

४२ ग्रहणं सहार्थमिति तद्भावः इति पक्षे त्विति तुना स्थानित्यत्वं सूचितं प्रविगणय्येति भाष्योदाहरणमपि तदनित्यत्वे एव संगच्छते अत एव हेगो रित्यत्र वृद्धेः स्थानि

वत्त्वान्नसवृद्धिलोपः पूर्वस्मान्निमित्तत्वेनाश्रितादिति व्याख्याने तु न मानं पूर्वत्रासिद्धेनेति अतिदेशादृष्यात्रिपाद्याम सिद्धत्वेनन्याय सिद्धानुवादोयं तत्फलं।

त्वतिदेशान्तराणांवति घटितानां प्रवृत्तिबोधनं अत एवामी सीरपेगोन्यादौ मीत्वणत्वे भवतः अत्रैकारस्यादः संवं धित्वंपे इत्यस्यैकाजुत्तरपदत्वं चान्तवद्भावाधी

नं तस्यदाषइति इदंवाचनिकमेव नमुनेइति सूत्रे नेति योगविभागस्तु भाष्ये न दृश्यते अत एव सिद्धकौडं वार्तिककृता रभ्यं नलोपः सुविति सूत्रं च सूत्रकृता कृतं।

प्रकारार्थमिति प्रकारः सादृश्यं तच्च सुत्वेन मास्य पनीत्यादावपि न लुमतेति निषेधानित्यत्वाच्छसादिपरत्वं बोध्यं शब्दत्वेन सादृश्यमित्यन्ये तन्न वाशोकष्य

ञ्रोभेष्वित्यस्य वैयर्थ्यापत्तेः नासिकायास्तस्क्षुद्रेषुनसिति भाष्य पठितवार्तिकस्य वैयर्थ्यापत्तेश्च आसन्यं प्राणमूचुरित्यत्रापि न हृदेवशसादिपरत्वं अत्र सु

प्रभृतिष्विति वाच्ये शस्प्रभृतिष्वित्युक्त्या ऽन्यत्र क्वचिदेव प्रवृत्तिर्बोध्यातेः अत एव पद्दन्निशां ग्रहणं चरितार्थं तेषां हि विधानामपि कोशसिद्धतयातत्रव्य

वस्थायाएववक्तव्यतया सु प्रत्ययमात्रे प्रवृत्तौतस्याऽसंभवेनतद्वैयर्थ्यं स्पष्टमेव प्रकारार्थत्वे प्रमाणमाह भाष्येइति तत्र हि शस्प्रभृतिष्वित्युच्यते अशस्प्र

भृतिष्वपि दृश्यते शलादोषणी ककुद्दोषणीयाचते महादेवइत्युक्तं आद्यस्याधिगुप्रैषेपप्रमानस्य शलाकाकारे दोषणीत्यर्थः छान्दसः कादिलोपः एतेनदो।

षइत्यकारान्तस्य दूषणवाचिनोदोषन्नादेश इत्यपास्तं तेन पदंघ्रिरिति नच कोशस्य पदादीनां पादाद्यादेशत्वे पादादिभ्यः पृथक्पदादिवचनं तत्रव्यर्थ

नहि स्थानिनां दृशोर्दे पृथक् उपादाने प्रयोजनमस्तिस्थान्युपादानेनैव तदर्थाभिधान समर्थादेशस्याप्यर्थबोधनात् अत एव न पाद्यादि

शानां कोशेऽनुन्यास इतिवाच्यं पदादीनांभाष्यरीत्यानादेशत्वात् तत्वेपि नज्ज्वल्कोष्टुरिति कव्यवस्थार्थमस्यावश्यकत्वेन सोपरतो न्हदादीनां व्यवस्था राम

र्थे प्रकारार्थत्वस्यावश्यकत्वात् स्पष्टंचेदं वाशोकेति सूत्रे मूले कोशेशब्दा अर्थपराएव शक्तिग्रहस्तु पदत्वहेतुकानुमानेन सामान्यतएव एवेष्वपि। ४२

स्तुर्नारायणइत्यादौ विष्णुपदार्थाभिन्नो नारायणपदार्थइतिक्रमेण बोधइत्यादिमंजूषायां नामार्थवादे विस्तरेण निरूपितं एतत्पदममुकवाचकमितिशक्तिग्रहस्तुस्वस्वमासि
ष्ठिमात्रयत्तंत्तत्स्तुत्यस्यानियतः पश्चात्स्मन्नसेवकार्थे देविसरस्वतिइडेवकाव्येविहव्येएतानिते घृतनामानीत्यादौ यत एतानितवनामानि अनस्त्वदभिन्नाएषामर्थाइतिबोधः स्था
नरूवनो जैवितंसमानाधिकरणेइतिसूत्रभाष्येसामान्यवचनमित्यस्येदं प्रत्युदाहरणं दत्तं अन्यथाएकार्थबोधकत्वरूपसामानाधिकरण्यस्याप्यभावात्तदसंगतिः स्पष्टैव स्या
स्तुनतथास्तिनितत्तच्छब्दस्वरूपस्यस्यस्य बोधाना पत्तेः अनेकशब्दानांस्वरूपबोधनपूर्वमेकार्थबोधनेकोशतात्पर्यात् अतएवयत्तदेतेभ्यइत्यादौ पाणिनिनैकशेषोनकृतःएते
नकोशशब्दानांशब्दपरता अतएवैकशेषोनअर्थपरत्वं तुनसंभवतिइतः पूर्वशक्तिग्रहाभावात् एतेशब्दाएकार्थाइतिबोधः एवंचात्रप्रकारार्थत्वाभावेपिनक्षतिरित्य
पास्तमितिदिक् संख्याविसायपूर्वस्यइतिवक्तव्येपूर्वग्रहणानुत्तरपदइत्यधिकृतस्यषष्ठ्यंतत्वलाभाय एतेनव्यहप्रियइत्येवेनदुदाहरणमित्यपास्तं विश्वपाइति विश्वंपा
तीतिविग्रहे आतोनुपसर्गेइतिप्राप्तेवासरूपन्यायेनातोमनिन्क्वनिब्विनिपश्चेतिचेनविच् सचादंतेभ्योलोकेपिकोलालपआगतमितिविभाषापूर्वाण्हेतिसूत्रेभाष्य।
प्रयोगात् क्विप्स्वादंतेभ्योभाष्याद्यनुक्तक्विबभ्योनभिधानमेव अतएवयूस्त्रयाख्याविति सूत्रेस्त्र्याख्याविलपत्रविगृहीतोभाष्येनतुक्विप् अतएवशंस्थाइत्यादिप्रयो।
गेषुभाष्यकृतादित्वंनकृतमितिकश्चित् अन्येक्विप्मेवाहुः दीर्घाज्जसिचेनेचीत्यस्यानुकर्षः दीर्घाच्छस्येवेतिनियमपरं दीर्घाच्छसीत्येवनसूत्रितं दीर्घाद्देवशासीतिविपरीतनियमापत्तेः
प्रत्याहारेषुजातिपक्षाश्रयणादत्रप्राप्तिः न्याय्यत्वादिति जसिपूर्वसवर्णदीर्घनिषेधस्यन्याय्यत्वादित्यर्थः धातोःकिंहाहानिति अव्युत्पन्नमिदं असत्क्रियाशब्दत्वे
तुसानितिप्रत्युदाहरणं परेतुक्वःअइत्यादिसिद्ध्यर्थमातोनापइतिवक्तव्यमित्युक्ते आतइतियोगविभागेनतत्संसाध्यतत्तथाख्यातंभाष्येएवंचसा शब्दादेर्ये ञ्म।
धानंतद्वायोगविभागेनलोपइष्टएव सूत्रेधातुग्रहणमावंतनिवृत्त्यर्थमेवभाष्यवार्त्तिककृतोरज्ञानकल्पनापेक्षयेदृशार्थकल्पनस्यैवोचितत्वात् आवंतादाचार।
क्विबेवनात्रक्विबंतान्डाकर्त्तरिक्विपनानभिधानादितिनतत्रसूत्रवार्त्तिकयोर्विरोधः अतएवप्रथमयोरितिसूत्रभाष्येपररूपंवाध्यसामान्यचिंतयादीर्घमात्रस्यवा
धकमितियक्षेरामानित्यादिसिध्यर्थमतोदीर्घइतिसुपिचेतिचानुवर्त्तमानेबहुवचनेझल्येदितिसूत्रेबहुवचनेइतियोगविभागेनपररूपबाधकंदीर्घविधायरामा।
णामित्यादावनेनदीर्घेपरत्वात्कृतेःमीनामित्यादौसावकाशस्यनुटोप्राप्तिमाशंकाह्रस्वनद्यापइतिसूत्रेआजसेरित्यत आग्रहणानुवृत्त्यासमाधायकीलालपामि

ल॰ शे॰ यमितितदाशयः अधात्ववपवाकारांतानांलोपाभावेनुतदसगतिः स्पष्टैवेत्याहुः त्कः श्न इति त्काप्रत्ययस्य डिस्याद्यर्थकं त्क इ इम्नः शस्ये
शे॰ सु॰ न्त्वमित्यादिप्रयोगस्य मत्रोदाहरणं एतेनाचारक्किवंतात्कर्तरिक्विपैते प्रयोगानिर्वीत्याद्दत्यपास्तं आचारक्किवंतप्रकृतिककर्तृक्किवंतस्य भाष्यकाप्यनुपन्यासेनने
४३ भ्यंः कर्तृक्विपोनभिधानस्यैव लाभाच्च इत्यादंताः जसि च हृस्वस्य गुण इति वर्त्तते हृस्वस्य संबुद्धौ चेत्यतः संबुद्धाविति निवर्त्तते शेषाघ्य सूत्स्मात्ख्याविस्पतो पू इति डि ति
हृस्वश्चेत्यतो हृस्व इति वर्त्तते शेषपदार्थमाह अनदीत्यादि तदंतमिति अनुवृत्तसूभ्यांशेषपदार्थस्य विशेषणात्तदंतलाभ इति भावः ननु मत्यै इत्यत्रानव
काशत्वान्नदीसंज्ञैव भविष्य तीति शेषग्रहणं व्यर्थमतआह एकसंज्ञेति अधिकारादिति कडाराः कर्मधारये इत्येतत्पर्यंतं तत्र बुद्धिस्थत्वादित्यर्थः ।
स्पष्टार्थमिति स्पष्टतयातदंतविधि लाभार्थमितिभावः मात्रे इति ऋतोङीति तु यू इत्यनुवृत्तावेव तात्पर्यं ग्राहकमितिभावः आङोना पुंसीति तु नोक्तं अमुनाकु
लेनेत्यत्र मुत्वस्यासिद्धत्वान्नुमनापत्तौ पुंस्त्वाभावेन नाभावस्याप्यनापत्तौ रूपासिद्धेः नमुने इति निषेधस्तु नुमि न मुटादेश इति वार्त्तिकविरोधात् अत एव सूत्रकृ।
तात्कौतिवन्नोत्तिनोक्तं तथासति तत्रेणान्कारनिर्देशेपि संभाव्येत आमं नुनाकारेण तस्यापि ने इति निर्देशे न तत्र स्वीकारे त्वत्यं तं ज्ञानगौरवमिति न किंचिद्बाधवमिति
स्पष्टं भाष्ये आङितीति ङ्कारविशिष्टासंज्ञानत्वस्य ङस्येत्वं अत एव हरिणा मत्येत्यादौ न गुणः एवमोङ आप इत्यत्रापि अत एवासंभवे एवापवादत्वमिति वार्त्ति
कमते पिरमे इत्यादेनयाह घेर्ङिति सुपि चेत्यतः सुपीति वर्त्तते तेन पद्वीतिसिद्धं न च घेर्ङीतिसूत्रं कार्येङकारादावित्यर्थः प्रवाहवेत्यत्राङ्याजयारामुपसंख्यान
मिति आङादेशस्तु डी इत्येकवर्णं शक्य इति वाच्यं मत्यामित्यादावाम्याप्यन्द्याद्दत्यस्यानापत्तेः अल्विधित्वेन स्थानिवत्त्वाभावात् इतग्रहणोत्वमुंवधकार्यत्वात्स्थानि
वत्वस्पष्टमितिदिक् ङसिङसोर्ह्यत्वेपि अस्वरितत्वाच्चयासंख्यं न ङितश्चेति तु नाः सुप्रिकृतउदित्यत्र कदंतान्ङि न्नोति परपूर्वपरयोरुत्वमित्यर्थः शृनीत्या
दौ शेषापत्तेः ङसोपीत्येवसिद्धे ङसिग्रहणं स्पष्टार्थमिति अच्च घेः इदुद्भ्यामिति किं घेः परस्य ङेरौदच्च
तिङि प्रकृतिघेरौत्वे तिवार्थो मा भूदिति अदोतोस्तपरत्वं सुखमुखार्थं इत्संज्ञायां चतस्य लोप इति तयोर्लोपः न चौतो विभक्तित्वान्न विभक्ताविति निषेधात् क शेम॰
रामि संज्ञेति वाच्यं मुखसुखार्थमित्यस्य तदेव प्रयोजनं ननु कार्यांतरं नापि प्रयोगे श्रवणमित्यर्थात्तत्व प्रतिज्ञैव न विभक्तावित्यस्यं तत्राप्रवृत्तेः अत एवेह द्वोक्त्या ४३

वैस्वं पैद्दस्याष्टि निर्देशाः संगच्छंते यदितूच्चारणार्थानांविनैव शास्त्रमपगमः स्यात्तदेतत्संज्ञकानामपिनहूदेवनिवृत्तिरस्तु किंतस्यलोपइत्यनेनस्वभाववादस्योभय
त्रापिसत्वात् ध्वनितंचेदंनस्यलोपइत्यत्रभाष्येइतिदिक् ओत्सूत्रेनिरूपयिष्यामः नचैवमग्नावित्यत्रौतःस्वरितत्वापत्तिःनचप्रत्ययाप्रत्यययोरित्येवसिद्धेऽम
त्तिति प्रत्ययग्रहणंकर्तव्यमितिवार्त्तिकादौपदेशिकप्रत्ययत्ववत्यवतस्त्वप्रवृत्तिरितिकच्च तस्याःपरिभाषायालक्ष्यसिद्धयेभाष्यकृताकाप्यनाश्रयणात् स्पष्टंचेदं
त्तित्स्वरितमित्यत्रकैयटे अगस्ये : तिसूत्रेभाष्येतुनत्रत्नाख्यानायैकदेशिनोक्तानतुसिद्धांतिनेतिस्पष्टंतदिदंश्नान्नलोपइतिसूत्रेभाष्येपिध्वनितंतत्तद्भा
वइतिचेन्नप्रत्ययग्रहणमित्यस्यविधानकालिकप्रत्ययवद्ग्रहणमित्यर्थात् अतएवादेशेष्वुदित्वमाश्रित्यतत्प्रत्याख्याने फलभेदोनेतिदिक् अनङ्सौ
साविति प्रथमैकवचनमसंबुद्धाविति पर्युदासात् नकाराकारस्तुउच्चारणार्थइत्संज्ञकः अलोंत्यात् अवध्यवधिमतोःसाजात्यादाह पूर्वोवर्णइति अतएव
शिष्टइत्यादौशाइतिसमुदायस्यशासइदीतीत्वन पंचम्यंतालग्रहणाच्च शास्यन सर्वनामस्थाने नोपधायाइतिद्वलोपइत्यनेनोदीर्घइतिचानुवर्तते अपृक्त अपृ
क्तइति पुंस्त्वमविवक्षितं अतएवापृक्तंहलितिसंगच्छते अपृक्तप्रदेशेषुहल्ग्रहणेनैवसिद्धेसंज्ञाविधानमदृष्टार्थं हल्ङ्याप् सुतिसीति पृथक्पदं हलंतादि
ति सुतिसीनांप्रत्ययत्वेनोपस्थितस्ययस्मात्सविहितस्तदादेरित्यस्यविशेष्यत्वेननतदंतत्वलाभइतिभावः एवंङ्यावंशेद्वेधातदुपस्थित्याङ्यावंतांतादित्यर्थोद्रष्ट
व्यः हल्ङ्याभ्यः किमिति रामइत्यादौ दीर्घात्तत्वाभावान्नदोषइतिप्रश्नः दीर्घात्किं निष्कौशांबिरतिखट्वइत्यारभ्यसंयोगांतलोपस्यासिद्धत्वादित्संतोपपाठः
मनोरमायांदर्शनात् सखेति यद्यप्यत्रैवसख्युरसंबुद्धाविति लेस्वउचित स्तथापिनांतलक्षणादीर्घेणैवसिद्धेरतउपधायाइत्यपेक्षयानित्यत्वेनतस्यैवौचित्या
च्चात्रनोक्तं अचोञ्णितिमृजेर्वृद्धिरित्यतोवृद्धिरित्यनुवर्ततेंऽगस्येतिचाधिकृतंतदाह अंगस्यवृद्धिरीति स्यात्यादिति उच्चारणार्थोकारेणकृतनयणः प्रयोगस्थस्यानुकरणाद
विशेषणाभेयोर्ग्रहणमित्याह खितौत्यादि ङसादिपरस्तादृशः खिखीतिती शब्दप्रकृतिकएवसंभवतीतिभावः सुसखेति नपूजनादिति निषेधाद्राजाहःसखि
भ्यइतिटज्न समुदायस्येति असखीत्यस्यसखिभिन्नावयवावितिवर्णसंज्ञापक्षेर्थः अत्रपक्षेपर्युदासेनतद्भिन्नप्रातिपदिकांत्यवर्णादेरेवग्रहणात्कृतंसख्येति
वीक्यनदोषः सिद्धांतिसंमतेतत्तदंतसंज्ञापक्षेसखिभिन्नावित्यर्थः पर्युदस्यमानसमर्पकसखिशब्दे अस्यतदंतग्रहणंतुनविशेष्यासन्निधानादितिभावः एतत्सर्वंहृद

सं॰ श॰ चानुरोधेन यस्येतिचेतिसूत्रभाष्यानुसखिशब्दस्य तदवयवेलक्षणया सख्यवयवभिन्नयोरिदुतोरित्यर्थः यथा अत्वसंतस्येति सूत्रे धातोरित्यत इष्टक धातुपदस्यापिंडग्रह
शे॰ सु॰ ण्यादिसिध्यर्थं धात्ववयवेलक्षणाकरे दृश्यते तदंतसंज्ञापक्षेप्यसखीतिपाठे विशेषणानंतत्वदंतविधिः उतश्च प्रत्ययादिति क्वतश्चसख्यवयवभिन्ने वर्णाच्चंतमि
४४ त्यर्थः तदंतविधिश्च शेषपदार्थविशेषणत्वाद्बोध्यः एवं च समस्तेनैव घिसंज्ञेति लभ्यते तत्र हि भाष्ये इवर्णस्य किमुदाहरणमतिसखेरागच्छतीति यत्र लोपो न स्यात्तदोक्त
नदीर्घस्यापूर्वोत्तरवद्भावेन सखिशब्दत्वात् अतिदेशविषये प्रतिपदोक्तपरिभाषाया अप्रवृत्त्या उपसर्जनह्रस्वत्वे कृतेपि घिसंज्ञा न स्यात् लोपे तु लक्षणप्रतिपदोक्तपरिभाषया
न दोष इत्युक्तं भवद्भिरित्याहि विशिष्टस्य सखिभिन्नत्वेन घिसंज्ञानिर्बाधैवेति तदसंगतिः स्पष्टैव न च लोपेपि लिंगविशिष्टपरिभाषया दोषः सखिशब्दस्य तदवयवस्योपसर्जनत्वे
न प्रातिपदिकग्रहणाभावात् प्रातिपदिकत्ववदुपस्थापकपदोपादानं हि प्रातिपदिकग्रहणं स्यात् तत्सूत्रे किमर्थं विकृतनिर्देशो न सखिपतिभ्यामित्येवोच्यत।
अतिसखेरित्यत्र माभूदिति भाष्येपि ध्वनितं प्रकृतिकार्यं विहितविशेषणाभ्राश्रयणेनैव प्रतिपदोक्तपरिभाषानाश्रयणेनैवैतत् भाष्यं प्रवृत्तमिति न तद्विरोधः।
त्यलं पतिः समास एव कार इष्टतोवधारणार्थः स्मृतिपुराणेषु पतयेसखिनेत्यादि व्याकरणानिष्पन्नत्वेनासाध्वेव त्रिशंकाद्युपाख्यानादाविव तपोमाहात्म्य।
नासाधुप्रयोगेपि ऋषीणां दोषाभावात् याज्ञेकर्मण्येवासाधुप्रयोगे दोषाच्च अस्माकमपि स्मृतिपुराणाध्ययनविधिबलात्तेषां तपोबलाच्च यज्ञमध्येपि तदंतर्गत
तत्पाठे दोषाभावः स्वातंत्र्येण तु दृशं प्रयुंजाना अस्मदादयः प्रत्यवयंत्येव अत एव नदीसंज्ञासूत्रे भाष्ये छंदोवत्कवयः कुर्वंतीत्युक्तान त्वेषेष्टिरस्तीत्युक्तं यूस्त्र्या।
ख्याविति सूत्रे हरदत्तग्रंथे स्पष्टतरं चैतत् समास इत्युक्ते बहुव्रीहौ पूर्वेन घित्वं अत एव पतिरेतावेवेति नास्ति वर्णसंज्ञापक्षे पत्यवयवेकार इत्यर्थः तदंतसंज्ञापक्षे पत्य
वयवेकारांत इत्यर्थः सूत्रे पतिशब्दश्च तदवयवेकारेलाक्षणिकः एतेन शेषो घ्यसखि तोपतिः समास एवेति सूत्र्यतामित्यपास्तं यस्येति चेति सूत्रस्थभाष्यरीत्या
सुपति नाऽसुसख्या इत्यादौ ष्टासिध्या तथा न्यासस्य कर्तुमशक्यत्वादिति स्पष्टमेवेति दिक् नित्यं बहुवचनांत इति किमः संख्यापरिमाणइत्यनेन किंशब्दाड्डुतेः संख्या
वति कतिसंख्यत्वविधयप्रत्ययः डतिरिति भाष्ये स्पष्टत्वादिति भावः बहुगणसंख्याप्रदेशेषु एतत्संज्ञाकरणाज्ज्ञानरूपप्रकरणसत्वेपि तन्मूलकृत्रिमाकृत्रिमन्याय्यं राम॰
स्यान्याय्यत्वात् कति कतिरिकमेत्यादाविव अत एव संख्याया अतिशदंताया इति निषेदंतपर्युदासः संगच्छते न हि शदंता कृत्रिमा संख्यास्ति तस्मात्संज्ञाप्रदेशेषु अप्रयुक्ता। ४४

ति: किंच लोकप्रसिद्धमहासंज्ञाकरणेन प्रदेशेषु लोकप्रसिद्धार्थस्यावगतिरिति स्पष्टं भाष्ये अत एव पंचकत्वादित्यादिसिद्धिः एतन्यायोपयोगस्त्वभ्यासाम्रेडितादिसंज्ञा
विषयेष्वव्ये सूत्रेष्व बहुगणग्रहणं तु तयोर्नियतविषयपरिच्छेदहेतुत्वाभावेनासंख्यात्वात् बहुत्वादित्र्यादिसंख्याव्यापको धर्मविशेषः अत एव भाष्ये एतत्सूत्रमतिदेश
र्थे यदयमसंख्याया अपि संख्याकार्यं करोति तज्ज्ञापयति भाष्ये एकादिकया चापि संख्यायत इत्युक्तं तस्यायमर्थः वह्वादिकयापि स्वव्याप्य त्रित्वादिसंख्यायाः संख्याय नेनाति शब्दो
पि संख्यानकरणीभूतार्थविषयप्रश्नार्थकतया संख्यानकरणं एवं वत्वं तेप्यूह्यं यद्वा चापि शब्दौ वाक्यालंकारे एकादिकया संख्यायते सापि प्रदेशेषु गृह्यत इति।
इति लोकप्रसिद्धमहासंज्ञाकरणमिति तदर्थः एतेनार्थात् संख्यावृत्तित्वे सति बहुत्ववाचिनश्चेत्संख्याकार्यं तर्हि बहुगणयोरेवेति नियमार्थं न तु तेन भूयादीनां नत्वेषां वैपुल्या
विषयत्वाविशेष्यविशेषणत्वाभ्यामबहुत्ववाचिन एकशब्दस्य बहुत्वमात्रवाचिनां भूयादीनां च न स्यादिति: यद्वा नियतसंख्यावाचिनां चेत्तर्हि बहुगणयोरेवेति यथान्तसंख्यावृत्तिवैपुल्य
नियमः अनंतशब्दवत् अनंतवाचिशतशब्दस्य संख्याकार्याभावइष्ट एव तत्पाठस्तु संघवैपुल्यवाचकयोर्नैव ग्रहणं परस्परसाहचर्येण त्र्यादिसंख्याव्यापकध
र्मवाचिनोरेव ग्रहणात् वतुइति सानुबंधनिर्देशो ब्राह्मणवदित्यादिव्यावृत्त्यर्थः डतिस्तद्धितस्य वतुसाहचर्यादित्यलं स्नांतेत्यतः षडिति वर्त्तते संख्येति च प्रकृतं
न दाह डत्यंतेति अत एव षट्क तौ तिडडनुवादेनसुप्विहितः अत एव संज्ञाविधावपि प्रत्ययग्रहणे तदंतग्रहणं संख्येतिकिं पतयः प्रत्ययस्य अनेकसंज्ञाकरणाद
न्यार्थविभक्तिविपरिणामेन चनेद्धावितसंज्ञाश्रयणमतो न संकरः तेन हं ती त्यादौ म्ञावितिनद्वित्वं तदाह लुक् श्लु लुप् शब्दैरिति अदर्शनं लोप इत्यतो ऽदर्शनमित्य
नुवर्त्तते प्रदेशेषु भाविसंज्ञाविज्ञानात् नान्योन्याश्रयः एकसंज्ञाप्रकरणादन्यदेशस्थत्वेन लोपसंज्ञयास्सां समावेशः तेन प्रत्ययलक्षणसिद्धिः षड्भ्यो जश्श
सोः शि त्यितो जश्शसोरिति वर्त्तते षड्भ्य इति विहितविशेषणेन गौणो न परमपंचेत्यादौ तु विशिष्टस्यापि संख्याप्रकारकसंख्येयविशेष्यकबोधजनकत्वेन सं
ख्यावाचित्वाभावस्त्वमस्त्येवेति न दोषः स्पष्टं चेदं षट्प्रधान एष समास इत्यादिना सर्वादिसूत्रे भाष्ये कैयटस्तु प्रमाद इत्यन्यत्र निरूपितं प्रत्ययलोपे प्रत्ययस्येत्यनुवृत्त्या
एवं आचेप्रत्ययग्रहणं अवयवलोपे मा भूत् तेनाघ्नीयेत्यादौ नानुनासिकलोप इति स्पष्टं भाष्ये इदमेव प्रत्ययग्रहणं ज्ञापकमवयवेपि प्रत्ययत्वव्यवहारस्य एवं।
कृत्स्नप्रत्यययोरिद्दुद्वपधस्य चाप्रत्ययोर्लक्षणादिना श्रयणीयं सात्पदाद्योरिति चरितार्थं स्थानिवत्सूत्रेण सिद्धे इदं वचनं नियमार्थमिति भाष्यं प्रत्ययस्यासाधारण्णं

ल॰ श॰ अथ आर्धीयतेतत्रैवेति नचैवंदाधर्मेइतिसूत्रे तेतिके इति किंनिपात्यते आत्मनेपदं नैतदस्ति अनुदात्तङित इत्येव सिद्धं नियमार्थं तर्हि भविष्यति अत्रैव यङ्लुगंतस्येना।
श॰ शे॰ यत्रैवमिति इत्युक्तं अथ नियमत्वे तेनात्मनेपदं दुर्लभं ङित्त्वस्य प्रत्ययाप्रत्ययसाधारणत्वादिति वाच्यं आत्मनेपदमित्यस्यैव सिद्धान्तकौमुदीत्वात् ततो विपर्ययोमिदमिति
४५ वार्तिकानुसारिणामनुदात्तङित इत्येव सिद्धमिति शंकितेतदनुसार्येकदेशिनः एतत्समाधानमित्यदोषादित्यन्यत्रविस्तरः प्रत्ययलोपे प्रत्ययवदित्येव सिद्धे लक्षणग्रह।
णं प्रत्ययनिमित्तकमेव न तु प्रत्ययस्थानिकमित्यर्थलाभार्थं तेन नरवभिन्नर इत्यादावेसादिकं नेत्येके अतिदेशेनाहायेन वृद्धिसंपादनेप्युच्चारणाप्रसंगात्पषष्ठ्य
र्थाभावान्नैसादीति तदर्थमित्यपरे कार्यमिति प्राधान्यात्कार्यातिदेशोयमिति भावः इहापि परिवीरिति शास्त्रपरविप्रतिषेधेन परत्वाद्दीर्घत्वं भविष्यती
ति भाष्येण तज्वत्सूत्रे शास्त्रकार्यातिदेशयोरैक्यकथनेन चातिदिश्यमानकार्याणामुत्पत्तिदेश एवदेश इत्यंगीकारात्परिवीरित्यत्र तु न दीर्घापवादेण न किंतु पर।
त्वात् दीर्घ एव अन्यथा नेनेवोभयोर्विधानात्परत्वाभावे पर्यायो दुर्वार इति बोध्यं तदेह जसि चेति गुणोप्राप्त इति जसि चेति विहितेन गुणेनेन प्राप्त इत्यर्थः नलुमता लुप्त स्युक्तालुमंत
तस्तदाहलुगित्यादि अंगकार्यमिति लुप्तप्रत्यये परतो यत्पूर्वं तत्प्रकृति भूतान्तस्यांगसंज्ञकस्त दुद्देश्यकं यत्कार्यं आगमनांगवेत्यर्थः तेन पंचेत्यादौ पदसंज्ञा भव
ति राजपुरुषादौ भसंज्ञा च न अंगसंज्ञा तु यथोद्देशत्वात्प्रत्ययसत्ताकाले जाता तिष्ठत्येव तत्काले कार्याभावात् अप्रवृत्तावपि प्रत्ययलक्षणेन सा तस्याः लब्धांग
संज्ञककार्यत्वाभावेन निषेधाप्रवृत्तेः स्पष्टं चेदं युवोरनाकाविति सूत्रे कैयटे नलुमतेत्यस्यानित्यत्वादंगसंज्ञायामप्रवृत्तिरिति तत्त्वमिति कश्चित् अत एव पंचभिः
क्रोष्टीभिः क्रीतं कुलमिति तद्धितार्थेति समासे क्रोष्ट्र इति लुकि लुक् तद्धिते तिस्त्रीप्रत्ययलुकि पंचक्रोष्टृ इत्यत्र तृज्वत्त्वं न द्व उक्तं भाष्ये तृज्वदिति सूत्रेन चापरं निमित्तमा
श्रीयते किं तर्हि अंगस्य क्रोष्टुस्तृज्वदिति अंगसंज्ञा च भवति प्रत्ययलक्षणेनेति न चोरस्त्वत्वकृत्तृज्वत्त्वेपि परनिमित्ताश्रयणमिति पंचक्रोष्टृ इत्यस्यासिद्धिरिति वाच्यं उर
दित्यत्र शब्दांशः परस्य निमित्तत्वानाश्रयणे पंगसंज्ञाद्वारो रत्वस्यापि परनिमित्तत्वेन स्थानिवत्त्वप्रवृत्तिरित्येव लिङ्ग्यासस्येति सूत्रस्थभाष्याशयात् नियमेनापं
रत्वे वृद्धिः परनिमित्तत्वात् अत एव चर्करीत्यज घोङ्त्यादावत्वप्रवृत्तिः अचिक्षुइत्यादावजादिप्रत्ययइत्यर्थस्तु अंगस्येति षष्ठ्यानिमित्त इत्यध्याहारेण सम
तसाद अंतर्यापर्यायकथंचिदुपपाद्यः [redacted]धिकारस्थेषु कार्यकालयाभावाच्च वस्तुतस्तु कार्यकालपक्षेपि क्रोष्टुशब्दः प्रत्ययेंगसंज्ञो भवति चांगसंज्ञक ४५

स्यात्तस्य तृज्वत्त्वं स्त्रियामित्येवार्थं इमितृज्वत्त्वमनैमित्तिकमेऽप्यदिप्सार्थो गतिरः तैव पदैकवाक्यतयान्वयस्तु संज्ञासूत्राणां दुर्लभ इत्यन्यत्र निरूपितमेतेन तउरदित्यादौ श्री
कृत्यं [illegible] तेनापि वक्ष्येति लस्यानुरोधान्नतथा प्रकृते लस्यानुरोधादेवेति तदाशयः चर्करीत्य ज घो इत्यादौ तु न लुमतेति निषेधानित्यत्वाद त्वप्रवृत्तिः त्रपो
इत्यादौ [illegible] गा क्षिप्रप्रत्ययनिमित्तं लुकि भवत्येवेति तु भुवे विहितमित्यादौ उवङा पृत्पा चिंत्यमित्यपास्तं त्रिवृत्सरूपा इति ङेप्रथमयोरिति सूत्रे युष्मानिसा
दौ नस्माच्छसो न इति उपन्यासपरेण भाष्ये साम्य मोनपुंसकादिति सूत्रे शिशीलुगादिभिर्युष्मदाद्यादेशानां विप्रतिषेधपरेण वार्तिके न तद्भाष्येण च न षष्ठीति निषेधे
न च लिंगसत्तावोधनेपि लिंगबोधकप्रत्ययानुत्पत्त्या रूपेण विशेष इत्यर्थः साम आकमिति सूत्रस्थस्यालिंगे युष्मदस्मदी इत्य स्यपदांतरसंनिधानं विना लिंगवि
शेषा युष्मदस्मच्छब्दमात्रान्न प्रतीयत इत्यर्थ इति दिक् त्रेस्त्रयः अयं न सांतो निर्जांत्रयाणामिति निर्देशात् त्रेरयङ् तु न कृतः अयङ्योत्पादाविव उच्चारणार्थं च
शंकानिरासाय केचिदिति आमि सर्वनाम्न इति साहचर्यादिति भावः वस्तुवति साहचर्य स्यासार्वत्रिकत्वात् सूत्रांतरस्थनदाश्रयणे ह्रस्वरमानाभावाच्चेति भा
वः न च गौणमुख्यन्यायेनात्रनेति वाच्यं अप्रसिद्धत्वमुख्यतालाक्षणिकत्वान्यतररूपगौणत्वाभावात् अत एवोपसर्जनानां सर्वनामत्वप्रतिषेधमारब्धो वार्तिककृता
इतर विशेषणतामात्रेण तत्त्वाभावात् पदकार्य एव तत्प्रवृत्तेश्चेत्यन्यत्र विस्तरः द्विशब्दे नित्यं द्विवचनात इति संख्यापरत्वेपीत्यर्थः अत एव कस्य द्वित्वे इत्यर्थे
कस्य द्वयोरिति भाष्ये बहुष्विति सूत्रे प्रयुक्तं त्यदादौ अष्टन आ विभक्ताविति पितौ विभक्तावित्यनुवर्तते न तत्फलं न तत्तुल्यं सोलुक् पत्त्वं न दृष्टिरिति भाष्यकारस्येति भा
वः द्विपर्यंतानां किमिति युष्मदस्मदोरात्वयत्वलोपेर्वाधात् किमः कादेशविधानाच्चेति प्रश्नः भवान् भवंतावित्यत्र य औतु सवर्णादीर्घ इति इदं संभावनामा
त्रेण एषां ओइ इत्तौ च सप्तम्यर्थ इति भाष्यप्रामाण्ये नानभिधानात् क्विवंतवातेति इत्वमवकारादाविति वार्तिकस्य पावान इत्यादौ नावनिपासाधनरूप संभूतत्वात्
स्यानभ्यासस्य च फले क्यायेह शेभ्यः क्विपोनभिधानमावश्यकमिति पीवरी पीवरीत्यादि प्याय्योः संप्रसारणं च क्विपुक्तानिष्ठनेत्यर्थका [illegible] भाष्यभाषे
इति सूत्र भाष्यपर्यालोचनया सिद्धा वार्तिकात्सिद्धं धीध्यायतेर्दधातेर्वेति क्विप् च चेति वार्तिकस्य भाष्ये दधातेर्व्युत्पत्तिरेकदेशिनः शंस्या इत्यत्र क्विजेवेति न दोषः मो
ङे मने स्त्रीकारांतात् क्विवित्येके वा न प्रमी [illegible] गाक्तातिजे तु विशेषः बहुश्रेयसीति इयसो बहुव्रीहेर्नेति निषेधान्नोपसर्जनह्रस्वः यूस्त्र्याख्यौ दीर्घयोरेव ग्रहणं वा

ल.श. ख्यातृत्वात् यारुंदसीति पूर्वसवर्णे सिद्धिः पूकिंमात्रे आण्नद्या इतिन स्त्रियमाच स्रातेस्त्राख्यौ मूलविभुजादित्वात्कः स्त्राख्याविस्तुपस्थितस्त्रीवाचकशब्दस्य विशे
शे.मु. र्षणत्वात्तदंतविधिरित्याह ईदूदंताविति आच्छीनद्योरित्यादौ नदीशब्दस्तदवयवे लक्षणाबोध्या आख्याग्रहणान्नित्यत्वलाभस्तदाह नित्यस्त्रीलिंगाविति नतु
४६ अंतुप्रामण्यादिव्यौवृत्तिः नित्यस्त्रीत्वंच प्रवृत्तिनिमित्ते कंचलिंगांतरविशिष्टार्थानभिधायकत्वं ड्यंतकुमार्यादीनां क्वचिन्निर्वृत्तेन त्रिलिंगे नसमानाकारत्वयानित्य।
स्त्रीत्वाभाववारणाय प्रवृत्तिनिमित्ते कइति नन्वेवं बहुश्रेयसीशब्दस्य नदीत्वं नस्यादत आह प्रथमेति अर्थांतरसंक्रमात्पूर्वं विद्यमानं नित्यस्त्रीत्वमादाय तस्यार्थांतर
संक्रमेपि नदीत्वं वक्तव्यमित्यर्थः यथोद्देशपूर्वं प्रवृत्तसंज्ञामादायैव कार्यं कार्यकालपक्षेपि कुमारीत्यादौ प्रकृतिभूतकुमारीशब्दस्य नित्यस्त्रीत्वेन वृत्तावपि विशेष।
णत्वानित्यस्त्रीलिंगरूपार्थबोधकत्वे न नदीसंज्ञा समासे तु स्पष्टैव तदवयवस्य प्रा॰ प्तिः तन्मात्रबोधकत्वनिवेशे प्राधान्येन तद्बोधकत्वनिवेशे वानमानं तदुक्तं भा।
ष्ये एव स्त्रीविषयत्वात्सिद्धं अवयवोत्र स्त्रीविषयस्तदाश्रयानदीसंज्ञा भविष्यतीति आकडारस्थसंज्ञानां कार्यकालत्वाभावात् अन्यथा ततद्विध्येकवाक्य
तापन्नयोः कथं बाध्यबाधकभावः स्यादिति बोध्यमिति केचित्त हे बहुश्रेयसीति ह्रस्वस्तु ते गुणस्तु न प्रक्रियालाघवाय यां वार्थाने ह्रस्वः ह्रस्वं नद्योर्गुणइत्येव वाच्ये ह्र
स्वविधानसामर्थ्यात् जसि चेत्यत्रैकदेशस्वरितत्वप्रतिज्ञया ह्रस्वपदस्यैवानुवृत्तिरिति भाष्ये स्पष्टं अंबार्थानामपि गुणस्तु वक्तुमशक्यः अनः क्लीबं जलेशाके
मातृस्वकनयोरपीति भसाघु कानः शब्दस्यांबार्थत्वेन गुणापत्तेः ह्रस्वग्रहणे त्वच इत्युपस्थित्या अंतांबार्थग्रहणान्नदोषः तस्य नपुंसकत्वेपि हे वारे इतिवत्प्रसं
गुणः स्यादेव गुणाश्रुत्येकपरिभाषोपस्थितौ त्वं वे त्यादावप्यनापत्तिः अयं च ह्रस्वोः नेलस्येति न्यायात् ह्रस्वस्य गुण इत्यस्यैव बाधकः तेन मातरि स्त्रियं त्वत्र ऋतो ङेति
गुणो भवत्येवेति दिक् आटश्च नमाङ्योग इति सूत्रे भाष्योक्ते आटश्चेति न्यासे तु वृद्धिरेचीति बोध्यं अत्राइजु वक्तुमशक्यः अस्वपो ह सन्नित्यत्र वृद्धिः प्रगृणाया।
टश्चेत्यत्र धातोर्विस्पकर्षेण वृध्यनापत्तेः वृद्धिरेचीत्यस्य नु पररूपं बाधकमिति बोध्यं ङेरिति सप्तम्येकवचनं व्याख्यानात् इद्धपरत्वादिति सक्ता इति न्यायांत्र
णाद्दिर्भाषा स्पष्टं चेदं ह्रस्व न बापइत्यत्र भाष्ये यद्यपीहाण्डपवादो नद्यामपूर्वेश्यानवकाशत्वात् अपवादो नु कृदीर्घत्वस्येति दीर्घो कित इति सूत्रभाष्ये उक्तत्वे राम
मादिशीयारपितत्वसत्वात्तथापि अनकाशत्वेन बाधे अपवादप्रवृत्तेनान्तमुत्सर्गप्रवृत्तेर्नदोषः अत एव न गोरीत्वमपवादत्वाद्धलादिः शेषं बाधते किंत्वयं नव॥ ४६

काशत्वादितिगुणोपदं लुकोरिति सूत्रभाष्ये उक्तं पादः पदिति सूत्रस्थे शब्दान्तरस्यापि स्याः नित्ययोराडामोः परत्वादामिति भाष्यं त्वेकदेशयुक्तिरिति बोध्यं अत्र्यं तत्त्वादि
तिलसेऽप्युक्ते त्वोणादिकप्रत्ययान्तत्वादिति भावः कुमारीति ह्रस्वविधायके शास्त्रे ङीप उपसर्जनग्रहणाज्ञोऽस्त्रियोरिति ह्रस्वो न अचि श्नुभ्रूशब्दोऽव्युत्पन्नं प्रातिपदिकं अत्र
मेईनत्प यत्तोवा इह ह्रस्वोरिति धातोः समानाधिकरणं विशेषणं तदाह इवर्णो वर्णान्तधातोरिति। इत्यस्येति इत्यन्तस्येत्यर्थः तेन सुभ्रुवाविति सिद्धं आंतरेत्ति स्यानन्तर्गमिति भा
वः प्वोरिति किं वव्रे अविविकिं युयात् इतीयङिति सुधीशब्दे यणो निषेधारंभेणात्र प्रकरणे धातोः स्वरूपग्रहणे इति परिभाषाया अप्रवृत्तिरिति भावः एरनेकाचो
धात्ववयव संयोगपूर्वो न भवतीति धात्ववयवसंयोगभिन्नपूर्व इत्यर्थः तद्भिन्नश्च धात्ववयवपूर्वस्यैवेति उन्नियावित्यादौ न दोषः असंयोगादित्येव धात्ववयवसंयोग
भिन्नात्परस्येत्यर्थेन सिद्धे पूर्वग्रहणं स्पष्टार्थं एः किम् असंयोगपूर्वग्रहणमिवर्णस्य विशेषणं यथा स्यादंगस्य विशेषणं माभूदिति तेन यवक्रियावित्यादौ नातिप्रसंगः
लुलवतुरित्यादौ तु नातिप्रसंगः ओः सुपीति नियमात् विपरीतनियमस्तु न सुधीशब्दे चित्सुप्ययणो निषेधारंभात् कुमार्याविति अंतर्वर्तिविभक्त्यापदत्वा।
द्वाकलंतु अत्र न न ओइति निषेधात् प्रधीरिति प्रकृष्टं ध्यायतीति विग्रहे निस्वत्वाभावान्न नदीत्वं प्रकृष्टधीर्यस्येति विग्रहे तु नदीत्वं ग्रामण्योरिति अग्रग्रामाभ्यां नयते
रिति णत्वं गतिकारकपूर्वस्यैवेति भाष्ये पठ्यते स च नियमः तेन गतिकारकभिन्नपूर्वस्य नेति फलितं तद्भिन्नं च तत्तदर्थं सपूर्वपदमेव तेन निन्युरित्यादावेयणत
दाह गतिकारकेति यत्तु अत्र गति समासे नित्याधिकारस्य एव प्रतिपदोक्तत्वाद्ध्यात इति तन्न भाष्ये पूर्वपदग्रहणाभावेन समासोपस्थितेरभावेन विशिष्टरूपोपादान
विषयप्रतिपदोक्तपरिभाषाया अप्रवृत्तेः अत एव नदीसंज्ञासूत्रस्थः प्रकृष्टाधीर्यस्येति विग्रहाभिप्रायेण प्रवृत्तः प्रध्येव ब्राह्मण्ये इति भाष्यप्रयोगः संगच्छते शुद्धधियाविति शु
द्धाधीर्यस्येति विग्रहः शुद्धं ध्यायतीति विग्रहे यणेव आद्येसत्वमूताथेक धीशब्दार्थविशेषणत्वात् शुद्धत्वस्य कथमपि न कारकत्वमिति भावः कथं तर्हीति दुर्ध्या
यतीति तु दुष्टाधीर्ध्यानं येषामिति दृक्श्विकाङ्क्षेरिति विग्रहाभिप्रायेण प्रश्नः दुःस्थितेति दुःशब्दोपात्तदुष्टत्वस्य स्थितिक्रियाविशेषणत्वमिति भावः प्रकृष्टाधी
यादौ प्रकर्षः प्रशब्दार्थो धीशब्दोपात्तधात्वर्थविशेषणमिति यणभवत्येव यत्क्रियेति याचासौ क्रियेति विग्रहः तं प्रति तद्वाचकं प्रति यद्वा यस्य धातोर्वाच्या
क्रिया समायुक्ता इत्यर्थः नेहेति ततश्च संबंधसामान्यषष्ठ्येव समासः मीत्रार्थानामिति तु हेतुत्वप्रकारकबोधजनकीयावाधनार्थं विभक्तिप्रकरणे तु नष्टं तं कारकत्वप्र

ल॰श॰ सुजंतेत्वेकयोनापत्तेरितिभावः किंच हेतुत्वाविवक्षायांसंबंधत्वेनविवक्षयाषष्ठीसप्तारंभेपीत्यपिबोध्यं अस्पुटत्वंपेनाह द्वाविकसंबधिनीति अत्र पूर्वपदस्यांगत्वेनोत्तरपद॥
शे॰सु॰ लोपः शाकपार्थिवादित्वात् नभू अनंतरस्येतिन्यायेनैरनेकाचश्चः सुपीत्यनयोरेवनिषेधः सुपीतिचानुवर्ततेतदाह सुपीति लोपाविति अतोलोपः लोपोव्योरित्या
४७ ख्पामितिभावः यलोपेनिषेधाद्दलोपोनस्थानिवत् वेरपृक्तलोपाद्दलिलोपः पूर्वमिष्यते स्थानिवत्त्वादिति एवंचयणादेशोयलोपेसत्स्वइतिस्यादितिभावः अंतरंगत्वादिति वि भ
क्तौपरत्वात्पदस्येतिनिषेधस्तुन स्थानिवत्त्वस्यनः कोइतिसामान्यापेक्षनियमेनादत्वातपरपदस्याजादेशस्यैवतेनस्थानिवत्त्वनिषेधाच्चकिंवपेसकचसंबंधियलोपस्य
यणोवहिरंगासिद्धत्वंतुन अनित्यत्वात् कोलुप्तमितिभावः क्तः लोपइत्यर्थः गोमत्यते प्रत्ययेगोमानितिभाष्यात्केरस्यापृर्थस्यकचिदंगोकारः कौविधिमतिनेत्येवतु
सार्वत्रिकमित्यन्यत्रविस्तरः अनङिति अभिव्यक्तपदार्थायेइतिन्यायस्तुगोणमुख्य न्यायवत्सदकार्यविषयएवेतिभावः दीर्घस्यापीति प्रयोगस्यपकारांतानुक
रणसूत्रेअकारस्योच्चारणार्थइतिभावः लुनीरित्यादिल्वादिभ्यःस्नायोमःमस्त्वोन्यनस्यामितिनत्वमत्वेशुषःकःपचोवइतिकत्ववत्वे व्याख्यानात्प्राधान्याच्चरू
पातिदेशोयमित्याह क्रोष्टुशब्दइति नचोदात्तनकारविशिष्टमतिदिश्यतेतृज्वदितिचकारोच्चारणात् तेनक्रोष्टत्यादावुदात्तयणइतिस्वरसिद्धिर्बोध्या पक्वारे
स्तुनातिदेशः अर्थतआतर्याभावात् इदंस्त्रीस्त्रियांचेतिचप्रयोगनियमफलकमितिबोध्यं अनृन् ननुव्युत्पत्तिपक्षेतृन्नंतत्वात्तृजंतत्वाद्वादीर्घोसिद्धेनकारग्रहणं
व्यर्थमतआह नियमार्थमिति अन्येषामुणादिव्युत्पन्नानांसंज्ञाशब्दानांनेतिनेष्ट्रादयोप्युणादयएवेतिभावः तेषांतन्निसूत्रस्यवार्तिकेनव्युत्पादनानत्प्रा
दीत्यादिग्रहणेनप्रशास्तृशब्दस्यैवग्रहणमित्यन्ये अव्युत्पत्तिपक्षेतुविध्यर्थमेवेतिबोध्य भाष्यप्रयोगादिति एवंचोणादिष्वस्यव्युत्पादनमप्रामाणिकमिति।
भावः पंकजादिवद्योगरूढोयं यत्त्वोणादिकत्वमेवास्यस्वीकृत्यभाष्यप्रयोगादेवदीर्घत्वमिकुर्वतितेमान्याः भाष्यकृतान्यप्रयोगस्योदाहरणत्वेनदानेप्यस्यभाष्य
प्रयोगत्वाभावात् ण्वुल्तृचाविविभाष्येतुतृचश्चकारोव्यर्थः नचास्तृन्त्त जित्यादौविशेषणार्थःतृइत्येवसिद्धेः नचतृइत्युच्यमानेमातरौपितरावित्यादौप्राप्नो
ति तत्राहितप्रत्ययोनिरनुबंधकइतिवाच्यं नप्तृग्रहणस्ययोनिसंबंधवाचिनांचेदस्यैवनान्येषांयोनिसंबंधवाचिनामितिनियमादित्युक्तेः नेष्टत्वष्टहोतृपोतृ राम॰
णांतृन्नंतत्वस्यप्रशास्तुस्तृजंतत्वस्यतृन्निति सूत्रेभाष्यवार्तिकयोरुक्तत्वेनतेषांग्रहणंप्रपंचार्थं एवंचयथान्यासेनियमफलंचिंत्य क्रोष्टेति अनङिसंबंधेना ४७

मस्यानेचेति दीर्घः प्रथमोपस्थितत्वात् क्रोष्टुशब्दविषयार्थं तु तल्लेखः यद्वा विशेषविहितत्वात् शीघ्रोपस्थितिकत्वेन स एव न्याय्यः विभाषात् अयमपि निय
मस्त्वन्तृतीयादावज्येवोभयमिति नेनभ्यामादौ शासि क्रोष्टुपत्र इत्यादौ च न दोषः सर्वत्र विशिष्टाभावस्य सुलभत्वात् तृज्वत्क्रोष्टुः स्त्रियां चेत्याभ्यां सर्वनामस्थाने ।
स्त्रियां च तृजन्तरूपविधानेन तयोः प्रयोगनियमार्थत्वं फलति एतेन तृज्वत्सर्वनामस्थान एवेति नियमादिदं विध्यर्थमित्यपास्तम् न चैवमपि क्रोष्टुनि साध्ये
संगतमन्यत्र तृजन्तस्यैव प्रयोगेणाप्युक्तनियमस्य चारितार्थ्यादिति वाच्यं तृज्वत्क्रोष्टुरिति योगविभागस्यैवं सति वैयर्थ्यापत्तेः न च तद्धितेष्वचामादेरिति क्रोष्टु ।
तावृद्धीति सूत्रयोः क्रौष्टुः क्रौष्टीया इति भाष्यप्रयोगासंगतिरिति वाच्यं ऋकारान्तस्यैव ऋषिवाचकत्वेनादोषात् इदं सूत्रत्रयं शृगालवाचिक्रोष्टुक्रोष्टुशब्द ।
योरेवस्यार्थमित्यवधेयं तदुक्तं भाष्ये तृज्वद्भावविषये एतत् तृजन्तं मृगवाचीति तृतीयादावजादिविभक्तिषु तृजन्तं तृन्नन्तं च मृगवाचीति च अनेन तृन्नन्तमप्यनुतन्त
मेवस्यापि सूचितमिति दिक् ऋत उत् तपरत्वं भाष्यमानस्यापि क्वचित्सवर्णग्राहकताज्ञापनद्वारान्तर्यतो द्विमात्रनिवृत्त्यर्थं तेनामूहत्यादिसिद्धिरिति क्रोरिति
सूत्रे कैयटः एतत्तपरत्वं ढ्रलोपे इति दीर्घबाधनार्थमित्याह तन्न सुपत्रवाजिता वाणाज्ज्वलिता इव पन्नगाः नैर्ऋतोरस्यभासं तसवितू रश्मयो यथेति तिरामा
यणप्रयोगविरोधात् उरण्रपर इति सूत्रे आगमग्रहणाभावे उरपर इति भाष्यप्रयोगविरोधाच्च रात्सस्येति संयोगान्तलोपेन सिद्धे नियमार्थत्वेनोर्गित्यादौ नेति भावः विपरीत
नियमस्तु न पुमान् स्त्रियेति निर्देशात् एरनेकाच इति सूत्रमेरिति पदरहितसानुवृत्ताद्वृत्तिविशेषणस्वार्थिकं चानुवर्तत इत्याह धात्ववयवेत्यादि गतौ निव स
क्लस्वावित्यत्र क्रियाविशेषणत्वेन कर्मत्वाद्यण् न भूसुधियोरिति निषेधे प्राप्ते आह वर्षाभ्वश्चेति वर्षाभूर्दर्दुरे पुमान् स्वार्थिक इति स्वस्याः प्रकृतेरर्थः स्वार्थः
तत्र भव इत्यर्थे अध्यात्मादित्वाट्ठञ् द्वारादिषु स्वग्रामस्वाध्याययोः पाठेन स्वशब्दादिश्चेदेतयोरिवेति नियमार्थकेनैजागमेन पुनर्भूशब्दस्य हृद्रस्य नित्यस्त्रीत्वा
दाह यौगिक इति ह्रस्वान्ताः वर्णैकदेशाना वर्णग्रहणेनाग्रहणे रेफाभावादाह ऋवर्णादिति व्युत्पत्तिपक्षे इति अव्युत्पत्तिपक्षे स्वादिष्वपाठाद्दीर्घशंकैव नेति भावः बु
ल्लोपपक्षे निरनुबन्धकतृप्रत्ययान्ता एवेति ण्वुल्तृचाविति सूत्रस्य भाष्यस्वरस इत्यदन्ताः वैकल्पिकेति पक्षे नेम्प इत्यत्र त्यदाद्यत्वकरणादतिदेशस्य स्त्रियं इत्यादौ धा
त्वर्थानुकरणे विभक्तिकरणेन वैकल्पिकत्वस्य च ज्ञापनादिति भावः अनुकरणस्यानुकार्यशब्दस्वरूपमात्रेमर्थ इति प्रातिपदिकत्वं अनुकार्यमनुकरणाद्भिन्नं

सु॰श॰ मेवेत्कमतो रुड् इति सूत्रे भाष्ये स्पष्टं ईषदानुपूर्व्यां व्यत्यये ऽपि वाचकत्वात् दृश्यादर्थोपस्थापकत्वमिति अत्र कैयटे प्राग्दीव्यतो ऽणिति सूत्रे भाष्ये स्पष्टं अत एव किरत्यादिर्न ...
श॰सु॰ उपनिवोधः भूसत्तायामित्यादौ त्विन एव निर्देशात् कदाचिदनुकरणाद्विभक्त्यभावो ऽपि स च सूत्रेष्वेवेति प्राञ्चः णिकाः गवित्ययमाहेति वांतस्यैवानुकरणमनुकार्यस्वरू
४८ पभंगभिया चनवलोपः ज्वलतीजशित्यादौ जश्त्वाभाववदित्याहुः इत्वेइति किरश्चपचभ्यइत्यादानिर्देशाद्धातुप्रत्ययपितस्वरतिरिति भावकीरिति कृधातुरित्यर्थः।
गुणोवेति ऋतउदित्यत्र लमप्यत एव न अत एव ग्रोयङीति निर्देशः संगच्छते इत्युदंता अनङिति ऋलृवर्णयोः सावर्ण्यादिति भावः गम्लृनिति लृवर्णस्य दीर्घाभावादृवर्णस्य एवे
ति भावः ननु तुल्यास्यसूत्रे भाष्यकृता ऋति ऋ वेत्यादि विधेययोरेफद्वयगर्भलद्वयगर्भयोरत्वदीर्घत्वांगीकारेणात्र ह्लिकारकईषत्स्पृष्टो द्वयोरः आमि च तथा
धातृणामित्यत्र रेफद्वयगर्भो ऽपीति चेन्न अकः सवर्णे इति सूत्रे उक्तोत्तरत्वात् गम्लृति पत्तुलणसूत्रे उरण्रपर इत्यत्राणिति वक्तव्ये ऽण्ग्रहणसामर्थ्येनाण्पूर्वे।
णैवेत्युक्तं भाष्ये लृकारस्य परिगणितत्र लपरत्वार्थं परेणाण्ग्रहणं स्यादिति सामर्थ्योक्तिरसंगता ऋकारस्य यणि तु रोरीति लोपेन विशेष इति तन्न ऋकारांशेह
ल् रूपाणि रोरीति लोपप्रवृत्त्या फलाभावेनाप्रवृत्तेः तत्त्वाद्धस्वचयोल्लृकारांशेपि हल्रूपाण्यप्रवृत्तिरित्याशयात् वस्तुत ईदृशानामभिधाने प्रमाणं मृग्यमित्यत्र सेति
ज्ञास्त्रेहेत्यर्थः वोपसर्जनस्येति सत्वं एकादेशस्य पूर्वान्तत्वे ऽपि लिंगाद्यन्वय्यर्थप्रतिपादकत्वाद्व्ययमिति महासंज्ञया ऽस्यामव्ययत्वान्न विभक्तिलुक् सादेशात्पूर्वे
मा गुणस्तु नने इस्येति ज्ञापकेन पूर्वोत्तरपदनिमित्तकार्यात्पूर्वमेकादेशाप्रवृत्तेः न च नांतः पादमिति सूत्रस्थेन नन्वेङः पदांतादतीरुरस्तीति भाष्येण सह विरोधात्।
नसावीदृशानां प्रयोगाः नु चितः सा वपि पदत्वसत्त्वादिति वाच्यं योगविभागसिद्धस्य सो पदत्वस्य क्वाचित्कत्वेनादोषात् साव प्रयोगम एवेत्यन्ये सयइति न चास्या
नर्वर्तिविभक्त्यापदत्वादेङः पदांतादतीत्यादि दुर्वारमिति वाच्यं भाष्ये स्वादिष्विति योगं विभज्य स्वादिषु पूर्वं पदमित्यर्थः ततो ऽसर्वनामस्थाने यचि सुबंतमित्यनु
वर्तते अयचीति प्रसज्यप्रतिषेधः तेन यजादौ सर्वनामस्थाने पूर्वं पदं न मध्ये च सुबंतं तदपि पदं नेति व्याख्यानेनादोषात् आतिदेशिकस्याप्ययं निषेध इति स्पष्टमेव उ
त्तरपदत्वे चापदादिविधाविति प्रतिषेधाच्च उत्तरपदस्य तद्धितस्य वा पदत्वे कर्तव्ये अंतर्वर्तिविभक्तेः प्रत्ययलक्षणं नेति तदर्थः अतो न योगविभागमूलकप्रत्याख्यानं। राम॰
नफलभेद इति केचित् इतो ऽदित्यतो ऽनुवृत्तं सर्वनामस्थाने इति प्रथमया विपरिणम्यते णिदित्यनेन सामानाधिकरण्यादित्याह सर्वनामस्थानमिति तत्र णितः ४८

कार्यस्यासंभवात् णितियत्कार्यं तद्गतिदिश्यते शसेति अचोन्त्यधिकारात्तङितश्शसोनग्रहणमिति भावः गामिति परत्वाद्त्र वृद्धिस्तु न अनवकाशत्वेनात्वस्यापवादत्वा
दत आह ओतो णिदिति सूत्रे पतरकरणेन गस्याविवक्षितत्वमिति भावः तेन चित्रगुरित्यादौ न दोषः अन्यथा प्राधिकारोक्तदंतविधेः सत्वस्थानिवत्वेन गोंतत्वाद्दोषः स्यादेवं म
त्वोकारांतताभावाद्लिविधौस्थानिवत्वाभावाच्च न दोषः परे तु गोतो णिदिति सूत्रे भाष्ये तपरत्वं प्रत्याख्यातं चित्रगुरित्यादौ तु न दोषः गोः पूर्वत्व … गोत्वात्वस्वरे
षु स्थानिवत्वप्रतिषेधात् हे चित्रगो इत्यादौ तु लाक्षणिकत्वान्न दोष इत्यत्रैव सूत्रे भाष्ये स्पष्टं द्योः सर्वनामस्थाने णित्वं वृत्तममितैतोतोमित्यत्र भाष्ये उक्तमित्याहुः सु
द्योरिति केवलद्योशब्दस्य स्त्रीत्वाद्द्युद्युभ्यां हि सूत्रात्ततः विहितमिति यदि तु वर्णग्रहणे पि प्रतिपदोक्तपरिभाषा प्रवर्तते तेन दाम्यर्थायं यत्नः स्मृतौ रित्ति स्पष्टं तः उ
र्येनेत्यर्थः पूर्वयवायावादिष्वेकादेश उदात्तेनोदात्त इत्यस्य सिद्धत्वं वक्तव्यं तत्स्थानिकार्यादीनामस्वरितत्वायेति वार्तिकव्याख्यावसरे ऽवादेशनास्तुदाहर।
णमिति स्वरितौ वेति सूत्रस्थभाष्यविरोधः प्रकृते पूर्वपदप्रकृतिस्वरेण स्मृतस्यान्तत्वे विषनिघातेन उशब्दस्यानुदात्तत्वाद्यादेशस्य एकादेश उदात्तेनेत्युदात्तत्वे
स्मृतक्यादौ तदुदाहरणासंभवादिति तन्न तृतीयादिष्वितभिधाने पि अन्यत्र तत्सत्वे वा धकाभावात् न च गोतः इति सूत्रे द्योश्च उद्दिवत्त्वेति वार्तिके द्योशब्दस्ये
वाप्रादानादन्यौकारांतताभाव इति वाच्यं उपलक्षणतयाप्यास्मोनेनादोषात् परे त्वोदृशानामनभिधानेपि न क्षतिरित्याहुः रायो हलि अष्टन आ इत्यत आ विभक्ता
विपि नुवर्तते ॐ इति अजंताः पुल्लिंगाः ॐ रमेति रम्यते पचाद्यच् टाप् एकादेशस्य पूर्वांतत्वेन प्रातिपदिकत्वात्त्वादयः वा चेत्यादौ तु लिंगविशिष्टपरि
भाषया प्राप्तत्वात् आप इति प्रथम्यते न सामानाधिकरण्याद्गस्यति पंचम्या विपरिणम्यते विशेषणे न तदंतविधिरित्याह आवंतादिति जसः शीत्यतः शीतिवर्त
ते र्मैशुत्ति यस्येति लोपस्तु न अभत्वात् संबुद्धौ च बहुवचने झल्येत् इत्यतरादिति आङि चाप इत्यत आप इति चानुवर्तते एङ् ह्रस्वादिति संबुद्धौ प्रतिपदोक्तत्वे
न रमे इत्यसिद्धिरिति कन याह ल्भ्यादिलोपात्प्रथम मे त्वेनेन संबुद्धिलोप इति भावः संनिपातपरिभाषात्वनित्यत्वान्नात्र प्रवर्तते आङि चापः चेन प्रकृतमासिवेति
पराम्श्यते घेर्ङितीत्यतो नुवृत्तङितीति आप इति पंचम्या षष्ठ्या विपरिणम्यते इत्याशयेनाह ङिद्वचनस्येति सर्वनाम्नः स्या आवंतात्परस्य सर्वनाम्नो विहितस्य
स्य नेत्रमासपूर्वायै इति सिद्धं अत्र ह्रस्वो न स्यात् तस्य विधेयत्वेनोद्देश्यासंभवात् नापि ङिद्वचनस्य आख्यानादत आपोह्रस्व इत्याह आपश्चेति आङ्

ल.श. स्यमुपोपाठाभावेन सर्वनामत्वाभावात् तत्राह एकादेशस्येति ग्रहणादिति सर्वनामशब्देनेत्यर्थः नचैवमप्यावंतत्वाभावः एकादेशनिष्पन्नस्याबाभावात् अत्र
शे.सु. सकृत्वद्वेत्यादेोपरादिवद्भावेनात्वमाश्रित्यावंनादितिसालोपउक्तः परादिवद्भावेन तत्वं तु न लभ्यमुभयतआश्रयणेनादिवत्वाभावादिति वाच्यं उभयतआश्रयणेन
४९ त्वाभावस्य भाष्य एवादेशयुक्तित्वेपि सिद्धांतिसंमतत्वाभावात् तच्चातिङः नेड्गाधातौ वक्ष्यामः परे तु लिंगविशिष्टपरिभाषयाटावंतस्य सर्वनामत्वं आवंतत्वं तु पर
दिवद्भावेनेत्याहुः सर्वस्यामिति इह परत्वात्स्याट्कृते नेसकृदिति न्यायात् सुड्प्रतिपदोक्तस्येति दिक्शब्दमुच्चार्य विहितत्वादस्यतत्वं योत्तरेति अनेकमन्यपदार्थे
इति बहुव्रीहिः सर्वनाम्नो वृत्तिमात्रे इति मात्रग्रहणात्स्त्रप्रत्यसर्वनामत्वेपि पुंवत्वं योत्तरेतियत्तच्छब्दाभ्यामुद्देश्यविधेयत्वप्रतीत्यायोत्तराल्प्रकारकज्ञानवि
शिष्यासः प्रसिद्ध पूर्वोयस्याइत्यर्थे नोत्तरापदस्याग्रणवाचकत्वात्पूर्वनिपात इत्यन्यत्र विस्तरः स्पष्टार्थमिति दिङ्नामान्यतरालेइत्यस्य बहुव्रीह्यधिकारे सत्वा
द्विति भावः अंतराय नगर्यइति अपुरीत्यस्य पू शब्दार्थस्य विशेष्यत्वेइति भावः अन्नमानोमन्वेष्यं हे अंबेति ह्रस्वकृते संबुद्धौ चेत्सत्वं न आत्रावितिप्रश्ले
षात् द्यक्षरं यदीति पठित्वा द्व्यक्षरांवार्थस्येव ह्रस्व इति नियममाश्रित्य डलकवतां ह्रस्वो नेत्यस्य भाष्ये प्रत्याख्यानात् फलाभेदाय सामान्यतो वार्त्तिकमसंयुक्त
विषयमित्याह असंयुक्ता इति द्व्यक्षरं यदीत्यस्यागत्या द्व्यक्षरांवार्थकांतस्यैव ह्रस्व इति नियमशरीरात् जगदंबेत्यादौ ह्रस्वो भवत्येव यद्यपि जरसादेशस्येति ए
वंचेत्वशीनुइयाडामां नित्यत्वात्पूर्वमेषु कृतेषु क्वचिदजादित्वाभावात् क्वचित्संनिपातपरिभाषया जरसोनापत्तिरिति भावः यद्यपि याडामोर्जरसपेक्षयापरत्वा
त्तयोः कृतयोश्चाद्येः जादित्वविघातादेत्यसंनिपातपरिभाषया न जरसः प्राप्तिरेवमेत्वेपि तथापि तत्र प्रश्लेषफलं दर्शयितुमाह एवमिति अत्र यद्वक्तव्यं तन्निजेर
शब्दे उक्तं स्वाश्रयमिति स्वश्रूयमाण आकारः स्थानिवद्भावेनात्वमिति नचद्व्याप्ग्रहणे दीर्घेआदेशेनस्थानिवदिति ह्रस्व आत्वस्य विकृतेदात्कथं दीर्घस्यानिव
त्वेन तल्लाभः ङ्याप्स्यानिको दीर्घभिन्न आदेशोनस्थानिवदिति तदर्थ इति वाच्यं याडापऔडापआङिचापोडेरामनद्याम्नस्याविति तेषु आकारप्रश्लेषमाश्रि
त्यस्थानिवत्वनिषधप्रत्याख्यानभाष्यनये शंकासत्वेनादोषात् अत्र यत्रोदाहरणे सूत्रभाष्यवार्त्तिकानां फलभेदआपतति तेषामनभिधानं यथाअति खट्वस्य रम
अः अतिखट्वाइत्यादेः वक्ष्यमाणरीत्या दीर्घात्पूर्वं फलाभावेन स्थानिवत्वाप्रक्तौ फलभेदस्यैवाभावाच्च यत्वाकारांतरं प्रश्लिष्याकाररूप एव योनकदाचिद्रूपांतरं ४९

प्राप्नस्त्यर्थ इति तन्न मानाभावात् भाष्ये तस्यानुक्तेश्च आवर्तं पदंगमिति प्रत्ययग्रहणपरिभाषया ऽतिखट्वस्य नावर्तत्वं यच्चावर्तं खट्वेति तन्न दं गमिति भावः नन्वा
न्यायं [illegible] णोते नाग विशेषणादावर्तति पदंगमित्यर्थादिति खट्वायेत्यादौ दोषस्तदवस्थ इति वाच्य अंगस्य विशेषणत्वात् ॥ एतेन श्रुतमाकारमात्रस्य
स्थानमनुबंधमादाय आप्त्वानुसंधानाद्वा देवयाडित्यपास्तं तस्य लाक्षणिकत्वाच्च ननु स्त्रीप्रत्यये वाचनिकस्तदादि [illegible] निषेधो भाष्ये पठितस्तत्कथमस्य तत्
त्र प्राप्तिरत आह उपसर्जनेति स्त्रीप्रत्यये चानुपसर्जनेनेति वचनस्यैव भाष्ये पाठादिति भावः अत्रोपसर्जनत्वं लौकिकमेव स्त्रीप्रत्यये शास्त्रीयोपसर्जनत्वासंभ
वात् यद्यपि स्त्रीप्र त्ययान्ते शास्त्रीयोपसर्जनत्वमस्ति तथापि न तेन प्रत्ययग्रहणो इति तदादिनियमप्रसक्तिः एतत्सर्वं व्याख्यादर्शना नुरोधेन परत्वस्याका
रस्य लाक्षणिकत्वान्न याड् वर्णग्रहणे तस्य कर्तेरित्यादौ भाष्ये स्पष्टत्वात् न च खट्वार्थ इत्यत्र याडनापत्तिः स्वतंत्रजनिशाये इत्यादौ चरितार्थमिति वाच्यं परस्य
लक्षणप्रवृत्तिं विना न संभवस्तस्यैव लाक्षणिकस्य तत्परिभाषाविषयत्वात् न चेह तथा एकादेशेन मागपि तद्रूपसत्वात् पदांगाधिकारे इति वार्त्तिके नागस्य
विशेष्यताया एवोचित्यबोधनाच्च अत एवावर्तं पदंगमित्यर्थाभिप्रायेणाति खट्वायेत्यनतिखट्वायेति खट्वे इति स्थिते प्रवृत्तं ङ्याप्ग्रहणे अदीर्घ इति वार्त्ति-
के व्याख्यायां श्रुताकारस्मृतानुबंधाभ्यामाभ्यां न [illegible] शंकां कृत्वा लाक्षणिकत्वेन समाधायाकारप्रश्लेषेण नत्वत्याख्याने एतत्परित्यागे यो पापान्तराः कथं न भाष्ये
किं चांगस्य विशेषणत्वे वार्त्तिकस्य तत्रस्थानापाकारप्रश्लेषस्य च वैयर्थ्यं स्पष्टमेव किं च खट्वाया अर्द्धः अर्द्धखट्वायामित्यादौ याडनापत्तिः किं वाकारप्रश्ले
षपक्षेऽपि दीर्घान्तरस्याभावादाकारत्वस्य स्थानिवद्भावेनात्वमिति शंकाया एव दीर्घात्पूर्वे स्थानिवत्त्वस्य फलाभावादप्रवृत्तौ स्थानिन्याङ्खट्वेदृशाभावात्तदादेशे दीर्घेत
दादिस्पष्टसंभवात् परंपरयाकार्यमादाय स्थानिवत्त्वप्रवृत्तौ मानाभावात् याडाप इति सूत्रे भाष्येऽपि अतिखट्वायेत्यत्र स्थानिवत्त्वात्प्राप्तस्य याटः प्रतिषेधो
वक्तव्यः न वक्तव्यः ङ्याप्ग्रहणेऽदीर्घ इति स्थानिवत्त्वनिषेधात् न च दीर्घत्वे आबसौ भवत्पूर्वं इति याट् प्राप्नोति लाक्षणिकत्वान्न स्थानिवत्त्वे तु तत्सामर्थ्या
[illegible] त्परिभाषा प्रवृत्तिरित्युक्तं यद्यपि स्थानिवत्सूत्रयाडाप इति सूत्रस्य भाष्याभ्यां हल्ङ्यापसूत्रयाडाप इति सूत्रयोरेव प्रश्लेषो लभ्यते तथापि भाष्ये [illegible] पलक्ष
णमेतत् सूत्रविषयोदाहरणानभिधानं वेत्यनयोर्युक्तं सुधीभिर्विचार्यमित्याहुः वृश्च अत्र राजिसाहचर्याद्राजिः फणादिरेव तेनान्यस्य विभागित्वे [illegible]

ल॰ श॰ कुशोवृषौ तम्यांशब्दग्रहणं विशेष्यमादायतदंतग्रहणमित्याह छशांतयोरिति छशयोरित्युक्तेपि नस्पतिरिति चिंत्यं पदस्येतिनुस्पष्टमित्यादिसिद्धयेप्यधिकारणामेकंस्य
शे॰ सु॰ नोदेशाईति अलोत्यस्यांतवचनात् अत्रझलोझलीत्यतोझलीतिपदस्येतिस्कोरित्यतोनइतिचानुवर्तते क्रोः शुङ्क्तिपत्रक्रिं तो त्यनुवृत्तेः प्रष्टेत्यादौशादेशाभावादषणा
५० मत्वेषत्वप्राप्तोक्तमत्वणं अत्रापिसतुक्तनिर्देशोवाध्यः तस्यासिद्धत्वादिति वयोर्द्वितीयेयादत्पस्यनादिम्येतिसूत्रेभाष्यपाठादितिभावः धोपारिति धुडभावेटस्यधुरित्त
स्येतर्थः नेनवतीति जश्त्वात्प्राक्षस्यनेत्यर्थः जश्त्वनुमाश्रिवेनेतिवाध्य तैपिदित्विति एकाचइत्युत्तरसूत्रेनुवृत्त्यामध्येपिसंबंधएवोचितइतिभावः जश्त्वेनेति प
नुगमस्तुझलीति निर्देशात्शस्यनजश्त्वमिति तन्न अविकृतस्वरूपप्रतिपादनतात्पर्यादस्यसमपादित्वे॰ भत्वाच्च तत्रतदप्राप्तौन्यायसिद्धायांज्ञापकत्वायोगात् उपदि
शाजित्यादिनिर्देशःकृत्वाद्यसपतेश्च अत्रमतेभाष्यानुग्रहोविचार्यः मांस एतनेत्यस्यपदन्नइतिसूत्रेउपसंख्यानत्वादाह शसादौवेति स्त्रीत्वादिति पुंस्त्वाभा
भावादित्यर्थः नात्वंनेति स्त्रीत्वादित्यनुकृष्यते अतएवपुंस्त्वाभावान्नत्वाभावइतिनोक्तं नहिपुंस्त्वाभावोनाभावेप्रतिबंधकः नपुंसकेपितदंगोकारात् ङितिह्रस्व
श्च अत्रवाग्रहणमाद्येयूइतिस्त्र्याख्याविस्त्रीतियइत्युवङ्स्थानावितिवेतिचानुवर्तेते अंत्येयूइतिवेति स्त्रीवाचकावित्यनन्मात्रार्थकंस्त्र्याख्याविति च तत्र।
ह्रस्वयोरप्राप्ते दीर्घयोस्तुनेयङितिनिषेधादप्राप्तेविभाषेयं द्वादिष्वप्राप्तिमाशंक्यङितिह्रस्वश्चेत्यत्रनित्यस्त्रीलिंगावित्येवंविधोनियमोनाश्रीयतेइतिकैयट
स्तुह्रस्वाशमात्रविषयइत्याशयेनाह नित्यस्त्रीलिंगाविति अतएवास्यदीर्घाशेनिषेधविकल्पकत्वंभाष्येउक्तं यूस्त्र्याख्याविति सूत्रे तत्फलंकटप्रुवेब्राह्मण्यै
इतिलिंगांतरविशिष्टार्थाभिधायकत्वेनतत्वाभावात् परेत्वत्रविकल्पोभवत्येव आख्याग्रहणरहितस्येवात्रसंबंधात् यद्वास्त्र्याख्यावित्यनदेवस्त्रीवाचका
वित्येतन्मात्रार्थकमग्रशब्दाधिकारात्तत्तच्चङिदाशिभागस्यविशेषणं आतएवप्रथमलिंगग्रहणंचेतस्यात्रापकृतत्स्यन्वाख्यायकेह्रस्वोचेयङुवङ्स्थानौचप्रकृतौ
स्त्रीवचनावेवनदीसंज्ञौभवतेनतुपुंवाचकावितिवक्तव्यमितिवार्तिकेइतिशकस्येब्राह्मणैकमाभूत् अतिशकटयेब्राह्मणायप्रतिश्रियेब्राह्मण्येश्रियेब्राह्मण्ये
कमाभक्षतिश्रियेब्राह्मणायश्रियेब्राह्मणायेतिस्त्र्याख्याविति सूत्रशेषेभाष्येउक्तं एवंचास्यनिषेधविकल्पत्वमसंभवि समुदायस्यकेनापिप्राप्त्यभावात् अवयवे राम
वस्यप्राप्तावपिनस्थानेनविकल्पाभावात् ङिदाशिभागस्यैवानेनविकल्पात् एतच्चप्रकृतौस्त्रीवचनावित्यनेनसूचितं अतएवात्रकाक्वाद्वेपिविधिविकल्पएवद ५०

शितः एकेचात्र नियमो नास्ती यतइति केयटो वाक्यद्वयपर एवोचितः उपक्रमे निषेधपरतयाव्याख्यानं तु स्त्र्याख्याविति स्पनित्यस्त्रीत्वार्थकत्वमजानतो एकदेशिनो
युक्तिः इहवीयैस्त्रियामिति पक्षोपपादने उक्तिभूतमिति तन्नादरणीयं यत्तु दीर्घवाक्ये स्त्र्याख्याविती दूतोस्तदंतस्यवा विशेषणं पुनरंगेन तदंतविधिः अंगस्यचके वलस्त्री
त्वविशेषणमेव वृद्धस्वघटितवाक्ये पि स्त्रियामित्येतन्मात्रमुभयोर्विशेषणमिति तत्तु चिंत्यं भाष्यात्तदलाभात् नेयुङुवङ्स्थानावितिसूत्रे तु नेयङ्वाङ्स्थानावितिसूत्रे अंगविशेषणं स्त्रीत्वं तस्य स्त्रि
प्रत्ययङाद्विशेषणतायाएवोचितत्वात् यस्यांगस्येयुवाविति भाष्योक्तेः स्त्र्याख्यावित्यस्य नित्यस्त्रीलिंगावित्यर्थक स्ययूइत्यनेनैव सम्बन्धत्वाच्च अत एवाति
श्रियेब्राह्मणाये त्यत्र तेन निषेधाद्वयनदीत्वप्रयुक्तमपि नदीकार्यं न ननु यथा खलपुत्र्यै ब्राह्मणायेत्यादौ लुवंतस्य त्रिलिंगत्वे पि प्रथमलिंगग्रहणान्नित्यनदी
त्वं भवतीति भाष्य उक्तं तथा ब्राह्मणान्यस्यैत्यादौ पुंवद्भावेन स्वलिंगप्रयुक्तकार्याभावस्याप्यतिदेशान्ननत्वं स्पष्टं चेदं तस्मात्कुस्मइति सूत्रे भाष्यकैयटयोः यत्र
ः तिदेशो न प्रकृतिलिंगप्रयुक्तकार्यातिदेशो न तद्धितरुचस्त्रा अयकार्यप्रवृत्तिः स्पष्टं चेदं स्त्रियामिति सूत्रे भाष्ये युक्तवद्भावादिप्रत्याख्याने पि यथा दारादिशब्देः पुं
स्त्वेन स्त्रीरूपार्थस्याभानं तथा प्रकृते स्त्रीत्वे न पुंसो भानमिति तेन न ननत्वं पुंस्त्ववाच्ये नत्वमित्यर्थात् न चैवं खलपुत्र्ये इत्यत्रापि पुंवद्भावेन नित्यस्त्रीत्वात् स्त्रेणे स्त्रि
द्भमिति वाच्यं स्त्र्याख्याविस्यस्य स्त्रीत्वविशिष्टमेव यस्त्राहेत्यर्थात् न चायं तथा स्त्रीत्वेन रूपेण वस्तुतः पुंस्त्वविशिष्टस्याभिधानात् यद्यपि पदार्थमात्रे शास्त्रीयं लिंगत्र
यमस्ति तथापि व्युक्तिवस्तुपदंगयादि वोध्यत्वकाले तल्लिंगोपसर्जने पि स्त्रीपदादिवोध्यत्वदशायां तत्सत्वे मानाभावात् प्रकृते तु ब्राह्मणायेत्यादि विशेष्यदर्शनेन नतत्स
त्तानुमानात् स्पष्टं चेदं भाष्यकैयटयोः एव श्रीशब्दात्क्विलुपि श्रियेब्राह्मणायेत्यादौ विकल्पापत्तिः युक्तवद्भावे स्त्रियामग्रस्यवर्जनात् अत्र सूत्रे नित्यस्त्रीत्वा
नियमोनित्येन तत्वेभिधाने इष्टापत्तेः भाष्ये दृश्यमाने श्रियेब्राह्मणायेत्यादि तु काजंतात्क्विपि वोध्यं विपरीतं नित्यस्त्रीत्वनिवेशवादिनो लुवंतो श्रियेब्राह्मणाये
त्यादौ तत्नापन्ति दोषं इत्याहुः यूकि मात्रेयद्यपि पूर्वत्र दीर्घपरं तथापि विभक्तिविपरिणामेन दीर्घ स्त्र्याख्यावित्यन्वयो वोध्यः एतत्सर्वं वामीत्यत्रापि वोध्यं इदुद्भ्यामिदु
च घेरितिसूत्रे योगविभागेन व्याचष्टे इदुद्भ्यां अनदीसंज्ञकेभ्यश्च घेरौदित्याभ्यां वाधात् ङे राममिति सूत्रान्नदीग्रहणानुवृत्त्याहनदीसंज्ञकाभ्यामिति मत्वामिति
संनियोगशिष्टपरिभाषया अनित्यत्वाद्यण् त्रिचतुरोः अष्टनआइत्यतो विभक्ताविति वर्तते तत्फलं त्रि भार्यः तृतीयांतेन समासः भार्याभरणीयः अचिर अलौमप्रि

भाष्येवसिद्धेक्त तइतित्र अनुवर्तमानेतिस्वत सइत्यस्य षष्ठ्यंतत्वकल्पनाय अन्यथा त्रिचतुरोस्त्रियोस्थानेवानुट्स्यापत्तौ आदेशेनतिसृचतस्रो बाधापत्तिरितिदिक् नुमचि
ए.सु. रेति अत्राचि रोशे नतिसृतिनिषेधोमूलं एतेन स्त्रीत्वरूपार्थविशेषविभक्तिसंज्ञानिमित्ततिसृपेक्षयानुडंतरंगइत्यपास्तं अतोनिषेधादेवार्थसंज्ञाकृतवहिरंगत्वाना
५९ श्रयणात् अन्यथा आमितिप्रत्ययविशेषापेक्षत्वेपि संज्ञार्थविशेषानपेक्षत्वेनांतरंगत्वाच्च यादेशेतदसंगतिः स्पष्टैव. वस्तुतः स्वरूपेणोपादानेनवहिरंगत्वं किंतु के
नचिद्विशेषधर्मेणोपादानेएवेति विशेषापेक्षस्य वहिरंगत्वमेवनेतिसृदधातौ निरूपयिष्यामः तृज्वत्सूत्रे भाष्येतुनतिसृतिज्ञापकाद्रादेशोनुड्विषयेनपूर्वविप्रतिषेधे
नतुत्रिचतुरोतिरित्यपवादविषयेविप्रतिषेधाप्रवृत्तेः रादेः शस्यसवापवादत्वादित्युक्तं त्रिचतुरोर्विशेषणादिति स्त्रीनिष्ठसंख्यायांवर्त्तमानयोरित्यर्थइतिभावः नेहे
ति त्रिशब्दस्यपुनपुंसकवृत्तित्वेपिसमुदायस्यस्त्रियांवृत्तेरंगविशेषणत्वे आदेशःस्यादितिभावः आमित्विति तत्रामषष्ठीवहुवचनमेवार्थाधिकारात् अतोनडे
शमित्रयादेशाइति वाच्यमिथतिसेतिअंगविशेषणत्वे त्राम्याप्तिः स्यादितिभावः प्रियाजसृत्रिसस्इतिस्थितेअंतरंगानपीतिन्यायेनविभक्तिलुकिपुनःसुपितदं
तविधिनानिर्दिश्यमानपरिभाषयात्रिशब्दस्यादेशाः नतोनद्युतश्चेतिकप्तुनसमासार्थोलौकिकवाक्येऋकारांतोत्तरपदत्वाभावात् कइशनेत्यनइःप्रियत्रि
णीत्यादि अत्रनुमःपरत्वात्तिस्रादेशेपुनःप्रसंगविज्ञानेननुम् नतिसृतिज्ञापकेनसामान्यतआगमविषयेआदेशोनेतिज्ञाप्यतेप्रत्ययोत्तरेतिसूत्रेचोमौभ
भाष्यप्रयोगौ दूरत्वे इति वहिरंगासिद्धत्वंतुनयासयोरितिनिर्देशेनानित्यत्वान्नप्रवर्त्तते विभक्ताविति युवारनाकावित्यत्रभाष्येपाठात् व्याख्यानेतस्वारिभाष्याद्वे
षेवपाठाच्च सख्युरिति सख्याशिश्वीतिङीषूपस्यतिचेतीकारलोपः लक्ष्मीरिति कृदिकारादितिङीषिलक्ष्मीस्यपि स्त्रीतिस्त्यायतेस्त्यांशुक्रकशोणेनइतिस्त्री।
स्त्यायतेड्रटिटिलोपयलोपौरित्वान्ङीप् इयङिति स्त्रीशब्दस्यकारांतत्वादियङेवानुवर्त्ततइतिभावः गुणानेतिजसिचेतिगुणः आङोनाऽस्त्रियामित्यत्र घेरुत्वनवापद
स्येतिरित्यर्थः वाच्यतइतिस्त्रीशब्दस्ययङिस्यनेनान्वयःनुमिकोचीति पूर्वकारिकोक्तेर्बाधेसतियत्फलितंतदाह ओस्त्यादिति कजादौयइयादेशविधि तुम
अपवादत्वे पुंस्त्रिविधमानस्यस्त्रियाः स्त्रिशब्दस्योमादिषुवत्तुर्ष्वेवनत्वन्यत्रापुणादिभिर्बाधादितिभावः पुंवद्भावादिति तृतीयादिषुभाषितपुंस्कमनेनैकोमा शम-
वः नेतुअस्वेवाके ऽप्यस्त्रीत्यस्यसंबंधेनस्त्रीशब्दावयवभिन्नह्रस्वेवर्णांतादित्यर्थेनकथमत्रप्राप्तिरतआह अस्त्रीति तत्रवीजमाह नत्वेवह्रस्वैवेति प्रसज्यप्रतिषेध ५९

नु न [illegible] मेत्युपापत्तेः नन्वियङुवङ्स्थानाविभक्तेऽपि ह्रस्वस्य निषेधः किं केवलमादृती ईर्घस्या यमिति नत्र ह्रस्वपराभावादिति भावः अयं [illegible] नामिति श्री [illegible] वची [illegible] नात्
मिलन् [illegible] मालिकिपूर्वी अत्यंतत्वान्न सुलोपः नेयङुवङ्स्थानयोरुच्चारणं स्यान्नार्थं स्यान्न ह्रस्वोभावस्तु इंतः इयङुवङोः स्थानाश्रितत्वेयोरिति बहुव्रीहि [illegible]
विषयेएवतेनं प्रकृष्टाधीः प्रधीः प्रध्ये इत्यादौ न निषेधः [illegible] व्याख्यानात् तेन हे श्री रित्यादौ निषेधसिद्धिः श्रियावित्यादौ तन्निवृत्तिसिद्धान्[illegible]
यंगोवाधकाभावात् [illegible] स्थितिः कथं तर्हि दृष्टांतस्यतं [illegible] ह्रस्वनिषेध इति फलितं अत एव प्रकृष्टाधीर्यस्या यस्य प्रधीरित्यत्रापि वधी [illegible] स्य नदी संज्ञा [illegible]
[illegible] भाष्ये अवयवस्त्रीविषयत्वासिद्धमिति वेदियङुवङ्स्थान प्रतिषेधे परत्वात् [illegible] प्रतिषेधः प्राप्नोति अवयवस्य यङुवङ्स्थानत्वात् आध्ये प्रध्ये सिद्धं [illegible]
[illegible] स्यागस्य पूर्वो भवत् तस्य सेदं ग्रहणं न चेतस्यागस्य पूर्वो भवत इति श्रिये इति श्रिये इति ङिति ह्रस्वश्चेति विकल्पः स्यामि [illegible] इति [illegible] प्रधीशब्दस्येति प्रकृ[illegible]
[illegible] र्थकस्येत्यर्थः [illegible] त्यादीनामिति अयं भावः भाष्ये [illegible] प्रधये इत्या [illegible] विषयङ्स्थानत्वान्निषेधमाशंक्य यत्र नदीकार्यं प्रधये [illegible]
[illegible] कथं [illegible] किं प्रकृष्टं ध्यायतीत्याद्यर्थे [illegible] तत्र [illegible] भावेन [illegible] संगतिः स्त्रीविषयावयवो [illegible] मित्यत्र [illegible]
[illegible] विषयाविन्यर्थः नित्यमेव [illegible] विनाभी [illegible] कटपूर्वामप्ली नांकि या शब्दत्वात् [illegible] स्यावृत्तिः [illegible]
[illegible] अत्रा [illegible] मानपदां [illegible] साधारणमिति अत्रा [illegible]
[illegible] बहुव्रीहि [illegible] रूपत्वे [illegible] नदी [illegible] एवं न तत्प्रवृत्ते [illegible]
[illegible] सुलभः आध्येरीति [illegible] इति [illegible] पूर्व [illegible]
[illegible] भावात् [illegible] इति [illegible] घटित [illegible] त्यर्थः तेन [illegible] बहु [illegible]
[illegible] ग्रहणं चेत् अवयवधी [illegible] नदीत्वा [illegible] निषेधस्य [illegible] भावादिति [illegible] इति [illegible] स्त्र्यर्थः [illegible] मिति

स.श. मोर्दिकस्येत्यान्यत्रनिषेधस्यचप्राप्तेरितिभावः पुंसित्वोदृशवहुव्रीहावपिननदीत्वं नेयङितयवयवस्यनिषेधात्समुदायस्याप्राप्तेश्च पुंवदिति सुभ्रुध्यामनोतीति वि
शे.ऽ. विग्रहे इतिशेषः तस्यनित्यस्त्रीत्वाभावेनपुंसीवस्त्रियामप्यनदीत्वादितिभावः इतिविग्रहेत्विति ईदृशपदघटितविग्रहकेस्त्रीलिंगवहुव्रीहौकर्मधारयेचे।
५७ त्यर्थः अतवहुव्रीहावप्यव स्यनेयङितिनिषेधः ङितितुसमुदायस्यविकल्पइतिवोध्यं स्त्रियोच अत्रासंवुद्धौसर्वनामस्थानेइतिनसंवध्यते आरंभसामर्थ्या
त् [illegible]इति तदंतशब्दानांवहुत्वाद्वहुवचनं प्रातिपदिकविशेषणत्वात्तदंतविधिः स्त्रियामितिचाधिकारः कासिहेसुभ्रुइति एवंगानसीनापहारोत्त
रेणमविसंधिर्यविधिनात्वयापि हापितस्पर्शितः सहेसुभ्रुकासीत्येवंवहुविलसापेत्यर्थः नेयङित्यनेनावयवस्यसमुदायस्यचनदीत्वनिषेधात्प्रश्नः प्रमा
दाद्दतिविग्रहपीडितत्वेनानुवधानलक्षणोत्रप्रमादः सचविग्रहपोषकत्वात्काव्येगुणः एकादुएकोवायस्मिन्नादृशमुत्तरपदंयस्येतिसूत्रेवहुव्रीहिगर्भोव
हुव्रीहिः उत्तरपदेणइत्यनेन समासपदघटितवाक्यैकदेशानुमानात्समासोविशेष्यइत्याह तस्मिन्समासेइति आरंभेति प्रातिपदिकान्तेत्यने
नविकल्पेमणत्वेसिद्धइत्यर्थः पुनरिति णत्वहरोतृतं मानइत्यर्थः यणमिति हल्कारेतियणामित्यर्थः भेकुजाताविति शिलागडूपदीभेकीवर्षाभ्वीकमेकी।
ङसिरित्यमरादस्यव हृदित्वेनवाडिषितिभावः अन्यत्वस्यगौरादिपाठान्नित्यमेवङीषुभेक्यापुनर्नवायांस्त्रीतियादवप्रसुनः पुत्रः स्त्रियांत्वमी आहुर्द्दु
हितरमितिवन्नित्यत्वंतत्वेष्युपपत्तेरित्याहुः गौरादित्वादिकल्पनेमानाभावात् अमरेवर्षाभूःकमठीडुलिरित्येवपाठइतिसुवोधिनीकारइतिमाधवस्याद
नुसारेणमूलंवोध्यंङीपटापीनस्तइति स्त्रियांयत्प्राप्नोतितन्नेतिव्याख्यानादितिभावः स्वस्रादिषुमातृशब्दस्यननांदादिसाहचर्यात्प्र सिद्धत्वाचसंवं
धिकजननीवाचकस्येवग्रहणं संनिपातपरिभाषयैवतिसृचतस्रोर्ङीवभावेसिद्धेतदनित्यताज्ञापनार्थंतयोर्ग्रहणमितिकेचित् स्वस्रादिषुतिसृचतस्रोः
पाठेअनार्षइतिकल्म्यजंतसूत्रस्यभाष्यस्वरसः ॐ इतिअजंताःस्त्रीलिंगाः ॐ अतोम् अतइत्येतदधिकृतंतस्यांगस्यविशेषणंस्वमोर्नपुंसकादितिचोदन्य
नेवे [illegible]सुवाधकोयेननाप्राप्तइतिन्यायात् अमितिच्छेदोनतुमितिज्ञानमित्यादौसुपिचेतिदीर्घापत्तेः संनिपातपरिभाषयादीर्घवारणेतुहेज्ञानेत्यादौअ राम
संवुद्धिलोपस्यानापत्तिः मनिमित्तस्यप्रकृतिप्रत्ययसंनिपातस्यप्रत्ययलोपेनविनाशात् अतएवेङ्ह्रस्वादितिसूत्रेज्ञानेत्यादौमलोपायकतरदित्यादौला ५२

पाभावाच्चांगाक्षेपव्यधिकरणान्वयहल्सदानुवृत्तयश्चास्यिनाभाष्येनत्नुमितिछेद उक्तइत्यलंभाष्यविरुद्धकल्पनयेतिदिक् जसःशीश्रौङ आपइत्याभ्यांपश्चिश्रौ॥
ङइतिचानुवर्ततेतदाह क्लीवादित्यादि यस्येतिच इश्चाश्वयंतस्येत्यर्थः व्याख्यानाद्इस्येत्यधिकारस्थेननतद्धितद्धितप्रत्ययतद्धितोनुष्यक्तेतदाह भस्येत्यादि भस्यत्रिति
मगोत्प्ये श्रौङःश्यामिति इतएवनिर्देशादस्यनित्यस्त्रीत्वंवोध्यं श्रौङइतिस्वरूपकथनेसर्वेइत्यस्यभाधिकारेणासिद्धेः जेस्य सस्तत्रसुवेवआस्यावातल्पं
स्कसद्दिदितोनुमित्यतोनुमितिसर्वनामस्थानइतिचानुवर्ततेअंगस्येतिचप्रकृतंनच झलजभ्यांविशेष्यते नपुंसकस्येतिगृह्यमाणस्याभावात् अंगस्यैवविशेषणं
अस्थिद धीत्यादौनुगृह्यमाणस्यैवप्रकरणात् श्रुतेर्वलवत्वात् अतएवत्रिचतुरोस्त्रियामितितयोरेवविशेषणमित्याकरः उपधादीर्घइति सर्व
नामस्थानेचासंवुद्धावित्यनेनेतिभावः शेषमितिकर्मणिघञ् यत्रजपाःपुसीतिनुमाप्योवादः अद्इइत्तरादिअद्दुइतिपाठः दस्यछुलंडस्यसंयोगांतलोपश्चादेशस्वरू
पमंगमियानकृतइतिकैयटः पंचभ्यइति अधिकव्यवच्छेदायास्यसर्वादिषुतर्गणाकार्यत्वात परेतुडतरादिभ्यइतिविरुद्धंविभक्तिपंचम्यंतत्वादंगस्येत्यने
नान्वयानर्हमितिडतरादिभ्योविहितयोःस्वमोरंगसंज्ञानिमित्तयोरित्यर्थइतिभाष्येसर्वादिसूत्रे स्पष्टएवंचपरमकतरंकुलमित्यादौनादहयत्तुकैयटेनार्थ
द्वारकंविधानमाश्रयितव्यंतेनपरमकेतपदित्युक्तंतन्नतस्यपदडतराद्यर्थगतसंख्याभिधायिनइत्यर्थस्तदापंचम्यंतात्ताद्दशार्थप्रतीत्यसंभवः यदिषष्ठ्यर्थेपंच
मीतदाविहितविभक्तित्वादितिभाष्यासंगतिर्विधानस्यसर्वथानाश्रयणेनार्थद्वारकंविधानमितितदूथासंगतिश्च नचैतदर्थमुपसर्जनप्रतिषेधारंभोव्यर्थःस्यादितिवा
च्यं तन्मतेतत्प्रत्याख्यानस्येवैतद्भाष्यप्रवृत्तेः परमकतरादिव्यावृत्तयेऽवश्याश्रयणीयविहितविशेषणेनैवातिकतरादिव्यावृत्तोसव्यर्थइतितदाशयः त्यदादीनामइत्यत्र
षष्ठ्यंतत्यदादीनामित्यर्थद्वारकंविभक्तिविशेषणमस्यिदधीसादावंगंतथातद्विशेषणंव्याख्यानादित्यपितत्रैवभाष्येस्पष्टमित्याहुः ङित्त्वफलमाह टेः तिविं
शानेर्इत्यनोङितिवर्ततेभस्येतिचाधिकृतं पंचमइतिडटोमुटिभत्वाभावइतिभावः अन्यतमस्येति डतरादिष्वपाठादितिभावः एकतरमिति एकाचप्राचा
मितिडतरच् एकतमस्यत्वेकतमदित्येव परत्वादिति नुमपेक्षयेतिशेषः शब्दोनरमास्याझलंताजंतलक्षणभेदाच्चनुमप्यनित्यइतिभावः केचित्तुषिभावात्पर
त्वाजरसित्तःशोझलंतत्वान्नुमित्यर्थमाहुः अग्रयत्नवत्कव्यतन्निर्जरशब्देउक्तमस्तीतमहतःसांतेतिलुप्तषष्ठीकंपृथक्पदंसंयोगस्येत्यनेनसमानाधिकरणेनोपधायाः

ल·श· त्यनुवर्त्तेतेति तदाह सांतसंयोगस्येत्यादि उपधाग्रहणं च पूर्वत्वमात्रोपलक्षणं पारिभाषिकार्थस्येहासंभवात् सर्वनामस्थाने इति च सांतसंयोगविशेषणं अत एव हंसा
श·सु· सिरुषीत्यादौ न दोषः यद्वा नंत्यविकारोंत्यसदेशस्येति न दोषः मांस्पचन्या इति मांसस्य पचनीत्यर्थः मांसस्य पचि ल्युड्घञोरित्येतत्सिद्ध्यर्थानुवादः एवं च शास्त्रत्वेन च सा
४४ रूप्ये न लुमतेत्यस्य च नित्यत्वमित्यभिमानः कृत्ताविति भाष्ये तत्र त्वननुवृत्ताविति भावः मांसस्पचंदसीति मांसस्य लकारस्य ड्वादौ प्रत्यये परे छंदसीत्यर्थः मांड्गिशारद्वि प्र
त्सिद्धोदाहरणं ह्रस्वो नपुंसके क्लीववदर्थे वर्त्तमानस्याजंतस्येत्येव सामर्थ्याल्लाभात् प्रातिपदिकत्वाभे प्रातिपदिकस्येत्येतत्स्वप्रधानस्येत्यर्थलाभार्थं तेन कांडे इत्यादौ अतव
ङ्गावेव प्रातिपदिकत्वेपि न ह्रस्वः विभक्त्यर्थस्य संसर्गत्वेपि प्रवृत्त्यर्थापेक्षया प्राधान्यमस्त्येव प्रथमायाः अपि अन्याभिहितशक्तिरर्थ इति तत्र पितत्संसर्गकोवो
ध इति तस्याः प्राधान्यं कांडे तिष्ठत इत्यादौ आख्यातार्थकर्त्तुः कर्तृक्रियाभावेन क्रियायामन्वये तदभिन्नप्रथमार्थस्यापि तेन संबंधेनान्वयात्तस्य प्राधान्यं स्या
द् चेदं भाष्ये ज्ञानवदिति दीर्घान्तत्वमप्युक्तो न कश्चिद्विशेष इति भावः श्रीपाणीत्यादावेकाजुत्तरपदे णत्वं भवत्येवेति बोध्यं इकोचि सुपीति वक्तव्ये वि
भक्ताविति चिंत्यप्रयोजनं विभक्तौ किं मधुन इदं माधवं हैवारेहैवारीति अत एवेकोचीति सूत्रस्थमिह किंचित्प्रयो इति शङ्कु इत्यादिति ह्रस्वस्य हेत्वपुड् इति च भा
ष्ये संगच्छते इद्ध्योत्वेति दध्यादीनां क्रमेण गावौ हरौ क्रोष्टाहरये इत्यवकाशः तुमोवारिणी इति तृतीयादिषु भाषितः पुमान्येन शब्देनेत्यर्थे पीलुशब्देति प्रसंगः
तस्माद्भाषितः पुमान्यस्मिन्प्रवृत्तिनिमित्तरूपेर्थे इति बहुव्रीहिः भाषणं क्रिया यया स्वकरणं तया क्षिप्तशब्दस्य क्लीवेन समानो नु पूर्वेरकः समानार्थस्य यद्यतेप्र
त्यासत्तेः तनोः शब्दस्याद्यत्वात् फलितमाह प्रवृत्तिनिमित्तैक्य इति इकोचीति नपुंसकस्येति चानुवर्त्तते च तत्र षष्ठ्यंते नाथो लभ्यमाने इक इति किं श्रीपेण टारे किं
अनादिनो अयं च ह्रस्वनुमोरभावातिदेशः क्लीवत्वविशिष्टार्थवाचकस्य पुंविशिष्टार्थवाचकत्वरूपातिदेशः क्लीवत्वरूपार्थे अप्रवृत्तेस्तत्पुरस्सर्वकार्याप्रवृत्तेरित्यन्यत्र
विस्तरः अस्थिदधि नकारादुकार उच्चारणार्थः अनङ् उदात्तस्योच्चारणे न सिद्धावुदात्तग्रहणं असति यत्ने उदात्तादिशब्दैरनुपात्तो गुणो विवक्षित इति ज्ञापनार्थं
त्रिचतुर्भ्यामिति सूत्रेति सूत्रे तलित्यत्र ह्रस्वप्रयुक्तेनोदात्ति कर्त्तव्ये आद्युदात्तनिपातनं विवक्षार्थे निपातनं सामान्यादेशप्रयोगप्राप्तिः सामान्यादेशप्रयोगकरणं वैयर्थ्यं इति एम·
पिहंत्यनुरूपेतोदात्तेनुदात्ते वोच्चारणे पञ्चाद्युदात्तोच्चारणं विवक्षार्थे तदुक्तमसति प्रयत्ने इति परमास्थिशब्दादावंतोदात्ते उदात्तगुणस्यापि स्थानित्वेनात्र न द्विवक्षायां ५४

नमानभिति भाष्ये स्पष्टं उदात्तत्वफलं दध्नेत्यादावल्लोपे सति तन्निवृत्तिस्वरेण विभक्त्युदात्तत्वं दधनीत्यादौ श्रवणं च ज्ञापनफलं तु तृज्वत् गातानाभिन्न स्वरकाणामनाकार इ
ग्रामेत्यनेन तत्स्वरकानङ् सिद्धिरिति दिक् तदंतेति आगत्वादिति भावः अत्रापि नपुंसकस्येति संबध्यते तन्न धात्वा आदगमहनेति किप्रत्यये दधिनेत्यादौ न तत्त्वगृ
ह्यमाणस्यैव वत्ति शेषणं तेनातिदध्ना ब्राह्मणेनेत्यादि सिद्धं सुधियेति शोभनज्ञानवत्त्वरूपैकप्रवृत्तिनिमित्तत्वात् पुंवत्त्वं धीशब्दे प्रकृष्टज्ञानवत्त्वमेकं तत् मध्विति
मकरंदमद्यमाक्षिकवाचिनः पुंनपुंसकयोः सत्वात्पुंवत्त्वं मृद्वीकाविकारवाचिनो नित्यनपुंसकस्य तु न स च माद्वीकं मधुन द्वयोस्त्वमरेणोक्तः भाष्ये मध्वेत्यपि शब्दइत्ये
स्यलिंगव्यत्ययोदाहरणं तु माध्वी गीर्वो भवंतु न इति लिंगसिद्ध स्त्रीत्ववाचिनपुंसक मधुशब्दाभिप्रायेणेति दिक् स्नुवेति मासपृत्स्नूनां पदादिषूपसंख्यानमिति वृत्ति
कोक्तेरिति भावः पूर्वविप्रतिषेधेनेति न च नित्यत्वादेवनुम्सिद्धः किं पूर्वविप्रतिषेधेनेतिवाच्यं तदंते नुमि कृते अंगाधिकारे तदंतविधेः सत्त्वेन पद्दागमादृति।
न्यायेन नुमविशिष्टस्य तद्ग्रहणेन ग्रहणात् सूत्रे षष्ठीनिर्देशाभावान्निर्दिश्यमानस्य नुमाव्यवधानमित्यस्याभावे न तृज्वत्त्वप्राप्तेः सकृद्गतिन्यायान्न पुनस्तृज्व
त्वं नन्वयं कथं पाक्षो भूनइत्यस्यैव भाष्ये उदाहरणान्तरनीय दित्यवचीत्यत इत्यय कएवान्यथाप्रथमोपस्थितसर्वनामस्थानोदाहरणत्यागे बीजानापत्तिरितिचेन्न।
उदाहरणस्य संकोचकत्वे मानाभावात् नइदुक्तं न चोदाहरणमादरणीयमिति उदात्तवतातिरिक्तोदाहरणाभाव इत्येवं परतया नादरणीयमिति तदर्थ इत्याहुः सु
स्वेति अत्र शोभनलवनकर्तृत्वं प्रवृत्तिनिमित्तं पुंवत्त्वे ह्रस्वाभावेनाघित्वान्नाभावो न नुमभावाच्च यण् धातृ इति अनङ्नलुमतेति निषेधात् धारणादिकर्
तृत्वं चास्यैकं प्रवृत्तिनिमित्तं हे धातरिति ह्रस्वस्य गुण इति गुणः एच इक् आदेश इति कर्मणि घञ् ह्रस्वपदेन कर्मधारयो निर्धारणे सप्तमी सौत्रमेकवचनं त
दाह आदिश्येत्यादि मध्ये इत्येव पाठः तद्योगे [illegible] स्यात् ऐचापूर्वभागो वर्णसदृश उत्तरस्तु इवर्णो वर्णसदृश स्तत्रोभयातरत मत्स्वाभावात्पर्यायेणावर्णादिः प्राप्नोत्व
र्णाभावार्थं तदाह इगेवेति यथाप्राप्तमेव नियम्यत इति न यथासंख्यं ह्रस्वएचुनाम्त्येव वर्णे ओडिस्यादौ दीर्घनिर्देशादितिस्पष्टं भाष्ये न चार्द्धमात्रा वर्णस्याध्यर्द्धमात्रेव।
र्णोदर्णायेरित्युत्तरभूयस्त्वात् तत्सदृश इगेव भविष्यतीति नार्थः सूत्रेणेति वाच्यं अध्यर्द्धमात्रावर्णस्यार्द्धमात्रेवर्णावर्णयोरित्यस्यापि पक्षस्य सत्त्वे वेच इति सूत्रे विनिगम
नाविरहात् श्रेयणं भाष्ये उक्त तयासमप्रविभागपक्षस्यैव भाष्यकृत्संमतत्वादित्याहुः प्रैणामिति न च रणयोर्हलीति विषयसप्तमीति प्रागेवात्वमिति वाच्यं निर्दिष्टपरि

श॰ श॰) षावाधेसीनाभावात् आत्वेकृतेनुडनापत्याहलादिविषयाभावेनस्वेमात्वाप्रवृत्तेश्च केचित्तुनुटोनिमित्तस्यसंनिपातस्यदीर्घत्वाविनाशावश्यकत्वेनतद्विषयेसंनिपातपरि
शे॰ सु॰) भाषाप्रवृत्तिविषयएवन नामीतिदीर्घस्तुसुपिचेतिदीर्घस्यनित्यत्वाद्बाधनइतिमाधवाशयमित्याहुः ग्रामणिकुलमित्यादौनपुंसकहस्वस्यापितीतितुग्न सम्पुदितप्रातिपदिका
५५ पेक्षहस्वस्यबहिरंगत्वेनवर्णमात्राश्रयेनतुङ्नुक्तिमसिद्धत्वात्पेतुग्भवत्वतुकोर सिद्धइतिवचनान्नलोपइतिसूत्रेकृतेतुग्रहणाच्चहस्वस्यपितीतिसूत्रेणान्तरंगपरिभाषाया
अप्रवृत्तिंवदंतितेषामुपजीव्यविरोधान्नतुक्\ अजंतत्वमुपजीव्यहस्वप्रवृत्तेः नचैवंसंनिपातपरिभाषायाअप्यर्थातस्याअप्युपजीव्यविरोधमूलकत्वात् किंचतस्याअ
पिसएवार्थः अतएवसंनिपातपरिभाषादोषत्तिस्यणावसरेवर्णाश्रयःप्रत्ययोवर्णविधावलसानिमित्तंस्यादित्युक्तं नचनप्रत्ययःसंनिपातलक्षणःअंगसंज्ञानत्वनि
मित्तंस्यादित्यग्रिमभाष्यविरोधइतिवाच्यं तस्यैकदेशयुक्तित्वात् अन्यथाशे वइत्यादावपिमालोपनिमित्तंनस्यादित्यन्यत्रनिरूपितं [illegible] ग्रामणीकुलमित्या
दौपूर्वोत्तरपदनिमित्तहस्वेबहिरंगपरिभाषयापिसिध्यतीत्याशयेनकृत्त्वेमजंतइतिसूत्रेहस्वस्यपितीत्यादौतद्रुपन्यासएकदेशिनइतिनतद्विरोधइत्यलं ॥ ॐ ॥
हृत्यजेनानपुंसकलिंगाः ॐ होढः झलोझलीत्यतोझलीतिपदस्यस्कोरित्यतोंतइत्यनुवर्ततेझलिपरेपूर्वस्यपदांतेविद्यमानस्यवहस्येत्यर्थः उत्सुनविहितःध्रुडित्याद्या
सिद्धेः दादेर्धादादिग्रहणमौपदेशिकदादित्वलक्षकंव्याख्यानादित्यभिप्रेत्यफलितार्थमाह उपदेशइति एतच्चप्रकृतसूत्रेभाष्येध्वनितं तत्रहिषत्वस्यासि
द्धत्वाद्धत्वंप्राप्नोतीत्याशंक्यापवादत्वेनसमाधायाथवैवंवक्ष्यामिहोढःअदादेरितिततोधातोरितिदादेरितिवर्ततेनेतिनिर्दिष्टमित्युक्तं द्रुहेस्तु वाद्रुहेत्यनेनढत्वस्यापिवि
धानात्तत्रनदोषइतितदाशयः तत्रधातोरितिसूत्रेभाष्यकृत्कृतदादेरित्यनुक्तेः फलांतराभावेनतदुपदेशवद्दादिलक्षकंसामर्थ्यात् अर्थाधिकारानुरोधाच्चपू
र्वत्रनिषेध्यसमर्पकेप्येवंअतएवनामधातुविषयेदामलिडित्यादौढत्वघत्वाभावौसिद्धौ एवंचतदेकवाक्यतयापवादत्वपक्षेपिदादिपदस्योपदेशकालिकत्व
लक्षकत्वंविना तदनंतरंदादेरितिवर्ततेइतिभाष्यस्योक्ताशयमजानतोघोदादेरित्युच्यमानेकथमधोगितिशंकायामेकाचइतिसूत्रार्थमपिप्रसंगान्नि
र्णीतुंधातोरव्ययवोयोदादिरित्यर्थमुक्त्वागर्दभयतेरप्रत्ययेगर्धबित्यादौभष्भावायेतरसूत्रेआवश्यकंवैयधिकरण्यमुक्त्वाधोग्धेतितुव्यपदेशिवद्भावात्सिद्धमि श्रम
तिभाष्येउक्तं तत्रोत्तरार्थंवैयधिकरण्यमावश्यकमितिवदतातस्येहानावश्यकत्वंसूचितं तेनचदादेरित्यस्योक्तार्थकत्वंसूचितमित्यन्यत्रविस्तरः धुगित्यादिसिद्धं ५४

योगे नोक्तः औपदेशिकप्रायोगिकयोरौपदेशिकस्यैव ग्रहणमिति परिभाषा तु तत्र तत्रोपदेशग्रहणं कुर्वत्सूत्रविरोधेन न तरप्तमपौ घात्वसंज्ञकस्येत्यादिसूत्रस्थभाष्यविरोधेन चाप्रामा
णिकी तत्र हि भाष्य इदमुक्तं इह हि व्याकरणे सर्वेष्वेव सानुबन्धकग्रहणेषु रूपमाश्रीयते यत्रास्यैतद्रूपमिति रूपनिग्रहश्च शब्दस्य नान्तरेण लौकिकं प्रयोगं तस्मिं
श्च लौकिके प्रयोगे सानुबन्धकानां प्रयोगो नास्तीति कृत्वा द्वितीयः प्रयोग उपास्यते कोऽसावुपदेशो नामेति अनुबन्धप्रत्यासत्त्या सानुबन्धके त्वयुक्तं न्यायस्यान्यत्रापि
तुल्यत्वादिति बोध्यं एकाचो बश् झषन्तस्येति वक्तुं युक्तं भष्पदाशक्तिकत्वेन लाघवात् निर्वृत्तमिति धुग्भ्यामित्यादौ पदान्तत्वादेव सिद्धिरिति भावः ॥
सामर्थ्यादिति स्ध्वोर्ग्रहणस्येतरव्यावृत्त्यर्थत्वे तु तदनुवृत्तेः फलाभाव इति भावः धातोः किं तद्धाड् इत्यादि ननु दुहेर्घत्वे धात्ववयवमेकाच्त्वं पदं दुहिति उ
चितिश्च तत्राद्यो न झषन्तोऽन्त्येन बश् इ घितितु नावयव इति कथं भष्भावोऽत आह व्यपदेशिवद्भिति विशिष्टोपदेशो मुख्यो व्यवहारः सोऽस्यास्तीति व्यपदेशी
तिनं तुल्यमित्यर्थः इदमाद्यन्तवत्सूत्रे भाष्ये स्पष्टं एकाचः किं दामलिट् बशः किं क्रोत्स्यति झषन्तस्य किं दास्यति धुगिति अत्वसंतस्येति सूत्रे ऽधातोरिति निषे
धेन कारकं प्रत्ययप्रधानीभूतक्रियावाचकस्यापि धातुत्वादिति भावः नच धातोरुच्यमानं कार्यं तत्प्रत्यये भवतीति परिभाषया कथमत्र घत्वादि तत्प्रत्ययो धातु
संशब्देन न विहितः प्रत्यय इति वाच्यं अस्य पदान्तनिमित्तत्वेन प्रत्ययनिमित्तत्वाभावात् अत एवाप्रशानिति चरितार्थं अन्यथा मानो धातोरित्यस्यापि
न तत्प्रवृत्तौ नत्वानापत्त्या तदसंगतिः स्पष्टैव वाह्नह दुहेः प्राप्ते रन्येषामप्राप्ते उभयत्र विभाषेयं इग्यणः यणः स्थाने इति नन्वेवमुदुहितणमित्यादौ लस्यात्तमे
कुवचने इह इत्यस्य संप्रसारणत्वाद्धल इति दीर्घापत्तिः नच यथासंख्यसंबंधाद्दोषः ऋलृक्सूत्रे लृकारोपदेशः किमर्थ इत्यादिभाष्यविरोधादिति चेन्न प्र
देशरूपणाद् इग्यणित्येव सिद्धे संज्ञाविधानसामर्थ्येन तद्भाविते पक्षाश्रयणान्न दोषः वाक्यस्य संज्ञेति पक्षे भाष्ये संप्रसारणस्येत्यादौ संप्रसारणजातस्य
संप्रसारणग्रहणे न ग्रहणमित्युक्तं तथा तदेकवाक्यतयात्र पक्षे तद्भावितस्य संज्ञेति भाष्ये सूचितं तेन दुग्भ्यामित्यादावपि न दीर्घप्राप्तिः अत एवा
स्वधूस्थासानुवृत्त्या स्वरस्याप्रस्त्यादौ पूर्वरूपं न समानाङ्गग्रहणं तु भाष्ये प्रत्याख्यातं तथा च भाष्यं शकहूर्थमित्यादौ पूर्वरूपाभावाय समानाङ्गग्रहणं कार्यं न कार्यं मतं संप्रसा
नृप... अमन्ते ... नितिरित्यादौ गये केन विनीतो वामित्यादाविव विभाषा तत्प्रतिरूपकनिपातो गौकारेणाविषयः अयं ... प्रकृतेपि नद्दत्यस्य विभक्तिप्रति
पक्वादन्यार्थं तु मूलोक्तकस्य नावश्यकत्वं तदाह सर्वमिति सर्वेषां विघात इति अस्यप्रा प्रकृतिशेषः तत्रयंमुक्ते सरस्वतीत्यनयोर्वाधकाभावात् भवतिशु
नुद्रीत्वस्य तु न पादादिस्थत्वात् एतेनादिभ्यः सर्वेषामिति बहुवचनमसंगतमित्यपास्तं अग्ने तेजस्विन्निति अनुदात्तं सर्वमित्यनयोः संबंधानन्तरेण निवृत्ता
तत्साहचर्येण पादादावित्यस्याप्यविद्यमानवत्त्वे निवृत्तिरिति भावः आमन्त्रिते किं देवं करोषि सामान्यवचनं किं अग्ने देवि सरस्वति इडे काम्ये इत्यादौ पर्या
येषु परेषु निषेधो मा भूत् सामानाधिकरण्यं चैकार्थविशेष्यकबोधजनकत्वमेव न तु प्रवृत्तिनिमित्तभेदेन भेमिति दिक् सुपादिति शौभनौ पादावस्येति बहु
व्रीहिः संख्यासुपूर्वस्येत्यकारलोपः समासान्तः अंचेः सुपीति निपातनं साहचर्यादिति भावः अनिर्दिता इत्संज्ञकेकार इडिताना मित्यर्थः अंगस्येत्यधिका
रः अंचतेर्भस्येति अल्लोपोन इति कदस्यापि प्रसंग भवति भेनप्रत्यक्त्यादौ पूर्वोकारेन प्रवृत्तिः अच इत्यंचतेर्लुप्तनस्य ग्रहणं व्याख्यानात् भस्येति किं
प्रत्यंचौ लुप्तनस्येति किं पूजायां प्रत्यंचा चौ नेदं वर्ग ग्रहणं व्याख्यानात् तदाह लुप्तेत्यादि अरा इति कार्त्स्न्य इत्यादीनामनभिधानमिति भावः एवं चा
णग्रहणमुत्तरत्र संप्रसारणस्येत्यत्र तेनोपस्थितं द्यावृत्त्यर्थमावश्यकमिहापि संबध्यते न त्वत्रास्य व्यावर्त्यमस्ति त्याकरेस्पष्टं अक्तेति तत्परिभाषाभावे तु चोप्र
त्यंगस्य प्रतिषेधो वक्तव्य इति वचनमेवं भाष्योक्तेः शरणं विष्वग् चादासर्वनाम्न इत्यतः सर्वनाम्न इत्याकृष्यते सामर्थ्यादुपसर्जने प्रवृत्तिः अप्रत्यय इति पा
ठः विद्यमानः प्रत्ययः क्विवादिरित्यर्थः वप्रत्यय इति पाठे प्यकारस्याविवक्षितत्वात्समर्थः अद्यादेशसध्र्यादेशौ तो दान्तौ निपातनादिति स्पष्टं भाष्ये
अदसो असेरितौकार उच्चारणार्थः अदस इत्यवयवषष्ठी सग्रहणं तस्यानिकोकाररेफयोरप्युपलक्षणं तेनादस्यतिअ दो अद इत्यादौ न दोषः दादि रामः
तिकिं अमुयोरित्यत्रोत्वस्य मा भूत् समाहारद्वंद्व इति इदमर्वाचामनुरोधेन वस्तुतो युक्तमेतत् उसजसिति द्वेद्वे सुलोपे यं तत्त्वाद् ह्रस्वस्य पूर्वं विपातेन मुं ६५

दनेकानंत्यस्यप्राप्तावित्यर्थः ४

सकह्रस्वसवर्णदीर्घयोःप्राप्तयोर्दीर्घस्यशब्दांतरप्राप्त्याऽनित्यत्वेननित्यत्वादपरनिमित्तकत्वेनांतरंगत्वाच्चह्रस्वत्वे ततः सवर्णदीर्घे उ इति रूपासिद्धेः अतएव
वोकालेत्यत्र उकारइतिनकृतं तस्मात्स्विउतक्रतउदितितपरत्वेन भाव्यमानो कारस्य सवर्णग्राहकत्वात्तसिद्धमितिबोध्यं ष्यङः संप्रसारणमितिसूत्रेभाष्येऽन
त्यविकारेंत्यसदेशस्येति परिभाषापठितांत्यसदेशानंत्यसदेशयोरेकप्रयोगेयुगपत्प्राप्तावंत्यसदेशस्येवेति तदर्थः अनंत्यविकार इति लिंगं तामर्थतःपठति
अंत्यबाधइति अंतस्यबाधकार्यप्राप्तावर्थः अन्यथा णोनइत्यादिनेतेत्यादावेवबस्यान्तन्नुनमतोत्यादाविति भाष्यस्पष्टं अल्लोपोनःसांते त्यादावनेक।
क्लिष्टकल्पनापेक्षयेयंन्याय्या किंच भसंज्ञायां कार्यकालपक्षाश्रयणमशक्यं परत्वेन पदसंज्ञाबाधकत्वानुपपत्तेः राज्ञइत्यादौनलोपस्यासिद्धत्वात्पूर्व
मल्लोपोनइतिलोपेपश्चात्प्राप्तनलोपेकवाक्यतापन्नपदत्वस्येतदेकवाक्यतापन्नभत्वेनबाधायोगान्नलोपापत्तेश्च तस्मादाकडारस्थसंज्ञासुपर्थो
प्राश्रयणमेवावश्यकमिति यजादिस्वादिपरयोनित्यपर्यस्यनतत्रलाभः ष्यङः संप्रसारणमितिसूत्रस्य कार्यकालसंज्ञापरिभाषंभस्येत्यत्रउपस्थितमि
दंभवतियच्चिभमिति तत्रयजादिस्वादिपरत्वंप्राकारं विशेषयिष्यामः अनाकारमितिभाष्यंत्वेकदेशयुक्तिः यजादिप्रत्ययस्यांगांशेउपस्थितांकांस्तत।
यातेनानोविशेषणायोगाच्चअतएव सर्वफलानामन्यथासिद्धिंप्रदर्श्यापितस्माद्व्यान्येतस्याःपरिभाषायाःप्रयोजनानितदर्थमेषाकर्तव्येति उपसं।
त्दंतंभाष्येइतिभावः अंत्यसदेशस्येति अंत्येनसमानोदेशोयस्येत्यर्थः नत्वंचात्यवर्णतद्वर्णयोरितरापव्यवधानेभवतीतिचलीकृप्यतइत्यादौऋका
रांतरगतरेफस्यानराजभागेनव्यवधानान्नांत्यसदेश संभवइतिननत्रैतत्परिभाषाप्रवृत्तिः अतएव नसंप्रसारणइत्युदाहरणाभृतस्यविद्धइत्यादौनान
त्यसिद्धिः अतएवनसंप्रसारणइतिसूत्रंसार्थकंनैतस्याःपरिभाषायाःप्रयोजनानीतिनत्सूत्रस्थभाष्यस्यत्वयमर्थः एतत्सूत्रसाध्यानिविद्धइत्यादीनु
दाहरणानिनैतस्याःपरिभाषायाभवंतीति अंत्यसदेशत्वाभावादितिचतद्भावः परस्यैवेति द्वशब्दस्येवेत्यर्थः अःसेरिति अत्राकारेणाकारस्यापि
ग्रहणातेनाम्प्रहेणेत्यादिसिद्धिः तत्रत्यासर्वनामाइतिपूर्वपदांतस्यात्वं त्यदाद्यत्वे इति त्यदादीनामत्वविषयइत्यर्थः परेइति अत्रतंत्रेणार्थद्वयमपिसू
त्रार्थेसूत्रस्यानुरोधाद्व्यवस्था अत्रअसमारणामुपन्यस्यति उक्तंचेति लत्ववदितिचलीकृप्यतेइत्यत्रयथालत्वंरीगृकारयोर्भवतितथेत्यर्थः अत्राद

६६ अपूर्वविधित्वसंभवादिमं तन्न्यायपुरस्सरत्वेन करोति न न्यायाप्रवृत्तावपि अत्रैतदप्रवृत्तौ मानाभावात् अत एव भाष्ये दसो सेरिति वार्त्तिकप्रत्याख्यानायाय वाऽसेरिति।
पररूपत्वाय पुं व म मुमु यङि ति न सिध्यति अद इड्डि ति प्राप्नोति अदमुयङि ति भवितव्यमनंत्यविकार इत्युक्तं अत्रेति प्राप्नोतीत्युक्त्या तत्रासंमतिरुक्ता इति
भाष्ये वृत्तेव्य मित्यनेन दृष्ट्यमुत्वमिति पक्षे संमत्यभावो दर्शितः इति भवितव्यमित्युक्त्या च तत्र शब्दे अप्रयुक्तत्वं सूचितमित्याहुः विष्वग्देवयोः किमिति च स्याप्नु
पेलस्याप्रामिदं मन्तरपदाधिकारादं चु रूपे अन्तरपदे इत्यर्थो हि विष्वगेवचनमित्यादेर्व्याप्तौ व्यर्थमप्रत्ययग्रहणमत आह अप्रत्ययेति तेनेति अन्यथा तःकृइत्यत्रा।
निरुक्तसमास इत्यतो नु दृश्यमानस्य वृत्तौ न तरपदासैपपिका धातुरूपे अन्तरपदे इत्यर्थो पत्ता वृषस्कादिसादावेव स्यादिति भावः उदईत् अत्राच इत्यनुवर्तते स
मः समो मिडि ति सम इगितिवानकृत परिभाषाज्ञानकृतगौरवापत्तेः तिरसस्ति अल्लोप इत्यत्र शकंध्वादित्वात् पररूपेणाकारः प्रश्लिष्यते अस्य अल्लोपो लोपा
भावो यस्मिन्नं च ना वित्यर्थस्तदाह अलुप्ताकारेति तिरश्चेति अचि तेऽलोपस्य स्थानिवत्त्वं तु न पूर्वत्रासिद्धीये न निषेधात् पूजार्थस्येति पूजारूपार्थस्य ग
म्यत्वे इत्यर्थः अत एवाव्याकुलं गच्छतीत्यर्थके चितं गच्छतीत्यादौ न लोपोऽन अव्याकुलगमनेन पूजा गम्यते न त्वञ्चतेरेवसोऽर्थ इति स्पष्टमञ्चेनपादानेइ।
ति सूत्रे भाष्यकैयटयोः पूर्वोदाहृतं प्राच इत्यादि चिरंतनादिरूढस्येति बोध्यं एते नांचेर्गतावितिनियमेनैव सिद्धे नांचेः पूजायामिति व्यर्थमित्यपास्तं न
लोपाभाव इति ओपधत्वबोधनद्वारेत्यर्थः स्पष्टं चेदं परेश्च घाङ्कयोरिति सूत्रे भाष्ये अपि नाञ्चसमवधाने चोः कुरिति कुत्वाभावो निरुपपदाञ्चिकनूस
निपात्यत इति बोध्यं सडीनिति वचनाद्यात्कुत्वाभावः षत्वं स्कोरितीति सलोपे षत्वस्यासिद्धत्वात् सलोपे कृते षत्वमिति बोध्यं अत एव षत्वे इति सप्रम्प
तं न पठितं व्रश्चः क्विपि ग्रहिज्येति संप्रसारणे पूर्वत्वे श्चुत्वस्यासिद्धत्वात्सलोपः सुवृइ स्विति चत्वे स्यासिद्धत्वात् डःसीति वाधुट् निपात्यत इति भा।
ति प्रत्ययान्ता इति शेषः तत्र एषदृहयोर्णाभावश्चागमे जगादेशश्च महेः कर्मणि प्रत्ययश्च निपातनात् शतृवदिति प्रत्ययग्रहणपरिभाषया शतृ
प्रत्ययान्तवदित्यर्थः शतुरनुम इति सूत्रे बृहन्महतोरुपसंख्यानमिति तु एषदादिव्यावृत्त्यर्थं नियमार्थमिति बोध्यं अत्वसंत चस्त्वर्थे अनु इति लुप्तषष्ठी राम
कं पृथक्पदं अधातोरित्यसंतस्यैव विशेषणं तु शब्दान्तदाह धातुभिन्नेति अत एवोगिदचामिति सूत्रेऽगोमत्यते रप्रत्ययेगोमानिति प्रयोगो भाष्ये संगच्छते अगविशेश। ६६

प्राप्तत्वात् तदर्थसिद्धत्वं तदं न विधेरनुवादकत्वं तद्ग्रहणं परमिति वचनसामर्थ्यादुपधापदासंबंधेन चारितार्थ्यादित्यभिमानः अयमभ्युच्चयइत्याह नित्यमिति कृताकृतप्रसंगि ।
त्वमात्रेणोत्यर्थः सामर्थ्यादिति वाक्यार्थबोधकालेविरोधाभावेनोपधापदासंबंधकृतेसामर्थ्यात्पूर्वं दीर्घप्रवृत्तिरेवकल्प्यतइतिभावः धीमानिति नचैकानुबंधपरिभा
षयामतुपो त्राग्रहणात्सूत्रं तु सर्वादिपाठे तेनुनासिकोकारविशिष्टे भवतुशब्दे चरितार्थमिति वाच्यं पकारादेः समुदायानुबंधित्वेप्यतोप्यनुबंधकत्वाभावात् अवा
यवानां नांतरीयकतया समुदायोपदेश एव ऋषितात्पर्यमित्यर्थस्यादेच उपदेशा इति सूत्रस्य भाष्यसंमतत्वेनयदुपदेशप्रयुक्तायस्येत्संज्ञातस्य तदनुबंधकताया
एव स्वीकारात् नचोकारलोपेत्वं तत्वस्याप्यभावः उकारस्याश्रयणेन तदंशोभूतपूर्वगतिस्वीकारात् एतेन तदाश्रयणेः तुवंतमेतन्नात्वं तमित्यपास्तं तस्याश्रयणा
भावात् तस्मादनुनासिकोकारविशिष्टोपदेशो यइन्तरं तस्यप्रयोगस्थस्य दीर्घइति सूत्रार्थइतिनदोषः नियमार्थमिति धातोश्चेदुगित्कार्यंतर्हि नलोपिनो ।
चते रेवेति नियमइतिभावः तेनोखास्रत्ब्राह्मणीत्यादेरनुमड्डीपोन न्यायप्राप्तात्लोपाकरणपूर्वकेनलोपकारणस्य विवक्षार्थत्वमित्याशयः यद्यपि अंचते
नलोपिन एवेति नियमेप्यंचतिग्रहणं चरितार्थं तथापि भाष्यप्रामाण्येन सामान्यापेक्षउक्तनियमोयुक्तइतिबोध्यं नन्वत्र धातुत्वात्कथंनुमत आह अधा
तोरिति नचोपदेशिकधातुविषयक एव नियमोस्तु किमनेनेति वाच्यं औपदेशिकत्वानंतर्भावेण सामान्यापेक्षनियमज्ञापनार्थत्वात्तत्फलं परीणध्वदित्यादा ।
विकगोमानित्यादिनामधातावुगिनुश्चेति ङीव भावइतिदिक् कपच्चपहेत्लोपेन स्थानिवत् कोलुप्तत्वात् अत्राचार्यकिंवर्वाचीनमतेन वस्तुतहलंतेभ्यस्तदभा
वत्वेन आपइत्यत्र भाष्ये स्पष्टं उभेभ्य इत्यस्यानुसारेण गर्गदंडनन्यायादत्र समुदायेवाक्यपरिसमाप्तिरित्याह उभेसमुदितेइति द्वेइत्यनुक्त्वैवसिद्धेउभग्रह
णस्यप्रयोजनं यत्तूभग्रहणसामर्थ्यात्सहभावोपसर्जनद्वित्वविशिष्टार्थकं तेनसमुदितेइत्यस्यार्थलाभइति तन्न अशब्दार्थत्वात् शब्दाधिक्यादर्थाधिक्यस्य वह
मानतास्वीकृतोपदेशित्वाच्च ध्वनितं चेदं न दसति प्रयोगेनेउभग्रहणांसहार्थे विज्ञास्यतेइतिग्रंथेनभाष्ये अतएव समुदायेभाष्येगर्गदंडनन्यायेनैतदर्थसिद्धमा
श्रित्य समुदायग्रहणंकर्तव्यमितिवार्तिकं प्रत्याख्यातं तुल्यन्यायात्तदर्थकत्वेनपराभिमतमुभयग्रहणमपत्याख्यातं सुधियोभिभावयंतु तत्रद्वयादिशब्दानामेकापायेः
द्वित्वाद्यभावनित्यादौ अभ्यासलोपेकार्यकालपक्षेणसंज्ञेतिनजुसएकादेशात्पूर्वमायनादिषूपदेशिवद्वचनेनांतरंगत्वादंतादिशेपिसर्वे सर्वपदादेशाइतिन्यायेनस्था

ऽङ्गवृत्तौ स्थितत्वेनजुस्तापत्तिः किंचैकादेशोजुसोपवाद विषयस्यजायमानत्वेनप्रकल्प्यवापवादविषयमितिन्यायेनपूर्वमतिभावाप्रवृत्तौ एकादेशेजुसापत्तिः य
यादेशेसंमु यप्रकृतसंज्ञायाः स्थानिवद्भावेनाभ्यासलोपसत्त्वेपिपंचमीसमासेनैकादेशस्यस्थानिवत्त्वान्नतत्प्रवृत्तिः अतएवप्रत्येषिषत्नित्यादौनदोषइत्यवं
नामैतावदुयोभ्यवच्छिन्नोपिनुमइहानुवर्ततेसामर्थ्यात्तदाह नुमेति दाजः शतरिशपः श्लोश्लाविति द्वित्वेऽभ्याससत्त्वेभ्याभ्यस्तयोरालोपेददीदतिदधत्।
दिधं नोचनमिहत्वानं आसवे दग्धशवनुम्वितिसूत्रमनुवर्तते षत्वापवादत्वादिति कुः किमतइतिन्यासेनदृष्टेइत्यध्याहारेणचवहुव्रीहिफलेसिद्धप्रत्य
यग्रहणोनान्यपदार्थांशेवीप्सार्थवहुव्रीहिणालब्धंताद्दशादिक्विन्नंतविषयंलक्षणमचरितार्थमितिभावः खकारइति अघोषमहाप्राणशजुल्यत्वादिति।
वः केपटेति किमस्यपस्येतिसूत्रस्येत्यादिः असिद्धत्वादिति यद्यपिजश्त्वापवादः कुत्वंतथापिशस्थानिकजश्त्वस्येवनजुस्वस्थानिकस्यामीतिभावः वस्तु।
तदिदंचिंत्यं प्रत्ययग्रहणस्यवहुव्रीहिमात्रफलकतायाएवभाष्यकृतोक्तेः तस्माद्दध्यगृअंचुयुजिक्रुञ्चुश्चस्यचारितार्थ्येनजश्त्वषत्वापवादतानुपपत्तेर्नतदे
तन्मतइतिवदतास्सूचितमितिदिक् नगिति षडगकाःप्राग्वत् नङ्भ्यामिति मस्जिनशोरितिनुम्तुन धातुप्रत्ययेतद्विधानात्. स्पृशोनु अनुदके किं उद।
कस्पर्शः अंतोदात्तत्वमिति नित्वाद्यनुदात्तत्वंप्राप्तं कुत्वस्यजश्त्वंप्रत्यसिद्धत्वादाह कुत्वात्पूर्वमिति वोरु सिपिधातोरित्यतोधातोरितिवर्ततेतच्च वोभ्यां
विशेष्यते पिपठिषतेः क्विपिअतोलोपेप्रातिपदिकत्वात्सोहल्ङ्यादिलोपेप्रत्ययलक्षणेनपदांतत्वाद्रुःकृत्वेऽल्लोपोनस्थानिवत् पूर्वत्रासिद्धेतन्निषेधा
दितिकेचित् कौलुभेनेतितुतत्त्वंनुम्वि इण्कोरितिवर्तते व्यवधानेऽप्राप्तेरिदं अयमप्यधिकारः अतएवनिंस्वेत्यत्रधातोःसस्यनानेनषत्वं व्यवायशब्द
स्यप्रत्येकंसंवंधोव्याख्यानात्तदाह प्रत्येकमिति अपिनाऽव्यवधानेपि नुम्स्थानिकेति प्रकृतसूत्रस्थंहयवरट्सूत्रस्यंचभाष्यमत्रमानंप्रश्र्वेतिषत्वेइति स
पादसप्ताध्यायीस्थकार्ययोग्यतायांत्रिपादीस्थस्याप्रवृत्तेर्हल्ङ्यादिलोपोत्तरंविविशस्इत्यवस्थायांषत्वस्यासिद्धत्वात्संयोगांतलोपेषइत्यर्थः कलोपइति पदां
तसंयोगादिलोपस्यसंयोगांतलोपापवादत्वादितिभावः तडिति तक्ष्णोतेः क्विप् प्यंताभ्यामिति णिलोपस्यस्थानिवत्त्वात्तकुस्थानेत्योदौसंयोगादिलोपाप्रा एम·
प्तिः काष्ठशगेवनास्तिकुतः काष्ठशकुस्थातेतिपरेष्ववघांकयोरितिसूत्रस्यभाष्येणानविरोधः तत्रझल्परसंयोगादिलोपमाशंक्यतथोक्तं नस्पदोषइति कौलु ६०

प्रमितितु न सार्वत्रिकमिति भावः इत्यन्यत्र विस्तरः दिधगिति दादेरिति घः एकाच इति भष्भावः विद्वानिति विदेः शतुर्वसावदादित्वाच्छपो लुकि शतुर्ङित्वाद्गुणाभावे उगि।
त्वान्नुमि सांते ति दीर्घे संयोगांतलोपे तस्यासिद्धत्वान्नलोपो न वसोः प्रत्ययग्रहणे तदंतग्रहणं भस्येत्यधिकारात् तदाह वस्वंतस्येत्यादि न च विदेः शतुर्वसोरेकानुबंधकत्वा
त्तस्यैवात्र ग्रहणं स्यान्न तु लिडादेशक्वसोरिति वाच्यं वसुसादेशेन तस्यापि द्व्यनुबंधकत्वादिति स्पष्टं भाष्ये विदुष इति संप्रसारणपूर्वस्य षत्वं तु कोः रित्यसिद्धत्वं तु।
न पदांतपदाद्योरेकादेशस्यैवेति तेनासिद्धत्वात् सेदिवानिति षद्लृधातोर्भाषायां सदेर्मिलिटः क्वसो द्वित्वे तएकेत्सेत्वाभ्यासलोपयोर्वस्वेकाजादिनीट् अरुदतेति परे
तुपदावधिके व्याख्याने सेदुषः अ सितिस्थिते इट् संप्रसारणयोः प्राप्तौ प्रतिपदविधित्वेन शीघ्रोपस्थितिकत्वेन पूर्वं संप्रसारणे वलादित्वाभावादीटः प्राप्तिरेवनेति से
दुष इत्यादि सिद्धिरित्य कृतव्यूहपरिभाषानिष्फलाल स्यानुरोधादत्र पदावधिकमेवान्वाख्यानमित्याहुः साहचर्यादिति न च महस्पतेः क्विपि महतोपि धातुत्वसंभव
इति वाच्यं औपदेशिकधातुत्वासंभवेन तत्साहचर्येणौपदेशिकधातुभिन्नसांतसंयोगस्य ग्रहणमित्याशयात् सुहिनिति नांतलक्षणादीर्घे सुसंयोगांतलोपस्या
सिद्धत्वान्न हिसीत्यस्येदित्वादनिदितामिति लोपो न ध्वदिति लंसु ध्वंसु अवलंसने अनिदित्वान्नलोपः वस्विति दत्वं विवक्षितं इति भाष्ये असुञुपदेशिव
न्वचनं स्वरसिध्यर्थं बहिरंगलक्षणत्वादित्युक्तेरिति भावः वस्तुतो वचनमेव ज्यायः विवक्षितसप्तम्यामपि विभक्तिवृद्धिनिमित्तत्वेन बहिरंगत्वात्ततः पूर्वपरमपु
त्रिनित्यादौ स्वरप्रवृत्तौ दोषात् बहुपुंसीति विभक्तौ लिंगविशिष्टाग्रहणान्नासुङ् विभक्तिविवक्षाया लिंगकार्यांतरमेव सत्वेन नङीपः प्रागसुङिति भावः पुन्न इति
नेरिति पाठांतरं स्त्रियामिति सूत्रे भाष्ये तु स्तेः सस्य पः ह्रस्वः मुम् प्रत्यय इत्युक्तं वस्तुत उच्चारणार्थानामपीत्संज्ञावश्यकत्वादियमुक्तिर्निष्फला पुमानिति सांते
त्विदोः उशनेति वशः कनसि ग्रहिज्येति संप्रसारणं अस्य संबुद्धाविति एतच्च वृत्तौ वाच्चनिकं पठितं वशधातोर्माधवस्तु संबोधने तूशनस स्त्रिरूपं सांतं तथा नांतमथा
प्पकृतुरिति श्लोकं वार्तिकमित्याह भाष्यानुक्तत्वादिदमेवेति प्रामाणिकाः उशना शुक्रः अनेहा कालः नञि हन एह चेत्यसुन् हन एहश्च सुव इति अधातोरित्य।
ष्यास्तावदयं वलिं न्नासंतस्येत्यर्थ इति भावः अन्यथा समुदायस्य धातुभिन्नत्वाद्दीर्घः स्यादेवेति बोध्यं अदस औ अदस इति षष्ठी न दोः स इत्यतः साविति वर्तते।
त्वित्यग्राचात्वापवादः ननु सौ डौ इत्येवास्त्विति चेन्न असाविस्तत्र टिलोपे कृते नित्यत्वात् सत्वं बाधित्वात् त्यदाद्यत्वे सावित्यसिद्धेः असुक इति असुक इत्यादौ त्व

सा॰ सुपि नेदं शरपर्यायो मुकशब्द इत्याहुः एतद्धेत वहुवचनस्य द्वियौगिक इत्याह वहुर्थेति तेनामीति सिद्धं पश्चादुत्वेति उत्वेत्युपलक्षणमीत्वस्यापि न तु मुत्वस्यासिद्धत्वात् कथं वा
३ नेदं शपर्यत्वं आह न मुन इति कर्त्तव्ये कृते नेचेति एवं च नइति विषयसप्तमीति भावः भाष्ये तु नेप त्कार्यं तत्रासिद्धत्वनेत्यर्थे नैव नाभावो प्याक्षिप्त इति व्याख्यातं मुइति समाहार
९८ द्वंद्वः कृतौ चेत्युक्तौ मुत्वे सुपि चेति दीर्घो न अमीभिरिति नेदमदसोरित्यैस्न ॐ इति हलंताः पुंल्लिंगा नहोधः झलो झलीत्यनो झलीति पदस्येति स्कोरित्यतो तद्धतिवा
नुवर्तते झलि परे पदांते च विद्यमानस्येत्यर्थः अलोंत्यस्येत्येतल्लब्धं हस्येति उपपूर्वात् णह वंधन इत्यस्मात् क्विप् नहिवृतीति पूर्वपदस्य दीर्घः सोर्हल्ङ्यादिलोपे धत्वजा
पत्वचर्त्वादि लोपषत्वे इति पूर्वपदांतस्य लोपो धातोः सस्य षत्वं आदेशप्रत्यययोरिति तु न षत्वं पदादादिरिति पक्षे सात्पदाद्योरिति निषेधात् हस्य घ इति कैयटादि
मतेषत्वस्येवप्त्वस्यापि कुत्वेन वाधादिति भावः उष्णिगं चेति निर्देशात् कुत्वस्य जश्त्वेनासिद्धत्वं स्वरीत्पातु ठडगका इति वाध्यं चोरिति दिव औदित्यौत्वं परा चतस्र
इति परत्वादाम्वाधित्वा च तस्रादेशस्य कृत इति न्यायात् तु नुडामेति स्यानित्वसूत्रे भाष्ये चतसृणामिति न तिसृचतसृदीर्घनिषेधः सर्वावदिति सर्वाशब्दवदित्यर्थः अत
एव सर्वनाम्नो वृत्तिमात्र इति नपुंसकत्वे शब्दपरत्वे कदापि सर्वनामत्वाभावादिति भावः यः सौ पुंस्यया वाधात् क्लीवे सो लुका लोपात् स्त्रियामिदं वागिति वचेः क्विप् वचि
स्वपीत्यादिना क्विपि दीर्घो संप्रसारणं च अपो भि अ च उपसर्गात् इत्यत इत्यनुवर्तते अवितिनप्रत्ययो व्याख्यानात् दिगिति दिश अतिसृजेने क्विप् षडगकाः प्राग्व
त् त्विषगतावस्मात् क्विप् जषत्वचर्त्वे जुषी प्रीतीत्यतः क्विप् सह स्य सभावे सजूः अमूभिरिति अदंतत्वाभावादेत्वाभावेनैत इदित्यस्याभावे मुत्वमेव ॐ इति हलं
ताः स्त्रीलिंगाः दत्वमिति वसुस्रंस्विति असय पदाधिकारस्थत्वात्तदंते पि दत्वमेवमागत्वाद्यामपि पूर्वपदस्येति वे प्रत्ययलक्षणेनेति भावः अत एव राजपुरुषा
दौ नलोपादि सिद्धिः उत्तरपदत्वे चेति उत्तरशब्देनोत्तरपदं उत्तरपदं च समासस्य चरमावयवे रूढः तेन तस्य पदत्वेन प्रयुक्तकार्ये कर्त्तव्ये लुमता लुप्ते प्रत्ययल
क्षणं न पदादिविधौत्वयं निषेधो नेत्यर्थः तेन परमवाचेत्यादौ न कुत्वं दधि सेचावित्यादौ सात्पदाद्योरिति षत्वनिषेधश्च निरुपपदाद्देव विचि षष्ठीसमासो ऽत्रे सो
पपदाद्विचो ऽनभिधानमिति कैयटः से च यतेः क्विवित्यन्ये यदादिविधिश्च प्रतिपदोक्तत्वात् सात्पदाद्योरित्येव तेन परमवुधावित्यादौ भष्भावो न उत्तरपदादिः एम॰
कर्णो कर्णो लक्षणादित्यादौ तूत्तरपदशब्दस्य समासचरमावयवमात्रे रूढेर्न दोषः अयं च निषेध उत्तरपदस्य कार्यित्व एवेति ङ मुदुक्सूत्रे उक्तं वहुपूर्वके वहुधा चैव ९८

हसेवावित्यादावपि न दोषः बहुच्पूर्वस्य च पदादिविधावेव प्रत्ययलक्षणमिति वचनांतरात् पूर्ववार्तिकमपि उत्तरपदत्वे च पदादिविधावित्येवमेव पठितं एतन्मत्वा ।
ख्यानप्रकारस्तु गुरुतर इति न युक्त इति भाष्ये ध्वनितं प्रत्याख्यानोत्तरं पुनर्नेत्र घिटिनै तद्वचनपाठेनेति न संलिखितः
उत्तरपदशब्देन मध्यमपदत्वानाक्रांतोत्तरपदस्य ग्रहणं व्याख्यानात् तेन पूर्वंदडिप्रियइत्यादावव्यांतरतत्पुरुषोत्तरपदेपि न लोपसिद्धिः कोदेशोनेति इदमः शब्दे
यः सावितिचनेत्यपि बोध्यं वक्तव्य इति द्वितीयाटौस्वित्यत्र संबध्यते अयं च सामर्थ्यात् लुका लुप्तेपि भवति एनादेशोपि एनमित्यादिसिध्यर्थं वक्तव्यः येन ना
प्राप्तिन्यायेनैतदन्यपदाद्युत्वापवादत्वेन तत्र कृतेत्यदाद्यत्वाप्राप्तेः अत एव भाष्ये नपुंसकैकवचने एनद्वक्तव्यः कुंडमानय प्रक्षालयैनदित्युक्तं अत्र नपुंस
कैकवचन इत्युक्त्याऽन्यत्रैनो वक्तव्य इति स्पष्टमेवोक्तं वार्तिककृता सिद्धांतिना अपवादत्वमजानत एकदेशिनो यद्येनदित्यादिरुक्तिः यदि गर्भवाक्ये पूर्व
पक्षयुक्तित्वस्यैवौचित्यात् भाष्यकृता तु फलगुत्वान्नात्रोत्तरमुक्तं सिद्धांतीतु किमुच्यते नपुंसकैकवचन इति सर्वत्र एनद्वक्तव्य इति एवं शब्देः प्रत्याख्यानं
कुर्यात् अनयोरप्यादेशयोरेतदस्त्वन्तसोरित्येतत्साहचर्येणोपसर्जनेन प्रवृत्तिः त्यदाद्यत्वेन सिद्धमिति भाष्यासंगतेश्च एनत्तमादायैनादेशप्रत्याख्यान
परं यद्येनत्क्रियत इति भाष्यं त्वेकदेश्युक्तिरिति भाष्यप्रदीपोद्योते निरूपितं अन्वादेशविषय इदमेतदोः समासस्याप्यनभिधानमेव यद्येनत्क्रियते ए
नो न वक्तव्यः कथमेनमित्यादि त्यदाद्यत्वेन सिद्धं यद्येवमेतच्छ्रितकोनसिध्यति एनच्छ्रितक इति प्राप्नोति यथालक्षणमप्रयुक्ते इति भाष्यात् ब्रह्मणीइ
ति न संयोगादिति निषेधाद् ल्लोपो न रोऽसुपि अहर्भातीति अहन्निति रुत्वे होभातीति स्यादिति भावः नलोपे प्राप्त इति न च नलोपेऽकारस्योरेवाविशे ।
षभावेनान्यतरेणोवोपपत्तौ उभयविधानसामर्थ्यादेव लोपो नेति वाच्यं संबुद्धौ नलोपनिषेधेनाहर्गच्छेत्यादावुत्वाभावेन दीर्घाहो निदाघ इत्यादावुत्वसंप
र्द्वे न च चारितार्थ्यात् न च तत्कारोच्चारणसामर्थ्यलब्धेन नकारांतानुकरणेन नांतस्याहन्शब्दस्येति व्याख्यानान्न लोपो नेति वाच्यं दीर्घाहो निदाघ इत्यादौ
हो प्रवृत्ताभ्यामादौ व्यावृत्या च नकारस्य चारितार्थ्यात् तेन नलोपबाधे मानाभावादिति भावः आवर्त्यैति आवृत्तौ मानं च रूपरात्रीति वार्तिक
मेव अन्यथा नलोपेऽकारस्य रेफादेशेनैव सिद्धे तद्द्वैयर्थ्यं स्पष्टमेव भाष्यप्रामाण्याच्च तस्य संबुद्धावप्रवृत्तिः तज्ज्ञापकसिद्धवचनकल्पनापेक्षया ।

रितार्थ्याभिमानेन वस्तुतः सत्यपिसंभवेबाधने भवतीति भाष्यसिद्धान्तात् रुत्व रत्वेनलोपापवादभूतेएव निषेधविषयेपिप्राप्तिमात्रेणास्येननाप्राप्तिन्यायविषयसत्त्वात् निषे
शे·सु· धेनापिनस्यबाधइत्यन्यत् एतेनसंबुद्धौ चारितार्थ्यमित्यपास्तं ध्वनितंचेदमपवादोरुनलोपंबाधिष्यतइत्यर्थकभाष्येण एतदेनेनलोपेकृतेकारेसावकाशत्वशंकानन्त
६९ माषानादिवार्तिकानुसारिणा इत्यलं तदंतस्यापूर्ति पदाधिकारस्थत्वात् ग्रहणवतेतिनिषेधस्तुप्रत्ययविधिविषयइत्यसमासेनिष्कादिभ्य इतिसूत्रेभाष्यकैयटयोःस्पष्ट
मितिभावः तस्यासिद्धत्वादिति अकृतव्यूहपरिभाषयादीर्घाप्रवृत्तिःस्यादित्यभिमानेनेदं दीर्घस्तुपरत्वाद्धल्ङ्यादिलोपात्पूर्वमेवबोध्यं संबुद्धौत्विति सुपोहल्ङ्या।
दिलोपादसंबुद्धावित्युक्तेदं घाभावेरुत्वेहशिचेत्युत्वेआद्गुणःस्रग्वीणीति इन्ग्रहणोऽनर्थकस्यापिग्रहणादीर्घइतिभावः वृत्रहाणीति अत्रयद्वक्तव्यंतदुक्तं।
पदांतेकुत्वमिति किन्त्वप्रत्ययस्येत्यस्यासिद्धत्वाद्व्रश्चेतिषत्वेकुत्वमित्यर्थः षत्वंतुस्पष्टमित्यादेःसावकाशमितिभावः भाष्यप्रयोगादिति अनेनभाष्यप्रयोगेणान
व्ययपूर्वपदेकुत्वाभावोबोध्यते तेनास्तृगित्यत्रनदोषः कुत्वापवादइति सृजियज्योः पूर्वोत्तरसाहचर्येणपदांतेपिविशिष्यषत्वबाधनेनतत्सामर्थ्यात्कुत्वबाध
इतिभावः अतएवोपयुङ्क्ताम्पतीतिकाम्यचसूत्रस्थभाष्यप्रयोगःसंगच्छते निपातनादेवेति निपातनेनत्वनयोरपवादाप्रवृत्तिमात्रबोधनं कुत्वंतुशास्त्रेणै
वएतेननिपातनादपदांतेपिकुत्वापत्तिरित्यपास्तं असृक्शब्दस्त्विति इदमेवन्याय्यं ऊर्गिति अयंपुल्लिंगोपिनपुंसकस्येतिसूत्रेबहुवचनेऊर्ज्जइतिकैय
टात् नरजानामिति वहुर्जिनुमःप्रतिषेधइतिवार्तिकरीत्येदं अचःपरोयोझल् तदंतस्यनुमितितत्सत्वाख्यात्भाष्यमतेतुनुमोत्रप्राप्तिरेवनेतिबोध्यं नचैवं
कुंडानीत्यसिद्धिः इकोचीतिसूत्रेऽचःसर्वनामस्थानइतिअनुवत्यानुवृत्तिसामर्थ्यादिकइत्येतत्साहचर्याच्चसर्वनामस्थानइति सप्तम्याषष्ठीप्रकल्प्यावाक्यभे
नाजंतस्यतत्रनुमविधानाददोषइतिस्पष्टंभाष्ये काष्ठतङ्क्षीत्यादौदिवऔदितिसूत्रभाष्योदाहृतेऽचःपरझल्जातेराश्रयणान्नदोषः अंत्यादिति इदंवाचनि
कमेववहुर्जेशब्दमात्रविषयकं वहूर्जीति श्चुत्वस्यासिद्धत्वादनुस्वारपरसवर्णोबोध्यः स्थानिवत्त्वादिति कौलुप्तमितित्वसार्वत्रिकमितिभावः स्पष्टंचेदंदी
धीवेवीटामितिसूत्रेकैयटे जायंतेनवसोतथामिचनवभ्यांभिसभ्यसांसंगमेषट्संख्यानिनवैवसुप्यथजसित्रीण्यपवनद्व्स्ति चत्वार्यन्यवचः सुकस्यविबु। राम
धाःशब्दस्यरूपाणितज्ज्ञानंतुप्रतिभास्तिचेन्निगदितुंषाण्मासिकोत्रावधिरितिप्राचीनस्यशुष्कप्रक्रियातार्किकस्यप्रश्नेतदनुसारेणोवश्लोकद्वयेनोत्तरमाह। ६९

गवाक्शब्दस्येति शब्दपरत्वेनापूजार्थकत्वान्नस्यलोपः भेदत इति आद्यादित्वात्तसिः भेदेनेत्यर्थः नवेति द्वंद्वांते श्रूयमाणंत्वात्प्रत्येकं नवेत्यर्थः अग्रेऽपि प्रत्येकमे
वसंख्यान्वयः गवागिति सोर्लुका लुप्तत्वान्नुम षण्णामिति कुकुप्स्वेत्रयाणां गत्तौत्रयाणामित्यर्थः चर्त्वस्येति तेन गतौत्रयाणामाधिक्यं नेत्यर्थः कुकुप्सहितेषू
जात्यामित्यर्थः अश्वासीति सप्तविंशत्यधिकापंचशतीत्यर्थः पःशतेति शतृप्रत्ययइत्यर्थः आच्छीनद्योरिति वर्तते उत्तरसूत्रे नित्यग्रहणात् नाभ्यस्तादित्यतो नेति
तु नानुवर्तते निषेधस्य प्राप्तिपूर्वकत्वादत्र च प्राप्त्यभावात् नुमग्रहणं तु स्पष्टार्थं शतुरवयव इति परोयः शतेति तु नोक्तं तुदतीत्यादावेकादेश उभयत आश्रयणे
नादिवद्भावाभावेन तेन व्यपवर्गालाभेन च नुमभावापत्तेः अवर्णाश्च शतृभिन्नावयवस्य वर्गस्यात् शत्रकारेणाव्यभिचारात् शप्श्यनोः आदिति किं भाती
त्यादौ नित्यनुमभावाय अन्यथा प्रत्ययलक्षणेन स्यात् आदित्युक्तौ तु वर्णप्राधान्यान्न प्रत्ययलक्षणं नलुमतेति निषेधस्तु प्रत्ययस्यालुप्तप्रत्ययनिमि
त्तांगस्य कार्य एवेति भावः पचंतीत्यादिबहुवचनेन नपुंसकस्य झलच इति नुम् निरवकाशत्वमिति इदं तु इदित्यधिवुले ठेन्निति सूत्रे शेषाद्विभाषेति सूत्रे च भा
ष्ये स्पष्टं परे तु निरवकाशत्वरूपप्रतिपदोक्तस्य बाधकताप्रयोजकत्वं प्रकृते तदभावेनाबाधकत्वेऽपि प्रतिपदविधित्वेन शीघ्रोपस्थितिकतया पूर्वं प्रवृत्तौ नि
यामकत्वे बाधकत्वाभावेन पूर्वं दीर्घे नित्ते नुमि स्वापीत्येवेत्याहुः धनुरिति वौरिति दीर्घस्तु न रेफांतस्याधातुत्वात् श्रेयांसीत्यादौ युगपद्द्वयोः र्त्त्यादचः पर
त्वायोगाद्विरोधे परत्वात् झलंतलक्षणो नुमिकृते उगिल्लक्षणो न सकृद्गताविति न्यायात् किंचांत्यादचः परो मित्स्यात् कर्तव्य इति मिदच इत्यस्यार्थे न द्वयोर्मित्त्वोरंत्यादचः
परप्रयोगासंभवेन नात्र नुम्द्वयप्रसक्तिः पुनः प्रसंगविज्ञानेऽपि किंच सत्यपि नुम्द्वये परस्यानुस्वारे तस्य झल्ग्रहणेन ग्रहणात्पूर्वस्यानुस्वारे द्वयोरनुस्वारयोः श्रौ
न विशेष इति नपुंसकस्येति सूत्रे भाष्ये स्पष्टं ॥ इति हलंता नपुंसकलिंगाः ॥ स्वरादि स्वरादीनामपि निपातसंज्ञैव नन्कृता स्वरादौ निपाताश्चाद्युदात्ता इत्य
युक्तेः एतेन चादीनामप्यव्ययसंज्ञैव कार्येत्यपास्तमित्यन्यत्र विस्तरः स्वरित्यादि अनुकरणान्येतानि तत्रैत एव निर्देशान्न स्वाद्युत्पत्तिः तेन विसर्गादिकं न स्वरा
दीनामनेकशक्तिप्रधानतास्व आगतः स्वस्थितः स्वः पश्येत्यादिदर्शनात् गणोऽयं तत्रैरासर्वेषामुच्चारणं उच्चैरित्यादीन्यधिकरणशक्तिप्रधानानि शब्दशक्ति
स्वभावात् हिरुगादीनि क्रियाप्रधानानि क्रियाप्राधान्यं चैषां क्रियायामेव विशेषणत्वेन स्पष्टं चेदं तद्धितश्चेति सूत्रे कैयटे सायंचिरं मांतव्यये सायंचिरमिति सू

ल॰श॰ शे॰सु॰ ७१ त्रस्थभाष्यप्रामाण्यान् चिरमित्यव्ययमप्रामाणिकमिति परे वदन्ति तेनतुल्यं तत्रत्तसेवतदर्हमिति विहितः उपसर्गाच्छंदसीति विहितस्य छांदसत्वादेव नसंज्ञा वस्तु
नस्वेत्येवसिद्धेवृत्त्यग्रहणम्पर्थं अंतरा अंतरेणेति अंतरांतरेणयुक्ते इति सूत्रे भाष्ये नयोर्निपातत्वोक्तेः स्वरादिष्वनयोः पाठः प्रक्षिप्तः अस्तीति धनवानित्यर्थके
अस्मिमानित्यादौ धनवाचिनः सत्ववचनस्य विभक्तिप्रतिरूपकत्वेन न सिद्धिरित्यस्य पाठः विनिगमनाविरहेण विभक्तिप्रतिरूपकत्वस्य शब्दतोऽर्थतश्च ग्रहणा
त् तेनैव सिद्धिरिति तु मन्तु सूत्रे भाष्यकैयटयोः सत्ताकर्तृत्वेनैव धनवोधादस्ति कथंचिदर्थतः साम्यमिति तद्भावः एवं चास्तीत्यस्याप्रामाणिकः पाठ इति तत्त्वं नमस्ति
ति महसां नमसां मिति प्रयोगस्तु सत्त्ववाचकत्वे वोध्यः प्रतामप्रशामिति प्रतानितिनांताव्ययस्य पृथक्या वसामर्थ्यादपदांतत्वाच्चास्य नत्वाभावः प्रशानिति नां
तपाठोऽसांप्रदायिकः मांतानुकरणेनत्वाप्राप्तेः स्वरादौ कृत्वादिवत् कृन्मेजंत सूत्रस्य भाष्यस्वरसोप्येवमेव नञः स्वरादिषु अप्रामाणिकः पाठः अव्ययनञ्कुनि
पातानामित्यत्र पृथक्नञ्ग्रहणं त्वकरणिरित्यादौ परस्यापि कृत्स्वरस्य वाधनार्थमित्याकरः एवमाङोपि स्वरादौ प्रक्षिप्त पाठः यावत्तावच्छब्दावमुत्पन्नौ
उपसर्गे विभक्तिश्च अत्र प्रतिरूपकत्वं विनिगमनाविरहादर्थतः शब्दतश्च गृह्यते गेयेकेन विनीतौ वामित्यत्रापि वामित्यस्य सुप्तप्रकृतिक विभक्त्यंतसमानार्थत्व
त्वमस्त्येव स्वरांशे तु नार्थतोऽसंभवात् एतेन युगपत्ततौ त्यादिमुत्पत्त्याश्रयणेन युगपदित्यादीनां विभक्तिप्रतिरूपकत्वादेव सिद्धेस्तेषां गणे पाठो व्यर्थ इ
त्यपास्तं एवं तदित्यपि लुप्तषष्ठीकं विभक्तिप्रतिरूपकमव्ययं अत एवाविघातच्चितो योगस्तत्तदर्थ विभाग इत्यादौ त्यदादीनीति नैकशेषः अवदत्तमि
ति अत्र क्रियायोगेपि अवदत्तं विदत्तं च प्रदत्तं चादिकर्मणि सुदत्तमनुदत्तं च निदत्तमिति चेष्यते इति भाष्यवचनेनोपसर्गत्वाभाववोधनद्वारा तादेशाभावो
वोध्यत इत्याशयः आकतीति अह इत्यहनीत्यर्थे ओमिति च स्वरादिषु तच्चाश्च उश्च मूचेति त्युत्पत्त्या शिवादिवाचकं अवतेष्टिलोपश्चेति सिद्धं त्वग्रहणं
गीकारे च उभयोरपि स्वरादित्वं व्याख्यानात् अंत्येकृन्मेजंत इति तु न सिध्यति चिरव्ययमित्युणादिपठितेन नियमादप्राप्तेः उणादिपठितानां चेच्चादि।
स्वराद्यपठितानां भवति तर्हि च्व्यंतानामेवेति तदर्थः अन्यथा च्व्यंतानां निपातत्वादेव सिद्धेस्तद्वैयर्थ्यं स्पष्टमेव स्वरादिनिपातमित्यत्र निपातपदं गौणमु शम॰
ख्यन्यायाप्रवृत्तिरनित्यत्वात् अन्यथोदितिप्रगृह्यत्वमिवेदमपि न स्यात् एवं अतिशयेन साधु इत्यर्थे साधीय इत्यपि सर्वे शब्दोत्र सर्वः पटो दग्ध इतिवद् ७०

वयवकात्त्वमित्याशयेनाह यस्मात्सर्वेति वचनत्रयात्मिकेत्यर्थः नेति किंत्वेकवचनमेवेत्यर्थः ननु संख्याकारकबोधकैरेव वाक्यं तथा सुपां विधानमिति पक्षेऽव्ययार्थे सं
ख्याकारकयोरभावात्कथं विभक्तिः अव्ययादाप्सुप इति ज्ञापकाश्रयणेऽपि सर्वोपि किं च विहितानां नियमपक्षेपि नास्योपपत्तिरत्र पक्षे सर्वेष्वर्थेषु विधेयतया प्रधा
नप्रत्ययानुरोधेन गुणीभूतप्रकृतिभेदकल्पनेन सर्वविभक्त्युत्पत्तौ लोपेनेव जातस्य निवृत्तिः तन्निवृत्तौ च कल्पितगुणास्वरूपस्य तत एव निवर्त्तते नियमश्च द्विविधः
अर्थनियमः प्रत्ययनियमो वा अन्त्योपि द्विविधः प्रकृतार्थापेक्षः सामान्यापेक्षो वा तत्र कर्माद्यर्थयोग्यप्रातिपदिकाच्चेत्कर्मणि विभक्तिस्तदा द्वितीयैव कर्मादिरहितेनच्यो
त्प्रथमैवेत्यादिरर्थनियमः अत्र पक्षे सर्वाः सप्तापि विभक्तयोऽव्ययेभ्यो विभक्तीनामनियतत्वात्कर्माद्यर्थयोग्यप्रातिपदिकाच्चेद् द्वितीया तदा कर्मण्येव न करणादौ कर्मा
दियोग्ये तद्रहितप्रातिपदिकार्थ एव प्रथमा न कर्मादौ संख्यावदर्थयोग्यप्रातिपदि — कत्वादावेवैकवचनादि न द्वित्वादावित्यादिः प्रकृतार्थापेक्षप्रत्ययनि
यमः अत्रापि पक्षे सर्वाः सप्तापि विभक्तयोऽव्ययेभ्यो लभ्यन्ते अथ प्रातिपदिकाच्चेत् द्वितीया तदा कर्मण्येव नान्यत्र प्रातिपदिकाच्चेत्प्रथमा तदा मात्रग्रहणा
त्पर्युदासन्यायेन कर्मादियोग्यतद्रहितप्रातिपदिकार्थ एवेत्यादिः सामान्यापेक्षः प्रत्ययनियमस्तदाव्ययेभ्यो विभक्तिप्राप्तिरेव नेति पूर्वोक्तज्ञापकादेवसेति।
सर्वापि यद्यपि सुपां तिङां संख्याकर्माभयार्थकत्वेन कर्मण्येव नान्यत्रेति वक्तुमशक्यं तथापि कर्मण्येव न तु तदभाव इत्याकारो वक्तुं शक्यः स्पष्टं चेदं सर्वं बहु।
ष्वित्यादिसूत्रेषु भाष्ये तत्र हि अर्थनियमे प्रकृतार्थापेक्षप्रत्ययनियमे च सप्तापि विभक्तयः संपूर्णा उक्ताः सामान्यापेक्षप्रत्ययनियमे च सुपोऽप्राप्तिरेवोक्ता
अव्ययादाप्सुप इति सूत्रे भाष्येपि स्फुटमिदमिति चेदत्र तद्धितश्चेति सूत्रे भाष्यकृत एकवचनमित्येकं सूत्रं कार्यमेकग्रहणं च न कार्यं विभक्तिविधावुद्देश्यतावच्छेदकावच
च्छिन्नादेकवचनमित्युत्सर्गः तस्य द्वित्वबहुत्वयोरिति रेवाधके भविष्यतः एवं चैकत्ववत्यपि भविष्यति अलिङ्गसंख्येभ्योऽव्ययेभ्यश्चैकवचनं द्विवचनादिवि
धायकयोर्हि बहुग्रहणसामर्थ्यान्महासंज्ञाबोध्यैकत्वाभावेपि तत्प्रवृत्तिः द्वित्वबहुत्वयोर्द्विवचनबहुवचनोक्तावर्थादेकवचनस्यैकवचनमित्येतद्वचनं वि
नापि द्वित्वाद्यभावे कर्मादौ सिद्धत्वेन सामर्थ्यादप्राप्तप्रापणार्थमेतदिति कर्माद्यभावेप्येतत्प्रवर्त्तत इति विनिगमनाविरहात्सर्वविभक्त्येकवचनमनेन न अ
त एवाव्ययादाप्सुप इति प्रत्याहारग्रहणं चरितार्थं तृतीयासप्तम्योरिति च प्रथमापि मात्रग्रहणाद्यत्र प्रातिपदिकार्थस्य कर्मत्वाद्याधिक्यसंभावना तत्रैव

ल॰श॰ तितस्या अप्यप्राप्तिः अव्ययेभ्यः पचतिकल्पमित्यादौतुनानेनसर्वैकवचनं सर्वथा अप्राप्तावेवतस्यविध्यर्थत्वात् अत्रचनतथाकर्तृत्वकर्मत्वसत्त्वेनक्रियायांस्व
शे॰सु॰ तएकवचनत्वेनसर्वथातदप्राप्त्यभावादितिवाच्यं यत्तुकैयटेनप्रथमातिक्रमेकारणाभावादनेकनियमबाधेगौरवाच्चप्रथमैकवचनस्यैवानेनोत्सर्गत्वंबो॥
७१ ध्यतइतितद्धितश्चेतिसूत्रेरूपसूत्रेभाष्येचोक्तं तन्न स्वादिसूत्रेप्रथमायाःप्राथम्येपिनियमशास्त्रपर्यालोचनयाद्वितीयायाअपितत्त्वेनतस्याविनि
गमकत्वात् रणिजांत्रयाणामित्य त्रत्रयाणांग्रहणेनाद्युदात्तश्चेतिसूत्रेआदिग्रहणेनचपाणिनिनास्वशास्त्रेएतन्न्यायानाश्रयणज्ञापनाच्च अत्रएवप्र
थमासंपूर्णाव्ययेभ्यःप्रथमायाएवैकवचनमित्यादिपक्षांतराणि अर्वाचीनग्रंथेदृश्यंतेतान्यसंगतानि उक्तरीत्यातेषामुक्तिसंभवाभावात् घटइत्युक्तेए
कत्वनिश्चयस्तुद्विवचनाद्यभावेनद्वित्वाद्यप्रतीतौसंख्यावदर्थत्वेनसत्त्वभूतत्वात्प्रकरणाच्च बहुष्वित्यादिसूत्रभाष्योक्तपक्षास्त्वेकदेशिनोनसिद्धं॥
तिनइतितत्त्वं असर्वविभक्तिरिति बहुव्रीहिलभ्योविशेष्यइत्याह तद्धितांतइति केवलस्यतद्धितस्यप्रयोगाभावेनफलाभावात्संज्ञाविधावपितदंत
विधिरितिभावः नन्वेवमपिपचतिकल्पमित्यादावतिव्याप्तिः उक्तरीत्यातेषामसर्वविभक्तित्वात् उभयशब्देचातिव्याप्तिस्तेनोद्विवचनानुत्पादादतआ
हपरिगणनमिति एवंचसूत्रंनकार्यमितिभावः तसिलादयइति पंचम्यास्तसिलित्यारभ्यद्वित्र्योश्चधमुञित्यंताइत्यर्थः शस्प्रभृतयइत्यपिबहुल्पा
र्थाच्छसित्यारभ्याव्यक्तानुकरणादितिडाजंताः यस्त्वेवप्रतिकृतावित्यधिकारेप्रत्नपूर्वविश्वेमात्थालछंदसीतिथाल् तस्यस्वरादावस्थालादितिप
ठेनाव्ययत्वं तत्रेणाआसिरित्युणादिसूत्रविहितआसिः अयाइत्युदाहरणं आसिविधायकेछंदसीतिनानुवर्तते एवंचलोकेविभक्तिसहितप्रयो॥
गायाव्ययत्वमावश्यकं अत्रचस्वरादावासिपाठएवलिंगं अयासावयंसतितुछांदसं अमआमितिअमुच्चछंदसिकिमेत्तिङितिविहितौ क्त्वोर्था
इति क्त्वसुच् सुच्धाःतसिवतीति तेनैकदिकृतसिश्चेत्तेनतुल्यमित्यादिनाविहितोएवंचस्वरादिषु ——— वदितिपाठफलंचिंत्यं नानानाविति विनञ्भ्यां
नानाञौनसहेतिविहितौ कृन्मेजंतः कृञोमांतइतिकारयामित्यामंते आमइतिलुकेष्टसिद्धिरितिभावइत्याकरेविस्तरः कृदंतस्यनुनेतद्विशेषणं गणेप्र सम
शामशब्दपाठात् अन्यथाश्नुत्यामांतत्वेनप्रत्ययलक्षणात्कृदंतत्वेचानेनैवसिद्धेतत्पाठवैयर्थ्यंस्पष्टमेव तेनप्रतामौलवमाचक्षाणोवौरित्यादौनातिप्र ७१

संगः नचाधयेहे आधेकुंभकारेभ्यइत्यादौ गुणोएत्वे चकृते कृतएजंतत्वेनसंज्ञापत्तिः नचवहिरंगत्वंगुणादेः संज्ञायाः कार्यार्थत्वात्संज्ञाकार्यस्यतत्वेनसंज्ञाया अपितत्वात् लिंगसं
ख्याद्यन्वयित्वेप्यव्ययीभावादाविवात्राप्यापत्तेरितिवाच्यं सन्निपातपरिभाषयावाधात् नचतयासन्निपातविघातकलुकोवाधेपिसंज्ञावाधेमानाभावइतिवाच्यं एज्विषयसन्नि
पातनिमित्तकात्वीयसन्निपातविघातकस्य कृतिचेतिनिषेधस्यतयानिवृत्तावपिडपादास्तेत्सत्र कित्वापत्तेः कित्वफलंतुतन्नसन्नियोगशिष्टत्वसिद्धिः एवंचोपादेस्तेतिस्यात् नत्वहि
किदिनिव्यपदेशातिदेशएवेत्वप्रवृत्तिकाले कित्कार्यस्यातिदेश्यस्याभावात् तस्मादनयासन्निपातविघातकशास्त्रस्यैवएतत्कालप्रवृत्तिनिमित्तातिदेशसंज्ञानाम
पिनिवृत्तिरेवावश्यंवाच्या सासात्परंपरयावास्वसन्निपातविघातकस्यस्वयमेनिमित्तमितिपरिभाषार्थः एतेनात्राकजादिस्यादित्यपास्तं अकजाद्येकवाक्यतापन्ना
व्ययसंज्ञायांगुणादेरसिद्धत्वाच्चलुगेकवाक्यतापन्नानुनगुणादितोंतरंगा उभयोरपिशब्दतः सुवाश्रयत्वात् अव्ययादाप्सुपः इत्यस्य त्रियेत्यतोलुगनुवर्त्तते विहि
तेति अंगसंज्ञायांविहितत्वांशप्रवेशेनविहितप्रत्ययनिरूपितांगविशेषणादित्यर्थः आप्सुवृत्त्यामाक्षिप्तांगस्याव्ययरूपस्यैवप्रत्यासत्त्याग्रहणमितिभावः तेनकुंभ
कारेभ्यइत्यादौसन्निपातपरिभाषयाव्ययसंज्ञानिवृत्तिद्वारालुगनिवृत्तिपरभाष्येणनविरोधः अत्तुच्चैसावित्ति अत्राधिकरणशक्तिप्रधानस्याप्युच्चैसशब्द।
स्यवृत्तिविषयेश क्तिमत्प्रधानत्वतद्धितीयांततयात्यादयः क्तांतार्थेइतिसमासेअवयवभूतोच्चैसशब्दादव्ययात्सत्वेनलुकस्यात्समुदायस्यतुनाव्ययत्वंलिंगाद्यन्वयि
त्वादित्यभिमानः समुदायस्यापितत्वमाशंक्यसमाधत्ते यद्यपीति तदंतेति शब्दस्यविशेष्यत्वात्प्रायोजनसर्वनामाव्ययसंज्ञायामितिवाचनिकमदंतविधिरि
तिभावः नगौणादिति अयंभावःसामानाधिकरण्यसंबंधेनलिंगाद्यनन्वय्यर्थबोधकत्वविशिष्टाव्ययपदकत्वेनत्वद्यव्ययपदंबोधकमितित्वादृशमहासंज्ञाकर।
पात्त्वादृशार्थानांगणेनुकरणावयवकत्वे इतरेषामनुकरणेमानाभावेनसमुदायस्यनाव्ययत्वमिति भावः वस्तुतोत्रार्थस्यप्रधानाप्रधानत्वपि नसर्वनामसंज्ञासाहचा
र्येणाप्रसिद्धांतरंगपदांतरानपेक्षानुपसर्जनीभूतस्यैवलिंगाद्यनन्वयिनोग्रहणेननसमुदायस्यनाप्यवयवस्यसंज्ञा अतएवभाष्येसर्वनामसंज्ञासूत्रस्योपस
र्जनप्रतिषेधानुवृत्त्यात्सुच्चैसावित्यादावव्ययत्वाभावमुक्त्वातत्प्रत्याख्यानरीत्यैवात्राप्यतत्प्रत्याख्यानमुक्तं एवंचविहितविशेषणमंगाक्षेपोवाव्यर्थएव अव्य

पाम्यंतर्लंस्यपेप्यभावात् उच्चैरौ उच्चैराभ्यामित्यादेरभिधानेतुनमानं अतएवभाष्येएतन्नोक्तं अलिंगत्वादितिनन्विदं सहशं त्रिष्विविश्रुतिविरुद्धमत आह लिंगेत्यादि
अयंभावः यथोपक्रमोपसंहाराभ्यांब्रह्मपरायाअप्यस्याः श्रुतेर्भोष्यप्रामाण्यादत्रोपसंहारस्तथात्वप्रामाण्यादेवलिंगाद्यभावपरतापीति विभक्तिवचनशब्दोकार
कसंख्यापरो प्रत्ययपरत्वे न्यतरवैयर्थ्यापत्तेः लिंगेष्वित्यादिविषयसप्तमीतत्तद्विषयेसादृश्यंचलिंगाद्यभावाश्रयत्वेनलिंगाभावेनसादृश्यमव्ययीभावाति रि
क्तविषयं तस्यलिंगविषसत्वात् संख्याभावस्तुसर्वसाधारणः तदभावादिसादृश्यादेवयद्विविधंरूपंतन्नप्राप्नोतीत्यर्थः प्रसंगादाहवष्टीति वशेश्छांदसत्वेने
ह्मप्रयोगश्चिंत्यः भागुरिराचार्यः अपिसाहचर्यादवेप्यादेरकारस्यैवलोपः इदंभाष्ये नदृश्यते निशादिशोरिप्युपधलस्वरोकेऽदंतत्वा—देवटाप् किंनिदिगि
त्यपि अतएवड्याप्प्रातिपदिकादितिसूत्रेप्यापूग्रहणंनकार्यं अकारांतादाप् तत्रोतवड्यावाप्प्रातिपदिकत्वेनैवसिद्धं यत्तर्हिनकारांतात्क्रुंचाउष्णिहादेवविशे
तिअत्राप्यकारांतादेव क्रुंचानालभेत उष्णिहककुभौदेवविशमितिअत्येकप्रत्ययः एवंविषयइत्युक्तावहुराजेतिडावंतार्थमापूग्रहणमितिभाष्येउक्तंसंगच्छ
ते तस्माद्दाचेत्यसाध्वेवेतिशिवं॥ ❀ इत्यव्ययानि ❀ ॥ ❀ ॥ ❀ ॥ ❀ ॥ ❀ ॥ ❀ ॥ ❀ ॥ ❀ ॥ ❀ ॥ ❀

॥श्रीगणेशायनमः ॐ॥ स्त्रियाम्· अचेतनखट्वावृक्षफलादिसाधारणं लिङ्गं नुमत्वादीनां गुणानामुपचयापचयस्थितिरूपं क्रमेण पुंस्त्रीनपुंसकाख्यम्।
एकार्थशब्दान्यत्वाद्दृष्टं लिङ्गान्यत्वमिति भाष्योक्तेरर्थनिष्ठं केवलान्वयि· इयमप्युक्तिरिदं वस्तु अयमप्यर्थार्थ इति त्रिविधस्य व्यवहारस्य पदार्थमात्रे सत्वात्· केनचिच्छ
ब्देन किञ्चिदर्थं तु एकैकलिङ्गविशिष्टमेव केनचित्पर्यायेण लिङ्गद्वयविशिष्टं केनचिल्लिङ्गत्रयविशिष्टमिति लिङ्गानुशासनादितो निर्णेयम्। तत्र स्तनकेशवती स्त्री
स्याल्लोमशः पुरुषः स्मृत इत्यादि लौकिकलिङ्गासम्भवे शास्त्रीयं ङ्ग्यर्थं शास्त्रीयं उक्तं एव· तत्सम्भवे तु शास्त्रीयविशिष्टे लौकिके शास्त्रीयमपि शब्दतो बुध्यते तथानु
भवात्· उपचयापचययोः स्थितेरपि सत्वेन तन्मात्रविवक्षायां सामान्ये नपुंसकमिति प्रवाद इत्यन्यत्र विस्तरः। अत इति वर्णग्रहणात्तदन्तविधि[illegible]ह· अकारा
न्तस्य चेति· वाच्यं यत्स्त्रीत्वमिति· तद्वाच्यार्थगतं यत्तद्वाच्यं स्त्रीत्वमित्यर्थः। एवम्व्याख्याने फलमग्रे स्फुटम्· तत्र द्योत्य इति· प्रत्ययार्थत्वे हितस्य विशेष्यतापत्तिः
द्योत्यस्य तु विशेषणत्वमेवेति स्पष्टमाकरे· वागादिषु विनापि टाबादिकं तस्य बोधाच्च· अत एव व्यावक्रोशीत्यादौ कर्मव्यतिहारे णच् स्त्रियामिति णचः स्त्रियामित्य
ञि चङीप्सिद्धिः। व्यतिलुनीन इत्यादौ द्विर्वद् सुवद्भवतीति न्यायेन समुच्चयस्य दृष्टत्वात्· टाप् स्यादिति· स चाधिकारात्प्रातिपदिकादेव· तच्च सन्निधानादजा
दिरूपमेव· नन्वजादिष्वकारान्तपाठो व्यर्थोऽत इत्येव सिद्धेरत आह· अजाद्युक्तिरिति· येन नाप्राप्तिन्यायादिति भावः। एतेन ङीषि कृतेपि लिङ्गविशिष्टपरि
भाषया टाप् चरितार्थ इत्यपास्तम्· ननु प्रत्ययविधौ पञ्चम्या युक्तावेनाजादिभ्यष्टाप् स्त्रीत्वे द्योत्य इत्यर्थ एव युक्तः। स्त्रीत्वञ्च प्रत्यासत्त्या प्रकृत्यर्थनिष्ठमेवे
त्यत आह· अजादिभिरिति· व्याख्यानादेतल्लब्धमिति भावः। अन्यत्र तु स्त्रियामिति तदन्तस्यापि विशेषणं व्याख्यानादेव· एवञ्च पञ्चसु तानो यस्या
सा पञ्चसु तन्वीत्येव· पञ्चाजीति· पञ्चानामजानां समाहार इति द्विगावकारान्तोत्तरपद इति स्त्रीत्वे द्विगोरिति ङीप्· अजादिभ्य इति व्याख्यानेऽमहत्पूर्वग्रहणेनाम
नुपसर्जनाधिकारेण च वनोर चेत्यत्रेवात्रापि तदन्तविधिसम्भव इति भावः· न च तदन्तविधावपि श्रुतत्वात्स्त्रियामित्यजादीनामेव विशेषणमिति वाच्यम्·
अनुपसर्जनाधिकारेण तदन्तग्रहणस्येव स्त्रियामित्यस्य तदन्तविशेषणत्वमित्यर्थस्यापि बोधनात्· अत्रहीति· समासेऽजशब्दसत्वेपि समाहारनि
ष्ठं स्त्रीत्वं समुदायवाच्यम्· नाजशब्दमात्रवाच्यं सामर्थ्ये नाजादिमात्रवाच्यस्त्रीत्वस्यैव ग्रहादिति भावः। चटकेति· क्षिपकादित्वादित्वं न· ह्रस्व इति· अ

स्त्री· तेऽश्रुयन्तु भस्त्राफलेत्येव· संभस्त्रेतिसदजितिमूलान्नञ इति च पाककर्णेति प्राप्तस्य ङीषो बाधनार्थम्· एवञ्च श्वेतफलात्रिफलेत्यप्यत्रबोध्यम्· शूद्रा चेति·
प्रत्ये जातिलक्षणङीषोऽपवादः जातिश्चेदाबित्यर्थः।पञ्च शूद्रीति समाहारे जातिवाचकत्वाभावात् शूद्रशब्दार्थगतस्त्रीत्वाभावाच्च न दोषः॥ जातिश्चेदित्यस्य फलमाह· पुंयो
१ गेत्विति· न चात्र गौणत्वम्।तद्दृशलाक्षणिकत्वस्यैव गौणत्वात्· गौणमुख्यन्यायस्य पदकार्यविषयत्वाच्चेति भावः॥ अमहत्पूर्वेत्यत्रापि जातिश्चेदिति सम्बध्यते·।
महत्पूर्वेण टापं लभते जातिश्चेदाबित्यर्थः।तत्फलन्तु जात्यन्तरनिवृत्तिपरत्वेन पूर्वञ्जातिमात्रविवक्षायां महच्छब्दस्य शूद्रशब्देन मृगक्षीरकुक्कुटाण्डवत्स।
मासे ततः स्त्रीत्वविवक्षायां महती शूद्रेत्यर्थे महाशूद्रेति टावेव।अमहत्पूर्वेत्यत्र जातिरित्यस्यासम्बन्धेऽनुपसर्जनाधिकारेण प्रधानेन तदन्तविधिसत्वाज्जातेरिति
ङीष् स्यात्· शूद्रशब्दे जातिवाचकत्वस्य स्त्रीत्वे शूद्रशब्दार्थसमवेतत्वस्यापि सत्वेनात्र टाप् निर्बाध इति भाष्यप्रदीपोद्योते निरूपितम्· महाशूद्रीति· आभीरी तु म
हाशूद्रीत्यमरः ब्राह्मणादुग्रकन्यायामाभीरः नृपाच्छूद्रायामुत्पन्नोऽग्रजातिकन्या अत्रानुलोमसङ्कराणाम्मातृजातिवृत्तित्वात्तत्रजाञ्जातिमारोप्य शूद्रशब्दप्रयो
ग इत्ययं शूद्रशब्दोऽर्थवानेवेति शूद्रशब्दार्थसमवेतस्त्रीत्वमप्यत्रास्ति·तदर्थसमवेतस्त्रीत्वेपि शूद्रशब्दादेव टाप्स्यान्नतदन्तात् ग्रहणवतेति निषेधादिति त
दन्तविधिज्ञापकतानासङ्गता· अतएव शंखस्मृतौ ब्राह्मणक्षत्रियवैश्यैः क्षत्रियावैश्याशूद्रासूत्पन्नाः क्षत्रियवैश्यशूद्रा एव भवन्तीत्युक्तमिति भावः।यत्तु शू
द्राभीरमित्यादौ सामान्यविशेषवाचित्वाद्द्वन्द्वाभावमाशङ्क्याभीरजात्यन्तराणीति त्वदादिनीति सूत्रे भाष्ये उक्तन्तत्वनारोपाभिप्रायेणेति न तद्दोषः।अजादिरा
कृतिगणः तेन नमुन इति सूत्रे टायामादेश इति भाष्यप्रयोगः सिद्धः।प्रथमाध्यायचतुर्थपादे च मसवदविशेषादिति सूत्रे शङ्करभाष्यवाचस्पत्योस्त्वजायाञ्छागेति
टावनप्रयोगो दृश्यते छागशब्दोऽप्यजादिष्विति केचित्· उगितश्च· उगिच्छब्देन प्रातिपदिकस्य विशेषणात्तदन्तविधिः।प्रत्ययविधाविति निषेधस्तु न उगि द्वर्णग्रह
णं वर्ज्जमित्युक्तेस्तदाह· उगिदन्तादिति· भवतीति· व्यपदेशिवद्भावोऽप्रातिपदिकेनेति निषेधस्तु सूत्रोपात्तान्तादिशब्दविषय एवेति भावः।भवतु इति उगितः प्रातिप स्त्री १
दिकस्यापि सत्वात् प्रत्ययमात्रग्रहणाभावेन प्रत्ययग्रहण इति परिभाषाया अप्रवृत्त्यानियंवमतीत्यादौ न दोषः।अच्चतेस्त्विति· नलोपिनोऽच्चतेरित्यर्थः।नि
यमोपि नलोप्यञ्चति विषय एवेति निरूपितम्।व्यपदेशिवद्भावलब्धमर्थं स्पष्टप्रतिपत्तये आह· वनन्तादिति· नन्वेवम्प्रत्ययग्रहणपरिभाषया बहुधीवरी त

न सिद्ध्येदत आह तदन्ताच्चेति। तत्परिभाषया लब्धवन्तेन प्रातिपदिकस्य विशेषणादिति भावः। सामान्येति। सूत्रेऽनुबन्धानुच्चारणात्तदनुबन्धकपरिभाषा
या विषयो नेति भावः। इदम्मतुवसोर्जाग्रो विजितिसूत्रयोर्भाष्यकैयटयोः स्पष्टम्। इदं सूत्रं ङीप्विधायकम्। किन्तु ऋन्नेभ्य इति प्राप्तङीबनुवादेन तस्मिन्नियोग
शिष्टस्य समानविधायकम्। उभयविधौ गौरवात्। शर्वरीति। शृधातोरन्येभ्योपि दृश्यन्त इति वनिप्। एतत्सिद्ध्यर्थमाह। ह[illegible]नाद्विहित इति। अर्थवतो ग्रहणान्नेह
मघोनी कनिन्प्रत्ययान्तनिपातितस्येदम्। बहुव्रीहौ वा। अनो बहुव्रीहेरिति निषेधे प्राप्ते इदम्। एतच्च वार्तिकमनउपधेति सिद्धङीबनुवादेन रादेशविधा
यकम्। अत एवेदमनुपधालोपिनि सुपर्वन्त्यादौ मेति विकल्पोऽर्थसिद्धौ वनो र चेत्येतत्तु ऋन्नेभ्य इत्येतज्ङीब्विषयमेवेत्युक्तम्। पक्षे डाविति। तेन द्विवचने रू
पत्रयम्। कृतसमासान्त इति। उत्तरसूत्रे ऋच्यभिधेयान्तस्यैव सम्भवेनार्थाधिकारानुरोधादिति भावः। तेन पादयतेः क्विबन्तस्य ग्रहणं न। द्विपदीति। द्वौ
पादावस्या इति बहुव्रीहौ सङ्ख्यासुपूर्वस्येति पादशब्दान्तलोपस्ततो ङीपि पादः पत्। टाबृचि। पूर्वसूत्रप्राप्तङीपोऽपवाद इति प्राञ्चस्तच्चिन्त्यम्। शेषाद्विभा
षेति सूत्रस्य भाष्यविरोधात्। तत्र हि प्रतिपदविहितसमासान्तानाङ्कापो वैकल्पिकत्वेन कबभावे सावकाशत्वमुक्तम्। तद्रीत्या अस्यापि पूर्वसूत्रस्य वैकल्पिकत्वे
न तदभावे सावकाशत्वात्। बहुव्रीहेरूधस इत्यत्रापि भाष्येस्य स्पष्टमेवैतत्। अत एव ङ्याप्प्रातिपदिकादिति सूत्रे पादशब्दसमानार्थकमकारान्तम्पदशब्द
मङ्गीकृत्यैतत्प्रत्याख्यातम्। श्रूयते च छन्दसि तस्याः सप्ताक्षरमेकपदमेकः पाद इत्यर्थ इति भाष्योक्तं सङ्गच्छते। तदा हि ऋच्यपि एकपदी एकपादितीष्यत ए
व। एवञ्चैकपदीत्यस्य सूत्रमतेपि सिद्ध्ये टाबृचीत्यत्राप्यन्यतरस्याङ्ग्रहणमनुवर्त्य पादन्तस्य ऋच्यनभिधानमिति तु न भाष्याशयः। ङीबन्तप्रयोग
स्य सूत्रीत्येष्टस्यासिद्ध्यापत्तेरिति बोध्यम्। केवलपाच्छब्दस्य स्त्रियामृचि वासम्भवेनात्र तदन्तविधिः। असिद्धत्वादिति। आपः परिगणितेष्वभावान्नत
त्र नलोपासिद्धत्वम्। इदञ्च कार्यकालपक्षे। अयन्निषेधः प्रियपञ्चाद्वीपदीत्यादौ तदन्तेपि। स्त्रियां यत्प्राप्नोति तन्नेत्यर्थादनउपधेति ङीबपि नेति बोध्यम्। ध्व
नितञ्चेदम्भाष्ये। परे तु अत्र बहिरङ्गासिद्धत्वाप्राप्तिः नलोपस्य तत्त्वाभावात्। सञ्ज्ञाकृतबहिरङ्गत्वानाश्रयणात्। पञ्चेत्यत्र तु स्त्रियां यत्प्राप्नोति तन्नेत्यर्थात्।
अयणाक्ताङ्गतपूर्वं षट्त्वाश्रयो निषेधः। अत एव षट्सञ्ज्ञाया नलोपासिद्धत्वस्य न फलमिति नलोपस्तु वित्यत्र भाष्ये उक्तमित्याहुः। मनः। नङीबिति।

लौ· श·शे· २

अथ नञ इति चोक्तरीत्या टापङीपोरुभयोरपि निषेधः। एतेन सीमभ्यां वहुयज्वभ्यां वहुधीवभ्यामित्यत्र डाम्ङीपोरभावे नलोपे डाबुभाविरित्यपास्तम्· डाबुभा·
उभाभ्याङ्ग्रहणाभावे सन्निहितस्यानञ एवानुवृत्तिः सम्भाव्येत· वचनसामर्थ्याड्डाम्निषेधयोः पर्याये सिद्धेऽन्यतरस्यामिति स्पष्टार्थम्· भाष्ये त्वन्यतरस्याङ्ग्रहणं वाक्य
भेदेनाणो वहुव्रीहेरित्यनुवर्त्यते ततः पक्षे ऋन्नेभ्य इति ङीवर्थम् एवञ्चानउपधेति सूत्रन्नियमार्थमिति वहुधीवरीत्यत्र ऋन्नेभ्य इति ङीविति तत्सन्नियोगेन रेफा
देशः सिध्यतीति वहुव्रीहेर्ध्वेति वचनमप्रत्याख्यातम्· अनउपधेति च ऋन्नेभ्य इत्यस्यैवानुवाद इति नियमस्य विधिमुखेन प्रवृत्तावपि न दोषः। अनउपधवहुव्री
हेरूधस इत्यतो वहुव्रीहेरिति मण्डूकप्लुत्या दरित्यतो ङीविति चानुवर्त्तते· अनुपसर्जनादित्यनुवृत्तमप्यत्र न सम्वध्यते तस्य गृह्यमाणविशेषणतया गृह्यमा
णस्य चात्र न वहुव्रीहावनुपसर्जनस्यासम्भवात् ध्वनितञ्चेदं वनोरचेति सूत्रे भाष्ये तत्र ध्वनो वहुव्रीहेरित्यनन्तरमुपधालोपिनो वेति न्यासो दर्शितः। विध्यर्थ
मिदम्। अन्यतरस्याङ्ग्रहणन्त्वनुपधालोपि सुपर्वेत्यादौ सावकाशयोर्डाप्प्रतिषेधयोरुपधालोपिन्यनवकाशेन ङीपा वाधो मा भूदिति· अन्यथा विधानसा
मर्थ्येन त्रयाणाम्पर्याय सिद्धौ नद्वैयर्थ्यं स्पष्टमेव· ककारादिति· अनेन वर्णमात्रं विवक्षितमकार उच्चारणार्थ इति सूचयति· न चकारिके त्वमाकारेण व्यवधा
नादाप्यरककाराभावेनेत्वानापत्तिरेकादेशोऽप्यचः परस्मिन्निति स्थानिवत्वाद्व्यवधानमेव। आपि परतोऽकारस्य कात्पूर्वस्येत्यर्थेऽपि निर्दिष्टपरिभाषोपस्थितेः।
र्व्यवहितेन प्राप्नोतीति वाच्यम्· आनन्तर्यांशोपस्थितावपि येन नाव्यवधानमिति न्यायेनाकारव्यवधानेऽपि प्रवृत्तेः। रथकृ्यादौ च नातिप्रसङ्गः केति सङ्घातग्र
हणे त्वेति का इत्यादावसिद्धिः। अकच्यकारस्योच्चारणार्थतया कशब्दाभावात्· न यासयोरिति ज्ञापकेन वर्णग्रहणमित्येतज्ज्ञाप्यते· अकज्विधायकस्य मकारवै
शिष्ट्यसमादायैव प्रवृत्तिज्ञापकत्वाश्रयणे तु गौरवम् तावतापि प्रत्ययस्थत्वांशानुपपत्तिश्च· न च वर्णग्रहणपक्षे एतिका इत्यादावकारद्वयव्यवधानादित्वा। सम
प्राप्तिः हयोरकारयोरेकादेशे टापा सहैकादेशस्य स्थानिवद्भावादेकेनैवाकारेण व्यवधानात्· पुनः स्थानिवत्वन्तु न लक्ष्ये लक्षणस्य सकृदेव प्रवृत्तेः। टयास २
हैकादेशस्य स्थानवत्वं विनापूर्वैकादेशस्य स्थानिवत्वं वक्तुमशक्य । त्यसटावेकादेशेनापहारेणादर्शनात्· अतएव न यासयोरिति निषेधसार्थकम्·।
स्थग्रहणन्तु स्पष्टार्थं केवलककारस्य प्रत्ययस्याभावात्· असुप इति वहुव्रीहिणा नाङ्गविशेषणं वहुचर्मिकेत्यादौ वित्वानापत्तेः। प्रत्ययलक्षणेनाङ्गस्य स

पूर्वत्वात्·नलुमतेनितुनात्रलुमतालुप्तेप्रत्ययेयदङ्गंनस्यकार्यंतन्निषेधप्रवृत्तेः।इदन्तुदाप्यङ्गमितिदिक्·सर्विकेति·अव्ययसर्वनाम्नामित्यकच्·कोर्किकेति·कोतिण्वु
लूनौ।अन्दोस्वार्थेकः।सुपःपरोनेतिप्रसज्यप्रतिषेधेनव्याख्यानेफलमाह·बहुपरिव्राजिकेति·पर्युदासेहिसमुदायस्यसुबभिन्नत्वेनसुबन्तभिन्नत्वेनचततंःप
त्वादित्वन्दुर्वारमितिभावः।परिपूर्वाद्व्रजेर्ण्वुलिबहुव्रीहौसुपोलुक्पिप्रत्ययलक्षणेनापःसुबन्तात्परत्वमबोध्यम्·कटुकेति·आपासहसवर्णदीर्घात्पूर्ववार्णादङ्गस्य
वलीयस्त्वादपवादत्वाच्चान्यककारादुत्तरस्याकारस्येत्वंस्यादितिभावः।मामिकेति·कस्यप्रत्ययस्थत्वाभावादप्राप्तेवचनम्·ममेयमितिविग्रहेयुष्मदस्मदोर
न्यतरस्यामित्यणितवकममकावेकवचनइतिममकादेशेआदिवृद्धिः·नरानिति·कैशब्दइत्यस्यादेचउपदेशइत्यात्वेआतोनुपसर्गेकइतिकेआतो।
लोपइटिचेत्यालोपः।नयासयोःप्रत्ययस्यादितिप्राप्तेनिषेधोयम्।यकेति·यत्तदोरकच्त्यदाद्यत्वेटाप्·सन्निपातपरिभाषास्यादेवनिषेधान्निर्देशाच्चा
नित्येतितद्विरोधात्कथण्टावितिनङ्गम्·त्यकनश्चेति·मृदस्तिकन्निति इत्वभूतनिर्देशेनज्ञाप्यकेनासेत्वंवारयितुंशक्यमितिभाष्यकृतः·पञ्चभिर्मृत्तिकाभिः
क्रीतइत्यर्थेपञ्चमृत्तिकइत्यस्यानभिधानमितितदाशयः।अत्रत्यिकनिकर्तव्येककारोच्चारणादित्वेनेतिनवक्तुंशक्यम्·पश्चोपत्यकाग्रामइत्यादावकारस्य
वर्णानापत्तेः।टापोलुकिप्रत्ययलक्षणंस्थानिवत्वञ्चन·उभयोरपिनलुमतेत्यनेननिषेधात्·अतएवकतीत्यादौवार्तिकमतेपिनगुणइत्यन्यत्रविस्तरः
आशिषि·आशिषिविहितस्यवुनोऽस्येत्वन्नेत्यर्थः।जीवतादित्यर्थेआशिषिचेतिवुन्·देवदत्तशब्दादनुकम्पायाङ्घन्यनजादौचविभाषालोपोवक्तव्यइतिदत्त
शब्दस्यलोपः।देवदत्तिकेत्युपन्यासस्तुदत्तलोपमभिव्यक्तुम्।ध्रुवकेति·ध्रुस्थैर्येपचाद्यच्कुटादित्वात्गुणाभावेउवङ्।ततष्टाप्यज्ञाताद्यर्थेकः।केणइति
ह्रस्वःपुनष्टाप्।चटकः·संज्ञायांकन्·वार्त्तिकोक्तागणास्त्वाकृतिगणाः।तेनकन्यकाध्रुवकाअलकाइष्टकोरयःसाधवः।उदीचामित्विति·अत्रापिशकुनाविति
सम्बध्यते तेनान्यत्रनित्यमेवेत्वम्·सूतकापुत्रिकावृन्दारकेत्यकारसहितःपाठोऽपपाठः कैयटादिसम्मतेः सूतशब्दात्स्वार्थेकन्·वृन्दशब्दात्कृञ्वृन्दाभ्यामारक
न्निति मस्त्वर्थीयआरकन्·वृन्दारकशब्दोमुख्यपर्यायौत्रिलिङ्गइतिभावः।ङीन्इति·शार्ङ्गरवादित्वाज्जातस्येतिभावः।अन्यत्र·सूतकादौ·उदीचामकपूर्वत्वञ्चा
स्य नास्तितिभेव·एवम्प्रत्ययस्यादितिसूत्रेकात्पूर्वत्वमपि उदात्तस्वरितयोरित्यादाविवानुवादेपिनिर्दिष्टपरिभाषाप्रवृत्तेस्तेनक्षशाख्शब्दात्केह्रस्वेइत्वविः।

सी॰ कलानि नित्यनुवृत्तावपि निषेधविकल्पे विधिविकल्पस्य फलितत्वादाह· इहेति· आतः किमिति· उदीचामियकपूर्वाया इत्येवास्तु यकपूर्वस्त्रीबोधकाकारस्येत्यर्थः।
प्र॰शे॰ साङ्काश्यकेष्वनातिप्रसङ्गः प्रत्ययावयवत्वेनाकारस्य स्त्रीबोधकत्वाभावादिति प्रश्नः· बहुलक्ष्यसंस्कारानुरोधादवयवषष्ठ्येवास्मात्· न च प्रतिपदोक्तस्त्रीप्रत्यय
१ स्यैवानुग्रहणं विशिष्य तदनुपादानादित्युत्तरम् स्त्रीप्रत्ययस्य किमिति· यकपूर्वाया इति स्त्रीलिङ्गनिर्देशः किमर्थमिति प्रश्नः। धात्वन्तेति· धात्वन्तयका
रककारपूर्वयोरकारयोरित्यर्थः। इत्वमिति शेषः। भस्त्रैषा· अयमपि निषेधविकल्प इत्यत आह· अतइति· अत्राप्यातः स्थान इत्यनुवर्त्तते· तदन्तेति· ये
न विधिरिति सूत्रे यदादिविधि भस्त्रादिग्रहणञ्च प्रयोजनमिति भाष्यात्· अपि नानन्भिन्नपूर्वाणामपूर्वाणाञ्च सङ्ग्रहः। नञ्पूर्वाणामपीति स्पष्टार्थं
म्· पदाङ्गाधिकारे तस्य चेति सिद्धेः। उपसर्जनार्थमिति· एवञ्चानुपसर्जने भ्रादाचार्याणामित्यात्वम्भवत्येवोपसर्जनेस्यचारितार्थ्येन बाधे मानाभावात्·
अन्यस्य· अनुपसर्जनस्य· उत्तरसूत्रमभाषितपुंस्काच्चेति· अन्तर्वर्त्तिनीमिति· न एतदसुइति स्थिते अकचि कृते· कृते वानन्तत्पुरुषे· नन्तरङ्गानपीति
न्यायेन त्यदाद्यत्वात्मा कुसुपोलुकि नतो· कचि वा पुनर्विशिष्टात्सुपि त्यदाद्यत्वे दापि समासात्पूर्वोत्पन्नसुपः परएवकटाविति भावः। बहुव्रीहौ तु प्रि
येतत्काप्रियैतकत्वावाकत्वभावे प्रियैतकदित्येवस्वर्वथाने त्वप्राप्तिः। अनेषकेति· अत्रानैषेषकानएषकेति विग्रहः। पूर्वन्नञ्समासेऽज्ञातानेषेति। असं
म्भवादिति· एषाहेति निर्देशान्नञ्ज्ञोपसर्जनयोरप्राप्तेरिति भावः। अकज्र्हेइति· एवञ्च तदकारस्यातः स्थानिकत्वाभाव इति भावः। अर्थान्तरे त्विति· आत्मज्ञाति
धनेष्वित्यर्थः। स्वोज्ञातावात्मनि स्वन्त्रिष्वात्मीये· स्त्रियान्धन इति कोशादिति भावः। कप्रत्ययान्तत्वादिति· तत्र च नान्तर्वर्त्तिविभक्त्या सुपः परत्वं केन व्यवधाना
दिति भावः। संज्ञापूरण्योश्चेति निषेधेन संज्ञायामपि भाषितपुंस्कत्वबोधनेन संज्ञाभूतेनाऽभाषितपुंस्काच्चेत्यनेन सिद्धिः। आत्मीयत्वपुरस्कारेणैव सं। एम
ज्ञाकरणादिति बोध्यम्· नित्यमेवेति· न त्वत्र ह्यकचि कृते आतः स्थानिकत्वाभाव इति भावः। एवमत्यन्तस्वार्थिककान्ते नित्यमेवेत्वम्· अकचोऽत्यन्तस्वार्थिका १
पवादत्वाभावात्· निःस्वकेति· स्वस्वानि स्वान्तेति विग्रहः· उपसर्जनह्रस्वः· अप्· अज्ञातादीकः। अभाषित· स्त्रीविषयात्वेति नोत्त्वम्· स्त्रीनपुंसकदामशब्दात्तु अप्य
ज्ञातादामादामिकादामाकादामकेत्यसिद्धापत्तेः। विहितस्येति व्याख्याने फलमाह· बहुव्रीहेरिति· अविद्यमाना[illegible]द्वा यस्य सा इति विग्रहे पाक्षिके[illegible]भावे गो।

स्त्रियोरित्युपसर्जनं ह्रस्वः स्ववृशब्दाट्टापि सुप्यज्ञातादौ के सुप्लुकि केऽण इति ह्रस्वे पुनष्टाप्यभाषितपुंस्काद्विहितत्वाकारस्यानिकाकाराभावे नैतत्स्त्रियां प्राप्ता
वुत्सर्गेण नित्यमेवेत्वम् । परविशेषणत्वे तु नाद्यश्चस्वद्वाशब्दात्परत्वेन दोषः स्यादेवेति भावः । शेषिके कपीति । न सद्वासुङादयवस्यायाङ्के पि सुप्लुकि प्रत्ययल-
क्षणेन भागद्वयस्य सुबन्तत्वात् समाससंज्ञायां समासान्ता इति शास्त्रबलात् कबन्तस्यैव समासत्वेनोपसर्जनस्त्रीप्रत्ययान्तसमासरूपप्रातिपदिकाभावात् गोस्त्रि-
योरिति ह्रस्वाभावे केऽण इति ह्रस्वेन कपीति निषिद्धे आपोऽन्यतरस्यामिति ह्रस्वे कपः प्राग्वर्तिनः स्ववृशब्दात्परस्यायो भाषितपुंस्काद्विहितत्वेन तस्यानिकाका-
रस्यायं विकल्पः । ह्रस्वाभावे तु अस्ववृकेति भावः । अयमेवेति । आचारक्विबन्तप्रकृतिककर्तृक्विबन्तानामनभिधानमेव स्त्रियाम् । एतद्भाष्यप्रामाण्यात् ।
पञ्चस्त्रीगोव्यक्तयोधनं यस्य स पञ्चगवधन इत्यत्रार्थवत्सूत्रोक्तार्थवत्त्वाभावादजन्तस्य प्रातिपदिकत्वाभावेन न ङीप् । आपिशलिना प्रोक्तमधीते आपिशला ब्राह्मणीत्य-
त्र तु न ङीप् । प्रोक्ताण्णः स्त्रियामवर्तनात् । अध्येत्रण् तु लुप्तः अणो योऽकार इति व्याख्यानेन वर्णाश्रये प्रत्ययलक्षणाभावात् । अध्येत्रर्थगतस्त्रीत्वमादाय तदण्नि-
मित्तकस्य न प्राप्तिः । स्त्रियामित्यस्य गृह्यमाणविशेषणत्वात् तदण् एतत्स्त्रीत्वेऽवर्तनात् । अत एव काशकृत्स्निना प्रोक्तां मीमांसामधीते काशकृत्स्ना ब्राह्मणीत्या-
आपि न ङीप् । प्रोक्तार्थगतस्त्रीत्वमादाय तु पुनर्न ङीप् । लक्ष्ये लक्षणस्य सकृदेव प्रवृत्तिरिति न्यायात् । तस्माद्दृक्कुरुचरेत्येव तद्व्याख्येयम् । तत्र च तदन्तविधिं विना प्रवृत्तिरेव
न । ज्ञापिते तु तदन्तविधौ प्राधान्यादेतदारम्भाच्च स्त्रियामिति ङीप्प्रकृतिविशेषणमेव । अत एव धीवानमतिक्रान्ता अतिधीवरीति सिद्धम् । एवञ्चापिशलेन्या-
यस्यैव व्याख्येयम् । अनुपसर्जनादिति च सामर्थ्याद्गृह्यमाणविशेषणमेवेति भावः । तदन्तविधिमिति । अणणन्तादेः प्रातिपदिकविशेषणत्वेनाण्णन्त-
न्ताद् एवंरूपमित्यर्थः । अन्यथा प्रत्ययविधौ प्रतिषेधात्स दुर्लभः स्यात् । प्रत्ययग्रहणपरिभाषालभ्यस्य तु नायं निषेधः । प्रातिपदिकादित्यनेन सहा-
नन्वयापत्तेः । तत्कृतं तु कौम्भकारेयसिद्धिः । अन्यथा कुम्भकारेय इत्यापद्येत । कुम्भेन समासे ङीपि कुम्भविशिष्टस्यापत्येन योगे कार्यार्थे तदयोगस्य
वक्तुमशक्यत्वात् । कदाचित्ततोऽपि ढकि कुम्भशब्दौकारे वृद्ध्यभावस्याप्यापत्तेः । निष्कृष्यैकार्थीभाव एव वृत्तिनिमित्तमिति तु वक्तुमशक्यम् । तद्धितार्थेत्युत्त-
रपदे समासविधानात् समुदायेनैकार्थीभावेऽवयवेनापि तस्यैव सत्त्वात् कृद्ग्रहणपरिभाषायाः कृन्मात्रग्रहणे प्रवृत्त्या न तया विशिष्टादेव ङीबुत्पत्तिप्रा-

सि॰ त्याश्॥·नैवं तदन्तग्रहणेपि कारशब्दस्य व्यपदेशिवद्भावेनाणन्तत्वात्ततोपि कदाचित्कोपि कुम्भकारेयो दुर्वारः किन्त्वसमुदायान्ङीप्यपि स्त्रीप्रत्ययेन तदा
श॰ शे॰ दिनियमाभावेन केवलादपि कदाचिट्टकि सदुर्कर् इति वाच्यम्·एतदधिकारादेव ज्ञापकादसहाय एव व्यपदेशिवद्भावप्रवृत्तेः।अर्थवत्सूत्रोक्तार्थवत्त्वाभा
४ वेनाणन्तस्याप्रातिपदिकत्वाच्च·तदादिनियमाभावेनाधिकस्य कार्यस्याबोध्यते न तूनस्येत्यकेषाञ्च·अन्यथा तदन्तग्रहणे फलाभावेन तद्वैयर्थ्यं स्पष्टमेव·ए
तदेवाभिप्रेत्यात्र भाष्ये उक्तम् समासे च कृतेऽवयवादुत्पन्नाववयवस्य वृद्धिः स्यादिति·येन विधिरिति सूत्रे च तदादि तदन्तविधेः प्रयोजनं गार्ग्यायणः प
रमगार्ग्यायण इत्युक्तम्भाष्ये·तत्रैकदेशात्प्रत्ययाभावे परमश्चासौ गार्ग्यायण इति तदर्थो वाच्यस्तथा सति नैव परमगार्ग्यात्प्रसक्तिरिति तत्प्रयोजनत्वोक्ति
रसङ्गता स्यात्·मैवं तु परमगार्ग्यस्यापत्यमित्यर्थेप्युक्तन्यायाद्गार्ग्यशब्दादेव प्रत्ययो न तु परमगार्ग्यात्तथा सति पारमगार्ग्यायण इति स्यादिति तत्प्रयो
जनत्वोक्तिसङ्गतिः।कियतोपि तदादिनियमावश्यकत्वप्रदर्शनाय परमगार्ग्यायण इत्युपन्यास इत्युक्तवान्·यत्तु सर्वादिसूत्रे भाष्येऽनुपसर्जनादित्येष
योगः प्रत्याख्यायत इत्युक्तन्तत्त्ववार्त्तिकेनातस्य प्रत्याख्यानात्तदभिप्रायकमिति भाष्यप्रदीपोद्योते विस्तरः।टिड्ढाणञित्येव सिद्धे ठक्ठञोरुपादानं ठन्स
ठयोर्व्यावृत्त्यर्थम्।अदन्तमिति·प्रत्यासत्त्या टिदाद्यवयवाकारान्तमित्यर्थः।तेन पश्चाद्भेन्यादौ ठग्निमित्तोपि न ङीप्·कुरुचरीति कुरुषु चरतीत्यधिकरणे
उपपदे चरेष्टः।टितोऽप्रत्ययस्यापि सत्त्वात्प्रत्ययग्रहणपरिभाषाया अप्रवृत्त्याऽत्र टिदन्तत्वं कुरुचरशब्दस्येति बोध्यम्·वक्ष्यमाणेति·वचेर्लृटः शानच्
टित्वादिति·स्थानिवत्त्वेनेत्यादिः।नस्तपीति लिङ्गाद्धित्वादेरशास्त्रीयस्याप्यतिदेशोऽनुबन्धकार्ये नल्विधाविति निषेधाप्रवृत्तिश्चेति भाव·ङित्वेनेति·लिङ
देशानां स्थानिवत्त्वेनैव सिद्धौ तद्वैयर्थ्यं स्पष्टमेव·तद्धि अवयवेऽचरितार्थतया समुदायोपकारकम्·न चेदं ङित्वं सुडादित्वादसार्वधातुकलक्षणा वृद्धिनिषेधा राम
र्थमिति वाच्यम्·विनिगमनाविरहात्·उतओदिति वक्तव्ये वृद्धिग्रहणान्न स्थानिनिर्देशेपीकुपरिभाषोपस्थितिस्तस्या अपीग्लक्षणत्वाच्च·नन्वेवमभूता ५
दित्यत्र बुवुईदु प्राप्नोति लाश्रयानुबन्धकार्यस्य तदादेशेष्वभावेपि तिपः पित्वस्य तदादेशेनातद्भावकल्पने मानाभावादतंस्मात्·स्मइति·[illegible] इति·तथा
नुरोधेन च व्यवस्था·परे तु यासुटो ङित्वन्ज्ञापकम्पिदर्थे ङित्वमिति भाष्यात्·सार्वधातुकमिति सूत्रेऽपिदित्यस्य कार्य्यप्रसज्यप्रतिषेधसिद्धेन ङिच्च पिन्नपि

च्ङिन्नेत्यनेन हलः श्न इति सूत्रभाष्योक्तेन पित्सु ङित्वाप्रसक्तेः। शानचः शित्वमपि तत्सूत्र एव भाष्ये प्रत्याख्यातम्। हेरपित्वस्य नातङो ङित्त्व सार्थक्यमर्थ्यीपा।
च्ङिन्नेत्यनेन हलः श्न इति सूत्रभाष्योक्तेन पित्सु ङित्वाप्रसक्तेः
तिमस्य ज्ञापकत्वेदूषणमप्युक्तम् भाष्ये। तस्मादस्य माणोन्यादैसत्यभिधाने ऽजादित्वाद्वाप् यत्तु क्ङिति चेति सूत्रभाष्ये यासुटो ङित्वचनस्य न ङिदादेशानां ङित्त्वमि
त्यत्र ज्ञापकतोक्ता तन्न वार्तिकमतमङिच्चपिन्नेत्यादेस्तेनानुक्तेः। यदपि गाङ्कुटादिभ्य इति सूत्रे गाङो ङित्वं सानुबन्धकादेशेऽनुबन्धानां स्थानिवत्वस्य ज्ञापकमुक्तं वार्तिककृता त
शेषपाकोन्यस्याविशेष इति द्रव्यधर्मस्य व्याप्तोव्याप्तेर्यासु कालयोगइति स च वहिरङ्गः। अपि च साधनसम्बन्धिनाते क्रियायाः परिच्छेदकत्वात्कालाकाङ्क्षेति
स च वहिरङ्गः। अकर्मकव्यवहारस्तु धातूनान्द्रव्यकर्माभावनिमित्तएव· अत्रवीजम्वक्ष्यते· तदुक्तम्· अतस्तैः कर्मभिर्युक्तो धातुर्द्व्येरकर्मकः। लस्य कर्मणि भावे च
चनिमित्तत्वायकत्वतइति· गतिबुद्धि· शब्दः कर्मकारकं येषामित्यर्थः व्याख्यानात्· तेन ज्ञापयति क्रन्दयत्योर्न। अणौ विनिणिच्यमुत्पन्न इत्यर्थः। अत्रापि
चहेतुमण्णिजेवसमाविव्यत्रापि स एव व्याख्यानात्· अतएव भसेर्निषेधश्चरितार्थः। सहितिन्य एयन्तश्रुतादिरिति बोध्यम्· अन्यानधीनत्वलक्षणा
र्थप्राधान्यशब्दप्राधान्ययोः प्रयोजकव्यापारे सत्त्वेन तत्स्वतुरीषिकर्मत्वस्यान्तरङ्गादपि कर्तृत्वाद्बलवत्त्वेन कर्तुरित्येव सिद्धे णिजर्थेनाप्यमानस्य चेत्र
त्यर्थादीनामेवेति नियमार्थमिदम्· तेन पाचयत्यादियोगे नेति हेतुमति चेति सूत्रे भाष्यकृतः प्रधानकार्यं सर्वतो बलवदित्याकडारसूत्रेकेपदे स्पष्टम्
तेन गत्यादियोगेप्यन्यस्य कर्मत्वशक्तिमत्वम् पाचयत्यादियोगे कर्तृत्वशक्तिमत्वमेवेति बोध्यम्· गमयति देवदत्तेनेति· यज्ञदत्तकर्मकगमनानुकू
लदेवदत्तकर्तृकव्यापारानुकूलो विष्णुमित्रकर्तृको व्यापार इति बोधः। अत्र देवदत्तस्य न कर्मत्वम्· नियन्त्रिणि· नियन्तृकर्तृकस्यन्तप्रकृतिभूतस्येत्व
र्थः। अपप्राणान्वहिर्णिच्यर्थस्याभावेपि ग्रामङ्गमयतीत्यादौ तत्रापि गतिं विना सम्भवादासिद्धगत्यापि गत्यर्थत्वमस्तीत्यभिमानेन वार्तिकारम्भः। सुखम्या
दि इत्यादौ न तस्याक्षेपः। तत्र कर्तरि क्त आदिकर्मणि बोध्यः। अतएव ग्रामम्प्रापयति देवदत्तेनेत्येवेति ध्वनितं नगतीति सूत्रेनवेति सूत्रे च भाष्येनय
ते तु पाप्रापणइत्यादेरिवगत्युपसर्जनम्प्रापणं वाच्यमिति तस्य गत्यर्थत्वमेवेति बोध्यम्· आदिखाद्योरिति प्रत्यवसानार्थत्वात्प्राप्तिः। प्रत्यवसान

नितन्त्वामिनोत्र हिंसादृश्या जल्पयतीति· अन्वयत्तदत्तमितिशेषः लाडनपूर्वकशब्दोच्चारणे जल्पत्यादेर्वृत्तिस्तेनजल्पयतिपुत्रन्देवदत्तइत्यादौपुत्रस्यकर्मत्वपुत्रोधर्मं
जल्पतितंद्वेषकवाक्यानिकथयति देवदत्तोजल्पयतिधर्मं पुत्रमित्यर्थः।शब्दाययतीति·शब्दङ्करोतीत्यर्थेशब्दवैरेत्यादिकाण्डनामिच्· परेतुशब्दक्रियाणा
मित्यर्थेहायपन्तिशब्दाययतिक्रन्दयतीनाम्प्रतिषेधउक्तोभाष्ये· ननुशब्दकर्मकाणामितिपक्षे एवम्चतत्रपक्षेभाष्येशब्दाययतोमतिषेधानुक्त्याःकर्मक
शब्दाययतिसत्वेनमानेशब्दस्यधात्वर्थसङ्ग्रहीतत्वेपिवहिर्भूतपुत्रादिकर्मणोभावेमानाभावात्हूयताविवेतिबिन्नोयनिषेधइत्याहुः।येषामिति· अयभावः
गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणिकर्त्तासणाविति सूत्रन्नियमस्यसजातीयापेक्षत्वात्कर्मकाणाञ्चेदेषामेवेतिनियमपरम्।एवंसिद्धेऽकर्मकग्र
हणंसामर्थ्याद्देशकालादिभिन्नकर्माभाववतोऽकर्मकग्रहणेनग्रहणार्थं·तच्चसामान्यापेक्षन्व्यापकम्।शास्त्रेऽकर्मकपदेनेदृशानामेवग्रहणमितितेनमासमास्त
इत्यादौभावेलोभवति·नत्विति·तदविवक्षाहिदेधातदनपयोगात्कात्थर्तत्यागात्तत्वेवतस्मिन्नर्थेतत्रसम्बन्धित्वेनान्वयविवक्षणादितिभावः।इदङ्क्यद्धानुरोधेन·
परेत्वविवक्षितकर्मकाणामप्यकर्मकपदेनग्रहणम्।क्तादीनामेवविवक्षितकर्मकेभ्यःकृतपूर्वीकटमित्यादौभाष्यकृताकैयटेनचाङ्गीकारात्·लुनातेर्निदा
नप्रेषणामिविलावयतिकेदारन्देवदत्तइत्यादौकेदारस्यकर्मद्वितीयान्तस्यणौरणाविति·कैयटेनप्रयोगाच्च नचात्रार्थान्तरेवृत्याऽकर्मकत्वन्नत्वविवक्ष
यितिवाच्यम्·तत्वप्रत्ययमित्यायार्थान्तरत्वाभावात्·तदुदाहरणानुस्यन्दनइत्याद्यर्थकमदीवहतीत्याधाकरेस्पष्टम्·अधीगर्थेतिसूत्रेकर्मणःशेषत्वविवा
क्षयाऽकर्मकत्वेमातुःस्मर्यतइत्यत्रभावेलस्यभाष्येउदाहृतत्वाच्च·यत्तुप्रकृतसूत्रेभाष्येकालकर्मणामुपसङ्ख्यानङ्कर्तव्यमकर्तव्यम्।नचकेचित्कालभावाध्व
भिन्नकर्मकास्तएवंविज्ञास्यामःकचिद्येकर्मकाइत्युक्तम्·कचिदित्यस्यकालादेःकर्मसञ्ज्ञाप्रयोजकव्यापाररहितेऽर्थइत्यर्थःनस्योपम्भावः।उक्तभाष्याऽक
र्मकपदमासमर्थ्यादत्रशास्त्रेऽकर्मकपदस्यावस्थानरेकर्मरहितेइत्यर्थइति तादृश ञ्चसर्वथाद्रव्यकर्माभावात्तदविवक्षणाद्धेतुभयविधमपिकृतपू
र्वीत्यादिभाष्याद्ग्राह्यंविनिगमनाविरहाच्च·अतएवाकर्माधिकारेष्गुदृश्यादिभ्य आत्मनेपदविधानसङ्गच्छतेअकर्मकशब्देचधातुरेवान्यपदार्थःअर्थभेदेनचशब्दभेदःकामेतेनका
[illegible] तय कर्मभवतिनचभवतितेनाकर्मकाणाञ्च

तत्रामर्थ्याद्यभिचारिद्व्यकर्मैरहितेनार्थोऽबोधितः। एवञ्च मासादिप्रयोगेपि नद्वस्थायामेवाकर्मत्वम्बोध्यम्· एतेनात्र सूत्रे नच केचिदिति प्रतीकमुपा
दाय कालादेरविवक्षयातिरकर्मकत्वसम्भवोऽस्त्येवेत्याशङ्क्यात्यन्ताविद्यमानकर्मकाणामेवात्र शास्त्रेऽकर्मकपदेन ग्रहणम्· अन्यथा पचादीनामविवक्षि
तकर्मत्वेलादयः स्युरिति यत्कैयटेनोक्तं तत्त्वरास्तम्· अतिप्रसङ्गस्त्वनभिधानाद्वारणीय इति वदन्ति· हृक्रोः। तत्राभ्यवपूर्वस्य हरतेर्भक्षणार्थत्वाद्विकार
र्थकरोतेश्चाकर्मकत्वात्प्राप्तेऽर्थान्तरे चाप्राप्ते उभयत्र विभाषेयम्· अभिवादिदृशोः· हेतुमण्यन्तस्याभिवादेर्दृशिप्रकृतिकण्यन्तस्य चेत्यर्थः। अधिशी· आधा
र इत्यनुवर्तते तस्यैव कर्मत्वशक्तिमत्ताऽनेन बोध्यते· अभिनि· व्याख्यानादभिनीति द्वन्द्वेन त्पूर्वौ विशितिसमासः। अभिनिवेशश्चाग्रहः। सन्मार्गविषया
काग्रहवानित्यर्थः। व्यवस्थितेति· परिक्रयण इत्यतोऽन्यतरस्याङ्ग्रहणानुवृत्तेरस्य वैकल्पिकत्वम्· अतिप्रसङ्गस्त्वनभिधानाद्वारणीयः। एतदेवार्थं त्वभि
निविशन्तामिति प्रतीके समर्थसूत्रे कैयटे· परे त्वेतद्भाष्यप्रयोगादभिनिविशत्यानुपूर्व्या अविकृतायाय नश्रवणात्तत्रैवेतच्छ्रुतप्रवृत्तिरन्यतरस्याङ्ग्रह
णानुवृत्तौ व्यवस्थितविभाषाश्रयणे वनमानमित्याहुः। उपान्व· अलुग्विकरणत्वाङ्गादेरेव ग्रहणमित्याह· वसतेरिति· भाष्येऽत्यर्थस्यनेत्युक्तम्। मशकार्थो
धूम इति वदशिनि हन्त्यर्थस्येति तदर्थस्तत्फलितमाह· अभुक्त्यर्थस्येति· उपोष्य रजनीमेकामित्यादौ कालाध्वनोरिति द्वितीया ग्रामे उपवसतीत्यत्र ग्रा
मे वसन् त्रिरात्रमुपवसतीत्यर्थ इति इदन्न कार्यमिति भाष्यस्पष्टम्· उपपदविभक्तिमाह· उभेति· उपपदविभक्तीनां सम्बन्धोऽर्थः। विशिष्यार्थानुक्तेः षष्ठ्य
पवादत्वाच्च· उभसर्वयोस्तसाविति विग्रहः। उभांशे उभयशब्दनिष्ठप्रकृतित्वमुभशब्दे आरोप्यत तत्प्रकृतिकत्वं षष्ठ्यर्थः। उभयशब्द सर्वशब्दप्रकृति।
कतमन्तयोर्ग्रहणस्यार्थः। आम्रेडितान्तेष्विति· कृतद्विर्वचनेष्वित्यर्थः। धिक्कृतेति· धिगर्थो निन्दा· कृत्स्नाभक्तसम्बन्धिनी निन्देत्यर्थः। उपर्यादीनां
समीपोर्ध्वदेशादिवृत्तित्वमर्थः। अभितः परित इत्यत्र पर्यभिभ्यां चेति तसिल्· तत्राद्यस्योभयत इत्यर्थोऽन्यस्य सर्वत इत्यर्थ इति पर्यभिभ्या
ञ्चेत्यत्र भाष्ये· अन्तरान्तरे· अन्तरेणेत्यटावन्तसाहचर्यादन्तरेत्यटावन्तम्। अन्तरेत्यतृतीयान्तसाहचर्यादन्तरेणेत्यतृतीयान्तम्· साचर्यं भ
सादृश्यं तद्यथाऽस्य गोर्द्वितीयेनार्थ इति गौरेवानीयते नाश्वो न गर्दभ इति दृष्टान्तपरभाष्येण सदृशानामेव प्रयोगे सहायते इत्यर्थस्य प्रतिपाद

का॰ नात् तेनकिमनयोरन्तरेण ज्ञातेनेति सिद्धमन्तरेण विशेषेणेत्यर्थः। एवञ्चैतयोरव्यययोरेवग्रहणम् यद्यन्तरशब्दस्य प्रथमैकवचनान्तस्यानभिधा
प्र॰ शे॰ नादन्त एवेत्यानुपूर्वीकमव्ययमेव प्रयोगेषु दृश्यत इति तत्साहचर्यादन्तरेणेत्यप्यव्ययमेव तदुक्तम्भाष्ये · अन्तराशब्दोयमदृष्टापचारो निपातस्त
१७ वेति निवोध्यम् · अवधित्वरूपस्सम्बन्धो मध्यत्वान्वयी मध्यार्थान्तराशब्दयोगे द्वितीयार्थः तस्यैव सम्बन्धत्वेन वोधे षष्ठी। हयोर्द्विपद नुर्न द्विती
या उपपदविभक्तेरिति न्यायेन न तत्र प्रथमाया एव प्राप्तेः। युक्तग्रहणानुस्पष्टार्थम्। अधिकृत्येति विभाषाकृञीत्यन्नमितिवोध्यम् · महासञ्ज्ञाकरणा
न्वर्थत्वाय कर्मक्रियाम्प्रोक्तवन्तः कर्मप्रवचनीयाः। वाहुलकात्कर्तरि भूते नीयः। ते न सम्प्रति क्रियान्नद्योतयन्ति किन्तु क्रियानिरूपितं सम्बन्धवि।
शेषन्द्योतयन्ति। क्वचित्सम्बन्धविशेषद्योतकेपि वचनसामर्थ्यात्सञ्ज्ञा यथाधिपरी अनर्थकौ। सुः पूजायामिति च निपातसञ्ज्ञयासमावेशस्तस्याप्यप्रयु
कः। लक्षणाद्वितिनत्सम्बन्धे लक्ष्यलक्षणभावरूपेनुनाद्योत्यइत्यर्थः। अपवाद इति। तद्योत्यसम्बन्धस्य क्रियान्वयात्तयोः प्राप्तिः तेन प्रकृते नो गतिर्गता।
विति निपातेनः। द्वितीयार्थो लक्ष्यलक्षणभावः सम्बन्धो हेतुश्चेत्यनुनाद्योत्यते · लक्षणत्वञ्च ज्ञानजनकज्ञानविषयत्वम् · जपज्ञानेन हि कालविशेषवि
शिष्टा वृष्टिर्ज्ञाप्यते · जपाभिन्नहेतुज्ञानजन्यज्ञानविषयो वर्षणमिति वोधइत्याह · हेतुभूतेति · परापीति · कर्मप्रवचनीयसञ्ज्ञावकाशो हेतुत्वाविवक्षायां।
हेतुतृतीयावकाशोथ तेन कुलमिति प्रकृते च हेतुत्वविवक्षायाम्परत्वात्तृतीयाप्राप्तिरिति भावः। पुनस्सञ्ज्ञेति · लक्षणेत्थम्भूतेत्येव सिद्धे पुनस्सञ्ज्ञाकरणा।
वोधितपुनर्द्वितीयाविधानसामर्थ्यादित्यर्थः। एतेन सञ्ज्ञाया विजानीयत्वाद्विभक्तिवाधकः कर्तुमशक्य इति परास्तम् · स्पष्टञ्चेदम्भाष्ये · तृतीयार्थे तृतीया
शब्देन तन्निमित्तशब्दः सहयुक्त इत्यत्रोपात्तः। नन्तरत्वात्सहशब्दो लक्ष्यते तदर्थः साहित्ये द्योत्य इत्यर्थः · साहित्यरूपस्सम्बन्धोनुद्योत्यो द्वितीयार्थः न एम
येति · कइति · कर्तरीति भावः। उपोधिकेवाढ्येनेति सप्तमीति · यस्मादधिकमित्यनेनेति भावः। उपखार्यान्द्रोण इति यथा खार्यपेक्षयाधिकत्वान्द्रोणस्येत्यर्थः। १७
तेनो मयं मलीति फलति। इत्थम्भूतः कञ्चित्प्रकारं प्राप्तः स आख्यायते नेनेति इत्थम्भूताख्यानम्प्रकारविशेषनिरूपकम् · भागशब्देनांशः आयते नेनत।
स्वामीउच्यते · वीप्सायाद्विर्वचनविशिष्टवृक्षशब्दो वोध्यत्वादाह · विषयभूतेष्विति · वृक्षप्रकाशेन विद्युद्विद्योतते देशज्ञानाद्वृक्षोलक्षणम् वृक्षम्वृक्षमिति वृक्ष

सव्यापकतासम्बन्धेनान्वयो यद्यपि द्विर्वचनबलादेव तथापि प्रत्यादिसत्वेसोपि तन्निर्णायक इति सम्बन्धपरिच्छेदकत्वम्बोध्यम्· वृक्षादीनां सेचनकर्मत्वेपित
त्वेनाविवक्षायामनेन द्वितीया· किन्त्वयमत्र कर्मणि द्वितीयास्यान्नवाप्रतिना सामर्थ्याभावात्प्रतिवृक्षमिति समासानापत्तिः। किन्त्वप्रत्यादेः क्रिया विशेषका
त्वेनार्थं तथा कर्मप्रवचनीयसञ्ज्ञायाएवानापत्तिः। अतएव भाष्ये किमर्थम्पुनरिदमुच्यते नचोपसर्गसञ्ज्ञाबाधनार्थं क्रियायोगाभावादित्युक्त्वा द्वितीया
र्थमिति सिद्धान्तितम्· अतएव प्रत्यर्थशब्दनिवेश इत्यादावर्थस्य निवेशनक्रियानिरूपिताधिकरणत्वेप्यर्थमर्थम्प्रतीति विग्रहो भाष्ये दर्शितः। वृत्तिविषये
प्रतिरेव वीप्सायामपि द्योतक इत्यन्यदित्यलाम्। फलान्तरमप्याह· अत्रेति· यदत्रेति· यदत्र तु मम भागः स्यादित्यर्थः। कुतोपीति· कुत इत्यपादाने पञ्चमी· द्वि
तीयात्तु न कर्मप्रवचनीयद्योत्यसम्बन्धप्रतियोगिरूपस्य कर्मप्रवचनीययुक्तत्वस्याभावात्· गतिसञ्ज्ञाबाधादिति· धात्वर्थमात्रद्योतकत्वेन क्रियायोगा
त्· गतित्वम्प्राप्तं विशेषद्योतकत्वाभावात्तु नर्थकत्वव्यवहारोपीति भावः। सुसिक्तमिति· सेकगतपूज्यत्वद्योतकः सुः क्रियापूज्यत्वकृते न तत्क्रियाकर्तुः
पूज्यत्वे गम्यएवैषा सञ्ज्ञा अतएव सुस्थितं दृङ्नवेत्यत्र न· अतिक्रमणमुचितादधिकानुष्ठानम्। चात्पूजायामित्यनुकृष्यते अतिदेवानिति· देवेभ्योऽधि
को देवपूज्य इति वार्थः। द्वितीये कुगतीति समासस्याभावस्त्वनभिधानात्· आद्ये तु प्राप्तिरेव न स्वतीपूजायामेवेत्युक्तेः। अपिः पदार्थे· पदस्याप्रयुज्यमानप
दान्तरस्यार्थः पदार्थः। सर्पिषोपीति· अत्र बिन्दुरित्यादेः पदस्यार्थोपि द्योत्यः। तदुक्तम्वृत्तिकृता· मात्रा बिन्दुः स्तोकमित्यस्यार्थेपि वर्त्तत इति· सम्भावनायां लि
ङिति· उपसंवादाशङ्कयोश्चेति सूत्रशेषे भाष्ये पठितेनोपसंवादाशङ्कयोर्लिङित्यनेन· नवलोकवेदसाधारणमित्यपि तत्रैव भाष्ये स्पष्टम्· तत्राशङ्कोत्प्रेक्षा सम्भावना
प्युत्कटकोटिकाशङ्कैवेति भावः। कर्मप्रवचनीयत्वात्तद्द्योत्यसम्बन्धमाह· तस्या एवेति· सम्भावनाया एवेत्यर्थः। कर्त्तृदौर्लभ्यमिति· षष्ठीतत्पुरुषः कर्त्तृपदम्प्रका
तामिति प्रायम्। सर्पिषोपि स्यादित्यादौ कर्मदौर्लभ्येत्यादि बोध्यम्· तत्र बिन्दोस्तद्दौर्लभ्यप्रयुक्तदौर्लभ्यसम्बन्धस्य च द्योतकोपिः सम्बध्यत इति स्यात्पदवाच्यक्रि
यायामपिद्योत्यबिन्दोः कर्त्तृतयान्वयोऽन्योक्तसम्बन्धेन चान्वयादिति भावस्तदाह· अपिशब्दबलेनेत्यादि· एवञ्च सर्पिरवयवबिन्दुदौर्लभ्यवतीतत्कर्त्तृकासम्भा
वनाविषयभासतेति बोधः। विशिष्टसत्तायाः सम्भावनाविषयत्वबोधे दौर्लभ्यस्यापि सम्भावनाविषयत्वमनुभवसिद्धम्· नन्वेवङ्कर्मप्रवचनीयद्योत्येऽर्थे सर्पि

का॰ यो ऽन्वयेन तस्य कर्मप्रवचनीययुक्तत्वाद्द्वितीया स्यादत आह· द्वितीयात्विति· न त्वपिनेति· बिन्दुनायोगे ऽप्यपिद्योत्यसम्बन्धेनानन्वय इत्यर्थः। कर्मप्रवचनीययो
श॰ त्यसम्बन्धप्रतियोगित्वमेव तद्युक्तत्वम्· प्रकृते चापिद्योत्यस्योक्तसम्बन्धस्य बिन्दुः प्रतियोगी न सर्पिरिति भावः। यदा सम्प्रतिपत्तये ऽपिद्योत्यस्यापि विवक्षा प्रयोगा
१८ स्यादापि द्वितीया स्याधित्वोपपदविभक्तेरिति प्रथममेव तत्र कारकविभक्तित्वं क्रियाजनकत्वार्थकविभक्तिकत्वमिति दिक्· सञ्ज्ञाफलमाह· अनुपसर्गत्वादिति·।
अपि स्तूयादिति· पूर्ववल्लिङ्। क्रियाविषयशक्तत्वादिना सम्भावनमपिद्योत्यम् प्रकृते ऽवाङ्मनसगोचरं विष्णुमपि स्तूयादिति शक्त्युत्कर्षाविष्करणम्· अत्यु
क्तिरसम्भाव्यार्थसम्भावनम्। सम्भावनपदस्येदृशार्थकत्वे व्याख्यानमेव शरणम्। विष्णुविषयायाः शक्यत्वसम्भावने चान्यविषया निश्चयेन शक्या कर्तुमि
ति फलति शक्त्युत्कर्षमित्यौचित्योत्कर्षादेरप्युपलक्षणम्· अपि वेदान्तपारगं हन्यादित्यादौ हननक्रियायां सम्भावनाविषयौचित्योत्कर्षद्योतनात् सम्भावि
तौचित्यस्य चानुष्ठानमयुक्तमिति अस्य स्वार्थे तात्पर्याभावो ऽधर्मशास्त्रोक्तः सङ्गच्छते। कामचार इच्छया प्रवृत्तिः स्तुहि मा वा यथेष्टं कुर्विति यावत्· प्रैषातिसर्गेति लि
ङ्· अपि स्तूयाद्वृषलमिति· उपसम्वादेति सूत्रपठितवार्तिकेन परेणान्तरङ्गेण च गर्हायां लडपीति बाधित्वा सम्भावने लिङ् क्रियागतगर्ह्यत्वमपिद्योत्यम् वृषलपा
दसमभिव्याहारात्स्तुतेर्गर्ह्यत्वम्फलति नदेवधिक्त्वादिना ऽनूद्यते अपि सिञ्चेति· अपिद्वयेन मिलितेन समुच्चयद्योतनात् प्रत्येकं सञ्ज्ञायामुभयत्रापि षत्वाभा
वः कालाध्व· अत्यन्तसंयोगो निरन्तरसम्बन्धः स च गुणक्रियाद्रव्यैरभावेन च। तेन मासम्भोजनाभाव इत्यादेः सङ्ग्रहः। गुणादिभिः कालाध्वनोरत्यन्तसंयोगे
प्रत्यासत्त्या कालाध्ववृत्तिभ्यां द्वितीयेत्यर्थः। मासमधीत इति· गतिबुद्धिस्थं यावदवयवसम्बन्धरूपा व्याप्तिर्द्वितीयार्थः एकादश्यां रात्रौ जागर्यादित्यादावधि
करणस्य त्वविवक्षणान्न द्वितीया इति द्वितीया। स्वतन्त्रः। कारकाधिकारात्क्रियाजनने स्वतन्त्र इत्यर्थमत आह· क्रियायामिति· स्वातन्त्र्य॥ . . ॥
म्च कर्तृप्रत्ययसमभिव्याहारे प्रधानीभूतधात्वर्थाश्रयत्वम्· पक्वस्तण्डुलो देवदत्तेनेत्यत्र फलस्य प्राधान्येपि देवदत्तस्य कर्तृत्वसिद्धये कर्तृप्रत्ययसमभिव्या
हारे इति णिचस्तु वाचकत्वमेवातस्तत्र णपनधातुत्वप्रकृतिधात्वेतदुभयवाच्यव्यापारयोः स्वस्वार्थम्प्रति प्राधान्येन देवदत्तेन यज्ञदत्तः पाचयतीत्यादौ प्रयोज्य
व्यापाराश्रयस्यापि कर्तृत्वसिद्धिः। द्योतकत्वे तु नैतत्सिध्येत्· कारक इति सूत्र भाष्यात्त्वक्रियाकारकप्रवर्तकत्वं स्वातन्त्र्यमिति लभ्यते प्रकृतसूत्रभाष्याद्वे

हासंज्ञ याचसाधकत्वेलब्धेसाधकग्रहणमेवसाधकतमार्थम्भविष्यतीतिप्रश्नः।गङ्गायामिति·अधिकरणमित्यधिकरणल्युडन्तमहासंज्ञयैवसिद्धेआ
धारग्रहणसामर्थ्यात्सर्वावयवव्याप्त्यायआधारःसोधिकरणमित्यर्थः स्यात् एवञ्चेदंसूत्रंतिलेषुतैलमित्यादावेवप्रवर्त्तेत नहिगङ्गानीरंवासर्वावयवैर्व्या।
प्तानीत्यर्धमेस्यघोषाधारत्वस्यात्यन्तसामीप्यात्प्रवाहे आरोपोऽत्रबोध्यः।यदातुव्यवहितोगङ्गातीरेघोषस्तदागङ्गाशब्दस्यतीरेलक्षणा नमपग्रहणेनशब्दसाम
र्थ्यगम्यःप्रकर्षोनाश्रीयतइतिज्ञाप्यतइतिगौणाधारस्याप्यधिकरणसंज्ञासिध्यति एवङ्कुण्डायाङ्गावइत्यप्युदाहरणंसर्वावयवव्याप्त्यभावेनमुख्याधारत्वा
भावात्·गौणमप्याधारत्वादिसप्तम्यादिशक्तमेवेतिबोध्यम्·इदम्प्रकृतसूत्रेभाष्येस्पष्टम्·यदितुमहासंज्ञयातदासेपकरणसमर्थम्प्रति आधारादिपद
स्वरितार्थम् साधकशब्दस्यव्यापारानन्तरमव्यवधानेनफलोत्पादस्तत्रशक्तिराधारशब्दस्यचाधियतेयस्मिन्नितिव्युत्पत्त्याकर्तृकर्मणोर्धारणक्रियाम्प्रति
सर्वावयवव्याप्त्यायआधारस्तत्रशक्तिरित्युच्यते तदोक्तप्रयोगादिसाधनायकारकप्रकरणेउद्देश्यवाचकेस्वरितत्वप्रतिज्ञयागौणाधारादेर्ग्रहणम्वाच्यम्
स्वरितेनाधिकारार्थमित्यर्थात् नमपातुप्रकृते तदभावोबोध्यते एवञ्चव्यवधानेनफलोत्पादकेकरणत्वोपचारेणतृतीयानप्रयोगस्यासाधुत्वबोधनन्तम
प्फलम् एतत्तमब्वशादेवान्यत्रत्वस्ति मितिज्ञायतइतिदिक्·स्पष्टञ्चेदंस्वरितेनेतिसूत्रेभाष्ये·रामेणेति·कर्तृतृतीयायाः कर्तृत्वादिशक्तिमान्कर्तृक्रिया।
भावःसम्बन्धश्चार्थःकरणतृतीयायाः करणत्वशक्तिमान्क्रियाकरणभावःसम्बन्धश्चार्थः।तच्छक्तिमत्वञ्चव्यापारवत्त्वेवरामकर्तृकवाण करणकप्रा
णवियोगाश्रयोबालीतिबोधः।प्रकृत्यादिभ्यइति· इदंयथा योगसर्वविभक्त्यपवादः।दिवःकर्मच·चेनसंज्ञयोस्समावेशः।तेनदिवःसाधकतमस्यश
क्तिद्वययोगोबोध्यते·तेनाक्षैर्देव्यतेइत्यत्रतृतीयापरत्वात्·कर्मत्वाभावाकर्मकत्वप्रयुक्तपरस्मैपदाभावः।अत्रविप्रतिषेधशास्त्रबलात्तृतीयैवशक्तिद्वय
बोधिका·यदुक्षाणम्फलाश्रयत्वसमानाधिकरणकर्मत्वविवक्षातदाक्षान्दीव्यतीत्यादिसाधुः अक्षाणान्देवितेत्यादौतृतीयातःपरत्वात्कृद्योगलक्षणा।
षष्ठी मनसादेवइत्यादौहेतुतृतीयान्तेनपचाद्यजन्तदेवशब्दस्यसमासः।नचशक्तिद्वयस्वीकारेऽत्रकर्मणिलकारेकरणत्वशक्तेरनुक्तत्वेनतृतीयापत्ति
रितिवाच्यम्·अपादानमुत्तराणीत्यस्योदाहरणेगान्दोग्धीत्यादौ तत्रकर्मणिलकारेपञ्चम्यापत्तिवारणायैवद्रव्यगतानेकशक्तिमध्येएकस्या अभिहि

का· तत्वेऽपरस्याअपितद्वत्प्रकाशेनाक्षतेः। एकैवशक्तिः सम्बन्धाद्वयोपयोगिनी इतितु चिन्त्यम्· कर्मादिपदसत्ताकु मेत्वादितनव्छक्तिरूपेणावोधकतयातयोर्भेदस्यैवौ
श·शे· चित्यादितिमञ्जूषायांविस्तरः फलप्राप्तिरिति· तस्याश्चसत्याम्प्रयोजनाभावादेवनक्रियाप्रवृत्तिरितिफलप्राप्तिशब्देनतत्पूर्वकत्यागउच्यते त्यागस्यैवफलप्राप्तिर्न्व।
१९ त्यौचित्यमत्रविस्तरः। नायातइति· अनेनफलाप्राप्तिरेवस्फुटमुच्यते· सहयुक्ते· पृथग्विनानानाभिरितिवत्सहेनेत्येवसिद्धेयुक्तग्रहणंशब्दविशेषानादरेणा
र्थयोगेभवतीत्यर्थमित्याह· सहार्थेनेति· अतएवक्वचिच्छब्दयोगम्विनापिभवतितदाह· विनापीति· न्यायसिद्धेऽर्थे लिङ्गमप्याह· वृद्धइति· सहार्थः सा
हित्यम् तच्चसमभिव्याहृतक्रियादिसमानकालिकत्वक्रियादिमत्वम्। क्वचित्समानदेशक्रियावत्वम्· अतएवमाषवापोत्तरन्तत्रैवक्षेत्रेतिलवा
पेतितिलैः सहमाषान्वपतीतिभवति यद्यपिपुत्रेणसहागतइत्यादावागमनक्रियाकर्तृत्वादेवपुत्रात्तृतीयासिद्धा तथापिपुत्रेणसहस्थूलइत्याद्यसमु
च्चयमुदाहरणमितिभाष्येस्पष्टम्· अङ्गेन· अवयवेनइदंसन्निधानलब्धम्· अङ्गिनोऽवयविनः सूत्रेअङ्गशब्दोऽशर्शआद्यजन्तोव्याख्यानादितिभावः।
अक्ष्णाकाणइति· यद्यप्यक्ष्येवकाणन्तथाप्यवयवधर्मस्यसमुदायेआरोपाच्छरीरेतदवच्छिन्नेचव्यवहारोनिरूढइतिबोध्यम्· यद्यपिकाणशब्दोऽक्षि
गतविकारवाचकएवतथापिद्वौविप्रावितिवदक्ष्णेतिप्रयोगस्यसाधुत्वमीदृशरीत्याईदृशानांसाधुत्वेचेदमेववमानंषष्ठ्यपवादोऽयमित्याह· अक्षिस
म्बन्धीति· अङ्गविकारः किमिति· अङ्गग्रहणप्रयोजनप्रश्नः। अक्षिकाणमिति· प्रथमाम्वाधित्वात्रैवस्यात् लेशतोऽपिदर्शनसामर्थ्यहीनत्वङ्काणत्वम्॥
इत्थंशब्दः प्रकारमात्रपरः। प्राप्त्यर्थाद्भुवः कर्त्तरिक्तः कर्मविभक्त्यन्तेनेत्थंशब्देनभूतशब्दस्यसमासः। लक्षणशब्दः करणप्रधानः तस्यकर्मषष्ठ्यन्तेनेत्थम्भू
तशब्देनसमासइत्याह· कञ्चिदित्यादि· जटाभिरिति· यद्यपिताभिस्तापसोज्ञानइत्यर्थेज्ञानक्रियायाङ्करणत्वादिदंसिद्धन्तथापिकरणत्वाविवक्षायांलक्ष्यलक्ष
णभावमात्रविवक्षायान्तृतीयार्थमिदम्। इत्थम्भूतस्यपत्रलक्षणवाचकात्पृथगुपस्थितिरेवतत्रैवानेनतृतीयातेनकमण्डलुपाणिश्छात्रमद्राक्षीदित्या
दौकमण्डलुपदस्यनतृतीयानचोत्पन्नायास्तृतीयायाः सुपोधातुप्रातिपदिकयोरितिलुगितिवाच्यम्· कृतसमासेतस्याऽन्यत्वात्समासरूपप्रातिपदिकानवयवत्वा· द्वितीके
पदेस्पष्टमकमण्डलुः पाणौयस्येतिवहुव्रीहिः परेतुकमण्डलुपाणिशब्दात्तृतीयापत्तिः कमण्डलुयुक्तपाणिरूपस्यकमण्डलुपाणित्वस्यलक्षणत्वेवतस्यैवतद्वाचकत्वात्तुकमण्डलु

वित्यस्य कमण्डलुपाणित्वमेवेत्यर्थः। कमण्डलोर्लक्षणत्वे हि सम्पन्नेति वदेत्। किञ्चैतन्मध्यपतितन्यायेन तद्विशिष्टस्य प्रातिपदिकत्वेन तत्स्यात्तदनवयवत्वेनेत्य
मौवितेन लुको दुर्वारत्वम्। अत एव नरम्मन्य इत्यादाविजन्तस्योत्तरपदपरत्वाय पूर्वं सुपो लुकि उत्पन्नस्यामः सुपो धात्विति लुक् अम्विधिसामर्थ्येन नत्वभिमत
इव एकार्थीभावमिति सूत्रे भाष्ये इत्याहुः। सस्नौ· दैवादिकस्य जनेर्नग्रहणान्न सकर्मकत्वादित्याह· जानातेरिति· कर्मत्वमशक्तिरेवात्र तृतीयार्थः। हेतौ· हेतुरिह का
रणार्थशालीयः। तस्य कर्तृसंज्ञाया अपि सत्त्वेन कर्तृतृतीययैव सिद्धेः। ननु लौकिकहेतुरपि करणमित्यत आह· द्रव्यादीति· आदिना गुणक्रिये। साधारणमि
ति· तज्जनकेपि वर्तत इत्यर्थः। करणं तु क्रियाजनकमेवेति भावः। वैषम्यान्तरमाह·। निर्व्यापारेति· करणं तु व्यापारवदेवेति भावः। एवञ्च करणत्वशक्तेभि
त्वे हेतुत्वशक्तिरत्र तृतीयार्थ इति तात्पर्यम्· स्फुटप्रतिपत्तये करणवैलक्षण्यमाह· करणत्वमिति· हेतुहेतुमद्भाव एव तृतीयार्थः। दण्डव्यापारसत्त्वेपि
क्रियाजनकत्वाभावात् करणत्वम्· पुण्ये क्रियाजनकत्वेपि निर्व्यापारत्वान्न तत्त्वम्· फलमपीहेति· इहेमन्तस्नोपहरणात्किञ्चित्फलम्। पिहेतुत्वेन विवक्ष्यत इ
त्यर्थः। तस्यापि स्ववशानद्वाराजनकत्वात्। एतच्च प्रत्यय इत्यादिसूत्रेषु कैयटे स्पष्टम्।। नन्वलं श्रमेणेत्यादौ क्रियावाचकपदाभावात् क्रियाया अगतीत्या
कथं करणत्वमत आह· गम्यमानापीति· अलं श्रमेणेत्यादिपदजबोधविषयापीत्यर्थः। ननूच्चार्यमाणात्तद्वाचकपदजबोधविषयैवेति भावः। अक्लेशं द्यो निमि
धार्थत्वादाह· साध्यत्वात्तीति· ननु साध्यमित्यर्थे ज्ञानेपि तस्य श्रमेणेति नामार्थत्वेन न क्रियात्वमत आह· इहेति· स्ववाच्यक्रियाम्प्रति स्वस्य करणत्वमित्य
र्थः स्पष्टं चेदं मिम्यणाइति सूत्रे प्रविश पिण्डीमिति वा कार्यं वाक्यैकदेशप्रयोग इत्यादिना भाष्ये इति मञ्जूषायां विस्तरः। अशिष्टेति· अशिष्टानां सङ्कीर्ण
चाराणां यो व्यवहारः क्रियातद्बोधकप्रयोगप्रत्यासत्त्याय तत्सम्बन्धेन व्यवहारस्य सङ्कीर्णाचारत्वं तद्वाचकाच्चतुर्थ्यर्थे तृतीयेत्यर्थः। दास्येति· दासीसम्प्रदानक
र्त्रिफलकज्ञानमिति बोधः।। ❀ ।। इति तृतीया ।। ❀ ।। दानस्येति· दाधात्वर्थस्येत्यर्थः। इदमुपलक्षणं क्रियामात्रस्य कर्मणेति· सम्बद्धमिति शेषः· अभि
प्रैति· इच्छतिकर्मणा सम्बन्धस्य सत्त्वादिरूपः सम्प्रदानत्वशक्तिमान् सम्प्रदानचतुर्थ्यर्थः। स एवोद्देश्य इत्युच्यते· क्रियाकारकभावः सम्बन्धस्तद।
र्थः विप्रसम्प्रदानकं दानमिति बोधः। कर्मणेति किम्· तदभावे हि कर्मण्युद्देश्यतयान्तरङ्गत्वात्तस्यैव संज्ञा स्यात् कर्मसंज्ञायां तु पर्यायो भविष्यति

व्यर्थमित्यपास्तमकिञ्चद्

का॰ यसग्रहणं किम् तदस्त्वेहि कर्मणा योऽभिप्रैति ब्राह्मणादिस्तस्यैव स्यात् कर्तृसञ्ज्ञात्वकर्मकविषये सावकाशा नच कर्तुः कर्तृत्वाभावे कथङ्कौः क
श॰ शे॰ र्तृत्वमावेः कर्मसञ्ज्ञायाङ्कर्तृग्रहणस्य स्वतन्त्रोपलक्षणत्वात् अतएव सार्थो हीयते इत्यत्र कर्तुरपादानत्वेपि कर्मणि लकारः सिद्धः। ननु कर्मणो युक्तावकर्मक
२० क्रियोद्देश्यस्य सम्प्रदानत्वन्न स्यादत आह· क्रियेति· कर्मरहितक्रिययेत्यर्थः। सकर्मकेषु कर्मसञ्ज्ञास्या बाधिकेत्याशयेनाह· पत्ये शेते इति न सम्प्रदानादी
नान्तदर्थत्वाभावत्तादर्थ्ये चतुर्थ्यैव सिद्धेः किमनया सञ्ज्ञयेति वाच्यम्· दाशगोघ्नौ सम्प्रदान इत्यर्थत्वात्· तत्सम्प्रदानकन्दानमिति यो थार्थे नत्वावश्यकत्वाच्च
अतएव तादर्थ्ये चतुर्थ्या न्दानकर्मणो गवादेस्सम्प्रदानार्थत्वेपि दानक्रियायास्तदर्थत्वाभावेन चतुर्थ्यन्तार्थस्य दानक्रियान्वयानापत्तिरिति हेलाराजः।
तादर्थ्ये चतुर्थ्यैव सिद्धे चतुर्थी सम्प्रदान इति सूत्रन्त्व्यर्थान्नामित्यादिविषये चतुर्थ्यर्थमिति भाष्यस्पष्टम् पशुनेति· कर्मतृतीयार्थः सम्प्रदानं द्वितीया
र्थः। एतच्च दानार्थकयजधातुविषयम्। पूजार्थत्वे पशोः करणत्वन्यायसिद्धम् इदञ्छान्दसमिति कैयटः। अन्यकर्तृक इति· अभिलष्यतिक
र्त्रपेक्षयान्यदभिलष्यतिकर्म तत्कर्तृक इत्यर्थः। यत्किञ्चिद्विषयकप्रीत्यनुकूलव्यापाराश्रयो भिलष्यतिकर्ता हरिर्भक्तिमभिलष्यतीति प्रत्यया
त् यत्किञ्चिद्विषयप्रीत्यनुकूलः प्रीतिव्यधिकरणो यो व्यापारस्तदाश्रयो रोचतेः कर्त्रेति अभिलषते रुच्यर्थत्वाभावान्न तद्योगे सम्प्रदानत्वमिति भाव
स्तदाह· हरिनिष्ठेति· प्रथीति· नच प्रीयमाणपदाभावे तत्र स्य क्रियाजनकत्वमात्रविवक्षायां सञ्ज्ञा न रा प्राप्तिविषये चारितार्थ्येन परत्वादधिकर
णसञ्ज्ञाया बाधः सिद्धेः कथमेतदिति वाच्यम्· देवदत्ते रोचते इत्यस्याप्यापत्तेरित्याशयात् तत्स्वत्वे तु अस्य कर्मसञ्ज्ञापवादत्वान्न दोषः। गोपीस्मरा
दिति· श्लाघादेः स्तुत्यादिना बोधनमर्थः स्मरादिति हेतौ पञ्चमी स्तुत्या स्मानुरागङ्कृष्णं बोधयतीत्यर्थः स्तुति स्वकृष्णस्यैव एवं ह्नुत्या कृष्णं स्वानुरागं। पूम २०
बोधयतीत्यर्थः। ह्नुतिः सपत्न्यादिभ्यः कृष्णस्यैव। एवं स्थित्या शपथेन च कृष्णं स्वानुरागं बोधयतीत्यर्थः। यद्वा स्तुत्या ह्नुत्या च कृष्णं स्वसखीजनं बोधा
यति स्थित्या शपथेन च कृष्णन्तं बोधयतीत्यर्थः ज्ञीप्स्यमानपदेण्यर्थकर्मणः प्रकृत्यर्थकर्मणश्च ग्रहणादित्यन्यत्र विस्तरः। स्तुत्यादिमात्रार्थत्वे कृष्णं
श्लाघते कृष्णं ह्नुते इत्येव ज्ञीप्स्यमान इति ज्ञानवचनाज्ज्ञपेः सन्नन्तात्कर्मणि शानच् धारेरु धृङ् अवस्थाने इति णिजन्तस्य ग्रहणं व्याख्यानात्। म॰

कार्येति ध्रियमाणस्वरूपेणावतिष्ठमानम्मोक्षं हरिः प्रयुङ्क्ते इत्यर्थः। प्रेरणायाभक्तासत्वेऽभावात्तस्यापि प्रेरणाजनकत्वेन कारकत्वम्बोध्यम् अवश्यदेयत्वेन मोक्षे
ऽपिकारणत्वम्बोध्यम्· प्रकर्षविवक्षायान्त्विति· फलाश्रयत्वेन विवक्षायामित्यर्थः परत्वादिति· इदं सूत्रं विषयतयाक्रियाजनकत्वमात्रविवक्षायान्त्वरितार्थमितिभा
वः। पुष्पेभ्यः सम्प्रदानिकोक्तेति चतुर्थीसमभिव्याहारे बोधः कुमार्यइव कान्तस्यत्रस्यन्तिस्पृहयन्तिचेत्यत्र क्रियासम्बन्धित्वमात्रविवक्षायां षष्ठी अन्येतु भोगायेत्या
र्त्यवकान्तायेति विभक्तिविपरिणामेनवाक्यास्पियमित्याहुः। स्पृहधातुरिच्छामात्रवाची फलावच्छिन्नेच्छावाची वायेसम्प्रदानत्वमन्यत्कर्मत्वम्· ईप्सितत्वम्वात्वर्थ।
जन्यफलाश्रयत्वम्· नतुफलस्यधात्वर्थत्वपर्यन्तमाग्रहः। कर्मसञ्ज्ञायान्तु यथानद्यामभस्तथोक्तम् भार्यामीर्ष्यतीति· नात्रभार्याम्प्रतिकोपः किन्तु परैर्दृश्यमा
नान्तान्नसहत इत्येवा। एवञ्चात्र न कोपजन्येर्ष्या किन्त्वन्यपुरुषदर्शनजन्येतिभावः। हरेः क्रोधद्रोहाभ्यामिच्छाविषयत्वाभावात् क्रियपायमभीत्यनेन न
सिद्धिः नखकुपितः क्रुध्यतीतिभाष्येणापरूढकोप एव क्रोध इति बोधनात् कुपेस्तदर्थत्वाभावेन न तद्योगे इदं कुप्यतिकर्मविवित्या घसाध्वेव· उपसृष्टयोरि
त्यस्यार्थमाह सोपसर्गयोरिति· वैयाकरणनिकाय एव एतदर्थकत्वेन प्रसिद्धः पूर्वसूत्रापवादोऽयम् यदीयस्त्रैतिः यदीय शुभाशुभसम्बन्धीत्यर्थः। राधीक्ष्योः प्र
श्नविषयपर्यालोचनमर्थः। कर्मणः। प्रश्नविषयस्यधात्वर्थेनोपसङ्ग्रहादकर्मकावेतौ· अत एव वक्ष्यन्तराधोऽकर्मकादेवेत्युक्तेः कृष्णसम्प्रदानेकं शुभाशुभपर्या
लोचनमर्थः। प्रत्याङ्भ्याम्· व्याख्यानात्सत्येकर्त्तिमित्तत्वमित्याशयेनोदाहरति· गाम्प्रतिशृणोतीति· अन्वयोः प्रवर्त्तनापूर्वकोऽभ्युपगमोऽर्थः। तत्रविप्रस्यक
र्तृप्रयोजकत्वेन हेतुत्वेप्राप्ते वचनम्· अनुप्रतीतिभिन्नम्प्रदंलु तपच्चम्यन्तम्· गृणइतिअनानुकरणात्षष्ठी· शंसितुः शंसनविषयहर्षानुकूलव्यापारल
क्षणम्प्रोत्साहनमनयोरर्थः पूर्वव्यापारस्येति· शंसनस्येत्यर्थः। प्रोत्साहयतीति· आश्रावयेत्यादिशब्दैरिति शेषः। शतायेति· करणस्यैव सम्प्रदानत्वेन भा
व्रमत्र। तद्व्यापारश्चदानरूप एवेति बोध्यम्· तादर्थ्ये· तादर्थ्यमुपकार्योपकारकभावरूपः सम्बन्धः। यदा तादर्थ्यस्य सम्बन्धत्वेन भानन्तदा षष्ठी। गुरोरि
दंकुर्वर्धमित्यत्र भाष्यस्पष्टम्· क्लृपीतिसप्तमी। अर्थग्रहणञ्चात्र। सम्पत्तिरुत्पत्तिः क्लृप्यर्थकधातुयोगे उत्पद्यमानार्थे वर्तमानाच्चतुर्थीत्यर्थः। हितयोग
च· वार्तुरवयोगेपि। क्रियार्थोपपदक्रियार्थः फलं यस्य तत्क्रिया र्थन्तेन स्ववाचकं लक्ष्यन्ते क्रियाफलकार्थवाचकमुपपदं यस्येत्यर्थः सोऽर्थश्चप्रत्यासत्त्या क्रियारूप एक स्यानि शब्दस्या

का· क्रियार्थाक्रियेति· फलेभ्यो याती त्यादौ फलकर्मकाहरणफलकं यानमिति बोधः यथा वाक्यार्थे वाक्यैकदेशप्रयोगस्थले प्रविश पिण्डीमित्यादौ तस्यैव परस्स
श·शे· सम्पूर्णवाक्यार्थे शक्तता तथास्य समुदायस्याहरणघटितोक्तार्थे शक्तिरेतच्छब्दस्य बलात्स्थानिन इत्युक्तेः तत्प्रयोगेनेति बोध्यम्· अयमेवार्थोध्याहारः। नमस्कु
२१ र्मो नृसिंहायेति· नमः स्वस्तीत्यनेन तु न सिद्धिः। उपपदविभक्तेरिति न्यायेन द्वितीयापत्तेः पिण्डीमित्यादावप्रयुज्यमानभक्षणक्रियाकर्मणि चतुर्थीवार
णाय क्रियार्थोपपदस्येति· तुमर्थात्· तुम्शब्देन तदर्थो लक्ष्यते सोऽर्थो यस्येत्यर्थः इति सूत्रेणेति· भावेपि प्रत्यया वक्ष्यन्ते ते क्रियार्थायाङ्क्रियायामुपपदे
भविष्यति स्युरिति तदर्थः। यागायेति· यागफलकं यानमित्यर्थः। उपपदविभक्तेरिति· वाचनिकमेवेदम्भाष्ये पठितमिति केचित्· क्रियाकारकयोः सम्बन्धो
ऽन्तरङ्गः उपपदस्यार्थेन तु यत्किञ्चित्क्रियाकारकभावमूलकः सम्बन्ध इति तन्निमित्ता विभक्तिर्बहिरङ्गेति अनन्तरेणेति सूत्रे कैयटः अत्राहुः। एवं सति न
मस्यति देवानित्यादौ नमःपदार्थे क्रियाकारकभावेनैवान्वये परत्वाच्चतुर्थीमाशङ्क्यानेन वारणस्य भाष्योक्तस्यासङ्गतिः। एतेन प्रधानत्वात्क्रियायास्तत्स
म्बन्धनिमित्तकत्वेन बलवत्त्वमित्यपि परास्तम्· कारकविभक्तित्वञ्च क्रियाजनकत्वसमानाधिकरणकर्त्रादिषट्कान्यतमार्थकत्वम्· अनभिहितानुक्
तकर्त्राद्यन्यतमार्थत्वम्प्रथमायामपि। अभिहिते प्रथमेति वार्तिकस्वारस्यादतः प्रथमापि कारकविभक्तिरिति बोध्यम्· हवित्यादौ द्वितीयादिरिव देवदत्तः प
चतीत्यादावुभाभ्यामेकस्यैव कर्तृत्वस्य बोध इति न तद्बाधावृत्तिः नमस्करोति देवानिति उत्कर्षनिष्ठो यः स्वनिष्ठापकर्षस्त्वबोधस्तदनुकूलव्यापाररूपनम
स्कारफलस्य तादृशबोधस्याश्रयतया देवानाङ्कर्मत्वम्। स्वशब्देन प्रयोक्ताः नमःशब्दस्य साक्षात्प्रभृतिषु सूर्यादिषु वा पाठेन गतितात्त्वम्· एकस्याएवोपपदविभ
क्तित्वे कारकविभक्तित्वे चायन्न्याय इति तु न युक्तम्। नमस्यति देवानित्यत्रैतत्परिभाषोपन्यासपरभाष्यविरोधात्सह युक्ते इत्यादिसूत्रस्यभाष्यविरोधाच्च· अ
लमितीति· अलमित्यनेन पर्याप्त्यर्थानाङ्ग्रहणम्व्याख्यानादित्यर्थः तत्र ज्ञापकमप्याह· तस्मै प्रभवतीति षष्ठ्याश्चापि साधुत्वे बीजम् स एषामिति· आशीर्विवक्षाया एम
मिति· आशीर्विषयत्वविवक्षायामित्यर्थः। स्वस्त्यर्थः कुशलम्मङ्गलं वा। स्वस्तियोगे चतुर्थ्या अवकाशः स्वस्ति जाल्मायास्त्विति तत्कथनम्· कुशलार्थैराशिषीत्य ३१
स्यावकाशः स्वस्तिभिन्नाः कुशलार्थाः। स्वस्तिशब्दोऽनव्ययमपि। प्रतिगृह्णामिते धेनुं हुम्बार्थे विशेषतः स्वस्तिर्भवति मे नित्यं सुखं चानुत्तमं तथेति भवि

ण्योरन्तरेऽप्ययोगात् । मन्यकर्मणीति तिरस्कार इति । अनादरो नादराभावमात्रमपि तु नञोऽधर्मादाविव प्रतिपक्षवाचित्वात्तिरस्कार इति भावः । तत्रानादर इति मन्य-
कर्मविशेषणं न द्योतकं यत्कर्मेत्यर्थः । तेन युष्मच्छब्दाच्चतुर्थी न । तिरस्कारश्च व्याख्यानादपकृष्टनिरूपितोपमेयत्वस्याप्यभावरूप उपमेयेऽत्र गृह्यते तेन त्वं
कृष्णादश्वस्य सन्नयतो निश्चन्न समभिव्याहार एव तस्मात्तु समपि न मन्ये इत्यर्थः । तृणाय मत्वा रघुनन्दनोऽपि इत्यादौ नञोऽध्याहारस्तदाह न त्वा तृणमिति ।
कर्मात्र चतुर्थ्यर्थः । श्वनेति । न तु यकाव्याख्यानादिति भावः । श्वनूपलक्षणं तेन निन्दायामपि भवति तद्दर्शयन्नाह तानादिकयोगेनेति । नौकाकेति भाष्ये ये पुंसा-
मि पुनेष्यते तेनावाद्यो भविष्यन्ति इति ये ष्विति बहुवचनेन तन्त्युदाहरणबलेन चेष्टेवा निष्ठनिर्णय इति भावः । गत्यर्थकर्म । कर्मात्र चतुर्थ्यर्थे । मन्यर्थे इति-
म् । ओदनं पचति । कर्मणीति किम् । अश्वेन गच्छति । चेष्टायामिति । धात्वर्थस्य क्रियारूपत्वात् अस्य शारीरक्रियायामेव ग्रहणमित्युत्तरम् । पन्थानमिति ।
अध्वशब्दोऽर्थपरो व्याख्यानादिति भावः । अधिष्ठित इति । शब्दप्रयोगसमकालिकगन्तृव्यापारजन्यफलाश्रय इत्यर्थः । अध्वशब्देन मन्त्रप्राप्योऽर्थ उच्यते
तेन गन्तुमुपक्रान्तः स्त्रियां स्त्रियं गच्छतीत्यादौ न । स्पष्टं चेदं भाष्ये । उत्पथादिति । उत्पथं सन्नयत्येवेत्यर्थः । इष्यत इति । न त्वाक्रान्त इत्यर्थः । उत्पथेनेति । शुन्तुमशक्त इति
शेषः इति चतुर्थी ॥ ध्रुवम । ध्रुवं स्थिरम् । अपायो विभागजनको व्यापारस्तदाश्रयमिति यावत् । विभागश्च न वास्तवसम्बन्धपूर्वको वास्तवस-
किन्तु बुद्धिपरिकल्पितसम्बन्धपूर्वको बुद्धिकल्पितोऽपि । माथुराः पाटलिपुत्रकेभ्य आढ्यतरा इत्यादौ तु बुद्धिकल्पितापायाश्रयेऽपि वभाषे पञ्चमीसाध-
त् । कर्तृवारणाय ध्रुवमिति । अन्यथा कर्तृसंज्ञाया इयमपवादः स्यात् । अपायविषये यत्कारकं तद्रूपक्रियाजनकं तदपादानमित्यर्थसम्भवात्कर्तृसंज्ञ-
तु पञ्चनादिषु गैव चरितार्था । हरिरप्याह । अपाये यदुदासीनं चलं वा यदि वाचलम् । ध्रुवमेवातदावेशात्तदिति । स्पष्टं चेदं यदादौ भाष्यानुसारिणस्तु ए-
वं हि अस्मादश्वात्पततो धावतः पतित इत्यादौ ध्रुवत्वाभावादपादानत्वं न स्यादित्याशङ्क्य ध्रौव्यस्याविवक्षितत्वमत्रायतः सतोऽप्यविवक्षा भवतीति स-
माहितम्भाष्ये तदसङ्गतं स्यात् । त्वदुक्तध्रुवत्वस्य पतधात्वर्थव्यापाराश्रयत्वस्यात्रासत्त्वेन सतोऽध्रौव्यस्याविवक्षेत्यस्यासङ्गतेः । सिद्धान्तेऽपि त्वदु-
क्तध्रुवपदार्थकथनमेवोचितमिति तदसङ्गतिश्च लोकसिद्धातिरिक्तेऽर्थे ध्रुवशब्दस्य शक्तिकल्पने गौरवं च । अतदावेशादित्यस्य हरिकारिका-

का॰ यानन्तरावेशाविवक्षणादित्यर्थः तस्मादपायगतिविशिष्टसतियद्ध्रुवमवधिभावोपगमाश्रयत्वे सति तदतिरिक्तस्यावधित्वोपयोगिव्यापारस्यानाश्रय।
शा॰ श्री॰ त्वं पादानत्वमिति सूत्रार्थः ग्रामादेरवधित्वोपयोगित्वाश्रयेणाशङ्कां वृक्षात्पर्णमित्यादौ तस्यासत्वान्न तदुपयोगित्वं तस्य प्रकृते तु विद्यमानस्यापि तस्याविव
२८ क्षितत्वान्न तदुपयोगित्वं न स्येत्युत्तरम्· ध्रुवमपाय इति तु वृक्षस्य पर्णं स्पततीत्यादौ वस्तुतस्तस्य पर्णोद्वारा पातजनकत्वान्मापादानत्ववारणाय एवञ्च।
पाये इति वारकैरुत्तरस्य स्वक्रियाजनकत्वेन विवक्षितइत्यर्थस्तात्पर्यग्राहकं बोध्यम्· ध्रुवग्रहणानुकर्षकानन्तरं गामिवापादानस्यावधिभावोपगमेतिभिक
व्यापाराश्रयत्वाभावबोधनार्थमित्याहुः। अपादानत्वशक्तिश्च प्रकृतधात्वर्थविभागाश्रयत्वसमानाधिकरणेति अपादानसमभिव्याहारे विभागोऽपि धात्व
र्थ इति बोध्यम्· एवञ्च वृक्षात्पततीत्यादौ तदपादानकविभागपूर्वकः संयोगः पर्णवृत्तिरिति बोधः। वृक्षात् भूमिं स्पततीत्यादौ वृक्षापादानकविभागपूर्व
कः संयोगानुकूलो व्यापार इति बोधः परस्परस्मान्मेषावपसरत इत्यादौ मेषपदोपात्तयोरेव क्रियाश्रयत्वात् कर्तृत्वं परस्परपदोपात्तयोरेव विभागाश्रय
त्वादपादानत्वम्· मेषपदोपात्तेतद्विवक्षणात्संयोगानुसारित्वाद्विवक्षायाः। विभागपूर्वकसंयोगगमनं ह्यपसरणम्· आत्मानमात्मनात्मानं(?)त्यासवन्तष्कर
स्वाद्युपाधिकृतभेदवत् शब्दरूपोपाधिकृतभेदाग्रहणे मानाभावात् शब्दालिङ्गितार्थभानस्यैव सत्वाच्चेत्यन्यत्र विस्तरः यत्तु अपसरत इति धातु
नागतिद्वयस्याप्युपादानादेकनिष्ठाङ्गतिं प्रति इतरस्यापादानत्वमविरुद्धमिति तन्न वस्तुतस्तन्निष्ठव्यापारयोर्भेदेऽपि धातुनानिरूपितभेदस्यैवापाय
स्योपादानादुभयोरपि तत्क्रियाश्रयत्वेन परत्वात्कर्तृत्वापत्तेः। अत एवैकशेषसूत्रभाष्य उक्तमनवैव निडन्तानेकशेषारम्भमन्वयोजयति क्रियापाय
कत्वादिति धनुषा विध्यतीत्यत्र निःसरच्छरजन्यवेधनार्थत्वादवधेरपादानत्वाकरणत्वोभयप्राप्तौ परत्वात्करणत्वं बोध्यम्· ग्रामादायातीति· आयाते
र्विभागपूर्वकोत्तरदेशसंयोगानुकूलो व्यापारोऽर्थः। वृक्षात्स्यन्जतीत्यादौ व्यापारव्यधिकरणविभागस्यैव धात्वर्थत्वेन कर्मसंज्ञयापादानत्वस्यवाध राम
स्यन्देस्तु न विभागोऽर्थ इति वृक्षात्स्यन्दत इत्येव· चलतेस्त्वासनाच्चलित इति प्रयोगादस्त्येव विभागार्थत्वम्· सार्थाद्धीयत इत्यत्र सार्थस्य धात्वर्थव्याप २२
व्यापाराश्रयत्वेनापादानत्वे वाहीयरुहोरिति तापकात्कर्मप्रत्ययान्तहीयमानधातुयोगेपादानत्वम्· कर्मसंज्ञायाश्च कर्तृपदं स्वतन्त्रोपलक्षणमिति कर्म

णो लकारः सार्थेन त्यज्यते देवदत्त इत्यर्थः। धावत इति। क्रियाविशिष्टस्याप्यश्वस्य प्रकृतधातूपात्तगत्यनावेशाद्धावनस्याविवक्षणाद्वा ध्रुवत्वमिति बोध्यम्। जुगुप्से
त्यादि। जुगुप्सादीनां यद्विषयकत्वेन विवक्षा तदपादानम्। तस्यैव विषयस्य क्रियाजनकत्वरूपकारकत्वेनाविवक्षायां सम्बन्धित्वेन च विवक्षायां पापस्य जुगुप्सत
इति षष्ठी भवत्येव सत्यभिधाने। एवमुत्तरसूत्रेष्वपि बोध्यम्। एषां धातूनां स्वार्थपूर्वकं बोद्धविश्लेषजनकनिवृत्तिलक्षणाया सूत्रेणैव सिद्धेरिदं वार्तिकमुत्तरसूत्राणि च॥
प्रत्याख्येयानि इति भाष्ये स्पष्टम्। भयभीत्राणार्थासलदाह। भयार्थानामिति। हेतुतृतीयापवादोऽयम्। आरण्य इति। भयाद्यर्थानां योगे कारकमपादानमित्यर्थः। विशेषणान्स
र्वसञ्ज्ञाऽपवादोऽयं स्यादिति भावः। पराजेः। असोढोऽस्मानि विषयः एवं च पराजेरकर्मकत्वे उदाहरणान्तरमाह। ग्लायतीत्यर्थ इति। अभिभवतीति। तिरस्कारानुकूलो व्यापा
रो धात्वर्थ इति भावः। प्रवृत्तिविघात इति। भक्षणसंयोगादिजनकव्यापाराभावानुकूलो व्यापार इत्यर्थः। ईप्सित इति। वारणार्थधात्वर्थफलाश्रय इत्यर्थः। उदाहरणे वत
धात्वर्थव्यापारजन्यसंयोगादिरूपफलाश्रयत्वाद्यवानामपादानत्वमीप्सित इत्यनेन प्रधानाप्रधानान्यतरव्यापाराश्रयमात्रस्याक्षेपः। कर्मलक्षणे तु तमब्ग्रहणात्प्रकृ
तधात्वर्थप्रधानभूतव्यापारप्रयोज्यप्रकृतधात्वर्थफलाश्रयस्य ग्रहणमिति भावः। अन्तर्धौ। अन्तर्द्धिरन्यकर्तृकस्वकर्मकदर्शनाभावानुकूलो व्यवहितदेशस्थितिरूपस्तद्घ
टकं यत्कर्तृकदर्शनाभावमिच्छति तदपादानमित्यर्थस्तत्फलितमाह। व्यवधाने सतीति। येनेत्यत्र कर्तृकर्मणोरिति षष्ठी न सौत्रत्वात्। आत्मन इति। प्रत्यासत्तिलभ्यम्।
मातुर्निलीयत इत्यादावाक्षेपलभ्येच्छा बोध्या। चोरानिति। चोरकर्मकदर्शनेच्छाभाव इति शाब्दोऽर्थः। स च चोरकर्तृकस्वदर्शनाभावायेति प्राप्तिः। इच्छामात्रस्याक्षेपलभ्य
त्व इव विशिष्टस्याक्षेपलभ्यत्वेऽपि स्यादिति भावः। प्रकृते नान्तर्द्धिरिति न दोषः। येनेत्यस्याभावे हि स्वकर्मकदर्शनाभावं य इच्छतीत्यर्थे कर्तुरेव स्यादत उक्तं इच्छतिग्रह।
णादिमिति। अन्तर्द्धौ सति यत्कर्तृकदर्शनस्याभावस्तदपादानमित्यर्थोऽस्त्विति भावः। सत्यपीति। अदर्शनेच्छायां तदनुकूलव्यापारकरणे देवदत्तस्य दर्शने सत्य
पीत्यर्थः। अन्यथा यत्र दर्शनाभाव एव तत्रैव स्यादिति भावः। नियमेति। उपयोगशब्दस्य तत्रैव रूढेः। नियमो ब्रह्मचर्यादिः। नटस्येति। नटजन्यं श्रवणमिति बोधात्कार
कत्वान्नियमपूर्वकविद्याग्रहणाभावान्नेत्युत्तरम्। जनिकः प्रकृतिरुपादानकारणम्। ब्रह्म च मायाशबलं जगदुपादानकारणम्। हेतौ हेतुपदमप्युपादानकारणप
रमेवेति बोध्यम्। विभाषेत्येव सिद्धे इदमपादानत्वेन बोधनार्थम्। तत्र हि गुणेऽस्त्रियामिति प्रायिकं बाहुलकमप्रकृते तु न दृष्टेरिति वार्तिकप्रयोगात्। भुवः प्रभवः। प्रभवना।

का· म्प्रथमः प्रकाशः। प्रग्रहणात् तदधिकरणमपादानमित्यर्थः। प्रभवो जलमूलेस्याज्जन्महेतौ पराक्रमे ज्ञानस्य चादिमस्थान इति विश्वः। प्रकाशत इत्यस्य योगे तु न प्रथ-
श·शे· मप्रकाशोर्थं तन्नाभावात्तदाह· तत्र प्रकाशत इत्यर्थः· इति ल्यपलोप इति· ल्यबन्तशब्द्यज्ञाने इत्यर्थः। कर्मणीति प्रत्यासत्त्या ल्यबन्तधात्वर्थस्येति भावः। प्रासादादिति· फले
२३ भ्योयोतीत्यत्रैवबोधप्रक्रिया आजघ्ने विषमविलोचनस्य वक्ष इत्यत्र कर्मणः शेषत्वविवक्षया षष्ठी· वक्ष इत्यस्य प्राप्येति शेषः। गम्यमानापीति विशिष्य तद्वाचकश
ब्दानुपात्तापीत्यर्थः। कस्मात्त्वमित्यादौ फलेभ्यो यातीत्यत्रैव बोधप्रक्रिया· अन्येत्यर्थेति· तदर्थश्च भेदवान्। अत एव घटाद्भिन्न इत्यादि सिद्धिः· परे तु ध्रुवमिति सूत्रेऽ
पायशब्देन भेदस्यापि ग्रहणम्· पञ्चमी विभक्ते इत्यत्र विभागार्थकविभक्तपदेन भेदस्यैव व्याख्यानात् भिदिर्विदारणे इत्यत्र भेदज्ञानविषयत्वमपि विदारणम्
एकत्वेन गृहीतस्य तथा बोधे बुद्धिविदारणस्य तत्रापि सत्त्वात्· अत एव घटाभेद इति सिद्धम्· तद्योगेप्यपादानत्वेति तस्यैव सम्बन्धत्वेन विवक्षायां घटीयो भेद इत्यपि
अन्यशब्दस्याक्रियात्वात्तद्योगे एतद्विधानम्· अत एव घटः पटो नेत्यादौ न पञ्चमी· नञो भेदवदर्थकत्वेपि अक्रियात्वात्· घटादेक इत्यादि तु माध्येव अत एवेतरग्र
हणं चरितार्थम्· अत एव भाष्येऽर्थग्रहणं नोक्तमित्याहुः। आराद्दूरसमीपयोः। एतद्योगे दूरान्तिकार्थेभ्य इति प्राप्तम्· नन्वयं देशवाची न दिक्शब्दोऽतस्तत्राह· दिशि
दृष्टइति· शब्दग्रहणादिति भावः। ते च रूढ्यादिविशेषवाचकाः पूर्वादय एव गृह्यन्ते नैन्द्रीककुबादयो व्याख्यानात्· अवयववाचीति· तद्योगेपि पूर्वादियोगेऽवयवि
वाचकान्नेत्यर्थः। ज्ञापकस्य सजातीयापेक्षत्वात्· अत एवास्मादयम्पूर्वभागः कायस्येति सिद्धम्· अवयवे पूर्वत्वन्त्ववयवान्तरापेक्षया प्रथमकालिकोत्पत्तिकत्वे
न बोध्यम्· अञ्चूत्तरपदस्येति· दिक्शब्दसाहचर्येण तस्य दिग्वाचकस्यैव ग्रहणम्· तेन सध्र्यङित्याद्यर्थेन तन्नेति भावः। बाधितुमिति· परत्वात्प्राप्तामित्यादिः। यदि
तु षष्ठ्यतसर्थेत्यत्र प्रत्ययग्रहणं तेन श्रूयमाणप्रत्यय एव प्रवृत्तिस्तदेदम्नास्त्विति तत्त्वमिति भाष्ये स्पष्टम्· दक्षिणाग्रामादिति· दक्षिणस्यां दिशीत्यर्थे दक्षिण
दाजाहि च दूरे इत्याजाही। षष्ठ्यतसर्थेत्यस्यापवादः। प्रभृतियोगे इति· प्रभृत्यर्थयोगे इत्यर्थः। अपादाने पञ्चमीति सूत्रे यतश्चाध्वकालनिर्माणं तत्र पञ्चमी का राम
र्त्तिकाश्चाग्रहायण्या मासे इति वार्त्तिकप्रत्याख्यानाय इदमत्र प्रयोक्तव्यं सन्न प्रयुज्यते कार्त्तिक्याः प्रभृत्याग्रहायणी मास इति भाष्ये प्रभृतिशब्दाभावेपि तदर्थं। २३
सत्तामात्रेण पञ्चमीत्यर्थकेन प्रभृत्यर्थयोगे पञ्चमीति वचनसत्त्वस्य भगवता बोधितत्वादन्यथा प्रभृतिशब्दाभावे पञ्चम्यर्थवचनावश्यकत्वेन तत्प्रत्याख्यानं।

नासङ्गतिरितिभावः। एवञ्च तदर्थकारभ्यशब्दयोगेऽपि पञ्चमी यथा अवीचिमारभ्य मेरुपृष्ठपर्यन्तम्भूलोकः मेरुपृष्ठादारभ्य ध्रुवपर्यन्तङ्ग्रहनक्षत्रलोका
चित्रितोऽन्तरिक्षलोक इति पातञ्जलभाष्यप्रयोगे। प्रभृतीत्यस्य चावधिमादायेत्यर्थः। आरभ्येत्यस्यैतदर्थकतापि। अवधौ च पञ्चम्यन्तार्थस्याभेदेनान्वय इति वि-
शेषणत्वेऽपि न द्वितीया। प्रभृत्यर्थयोगे पञ्चमीति भाष्यकृदुद्घोषितवचनात्। आरभ्येत्यस्य गृहीत्वेत्यर्थेनावीचिमारभ्येत्यादौ द्वितीया। वस्तुतोऽवधित्वेनान्वयस्य सम-
भिव्याहृतपदार्थनिरूपितङ्गम्यमानक्रियापेक्षमित्यपादानत्वादेवात्र पञ्चमी सिद्धा। कार्त्तिकीतो विभक्तेः। अत एव कार्त्तिक्यवधिके आग्रहायणीघटिते मा-
से कार्त्तिकीमादाय गते आग्रहायणीति बोधः। भवात्प्रभृति आरभ्य वेत्यत्र भवकालाद्विभक्तेः। अत एव भवावधिके मरणान्ते काले भवकालमादाय हरिः से-
व्य इति बोधः। एवमन्यत्राप्यूह्यमित्यलं विस्तरेण। ज्ञापकादिति। पञ्चम्यन्तेन समासविधानाज्ज्ञापकादित्यर्थः। अयम्भावः परस्परसाहचर्यात्तत्रापप-
री वर्जनार्थौ कर्मप्रवचनीयावेव तद्योगे पञ्चम्यपाङ्परिभिरिति वचनाल्लक्षणप्रतिपदोक्तपरिभाषयापपरिनिमित्तकसुबन्तस्यैव ग्रहणाच्च पञ्च-
म्यैव सिद्धः समासस्तत्साहचर्यादुक्तपरिभाषया चाञ्चूत्तरपदेनापि तन्निमित्तपञ्चम्यैव सिद्धः समास इति व्यर्थं न बहिःशब्देन पञ्चम्यन्तेन समासविधानद्वारा त-
द्योगे पञ्चम्या अपि ज्ञापनार्थमिति। इदमपपरिबहिरिति सूत्रे भाष्ये स्पष्टम्। पञ्चमीति। सापीत्यर्थः। तेन करस्य करभो वहिरिति सिद्धम्। प्रतिनिधिप्र। यस्मा-
दिति पञ्चम्यर्थः सम्बन्धः। अस्मादेव निपातनात्षष्ठ्यर्थे पञ्चमी। प्रतिनिधिप्रतिदानशब्दौ कर्मणि भावे ल्युडन्तौ। प्रतिनिधिप्रतिदाने यत्सम्बन्धिनी ततः कर्म-
प्रवचनीययुक्तात्पञ्चमीत्यर्थः। प्रतिनिधिः सदृशः प्रतिदानन्दत्ततुल्यमूल्यस्य वस्तुनः प्रत्यर्पणम्। कर्तृवर्जितमिति। कर्तृसंज्ञारहितमित्यर्थः। ऋणत्वञ्च
स्तुस्वनिमित्तन्तु तृतीयावाच्यकोटिनिविष्टम्। हेतुभूतमिति। तेन करणत्वविवक्षायान्तृतीयेवेति भावः। विभाषा गुणे। योगविभागादिति। बाहुलकम्प्रक-
र्षेस्तु नुदृष्टेरित्युक्तवार्त्तिकप्रयोगाद्गुणेऽस्त्रियामिति प्रायिकमित्यन्ये। धूमादिति। धूमपदस्य ज्ञानेऽग्निमत्पदस्य ज्ञानविषये लाक्षणिकम्बोध्यम्। समुच्च-
यार्थमिति। स्पष्टञ्चेदम्भाष्ये एतेनान्यतरस्यामङ्गीकार इत्यर्थकम्पदद्वयमेतदित्यपास्तम्। विकल्पविषयेऽप्यर्थासङ्गतेश्च। परे तु द्वितीयासमुच्चयेन
फलं विना वा तं विना वर्षमित्यादावृतेशब्दयोग इव ततोऽन्यत्रापि दृश्यत इत्यनेन द्वितीया सिद्धेः। अत एव भाष्ये द्वितीयासमुच्चयो नोक्तः। पञ्चम्या अ-

का॰
ग्र॰शे॰
१४

धिकारे द्वितीयाषष्ठ्यौ विषये प्रतिषेधो वक्तव्यः। दक्षिणेन ग्रामन्दक्षिणातो ग्रामस्येति प्रकृतसूत्रस्थभाष्येणास्मिन् पाते द्वितीयेति सूत्रे षष्ठ्यसमर्थेत्यतः आ
मिति च सूत्रितम्। अन्यथा सौत्रक्रमत्यागेन्याय्यविपरीतपूर्वनिपातकरणे च बीजानापत्तिः अत एव करणे चेति सूत्रे द्वितीयासमुच्चयेनेत्याहुः करणे च स्तो॰ करणे वृती
यायाः सिद्धत्वेन पक्षे पञ्चम्यर्थमिदम्॰ चकारस्तृतीयान्यतरस्यामित्यनुकर्षणार्थः। षष्ठी तु गापोष्टगिति वत्॰ अद्रव्येति॰ द्रव्यभिन्नवचनेभ्य इत्यर्थः। द्रव्यपदेनात्र स
त्वेनामपरामर्शयोग्यं लिङ्गनिरूपितविशेष्यत्वात् स्तोकशब्दे यद्दर्मावेशाद्द्रव्ये स्तोकव्यवहारस्तद्धर्मपरः स च धर्मोऽल्पत्वादिः शब्दप्रवृत्तिनिमित्तमेव। शुक्लादिवच्चैतो।
धर्मवचनेष्वपि। करणत्वं च परम्परया ईदृशार्थे एवं च साधुत्वं सूत्रबलादिति स्पष्टमलुगुत्तरपदे इत्यत्र कैयटे॰ करणे किम्॰ स्तोकम्पचति। असत्त्वभूतफलसमा
नाधिकरणत्वादत्र स्तोकशब्दस्यासत्त्ववचनत्वमिति दिक्॰ दूरान्ति॰ अत्र दूरान्तिकार्थैः षष्ठ्यन्यतरस्यामित्यतस्समुच्चयार्थकान्यतरस्याङ्ग्रहणानुवृत्त्यैवार्थो धिकारा
त्पञ्चम्याः सिद्धौ चकारो व्यवहिततृतीयासमुच्चयार्थे व्याख्यानादित्याहुः॰ चादित्यादि॰ प्रातिपदिकार्थमात्र इति॰ व्याख्यानादिति भावः॥ इति पञ्चमी॰॥ षष्ठी शेषे॰
शेष उक्तादन्यः। स च तत्तद्रूपेण स्वत्वादिः सम्बन्धत्वेन रूपेण च॰ कारकविभक्तीनाङ्क्रियाजनकत्वसमानाधिकरणकर्तृत्वादिशक्तिरूपेण बोधकत्वं न त्रापितम्मू
लके सम्बन्धे विवक्षितेन षष्ठीत्याह॰ कारकेति॰ स्वस्वामिभावादिरिति॰ स्वत्वस्वामित्वसमूहः सम्बन्ध इत्यन्यत्र विस्तरः। एवं सर्वत्र बोध्यम्॰ षष्ठ्यर्थस्य संसर्गविध
येव भानम्॰ कारकविभक्तिभ्योपि क्रियाकारकभावस्य संसर्गविधया भानमित्युक्तम्॰ सम्बन्धमात्रविवक्षायामिति॰ सम्बन्धत्वेन भान इत्यर्थः॰ यद्वा क्रियाकार
कभावमूलकसम्बन्धस्यैव विवक्षायान्तु तद्विवक्षायामित्यर्थः॥ कर्तुरपि तथा विवक्षा क्तस्य च वर्तमाने इति सूत्रे छात्रस्य हसितमित्यादौ भाष्ये स्पष्टा॰ संयोग
सम्बन्धावच्छिन्नाधारस्य तत्तया विवक्षा च तत एव घटवद्भूतलमिति प्रयोगसाधकमतुप्सूत्रे अस्मिन्निति च पितार्थमिति तत्रैव भाष्ये स्पष्टम्॰ लोहितो लीषाइत्या एम
स्ववपि समस्यर्थे बहुव्रीहिर्बोध्यः। एधोदकस्येति॰ एधः कर्तृकर्त्ता वा॰ दकस्योदकस्येत्यर्थः एधशब्दोऽदन्तः पुंल्लिङ्गः कारक इति सूत्रे भाष्ये प्रयुक्तः। एधाः पश्या वे
नीति। सान्तः क्लीवोपि। हेतौ षोत्य इति॰ हेतावितिवर्त्तते। हेतुहेतुमद्भावेनेतरान्वये इत्यर्थः। तेनान्नं हेतुम्पश्यत्यादौ न॰ षष्ठीति॰ हेतुपापकादि ... प्रथमि
नेत्यादि॰ निमित्तादिप्रयोगे तेभ्यस्तत्समानाधिकरणशब्देभ्यश्चेत्यर्थः। किन्निमित्तमिति प्रथमान्तन्द्वितीयान्तञ्च। प्रायग्रहणादिति॰ एवञ्च षष्ठी हेतुप्रयोगे।

लभ्यतेइति २
सर्वेनामस्थानीयानेतिसूत्रेव्यर्थेइतिबोध्यम्·षष्ठ्यत सर्थेदिक्शब्दत्वात्पञ्चम्याम्प्राप्तायामिदम्।ततःपश्चादित्यत्रतुसार्वविभक्तिकःषष्ठ्यन्तात्तसिः।षष्ठ्यतिस्य
पृथ्वीदस्मृतौ·भाष्येतुनदृश्यते।विपरीतंषष्ठ्यतसर्थेतिसूत्रात्पूर्वमेनपेत्यस्यपाठइतिपृथग्विनेतिसूत्रेउक्तम्।दूरान्तिकार्थैः।यदपेक्षन्दूरत्वादिकन्ततःपञ्चमीत्यर्थः
पञ्चमीचेति·तस्माएवसमुच्चयोनतुद्वितीयातृतीययोरपीतिभावः।ज्ञोवि·अत्रसूत्रेऽविदर्थस्येतिच्छेदोव्याख्यानात्·सर्पिषोज्ञानमिति·जानातेःप्रवृत्तिरर्थः।
सर्पिःसम्बन्धिनीप्रवृत्तिरित्यर्थः।अधीग·अधीगर्थःस्मृतिः।कर्मणिकिम्·मातुर्गुणस्मरणम्·करणेशेषत्वेनषष्ठ्यभावेसमासोभवत्येव।अतएवात्रसूत्रेभाष्ये
शेषइतिवर्ततइत्युक्तम्·प्रतिपदविधानाषष्ठीनसमस्यतइत्येतैःषष्ठीसमासनिषेधात्।एधोदकस्येति·एधइतिपृथक्पदम्दकशब्दउदकवाची।रुजार्थाना
म्·रोगार्थानान्धातूनामित्यर्थोव्याख्यानात्·धातोर्भाववचनत्वाव्यभिचारेणसामर्थ्याद्वचनइतिकर्त्तरिल्युट्।भावशब्देनसिद्धरूपोऽर्थउच्यतेल्युट्प्रकृत्यर्थः।विव
क्षितस्तदाह·भावकर्तृकाणामिति·रोगकर्तृकमितिच।रोगोऽत्रक्षयादिः।भावकर्तृकाणांकिम्।श्लेष्मणश्चौरस्यजा श्लेष्मात्रनभावः।सर्पिषोनाथनमिति।सर्पिर्मभू
यादित्याशासनमित्यर्थः।जासिनि·जसुमोक्षणइतिदैवादिकस्यनग्रहणञ्जासीतिनिर्देशाद्धिंसायामित्युक्तेश्च·निप्रोपसृष्टोहनोनिप्रहणःशब्दपरत्वेपि सौत्रत्वाद्वने
तिणत्वम्·चुरादिरिति·घटादेस्तुनग्रहणन्दीर्घनिर्देशात्·क्राथनमिति·घटादेःक्रथेःक्राथेतिनिपातनाद्वृद्धिरितिवृत्तिः।परेतुएतत्सूत्रप्रामाण्याद्घटसाहचर्याच्चा
यमपिचुरादिर्बोध्यस्तस्याकृतिगणत्वात्·निपातनस्यशेषषष्ठीसन्नियोगशिष्टत्वे कर्मत्वेनविवक्षायाञ्चोरस्यक्राथनमित्यस्यानापत्तिः।सामान्येननिपातनेविस
मुत्विषयेक्रथक्रथमित्यादेःक्राथयतीत्यादेश्चानापत्तिरित्याहुः·समर्थयोरिति·समपर्यायसंशब्देनसमासःशकन्ध्वादित्वात्पररूपम्वा·ब्राह्मणपणवमिति·आ
प्प्रत्ययोवैकल्पिकत्वान्नकृतः।उदाहरणेशुनावेवेतिनियमादपिन·दिवस्त·कर्मणिषष्ठीस्यादिति·शेषइतित्वत्रनसम्बध्यते।व्याख्यानात्·अतएवद्वितीयाग्राह्य।
णइतिसूत्रेड्डामस्यतदहःसभायान्दीव्येयुरित्यत्रनित्यंषष्ठीप्राप्तौद्वितीयार्थमितिभाष्येउक्तम्·तद्धनयनतिउ·न्नमुदाहरति·शतस्यदीव्यतीति·यद्यपिपूर्वसूत्रेदि
वस्यर्थित्वात्तदर्थस्येतित्यक्तुंशक्यतेतथापियोगविभागउत्तरार्थः·शेषइत्यस्यासम्बन्धार्थश्च·विभाषोप·अत्रापिशेषइतिनसम्बध्यते·तदर्थस्येतिचवर्त्ततेनतदा
ह·पूर्वयोगेति·अतएवोपसर्गान्नविभाषेतिनवेतिसूत्रेभाष्येस्पष्टम्·कृत्वोर्थशेषेकिमिति·दिवस्तदर्थस्येत्यादिनाविच्छेदादधिकरणकारकेएवषष्ठीविधानंयुक्त

का॰ मितिप्रश्नः द्विर्हनीति हन्त्यादिप्रामाण्यान्मण्डूकप्लुत्यानुवृत्तिः स्वीकार्येत्युत्तरम् अधीगर्थेति सूत्रे कर्मादीनामविवक्षा शेष इति भाष्ये बहुवचनेनात्रापि शेषप
प्र॰शे॰ दसम्बन्धबोधनाच्च वस्तुतस्तु कर्माश्रयषष्ठीविषये सुप्सोपात्तसकर्मकाणामकर्मकवद्वचनमिति वार्त्तिकप्रत्याख्याना यशेष इति वर्त्तत इति भाष्यकृतोक्तेऽपरेण
२५ शेषग्रहणेऽकृते इति पृष्टे शेषे षष्ठीति सूत्रोक्तकर्मादीनामविवक्षा शेष इति सिद्धान्तिना स्मारितम् नैतावता कृतार्थ इत्यत्र सम्बन्धो लभ्यते किन्त्वेतद्भाष्यबलाद्विरत्र इति सू
त्रेऽपि शेषपदसम्बन्ध आवश्यकः । अन्यथा वार्त्तिकरीत्या शतस्य दीव्यत इति भावे इष्टस्य प्रयोगस्यासिद्धिः । अतएव वार्त्तिकव्याख्यायामधीगर्थादयः प्रेष्यब्रूपर्यन्ताः कर्मा
श्रयपदेनोच्यन्ते इति कैयटः । एवञ्च शेष इत्यनुवृत्त्या वार्त्तिकप्रत्याख्यानं वदेत् सूत्रद्वयप्रत्याख्याने एवं भाष्यतात्पर्यम् द्वितीया ब्राह्मण इति सूत्रस्थभाष्यन्तु वार्त्तिक
रीत्याह किञ्च यदा कर्म विवक्षितम्भवति तदा षष्ठी न भवति स्मरामस्त्वम्मातरमिति भाष्ये उक्तम् तद्रीत्या यदा कर्मादि विवक्षितम्भवतीति वदेत् एवञ्च शेषो विरर्थः स्यात्यत्रा
पि तदसम्बन्ध एव एवञ्च तद्योगे न कदापि तृतीयाशतं दीव्यतीत्यादि च सिध्यति । अधीगर्थेत्यादौ च मण्डूकानुवृत्तिरिति सुधियो विभावयन्तु कर्तृकर्मणोः कृतिशेषइ
ति न सम्बध्यते सूत्रे वैयर्थ्यापत्तेः कृद्योगा षष्ठी समस्यत इति वार्त्तिकेन तत्र समासस्येष्टत्वात् कृतिरिति भावे क्तिन । कृष्णस्य कर्त्ता जगत इति कर्मेदम् कर्तृसाहचर्यात् कर्मो
पि धात्वर्थभेदेनान्वय्येव गृह्यते । तेन सतो कम्पाक इत्यादौ न क्रियाविशेषणात् षष्ठी किञ्च क्रियाविशेषणेन सतो कम्पाचक इत्यादौ न समानाधिकरणे समासो नापि सुप्सु
पेत्यादिः । सुबन्तार्थस्य विशेष्येणानन्वयेनासामर्थ्यात् द्वितीयाश्रितेत्यादेस्तु सामर्थ्यादव्यवहारक सामर्थ्ये प्रवृत्तिः । द्वितीयाप्रकरणोक्तपरे तु मतरीत्या वासामर्थ्येम
अतएव पूजनात्पूजितमिति सूत्रे उदाहरणं यथा भवति तथाध्यापक इत्यर्थकस्य दारुणाध्यापक इत्यस्य सिद्ध्यर्थम्मलोपवचनमारब्धम्भाष्ये अन्यथा समासेन सि
द्धे तद्व्यर्थं स्यात् एतदेव भाष्यन्ततः षष्ठ्यभावेपि मानम् अन्यथा षष्ठीसमासस्य तृजकाभ्याङ्कर्तरीत्यादिनिषेधे उक्तसामर्थ्येपि प्रवृत्त्या तत्समासेनैव सिद्धौ मलोपवचनं
व्यर्थमेव स्यादिति बोध्यम् नच भिन्नपदत्वेपि तथा प्रयोगसाधुत्वार्थम्मलोपवचनमिति वाच्यम् तथा सति वाक्ये मलोपश्च वक्तव्य इति वदेत् अतएव कैयटेन क्रिया एम
विशेषणत्वात् उदाहरणादयस्तत्रैवैयधिकरण्यात्समासाभावाच्च लोपो विधीयत इत्युक्तम् सुप्सुपेत्यादिसमासो न सार्वत्रिक इति तदाशय इत्यलम् कृतिकिम् इति कर्त्तृ २५
कर्मभ्याङ्क्रियासन्निधाप्यते तद्वाचीच धातुरेव कारकान्वययोग्यतावच्छेदकरूपेण साध्यत्वेन धातुभिरेव तदुपस्थितेः । शत्योम्प्रत्याभिक इत्यादौ तद्धितान्तेन

रूपेणोपस्थितिरितिनन्तत्र कोऽप्यन्वय एतद्भाष्यप्रामाण्यात्· अतएव हि रुगादियोगेन कर्मादिसञ्ज्ञाः एतेन देवदत्तेन शत्यो ऽम्ब इत्यादौ षष्ठीनिरस्तेत्यर्थः ...णामि
त्पपाल्लम्· अधिकारवारीद्व्रणेनेत्यत्र हेतौ तृतीया क्रियायोगाभावात् कर्तुः कर्तृत्वाभावे जनकत्वरूपहेतुत्वसत्वात् धातोः स्वदये प्रत्यया लिङः सन्तश्च नत्रान्तियोगेन लो
केति विषये भाक्ष्यत्रयोग एव भविष्यतीति किन्तेन न लोकेति सूत्रे कृद्व्ययस्यैव ग्रहणान्तु अव्ययार्थस्य येकर्तृकर्मणी इति व्याख्यानेन सिद्धम्। ३ भयप्राप्तावित्यत्र वृत्ता
व्रीहि सुस्काबोदेहइत्यादाविवान्यपदार्थस्याशाब्दत्वेपि व्याख्यानाद्भविष्यति· नच भेदिका देवदत्तस्य यज्ञदत्तस्य काष्ठानामित्यादौ गुणभूते णिच् प्रकृत्यर्थ कर्तरि षष्ठी
र्थ ह्रुरोतीति कृदितिकर्तृपरत्नरितिवाच्यम्· तृतीयावत्तत्र षष्ठ्या अपि विनैव यत्नं सिद्धेरिति प्रश्नः। तद्धितेइति· तद्धितान्तशक्तिग्रह मात्रप्रयोज्योपस्थिति विषय क्रिया
याः कर्तरि कर्मणि च मा भूदित्यर्थः उदाहरणे सकर्मकप्रकृतिक भावक्तान्तस्येदृशहन्ति मात्रविषयताया भाष्यसम्मतत्वेन तस्य केवलस्य क्वाप्यप्रयोगेण तद्धि
तान्तसमुदायशक्तेर्वक्रियोपस्थापकत्वात्। कृद्ग्रहणात्कृदन्तशक्तिग्रह प्रयोज्योपस्थिति विषयक्रियाकर्तृकर्मणोर्ग्रहणान्न चात्र तथा। तद्धितुला नाम्याचकृत
इत्यादौ पाचकादेः पृथक्प्रयोगेण तच्छक्तिग्रहस्यापि सत्वेन कृदन्तशक्तिग्रह प्रयोज्योपस्थितिविषयत्वक्रियापाश्रस्त्येवेति भवत्येव षष्ठी· अतएव तद्धितेमा
भूदित्येवोक्तन्न तद्धिताधिकोइति। भाष्येपि तद्धितस्य येकर्तृकर्मणी तत्र मा भूत् कृतो येकर्तृकर्मणीत त्रैव यथा स्यादित्येवोक्तम्· क्तनपूर्वीति· अत्र कर्मविशेष
स्य तत्तद्रूपेण प्रागन्वयाविवक्षया ऽकर्मकत्वाद्भावे क्ते पूर्वादिनिरितिनद्धितस्तदन्तन्तु विशेषरूपेण कर्मयोगो भवत्येवातत्रो क्तरीत्या षष्ठ्यभावे ऽनभिहित
त्वाद्वितीयाप्रप्वरीत्यासाधुत्वे ऽत्र भाष्यमेवमानम्· वृत्तेः पूर्वङ्कर्मान्वयाभावाच्च सापेक्षत्वाद्वृत्तिर्नस्यादितिनशङ्क्यम्· एवमधीतीव्याकरणेइत्यादावपिबोध्यम्·
तदुक्तम्भाष्ये यदा वाक्यन्नतदाप्रत्ययः। यदाप्रत्ययः सामान्येनतदावृत्तिरिति। नतदाप्रत्ययः। नतदाभावेप्रत्ययः। धातोः सकर्मकत्वात्। यदाप्रत्ययः। सोवेइतिशे
षः। तदावृत्तिरेव। साच वृत्तिर्नैकदापि कर्मकाङ्क्षेनेत्याह· सामान्येनेति· कर्मविशेषस्य तत्तद्रूपेण प्रागन्वयाविवक्षाविशिष्टोयो ऽर्थस्तदर्थक धातुप्रकृतिकक्ता।
नेनेत्यर्थः। इयमेवकर्मणो विवक्षानामानेनतादृशक्तान्तस्य वाक्येन प्रयोग इति स्पष्टमेवोक्तम्। प्रयोगानुरोधिनी हि विवक्षेति नद्भावः। नचाविवक्षितकर्म
तयाभावेक्तसार्थेनयत्नो व्यर्थः। नपुंसके भाव इत्यनेन सकर्मकेभ्योपि सिद्धेरिति वाच्यम्· तस्याप्यकर्मकेभ्य एवेष्टेः। अत्र चेदमेव भाष्यम्मानम्· ददेर्दुःस्व।

का· स्यमाहृत्यम्येऽधीयेरासोदमुत्तमम्· लिम्पेरिवंतनोर्वातिश्चेतयः साञ्च लोनकइतिभट्टिपद्यम्· मादयम्योद्दुः स्वन्ददिङ्गिरुत्तममामोदमुष्यादीनाङ्गृहीत्वामाहृश्या
श्रा· शे· न्दनस्यदुःखस्यपक्षे कर्मादृशं शरीरं लिम्पद्भिरिववानैः कौमारकविरहाग्निव्याप्तश्चेतयन् ज्वलः। ज्वलन्निव नस्यादिति तदर्थः। दाधातोः पोषणार्थाद्दानम्रद्दानि
२६ दृधात्वोश्शृणोलिम्पश्च शा ज्वलैर्णाइति जयमङ्गलाश्लोकव्याख्याप्येतज्ज्ञातीयैव तत्रेति दिक्· तत्र धायैरामोदमुत्तममित्यत्र गृहीत्वेत्याहृत्यत योगेहितीयावा।
ध्याःउभयोः प्राप्तिर्यस्मिन्निति· तेनैकनिमित्तत्वलाभादोदनस्यपाको ब्राह्मणानाञ्च प्रादुर्भावइत्यादौ विभिन्नक्रियाकर्तृकर्मणोः षष्ठीप्राप्तौ नायन्नियम इति भावः
प्राप्तिपक्षे तु चोभयोः प्रयोगएवायन्निषेध इति ध्वनितम्· स्त्रीप्रत्यययोरिति· स्त्रियाङ्क्तिन्नित्यधिकारविहितयोरित्यर्थः। नायन्नियम इति· तेनोभयत्रापिषष्ठीभ
वत्येवेति भावः। भेदिकेति· धात्वर्थनिर्देशे ण्वुल्· सन्ननाङ्गिदेरप्रत्ययादित्यप्रत्ययः। शेषइति· नियमस्यायं विकल्पः इत्येके इत्येतल्लभ्यमर्थं स्पष्टप्रतिपत्तये आ
ह· केचिदिति· अकाकारभिन्नेष्वन्यत्रेत्यर्थः। अनुशासनमिति· अनुशिष्यन्तेऽसाधुभ्यो विविच्य बोध्यन्ते येनेति करणे ल्युट्· मतइत्यादौ मतिबुद्धीत्यादिवर्तमाने क्त
।इदमेषामिति· कर्त्तरिषष्ठी। सकर्मकेभ्यस्त्वधिकरणे क्तेकर्तृकर्मणोर्द्वयोरपिषष्ठी। इदमेषाम्भुक्तमोदनस्य। उभयप्राप्ताविति तु मध्येऽपवादन्यायेनकर्तृकर्म
णोरित्यस्यैव नियम इति बोध्यम्· नलोकाः लादेश इति· लकारसम्बन्धिन इत्यर्थस्तेन दरिद्रिग्गं इति सिद्धम्· केवललस्य क्वापि प्रयोगाभावादेवं व्याख्यातम्· कुर्वन्निति।
तृन्प्रत्याहारघटकस्तु नायम्· तृशब्दस्य तद्घटकत्वेपि शतुस्तद्घटकत्वाभावात्· लिडादेशक्वसादियोगे लिट्सदृशकिकिनोर्योगे च निषेधार्थन्तस्यावश्यकत्वा
च्च· उइति· उकारेणाव्याख्यानात्तदन्तविधिर्व्यपदेशिवद्भावेनोकारस्यापि सनाशंसेति। अलङ्कृञिति च उइस्तुचै। घातुकइति· लषपतपदेत्युकञ् इति स्तत्वम्·
कमेरिति· अव्ययान्तस्येति शेषः। इदञ्च भाषायामेव। भाषायामिति भाष्योक्तेः। निष्ठेति· एतदपवादत्तया भाष्ये वार्त्तिकम्पठ्यते नपुंसके भावे क्तस्य योगे षष्ठ्याः उपसं
ङ्ख्यानम्। छात्रस्य हसितमिति। इदञ्च प्रतिपदोक्तत्वान्नपुंसके भावे क्त इति सूत्रविहितक्तान्तयोगएव भावान्तन्देशमित्यादौ गत्यर्थाकर्मके इत्यनेन क्तेनानेन षष्ठी राम
नपुंसके भावे क्तस्तु नात्र तस्याप्यकर्मकेभ्य एवेष्टेः। अविवक्षितकर्मतयाऽकर्मकत्वेन क्तस्तु कृतपूर्वीत्यादिवृत्तिविषय एवेत्युक्तम्· एवञ्चेहाहेः सुप्तमित्या २६
दौपरत्वेन क्तोऽधिकरणे चेत्यनेन भावे क्ते शेषत्वविवक्षायैव षष्ठीसाधनस्यावश्यकत्वेनेदं शेषत्वविवक्षया भाष्यप्रत्याख्यातम्· वार्तिकेन चानेन कारकेषष्ठी

निषेधविषये शेषत्वविवक्षा चेति ज्ञाप्यते शेषत्वविवक्षया भाष्योक्तत्वात्तत्त्याख्याने तु। अनभिधानात्तदतिरिक्तविषये न सा। पूरणगुणेति सूत्रे भाष्ये उक्ता
नितमिदम्· तत्र हि सति किमुदाहरणम् ब्राह्मणस्य कुर्वन् नैतदस्ति कारकषष्ठ्या निषेधात् शेषषष्ठ्या तु ब्राह्मणस्य कटमित्यर्थेनासामर्थ्यादित्याद्य
र्थकमुक्तमिति परे· अधीयन्निति· इङ्धात्वोः शत्रकृच्छ्रिणीति शता। द्विषन्निति· द्विषोऽमित्र इति शता· शेषषष्ठीत्विति· इदञ्चिन्त्यमित्युक्तम्परैः· अ
केनोः· अत्र यथासङ्ख्यन्नेष्यते अकस्याधमर्ण्येऽसम्भवादाह भविष्यत्यकस्येति· वर्षशतस्य पूरक इत्यादौ एतत्कर्मकयाजनकर्तार इत्यर्थके।
अङ्ग्युजतां लप्स्यन्ते स्वयाजका इत्यादौ च षष्ठी भवत्येव कर्तृमात्रार्थके ण्वुल्तृचाविति ण्वुलिपदानन्तरसम्बन्धेन भविष्यत्प्रतीतावप्यकस्यतत्रापि [illegible]ः तुमुन्ण्वु
लाविति ण्वुल्तु भविष्यतीत्यधिकृत्य विधानाद्भविष्यदर्थकत्वावेति भावः अजङ्गमीति· गमेरिनिरित्यौणादिक इतिः स च भविष्यति भविष्यति गम्यादय इत्यु
क्तेः गामी निपाठे वाहुलकाद्वृद्धिः शतन्दायीति· आवश्यकाधमर्ण्ययोरिति णिनिः आवश्यके णिनावप्यय विशेषः सूत्रे आधमर्ण्यपदेन तन्त्रेणोक्तार्थोपल
क्षणात्· अत एवावश्यहारीति निर्देशः सङ्गच्छते तत्रावश्यके णिनिः न चात्र भविष्यदर्थकत्वेन सिद्धिभूतवर्तमानयोरावश्यकत्वबोधनस्यैवैकल्येन भवि
ष्यत एव न ततो बोधादिति वाच्यम्· वस्तुतो भविष्यतो बोधेऽपि तत्त्वेनाबोधात् णिनेस्तदर्थकत्वाभावाच्च· अत एवावश्यङ्कारी कटस्येति दृत्युदाहृतं सङ्गच्छते।
तत्राहेनानेन णिनिः अवश्यपदोपादानात्· किन्तु सुप्यजाताविति नव्याः कृत्यानाङ्कर्तृकर्मणोरिति नित्याप्राप्ते विभाषाकर्मनिदम्यर्थमुक्तम्ग्रहणम्· अनु
वर्तत इति· निषेधोऽयमुक्तेरिकर्मणि च कर्तरि चेति त्वनुभयप्राप्तिविषयमिति वृत्तिकैयटादयः अजमिति त्रगुणा कर्मणि वेष्यत इति विकल्पस्तु [illegible] कृत्यानिरिक्त
चरितार्थस्तस्य दोग्ध्या गां वः पयः कृष्णेनेत्यादौ गुणकर्मण उक्तत्वात् प्रधाने चरितार्थेनानेन परत्वाद्बाधात्·
तुल्यार्थैरयोग इति· तुल्यत्वार्थैरित्यर्थः अत एवातुलोपमाभ्यामिति चरितार्थम्· अत एव पर्युदासादनव्ययोम
ावेदम्· तेन [illegible] योगेन· चतुर्थी चाशिषि· आशीर्विषयक्रियान्वय्यर्थकात्प्रातिपदिकात्तद्धुरके आयुष्यादियोगे चतुर्थी षष्ठ्यावित्यर्थः अत एवैतदर्थकचतु
र्थ्यायुष्येन सुखहितादिभिर्न समासः उभयोरपि क्रियान्वयेन परस्परमसामर्थ्यात् अत एव हितेन चतुर्थीसमासविधानं तद्योगे चतुर्थीज्ञापकमित्याकरे

का॰ कासद्भ्ज्वते अनुवृत्तावुद्देश्यविधेयभावेनानन्वयादाशीर्विषये च तयान्वयान्न समास इति तन्न· वृत्तावपि प्राप्तत्वादिपर्यालोचनेन लोहितोष्णीषेत्यादौ तथान्वय
श॰ शे॰ दर्शनात् अस्थितथाप्यन्वयेवृत्तेरसाधुतायाअनुक्तेश्चेति समासवादे मञ्जूषायाम्विस्तरः व्याख्यानादिति· सूत्रे ऽर्थशब्दः पृथक्क्रिमि त्तमितिभावः भाष्ये तु नैमदृश्य
५. २१ ति ॥ ॥ इतिषष्ठी· ॥ ॥ आधारो·कारक इत्यधिकारात्क्रियाजनक एतत्प्रवृत्त्योपस्थितत्वादाधार क्रियाया एवतत्रेप्सिततमस्वतन्त्रपदाभ्यां साक्षात्क्रि
याधारयोः कर्मकर्तृसञ्ज्ञाभ्यां वा आत्परम्परयातदाश्रयस्यग्रहणम् परम्पराचकर्तृकर्मद्वारकैवव्याख्यानादित्याह·कर्तृकर्मद्वारेति· यद्यपिकालस्य साक्षात्क्रि
यापरिच्छेदकत्वन्तथापिकर्तृकर्मद्वारेवतथैवानुभवात्साक्षात्तदाधारत्वेपि आधारपदेस्वरितत्वप्रतिज्ञानात्परम्पराधारस्यग्रहणम्· किञ्चसाक्षात्तदाधारत्वे
कर्तृत्वमेवतस्यस्यात्कालः पचतिभूतानीतिवत् एवञ्चक्रियान्वयोऽप्यस्यकर्त्राद्यन्वयद्वारैवयस्ययद्द्वाराकारकत्वन्तस्यतद्द्वारैवक्रियान्वय इतिव्युत्पत्तेः अतएवा।
क्षशौण्ड इत्यादौसमासः। अत्राऽऽसनादिक्रियानर्भावेणावोधाननुभवात्क्रियाद्वारासामर्थ्यमितिकेयमयुक्तत्वयुक्तम्· मूलेवृक्षः कपिसंयोगीत्यादावपस्तिक्रियाम
व्याहत्यतस्याः स्वकर्तृकपिसंयोगिवृक्षद्वारामूलवृत्तित्वादाधारत्वम् विशिष्टवृक्षमूलवृत्तित्वबोधनेऽन्यत्रावयवेतद्विशिष्टवृक्षाभावप्रतीतिः कपिसंयोगेतद्व्यव
च्छेदकत्वम्फलतीतिदिक्· चकारादिति· प्रातिपदिकार्थइतिशेषः त्रिधेति· तत्रसकलावयवव्याप्तौव्यापकाधारत्वम्· यथातिलेषुतैलमिदमेवमुख्यमधिकरणमि
तिस्वरितेनेत्यत्रसाधकतममित्यत्रचभाष्येस्पष्टम्· उपसमीपेश्लेषः सम्बन्धस्तत्कृतमौपश्लेषिकम्· अतएवेकोयणचीत्यादावौपश्लेषिकेआधारेसप्तम्युक्तासं
हितायामितिसूत्रेभाष्ये· तत्राजादिसामीप्यमेवेगादीनांयन्मासेतिका नेदीयनेतस्य समास औपश्लेषिकमधिकरणमित्युक्तम्· तत्रत्वदीयतइतिसूत्रेभाष्येतद
स्मिन्नधिकमितिसूत्रेभाष्येस्पष्टमिदम्· कटेआस्ते इतितुनौपश्लेषिकोदाहरणंयुक्तमुक्तभाष्यविरोधात्· यद्वैकदेशावच्छेदेनश्लेषेपिश्लेषस्यसमीपमुपश्लेषन्त
त्कृतमितिव्युत्पत्त्यौपश्लेषिकत्वमित्यभिप्रायेणतदुदाहरणन्नत· एतत्सर्वेङ्गोणमधिकरणङ्गङ्गायाङ्गावइत्यादिकञ्चेतिस्वरितेनेत्यादौभाष्येस्पष्टम्· गौणोप्याधा राम
रादिःसप्तम्यादिशब्दएवेतिबोध्यम्· एतदतिरिक्तंसर्ववैषयिकम्· अधिकरणत्वशक्तिमांश्चाधिकरणविभक्त्यर्थः इन्विषयस्येति· इनोविषयस्येत्यस्मात्तेः कोजस्य २९
कर्मणीत्यर्थः तेनकृतपूर्वीकटमित्यत्रन। उदाहरणेनकर्मणिक्तः। अमितत्वेनसप्तम्यतापत्तेः किन्तुभावे· इष्टादिभ्यश्चेति· तत्रहिग्राह्यमनेनेत्यतोऽनेनेतिवर्तते।

अत्रकर्मशब्देनकालादिव्यतिरिक्तमेवगृह्यतेव्याख्यानात्· तेनमासमधीतीव्याकरणइत्यत्रनेतिकैयटः।साध्वसाधु·शेषषस्यापवादोऽयम्·साधुनिपुणाभ्या।
मित्यवसिद्धेऽनर्चायामत्रसाधुग्रहणम्· तेनतत्वकथनेऽपिभवतिसूत्रेऽर्चाग्रहणन्तुनिपुणार्थम्· निमित्तादिति·निमित्तवाचकात्सप्तमीभवतितस्यनिमित्तस्यप्र।
त्यासत्त्यासत्वाद्यपेक्षितक्रियाकर्मणायोगइत्यर्थः।निमित्तस्यात्रक्रियाफलम्।एवञ्चफलसप्तम्यर्थः।चर्मणीति· चर्मणःफलत्वञ्चहननस्यवध्याभेदाधीनत्वात्का।
र्यसम्बन्धश्चस्वरूपसन्नेवनिमित्तम्· द्वीपिचर्मणोरण्डकोशमृगयोश्चसमवायः।इतरयोस्संयोगः।मुक्ताफलायकरिणंरवुर्वीरेत्यादौक्रियार्थोपपदस्येतिच
तुर्थीप्राप्तीतिशेषः।मुक्ताफलान्याहर्तुमित्यर्थः।यस्यचभा·भावःक्रिया·तात्।ज्ञापकक्रियाश्रयवाचकात्।तेनगोपदडुह्यमानपदयोरुभयोरपिसप्तमीसि
द्धा·क्रियाश्रयःकर्त्ताकर्मच·तत्रब्राह्मणेष्वधीयानेषुगतइतिकर्तुर्यदुदाहरणम्·कर्मण्युदाहु·गोष्विति·तत्रकाचित्क्रियास्वाधारकालेनान्याक्रियाम्परिच्छिन
त्ति·यथाप्रकृतेकाचित्तुस्वाधारकालाव्यवहितपूर्वकालेन यथागोषुधोक्ष्यमाणास्वित्यादौ·काचित्स्वाधारकालानन्तरकालेन·यथागोषुदुग्धास्वित्यादौ।ज्ञापकत्वस
प्तम्यर्थस्तस्यचभावलक्षणमित्युक्तेःक्रियायामेवान्वयः।लक्ष्यलक्षणभावःशब्दबोध्यएवैतच्चास्यप्रवृत्तौनिमित्तन्तुतत्सम्भूयोदर्शनादिरूपमानान्तरेणग्रह
णापेक्षेतिबोध्यम्· अन्यथोदितेआदित्येतमोनष्टमित्यादावेवस्यान्नतुप्रकृते।कदाचिद्धिगोषुदुह्यमानासुसौगतः इदञ्चयत्रमानान्तरेणज्ञातेस्वरूपस्यार्थस्य
कालविशेषादिज्ञानार्थंशब्दप्रयोगस्तत्रैवप्रवर्त्ततेभाष्यस्वरसात्·राहूपरागेस्नायादित्यत्रराहूपरागपदेनतदाश्रयकालउच्यतइत्यधिकरणसप्तम्येव·विवाहे
नान्दीमुखंकुर्यादित्यत्रविवाहपदेनतत्पूर्वकालउच्यते·गवान्दोहेऽस्मागतइत्यत्राप्यधिकरणसप्तम्येवेत्यन्यत्रविस्तरः अर्हाणाम्·कर्तृत्वानर्हाणाम्/तद्वैपरीत्येऽर्हा
णामकर्तृत्वेऽनर्हाणाञ्चकर्तृत्वेइत्यर्थः।वाक्यचतुष्टयमेतत्।कर्तृ ~समर्पकादकर्तृसमर्पकाच्चसप्तमीत्यर्थः।सप्तम्याश्चनदन्वपिक्रियावाचकाद्धातोरप्रथमा
सामानाधिकरण्याच्छतृशानचावेव·लक्ष्यलक्षणभावाविवक्षार्थमिदम्·सत्स्विति·सन्तोहितरणक्रियाकर्तृत्वार्हाःतरणक्रियाकर्तृसत्सम्बन्धिअसत्कर्तृकमासन
मितिबोधः।स्वक्रियाधिकरणकालवृत्तित्वंसम्बन्धः।असत्स्विति·नरणक्रियाकर्तृत्वानर्हाणान्दकर्तृत्वमत्र·यद्यपिस्थितिक्रियाकर्तृत्वार्हत्वेनेदंसिद्धम्·तथाप्य
सतानामरणाङ्क्रियायामर्हत्वादिकमपिबोधविषयइतिभावः।सत्स्विति·नरणक्रियां र्हाणान्नदकर्तृत्वमत्र

का॰ षष्ठी॰च॰अनादर इति विषयसप्तमीयस्य च भावेनेत्याद्यनुवर्तते अनादरे गम्यमाने सति यस्य क्रियया क्रियान्तरं लक्ष्यते ततः सप्तमीषष्ठ्यावित्यर्थः । फलि
श॰शे॰ तमाह॰ अनादराधिक्य इति॰ लक्ष्यलक्षणभावः षष्ठ्यर्थः । अनादरविशिष्टप्रव्रजनन्धात्वर्थः । तत्र षष्ठी तात्पर्यग्राहिका ऽनादरश्च प्रत्यासत्त्या पुत्रादिविषयक
२८ एवेति भावः । स्वामीश्वर॰ शब्दपरत्वाद्विरूपाणामपीति नैकशेषः । पर्यायान्तरसङ्ग्रहाय पत्या स्वाम्यर्थेति नोक्तम्॰ दीयत इति व्युत्पत्त्या दीयमानांशरूपं दायमादत्ते
इति सोपसर्गाद्दाधातोरादानार्थतया एव निपातनात् कः । गवादिकं दीयमाने ऽन्वेति नित्यसाकाङ्क्षत्वादिति । दायादशब्दः स्वामिपर्याय इत्यन्ये॰ षष्ठ्यामेवेति॰ शेषषष्ठ्यन्यनेने
तिभावः । नेत्यर्थ इति॰ आसेवापदस्य तत्र रूढेरिति भावः । तात्पर्यञ्च तदेकव्यापारता । आयुक्तयोगे ऽधिकरणत्वविवक्षायां सप्तमी प्राप्तौ सम्बन्धविवक्षायां तत्र
श॰ लयोगे च षष्ठी प्राप्तौ वचनम्॰ यतश्च॰ जातिगुणक्रियासञ्ज्ञाभिरिति॰ विशिष्टस्येत्यध्याहारः । तद्विशिष्टस्यैकदेशस्य यतः स्वघटितसमुदायात्स्वेतरसमुदायघट
कव्यावृत्तधर्मकरणकपृथक्करणं तद्वाचकात् षष्ठीत्यर्थः यतः किम्॰ यस्य जात्यादिविशिष्टस्य स्वेतरव्यावृत्तधर्म वत्त्वबोधनं तत एवमाभूत् षष्ठ्यपवादत्वात् प्रथमा
पवादत्वस्यापि सम्भवात्॰ स्वघटितसमुदायावधिकस्वेतरसमुदायघटकव्यावृत्तधर्मकरणकपृथक्करणरूपनिर्धारणविषयत्वरूपो ऽवपर्वान्वयविभावरूपश्च
सम्बन्धो विभक्त्यर्थः । नृसमुदायावधिकद्विजेतरनरव्यावृत्तश्रेष्ठत्वकरणकपृथक्करणरूपनिर्धारणविषयो नृसमुदायावयवो द्विजः श्रेष्ठ इति बोधः । संसर्गघटकक
रणञ्च श्रेष्ठत्वादिरूपमेव प्रत्यासत्तेः । अत एव न निर्धारण इति सूत्रबोधितनिर्धारणं स्वविभक्त्यर्थत्वं सङ्गच्छते॰ उद्भूतावयवभेदविवक्षया नृणामिति बहुवचनम् ।
तिरोहितावयवभेदविवक्षया निर्धारणविषये एकवचनन्त्वसाध्विति कारक इति सूत्रे भाष्ये स्पष्टम्॰ तत्र हि निर्धारणे कारकेष्विति ब्रूयादित्युक्तम्॰ मिदंवोन्नाद्विष्क
सेतु सौत्रो निर्देश इति तदाशयः । द्वन्द्वः सामासिकस्य चेत्यत्र समासं समूहमध्ये इत्यर्थः समूहे ऽर्थे ऽपि चेति ठक्॰ पञ्चमीति॰ यतश्च निर्धारणमित्यनुवर्तते विभागो ऽत्र
भेदः । तत्र निर्धारणे सर्वत्र यथा कथञ्चिद्भेदस्य सत्त्वे न विभक्तग्रहणसामर्थ्यात्तत्र भेद एव न तु केनाप्युपात्तरूपेण भेदस्तत्रैव प्रवृत्तिरित्यत आह॰ भेद एवेति॰ अ राम
त्र पञ्चम्यर्थो निर्धारणविषयत्वरूप एव॰ पाटलिपुत्रकावधिकनिर्धारणविषया माथुरा आढ्यतरा इति बोधः । एवञ्च त्रितयोपादाने एव निर्धारणप्रतीतिरि २८
ति पुरुषोत्तम इत्यादौ सम्बन्धसामान्ये षष्ठी उत्तमनिरूपितेति समाससिद्धिरिति तरप्सूत्रे कैयटः । साधुनि॰ निपूर्वात्पुण कर्मणि शुभे इत्यतः इगुपधलक्षणः ।

अर्चतेश्च भौवादिकाद्गुरोश्च हल इत्यप्रत्ययः। अर्चा। चौरादिकात्तु ण्यासश्रन्थेति युच् स्यात् षष्ठ्यपवादोऽयम्· अप्रत्ययादिभिरिति· लक्षणेत्थमितिसू
त्रोपात्ताः प्रत्यादयः। नक्षत्रे च· लुपशब्देन लुप्संज्ञया लुप्तप्रत्ययार्थो लक्ष्यते इति बोध्यम्· अधिकरणे किम्· अद्य पुष्यः। असत्यां तदनुवृत्तावनारङ्गत्वात्प्राति
पदिकार्थ एव स्यात्· मूलेनेति· नक्षत्रेण युक्तः काल इत्यणो लुब्विशेष इति लुप् नक्षत्रे किम् पञ्चालेषु तिष्ठन्ति जनपदे लुबिति लुप्· सप्तमीपञ्चम्यौ·।
कालाध्वनोरित्यतस्तदनुवर्तते तच्च पञ्चम्या विपरिणम्यते मध्यस्यावधिद्वयसापेक्षतया द्विवचनान्तेन समासः। बोधस्तु शक्तित्वेन शक्तिद्वयस्य न तु वि
लेनेति बोध्यम्· ननु कर्तृरूपस्य कारकस्यैकत्वाद्भेदनिबन्धनमध्यव्यपदेशासम्भवोऽत आह· शक्तिद्वयमध्येयाविति· कर्तृत्वादिशक्तिरेव कारकं। सा
चक्रियाभेदेन भिन्नेति भावः। यद्यप्यवध्यवधिमतोस्साजात्यनियमान्न कालाध्वनोः कारकमध्ये सम्भवस्तथापि शक्तिशब्देन तदाधार कालादिग्रह
णान्नदोषः। षष्ठ्यपवादोयम्· स्वानन्तरकालवृत्तित्वादिकं विभक्त्यर्थः। शक्तिद्वयमध्यवर्तित्वन्तु वस्तुसन्निमित्तम्· अधिकशब्देनेति· कर्तरि क्तप्रत्ययान्ता
ध्यारूढशब्दार्थकाधिकशब्दयोगे लोकशब्दात्सप्तम्यां प्राप्तायां ज्ञापकादिमेष्यते इत्यर्थः। तदस्मिन्नधिकमिति सूत्रे भाष्ये तु उपश्लिष्टपदाध्याहारेणोप
श्लेषिकेऽधिकरणे सप्तमीत्युक्तम्· कर्मणि क्तप्रत्ययान्ताध्यारूढशब्दार्थकाधिकयोगे तु अधिको लोको हरिणेति प्रथमैव· उपपराई इति· उपोधिके च।
तिकर्मप्रवचनीयत्वम्· ननु मामुद्दिश्य विनियोऽस्य तदित्यर्थादत्र कर्मणि द्वितीयैवेति किं कर्मप्रवचनीयत्वेनेत्यत आह· अगतित्वादिति· तिङि चेति· उदात्त
वतीति तिङ् ङेगतिर्निहन्यत इत्यर्थः। अत्र तिङ्· तिङ इति निघातस्य निपातैर्यद्यदीत्यादिना निषेधात् करिष्यतीति तिङ· न्तस्योदात्तवत्त्वमिति सर्वैष्टसि
द्धिः॥ ॥ ❀ ॥ इति विभक्त्यर्थाः अधिगच्छति शास्त्रार्थं स्मरति श्रद्दधाति च। यत्कृपावशतस्तस्मै नमोऽस्तु गुरवे सदा ६ ॥

ल॰ शे॰ श्रीगणेशाय नमः॥ समर्थः पदः विधिशब्दः कर्मसाधनः शेष षष्ठ्या समासस्तदाह पदसंबन्धीति। पदविधिसहचरितोऽपि परस्वविधिशब्देन गृह्यते अत एव।
स॰ सन्नन्तादावेकार्थीभावेः पदविधिश्च समाससंज्ञादिस्तस्य वचनसामर्थ्यसाक्षात्विशेषणमसंभावादतस्त्राह समर्थाश्रितइतिसामर्थ्यंचात्र नव्यपेक्षाख्यमा
२९ नात् समासादिवृत्तिषु तस्यासंभवाच्च किं त्वेकार्थीभावः स च विशेष्यविशेषणभावावगाह्युपस्थितिजनकत्वं संसृष्टार्थे समर्थमिति भाष्योक्तेः। अत एव राजपुरुषेक
देशराज्ञि ऋद्धस्येत्यादिविशेषणान्वयो न देवदत्तस्य गुरुकुलमित्यादौ तु गमकत्वाद्भवत्येव वृत्तिः एवं राजपुरुषइत्यादौ विशेष णापदे संख्यानवगमोऽप्येकार्थीभाव।
कृतः संख्याविशेषप्रकारेण तत्तदर्थभाने पृथगुपस्थितेस्तंत्रत्वात् यथा घटाइत्यादितो बहुत्वेनैव त्रिचतुरादिव्यक्तीनां भानं न तु त्रित्वचतुष्ट्वादिना तथा वृत्तौ राजत्वा।
दिनैकानेकव्यक्तिभानं तात्पर्यवशान्न त्वेकत्वद्वित्वादिना एवं तावकीनो यौष्माकीण इत्यादौ संबोध्यत्वेनैवैकानेकव्यक्तिभानं न त्वेकत्वबहुत्वादिना विग्रहवाक्ये
येकवचनत्वारोपेण शास्त्रप्रवृत्तिमात्रं न तु तद्बोधः वृत्तिस्वभावविरोधादिति मंजूषायां विस्तरः गमकत्वादेव शिवस्य भगवतो भक्त इत्यर्थे शिवभागवत इत्ययः अ
लेति सूत्रे भाष्ये प्रयोगः प रं तु तत्र वृत्तिरेव न तु शिवस्य भागवत इति वाक्यं साधु तत्र भगवच्छब्दादण् शिवपदेन भगवच्छब्दस्य समासश्च युगपदेवेति बोध्यं तयोप
स्थितिश्च समुदायशक्तिसाध्या एवं च क्लृप्तशक्तित्यागे मानाभावात्प्रत्येकशक्तिसहकृतया समुदायशक्त्या तथोपस्थितिरियमेव चैकार्थीभावः जहत्स्वार्था वृत्तिः प
दानामानर्थक्यमिति तु न युक्तं महाबाहुः सुपंथा इत्यादावात्वाद्यनापत्तेः अर्थवत्त्वभूतपूर्वगत्याश्रयणं तु सत्यां गतावयुक्तमुक्तं वृद्धैः जहत्स्वार्था तु तत्रैव यत्र रू
ढिविरोधिनी अवयवार्थविरुद्धो यत्र समुदायार्थस्तत्रैवस्सेति तदर्थः यथा गोरखस्कन्धसर्पादौ परिभाषेयम् सा च पदविधिरिति सूत्रस्वरसात् समासेऽङ्गुलेः सं
गइत्यादौ समासग्रहणाच्च गतिर्गताविति सूत्रे पदस्येत्यधिकारात् समर्थपरिभाषोपस्थितिरिति कैयटस्वरसाच्च पदत्वेन श्रुतं तत्त्वेन वा यत्र साक्षादुद्देश्यता तत्रैव
प्रवर्तते तेनान्यारादितरर्त्तेत्यादौ नास्याः प्रवृत्तिः एकार्थीभावश्चालौकिकविग्रहवाक्य एव कल्प्यते यथा शत्रादौ द्वितीयासामानाधिकरण्यदृष्ट्या लकारेऽपि तत्क।
ल्पना तथात्र न्यपदार्थे समर्थेऽस्यार्थे इत्यनुवादबलादस्य तत्र कल्पनेति तथा च शतृविधायके भाष्यम् लस्याप्रथमासमानाधिकरणेनार्थेनायोगादादेशानु रा॰म॰
पपत्तिस्तस्य क्वापि प्रयोगाभावादित्याशंक्यादेशसामानाधिकरण्यदृष्ट्वानुमानाद्भन्तव्यं प्रकृतेरपि तत् भवतीति तत्र कैयटः सिद्धानां शब्दानामन्वाख्यानमत॥ ९

पचन्तं देवदत्तं पश्येत्यादिप्रयोगदर्शनात्तस्यानिनोपि लटः प्रक्रियार्थे विहितस्य प्रथमासामानाधिकरण्यमनुमीयत इति अत्रानुमाने सौत्रानुवाद एवानुकूल ।
स्तर्कः अत्र प्रक्रियार्थे विहितस्येत्यनेनान्यस्यापि प्रक्रियार्थे कल्पितस्य लोकेऽबोधकत्वं सूचितमित्यन्यत्र विस्तरः समर्थः किम् पश्य कृष्णं संश्रितोऽस्ममि
त्यत्र कृष्णश्रितयोः परस्परसंबंधाभावेनैकोपस्थित्यजनकत्वेनासामर्थ्यं सह सुपा सुबामंत्रित इत्यतः सुपिति वर्त्तते सुबंतसहितं सुबन्तं समाससंज्ञकमित्यर्थः
समस्यते इत्युक्तिस्त्वबुधानां भिन्नयोः शब्दयोरनेन संश्लेषः क्रियत इति प्रतिपत्तेस्तदनुसारेण संपूर्वकास्यतेश्च संश्लेषोऽर्थः प्राक्कडारादित्यत्र प्राग्ग्रहणमावर्त्त
ते तेन प्राक्समाससंज्ञका भवन्ति तत्संज्ञाः संतोऽव्ययीभावादिसंज्ञका इत्यर्थात्तयोः समावेश इति भाष्ये स्पष्टम् अन्यथा कडारत्वात्पर्यायः स्यात् इति दिक्
अत्र सुवित्येकत्वम् विवक्ष्यते तेन महिष्या अजायाश्च क्षीरमित्यत्र सुबंतसमुदायेन न क्षीरशब्दे न समास इति कैयटादयः । परे तु अनुवाद्यत्वादेकत्वाविवक्षैव ।
किंच तद्विवक्षायामेकेनैव केनचित्सुबंतेन किंचिदेकं सुबंतं समस्यते न तु अन्यैरन्यानि तस्मात्सुवित्यादौ जातिविवक्षा एवं च यथा स्वांगग्रहणेन स्वांगसमुदायस्य
न ग्रहणं स्वांगत्वस्य प्रत्येकं समाप्तत्वात् एवं सुबन्तत्वादेरपि प्रत्येकं समाप्तत्वेन सुबंतादिग्रहणेन न सुबंतादिसमुदायस्य ग्रहणमिति नोक्तदोषः स्पष्टं चेदं ।
मनुष्वत्र समर्थसूत्रयोर्भाष्ये तत्रत्यकैयटादीनां तु प्रमादः अत एव विभक्तिश्चेति सूत्रे प्रतिप्रत्ययं विभक्तिसंज्ञेति पक्षे प्रथमयोरित्यादौ विभक्तिसमुदाय
विभक्तिग्रहणेनाग्रहणात् प्रथमयोः प्रत्यययोरेव ग्रहणं प्राप्नोतीत्युक्तं कैयटेनेत्यन्यत्र विस्तर इत्याहुः अनुव्यचलदिति अनोर्व्यचलदित्यनेन युग
पत्समासः अनु इति सुबंतेन व्यचलदिति समुदायस्य समर्थत्वात् सुपेति इदं लक्षणमधिकारश्च अन्यत्फलं तु देवः करोति मातुः स्मरतीत्यादौ विशेषणं स्म
सषष्ठीसमासयोरभावः सुपोधा अंगनिमित्तस्य सुप इत्यर्थं भ्रमवारणायांगस्य सुप इति नोक्तं पूर्वेनिपात इति भूतशब्दस्यैवेत्यर्थः अन्यथा विनिगमनावि
रहेण प्रथमानिर्दिष्टत्वाविशेषादनियमः स्यादिति भावः अत एव निर्दिशादौ देशविषयेऽवयवद्वारकसामर्थ्येप्यस्य प्रवृत्तिः विस्पष्टपटुरित्यादावपि विस्प
ष्टादीनि गुणवचनेष्विति गमकं बोध्यं तत्र हि विस्पष्टमित्यादि पटुत्वादिविशेषणमिति कैयटे स्पष्टं इवेनेति हरीतकीं भुंक्ष्व राजन्मातेव हितकारिणीमित्यसा
ध्वेवनेतिः समानाधिकरणे प्रथमा अभिहिते प्रथमेति वार्त्तिकस्वारस्येन प्रथमायास्तत्र तत्र कारकविभक्तित्वोक्तिपरभाष्येण च क्रियायोग एव प्रथमायाः प्र.

श॰शे॰ प्रकृत्यामातेतिप्रथमायामातत्सदृशोमित्यर्थेऽसाधुत्वादित्यन्यत्रविस्तरः एतद्योगविभागसिद्धसमासस्यविशेषसंज्ञानसंभवेत्ततदधिकारेष्वपाठात्नोमत्तेऽविनि।
स॰ अत्रयथार्थत्वादिप्रयुक्तोऽव्ययीभावस्तुन तत्रतस्यैवेतिनिर्देशात् अव्ययी॰ अनव्ययमव्ययंभवतीतिभवतेर्णस्य उपसंख्यानमितिकर्त्तरिणः महासंज्ञाकरणाप्रा
३० चामनुरोधात् योगोविभज्यतेइति भाष्येऽन्विदंनदृश्यते अपदिशमित्यादिमांतानांस्वरादिपाठादव्ययत्वम् अपदिशेनेत्यादित्तुचिंत्यमेवेत्यन्ये॰ ननुसमासगते
अन्तर्विभक्त्याश्रये प्रथमांतत्वेआश्रीयमाणेकष्टश्रितादौश्रितस्यपूर्वनिपातापत्तिर्निर्दिष्टपदंचव्यर्थमत आह समासशास्त्रेइति समाससंज्ञाविधायकेशास्त्रे
इत्यर्थः नचराज्ञः कुमारीश्रितोराजकुमारीश्रितइत्यत्रद्वितीयायाःद्वितीयाश्रितेति सूत्रेप्रथमानिर्दिष्टत्वेनकुमारीशब्दस्यपूर्वनिपातापत्तिरितिवाच्यम् अप्रधानमुपस
र्जनमितिशास्त्रान्तरोक्तमहासंज्ञाकरणेनास्यतदर्थकतयासमासशास्त्रेप्रथमानिर्दिष्टमप्रधानत्वसमानाधिकरणोपसर्जनपदवदितिवाच्यार्थेनिष्पन्नेऽप्र
धानत्वस्यसंबंधित्वाद्यंप्रतिपदप्रधानंतंप्रतितदुपसर्जनसंज्ञमित्यवगते रदोषादितिभाष्यएवसमाधानात् प्रकृतेचनराजनिरूपितमप्राधान्यंकु
मार्याइतिनतदपेक्षोस्यपूर्वनिपातः नचैवंपूर्वकायाद्यसिद्धिः कायनिरूपिताप्राधान्यस्यपूर्वपदार्थेऽभावादितिवाच्यं समासशास्त्रस्यप्रथमानिर्दिष्ट
शब्दगताप्राधान्यस्याश्रयणेनादोषात् समासशास्त्रेयंप्रतिपदप्रधानंतंप्रतितदुपसर्जनमित्यर्थात् भवतिचश्रितादौप्रतिद्वितीयांतंतथासहयुक्तत्वेनोपा
त्तार्थस्यशब्दगुणान्वयित्वाभावरूपाप्राधान्येपितत्समभिव्याहृतप्रथमाद्यंतार्थतदधीनत्वरूपाप्राधान्यप्रतीतेः अतएवसमकक्षयोरप्येकस्यपरेणासंहा
गंतव्यमित्युक्तेदुःखंदृश्यते प्रकृतेपिद्वितीयांतंश्रिताद्यधीनंतंविनासमासाघटकत्वात् श्रितादिकंतुतंविनापिसमासांतरेघटकमितिद्वितीयांतस्यश्रिताद्यधी
नत्वमेवमन्यत्राप्यूह्यम् यस्यशब्दस्यसमासविधौप्रथमानिर्दिष्टंतंप्रतितदुपसर्जनमितिवक्तव्यमितिवार्त्तिकप्रत्याख्यानायतद्भाष्यप्रवृत्तेर्भाष्येपि यंशब्दं
प्रतियत्प्रथमानिर्दिष्टमप्रधानंतंशब्दंप्रतितत्प्रथमानिर्दिष्टंवाच्यंपदमुपसर्जनमित्यर्थस्यैवौचित्यात् अतएवयंयदितिभिन्नलिंगनिर्देशः बहुव्रीहौत्वेकवि
भक्तित्येवोपसर्जनत्वमिति अनुअस्सेवस्फुटीभविष्यति अन्वर्थत्वविरोधान्नानेनेतिभाष्यसिद्धान्तइतिबोध्यम् यत्त्वर्थगताप्राधान्येनान्वर्थत्वेपिपूर्वकाया राम॰
दौनदोषोऽन्वर्थसंज्ञाहियत्रसोऽर्थः संभवतितत्रप्रवृत्तिनिमित्तापेक्षाप्रवर्त्तते अन्यत्रतुविधानसामर्थ्यात्तन्निरपेक्षायथास्वादीनांकर्मप्रवचनीयत्वमितिप्रथमा ২

निर्देश सामर्थ्यात्पूर्वोदीनोप्रवर्तते इति वक्तव्ये निर्विभक्तिकस्योच्चारणासंभवेन तत्सामर्थ्यायोगात्प्राथम्यादन्विताथैकत्वाल्लघुत्वाच्च प्रथमैवोच्चारितेत्यस्य वक्तुमशक्यत्वादित्यत्र
म् उपसर्जनं पूर्वे समास इत्यधिकृतयोग्यतावलेन समप्रस्याविपरिणाम्यतेन दाह समासे इति नच राज्ञः कुमार्या इति परिनिष्ठितविभक्त्या समासे कुमार्या अपि पूर्वनिपातापत्तिरिति वा
वाच्यम् षष्ठ्यंतयोः समासे अर्थाभेदात्प्रधानस्यापूर्वनिपात इति भाष्येण समाधानात् अर्थाभेदात् अर्थस्य प्रधानस्याभेदात् समस्यमानराजपदार्थनिरूपितसंबंधाभावात् अ
प्रधानषष्ठ्यंतस्य प्रथमानिर्दिष्टत्वाभावान्न पूर्वनिपात इति तदर्थः अयं भावः षष्ठीत्यादिसूत्रेण समुदितेन समासस्तदर्थनिरूपितसंबंधाद्यर्थकमेव षष्ठ्यंतं गृह्यते तदेव च
तत्र प्रथमानिर्दिष्टमिति तदुक्तं कैयटेन राज्ञः पुरुषस्येत्यत्र राजापेक्षया पुरुषः प्रधानमेवेति नासौ अभिधीयते राजापेक्षयानव्यं निर्दिश्यत इत्यप्रधानस्यैव पूर्वनिपातः इति
उक्तरीत्याऽप्रधानषष्ठ्यंतमेव तत्र प्रथमानिर्दिष्टं न तु प्रधानमिति तत्त्वं यत्तूपसर्जनसंज्ञान्वर्थत्वादप्रधानस्यैवेत्युपसर्जनं पूर्वमित्यत्र कैयटस्तन्न तदुक्तमेवेत्यत्र प्र
थमानिर्दिष्टमित्येतेनानुवृत्तं समास इति तदर्थविग्रह ———— परमित्याह।
विग्रहे इति नियतेति एकग्रहणादवधारणगर्भसमासलाभ इति भावः निष्कौशांबिरित्युदाहरणं परिनिष्ठितविभक्त्यापि समासेन निष्क्रांतं निष्क्रांतेनेत्यादिक्रमेणान
स्यानियतविभक्तिकतया कौशाम्बीपदस्य तदपेक्षयानियत विभक्तिकत्वादनेनोपसर्जनत्वेन ह्रस्वत्वं परिनिष्ठितविभक्त्या समासे चेदमेव ज्ञापकम् अयं पक्षस्तत्तु भा
ष्यतुल्यार्थनि सूत्रे भाष्ये प्रथमान्तेन समास इति पक्षोऽप्यनेकमिति सूत्रे भाष्ये इति केचित् परेतु अनेकमिति सूत्रे भाष्ये समासार्थविग्रहे प्रत्यासत्त्या समासापेक्षयानियतवि
भक्तिकस्यानेनोपसर्जनत्वमुक्तं राज्ञः कुमारी राजकुमारीत्यत्र परिनिष्ठितविभक्त्यापि समासत्वान्न तदपेक्षया कुमार्या नियतविभक्तिकत्वमिति न तस्या उपसर्जनत्वमिष्ट
म् चित्रगुरित्यत्र च गोपदस्यानेनोपसर्जनत्वमंगीकृत्यानेकग्रहणं प्रत्याख्यातं बहूनां समासस्तु तद्धितार्थेत्यनेनोत्तरपदे द्विगुविधानात् ज्ञापकात्सिद्ध इति चोक्तं ए
वं चोत्तरपदेन परिमाणिनेत्यपि प्रत्याख्यातम् अतिप्रसंगस्त्वनभिधानान्न तदुक्तमनेकवचनमुपसर्जनार्थं न चैकविभक्तित्वादिति वार्तिककृतान्वर्थत्वानुक्ते स्त
द्दोत्याप्रयोजनं वार्तिककृन्नैवेति तत्खंडनं भाष्यरीत्यात्वेतत्प्राप्तिरेवात्रेति बोध्यं अन्यथा चित्रगुरित्यस्य विग्रहे द्वयोरपि नियतविभक्तिकतया किमपेक्षं गोशब्दस्य
नियतविभक्तिकत्वं स्यात् एकस्यानियतविभक्तित्वे हि तदपेक्षमन्यस्य तत्त्वं वाच्यम् समासापेक्षं नियतविभक्तित्वमेव युक्तमाश्रयितुं मन्यथा सभार्य इत्यत्रोपसर्जन

वृ·शे·
स·
३९

ह्रस्वानापत्तिः सहशब्दस्याव्ययतया विभक्तिमात्राभावेन लुकानुत्पत्तेस्तेनान्वाख्यानेनवानियतविभक्तित्वाभावात्तदपेक्षानियतविभक्तित्वसम्भार्याद्युत्पत्राभावेनोपसर्जन।
त्वानापत्तिः ममतु समासस्यानियतविभक्तित्वात्तदपेक्षंतत्वमस्त्येवेति न दोष इत्याहुः गोस्त्रियोः अत्र स्त्रीशब्दः स्वर्यते तेन स्त्र्यधिकारोक्तचातुर्थिकप्रत्ययलाभः।
उपसर्जनं स्यातं गोस्त्रियोर्विशेषणम् प्रत्ययग्रहणपरिभाषया च स्त्रीशब्देन तदंतग्रहणं ताभ्यां च प्रातिपदिकविशेषणात्तदन्तविधिरित्याहोपसर्जनं यद् इत्यादि गोकु
लेराजकुमारीपुत्र इत्यादौ तु न दोषः महासंज्ञाकरणेनान्येन शब्देन समासविधौ यत्प्रथमानिर्दिष्टं तस्य तत्प्रत्येवोक्तरीत्या प्रधानत्वेनोपसर्जनत्वात् प्रत्यासत्त्या तदंततत्समा
सप्रातिपदिकान्तस्यैव ह्रस्व इत्यदोष इति भाष्ये स्पष्ट तत्रह्येवं भाष्यम् अप्रधानमुपसर्जनमिति संबंधिशब्दावेतौ तत्र संबंधादेतद्गन्तव्यं यं प्रतियदप्रधानं तं प्रत्य
वेत्तोनोभवतीति यत्प्रथमानिर्दिष्टं तस्य तद्घटितसमाससमुदायस्य सोऽप्रधानशब्दोंतो भवतीति तदर्थः यद्यपि कुक्कुटमयूर्याविति द्वन्द्वबहुव्रीहावि वएकवि
भक्तौ त्वुपसर्जनत्वम् द्वंद्वः प्रथमांतानामेवेति चार्थे द्वन्द्व इत्यत्र वक्ष्यते एकविभक्तौत्युपसर्जनसंज्ञाऽप्रधानार्थकस्यैवेति मतेपि उद्भूतावयवभेदसाहित्यं प्रति
मयूरीपदार्थस्य तत्वमस्ति सर्वत्र द्वंद्वे साहित्यमेव विशेष्यमिति चार्थसूत्रे भाष्ये स्पष्टम् तथापि भाष्ये द्वंद्वेनेति वचनारम्भान्न दोषः अतएव कुमारी मिच्छन्ब्राह्मणः।
कुमारीत्यत्र ह्रस्वो ना प्रथमानिर्दिष्टमित्यादेः शास्त्रीयस्यैवात्रोपसर्जनस्य ग्रहणात् अतएव गोवष्कयणीत्यादौ वष्कयणीशब्दस्य गुणशब्दत्वादप्रधानत्वेपि तदं
तस्य ह्रस्वो न एतच्च वोप्या इति सूत्रे भाष्ये स्पष्टं अतिराजकुमारिरित्यादौ स्त्रीप्रत्यये तदादि नियमनिषेधात् राजकुमारीत्यस्य स्त्रीप्रत्ययांतत्वं न च तस्यातसर्थे प्रत्युप
सर्जनत्वेन कथं स्त्रीप्रत्ययांतत्वमुपसर्जनस्त्रीप्रत्यये तदादिनियमादिति वाच्यम् यस्य समुदायस्य स्त्रीप्रत्ययांतत्वमानेयं तदर्थं प्रति स्त्रीप्रत्ययस्यानुपसर्जनत्वमे
वेत्यदोषात् प्रत्यासत्त्या तादृशानुपसर्जनत्वस्यैव निषेधनिमित्तत्वात् अस्य चातिक्रांतार्थं प्रत्युपसर्जनत्वेपि राजकुमारीत्येतदर्थं प्रत्यनुपसर्जनत्वमेवेतिदिक्

नाव्ययीभावादतोम्त्वपञ्चम्या इत्यम एव विशेषणं न लुगभावस्य
तु नाव्ययविच्छेदात् अपदिश्यमिति यद्यपि नपुंसकह्रस्वेनापीदं सिध्यति तथापि चित्रगुरित्याद्यर्थमावश्यकेन गोस्त्रियोरित्यनेनापीदं सिध्यतीति तदुपन्यासः राम·
दिशाशब्दस्य शरदादिषु पाठेपि लिंगविशिष्टपरिभाषयात्र नटच् समासांतप्रकरणे लिंगविशिष्टपरिभाषाभावस्य ज्यास्त्रेभाष्ये उक्तत्वात् टावंतदिशाशब्दोऽका। २

रांतप्रकृतिकस्यैवेतिमतेऽव्ययीभावः अमस्त्वास्यात् दिशशब्देन विग्रहे तु न तस्य प्रयोजनं इत्यादाविति आदिनैकविंशतिभारद्वाजं सप्तगंगमित्यादिसंग्र
हः विभक्तीत्यादेरिति विभक्तिशब्देन तदर्थो लक्ष्यते वचनशब्दः कर्मसाधनः प्रत्येकं संबध्यते विभक्त्यादयश्च श्रुतत्वादव्ययस्यैव विशेषणानि तदाह विभक्त्यर्था
दिष्विति अत्र सुबंतेनेत्यस्य समर्थेनेति विशेषणम् अत एव तदुत्तरविभक्त्यर्थान्तर्भावेणैकार्थीभावः द्वितीयाश्रितेत्यादौ समर्थेन सुबंतेनेत्यस्य समर्थप्रकृतिक
सुबंतेनेत्यर्थः अत एव कष्टंश्रितस्येति परिनिष्ठितविभक्त्या समासे पूत्तरपदीयविभक्त्यर्थान्तर्भावेण न सः अत एव कष्टश्रितस्य धनमित्यादौ षष्ठी द्वितीयां
तं समर्थयेमित्यर्थो तदर्थान्तर्भावेणैकार्थीभावात्तु कार्यत्वान्न द्वितीयेत्याहुः हरिङीति फलाविशेषेऽप्यंतरंगानपीतिन्यायप्रभृतिमुपेत्येदं — द्वयोः समाना
र्थत्वध्वननाय चकारमुत्तरमेवात्राधिशब्दप्रयोगः वचनेति प्रत्यासत्त्या यद्विभक्त्यर्थवाचकाव्ययेन सुबंतस्य समासस्तद्विभक्त्यैव यत्सुबंतं तस्य ग्रहणादिति भावः।
तिङ्कृत्तद्धितसमासैरिति भाष्यसंमतः परिगणनाच्च तेनाभिहिते सप्तमीत्यपि बोध्यम् अत एव गृहस्योपरि इत्यादौ न समासः उपरीत्यस्याधिकरणशक्तिप्रधान
त्वेऽपि येन सुबंतेन समासस्तद्वृत्तकविभक्त्यर्थावाचकत्वात् अधिहरि भक्तिरित्यत्र हर्यधिकरणिका भक्तिरिति बोधः न च प्रतेरसः सप्तमी स्यादिति सूत्रं संमतसप्तम्य
र्थमात्रवृत्तिप्रतिरूपाव्ययेऽवचरितार्थस्यास्याधेः शौंडादिपठितत्वेन परत्वात्सप्तमी शौंडैरित्यनेन बाधः स्यादिति वाच्यं आधेयप्रधानस्यैवाधेस्तत्र पाठात् विधाना
सामर्थ्यादिति एतच्च रक्षितानुसारेण वस्तुतो मध्यार्थकसमयाशब्दयोगे द्वितीयाविधानस्य दूरार्थकाराच्छब्दयोगे पंचमीविधानस्य चारितार्थ्यादिदं मयुक्तम् सम
मयानिकषाऽऽराच्छब्दा अधिकरणशक्तिप्रधाना इति समीपमात्रवाचित्वाभावान्नैतैः समासः समीप इति हितेषामर्थः अत्र भक्षन्यायेन विभक्त्यर्थसमीपादि
मात्रवृत्त्यव्ययस्यैव तेन समासात् उपशब्दस्तु तन्मात्रवाची कृष्णसामीप्यवांत इति बोधादिति बोध्यं सुमद्रं इति वचनग्रहणात्समृद्ध्यादिवाचकत्वेऽव्ययीभावः
सुमद्रा इत्यादौ तु सुशब्दो द्योतकः समृद्धा मद्रा इति बोधादिति नायम् निपातानां वाचकत्वं द्योतकत्वं चेत्यत्रैव भाष्ये स्पष्टम् उपदशा इत्यादावुपस्य समीपवर्त्ति
पदार्थबोधकत्वेन समीपमात्रबोधकत्वाभावान्नाव्ययीभावः विगतेति ऋद्धेरभाव इति यावत् अर्थाभावशब्देन समस्यमानपदार्थाभावस्यैव ग्रहणादत्र तेन
न सिद्धिः तत्तु नयन्नाह मक्षिकाणामभाव इत्यादिना अर्थाभावशब्देन उत्तरपदार्थाभावस्यैव ग्रहणं व्याख्यानात् नञा तु नायं समासः अर्थाभावशब्देन ऽउपा।

लु॰ शे॰ दानेनसूत्रगृहीताव्ययेनैतत्स मासप्राप्तेः तत्वनन्सूत्रे उपपादयिष्यते नचाभावेप्येवसिद्धेऽर्थग्रहणंव्यर्थम् प्रतियोगिभूतवहिर्विद्यमानार्थसमानाधिकरणाभाववाचकेनैव
स॰ समासोयथास्यादित्येतदर्थंतत्सत्वात्तेनाभावार्थेनिराशश्शशशृंगादिशब्देनायंनप्राप्यभावार्थेनचस्न अतएवात्ययग्रहणंचरितार्थं तदुदाहरणंनिर्हिमंनिःशीतमितिद्वा।
३२ त्युक्तमेवयुक्तम् अतेस्तदर्थत्वाभावात् अतिहिममित्युक्ते तद्दतिशयस्यैवप्रतीतेः अत्ययशब्देऽतेः सूत्रगृहीताव्ययत्वाच्चेतिदिक् संप्रतिनयुज्यतइति एतौयुजिक्रि
यांतर्भावेणेत्यर्थोभावः अतिनिद्रमासीदित्यादौतथाव्यवहारविषयेऽतिनिद्रशब्दस्यलक्षणेतिबोध्यम् शब्दप्रादुर्भावेन्यस्यशब्दविषयप्रकाशार्थेनाव्ययेनसमा
सइत्यर्थः भाष्यप्रयोगेति अचःपरस्मिन्नितिसूत्रेयंप्रयोगः एतद्भाष्यप्रयोगादेतत्सूत्रेतत्तदर्थबोधकपदघटकत्यागृहीताव्ययेनतत्तदर्थकेननायंसमासः अ
तएवयथासादृश्यइतिसूत्रेसादृश्यस्यपनीतिप्राप्रेतीतिभाष्येउक्तम् यथाशब्देनतुभवत्येवोत्तरसूत्रारंभादितिभावः ननुनित्यसमासत्वाद्वाक्याद्दुर्लभमतआह प्रतिशब्दस्ये
ति इदंभाष्यानुरोधेन वस्तुतःप्रतिस्थानमित्यादौवीप्सात्वाभावसंपादनेनसाचरितार्था तस्मादर्थमर्थंप्रतिप्रत्यर्थमितिसरूपसूत्रादिस्थभाष्यप्रयोगात् यदाद्विर्वचनंन
दाप्रतिशब्दस्यवीप्सावृत्तित्वाभावात्समासप्राप्त्यावाक्यंसाध्वितितत्त्वम् लोकेद्विर्वचनंतुन समासेनवीप्सायाद्योतितत्वात्इतिहयवरट्सूत्रेकैयटः प्रतिनात
स्याउक्तत्वादितितत्त्वम् शक्तिमनतिक्रम्येति पदार्थयोगेवेतिक्वापदार्थत्वंचबोध्यम् हरेःसादृश्यमिति हरिटासहेत्यलौकिकं वक्ष्यमाणेनेति अत्रसूत्रा।
णेवावैविध्यार्थः यथासूत्रेषूत्तरत्रकृतस्यपूर्वत्रापकर्षणंवैविध्यायातद्वत् अनुज्येष्ठंकार्यंकृतमनुज्येष्ठंप्रप्रमतीत्यादौकारणत्वेनान्वयात्परिनिष्ठितविभ
क्त्यासमासमभिप्रेत्याह ज्येष्ठस्यानुपूर्व्येणेति आनुपूर्व्यंक्रमः पूर्वक्रमेणेत्यनुपूर्वमितिसूत्रगृहीताव्ययेनाप्यनुनासमासएतस्मात्सूत्रप्रयोगात् युगपच्छ
ब्देनतुनसमासः सूत्रगृहीतत्वात् उभयत्रापिस्वार्थेष्यन्तत्ध्वनयन्नाह चक्रेणयुगपदिति गुणभूतेइति व्याख्यानात्सादृश्यइतिस्वार्थेष्यञितिभावः सं
पत्तिसमृद्ध्योःपर्यायत्वमाशंक्याह ऋद्धेरिति धनधान्यादेरित्यर्थः अननुरूपोयोग्य आत्मनः समस्यमानोत्तरपदस्यभावःप्रवृत्तिनिमित्तंक्षत्रत्वादिः संपत्तिरि
त्यर्थः सक्षत्रमित्यस्यक्षत्रियाणांयोग्यंक्षात्रमित्यर्थः तृणमपीति साकल्यबोधकाव्ययेनसमासःसमासस्यनित्यत्वादस्वपदविग्रहोदर्शितः तृणठासहे एम॰
त्यलौकिकम् अपरित्यज्येति क्वसहयोगेचेतिक्वतयोगश्चबोध्यः नत्वत्रेति तृणेनसहभुंक्तेइतिबोधोत्तरंयस्तृणानिभक्षयेत्सकथमन्यत्परित्यजेदितिप्रती ४

तेः सकलंभोज्यमनीत्यत्रैवतात्पर्यादिति भावः अग्नि ग्रंथपर्यंतमिति बहुव्रीहौ द्वितीयांतं ग्रन्थोन्यपदार्थः अधीतइत्यस्यतुनसमासेतभोवोमानाभावात् अ
न्यत्वं साहित्यं च सहार्थः अन्त्याग्निग्रंथसहितमिति बोधः अग्न्यास्त्विहेत्यलौकिकं नचतदधीतइत्यणप्रसंगो वैकल्पिकत्वात् यथाऽसा. असादृश्य
इति वृद्धस्तत्रैव वर्त्तमान इत्यर्थः तथाहरइति तथाशब्दस्य सादृश्यार्थकत्वेपि न समासः सदृशइत्युक्ते नियमेन प्रतियोग्याकांक्षादर्शनात् सादृश्यप्रतियोगिवा
चकेनैव तद्बोधकाव्ययस्य समासात् द्योतयतीति सामान्यस्य भेदको यो विशेषस्तद्रूपे प्रकारे थालिति यद्विशेषवान् हरिस्तद्विशेषवदभिन्नो हर इति बोधे यत्तच्छ
ब्दाभ्यां तयोरेकत्वावगमेऽर्थादुपमानत्वप्रतीतेरिति भावः सूत्रेपि सादृश्यशब्देनोपमानत्वमेव याल सूत्रे सादृश्यस्य प्रकारशब्देन ग्रहणे यत्सादृश्यवान्ह
रिस्तत्सादृश्यवान्हर इत्येवं बोधः स्यान्न तु हरिसदृशो हर इति भाष्यानुसारिणस्तु यथासादृश्ये इत्यस्य यथाशब्दः सुवंतेन समस्यते सादृश्ये द्योत्ये नेत्यर्थः यथा श
क्ति यथाबलमित्याद्युदाहरणम् अत एव भाष्ये असादृश्ये इति किमर्थं यथा देवदत्तस्तथा यज्ञदत्त इत्युक्तं न तु सूत्रमेव किमर्थमित्युक्तं यथार्थत्वेन तु सिद्धिः स्पष्टा
हीताव्ययेन तेनासमासात् अत्र चेदमपि ज्ञापकं न च प्रकारवचनतया तन्निष्पन्नस्य यथाशब्दस्य सर्वथा सादृश्यद्योतकत्वेन सूत्रे दाहरणासंभव इति सूत्रव्य
र्थमिति वाच्यम् अत्र सूत्रे अव्युत्पन्नस्य वीप्सायोग्यतापदार्थानतिवृत्तिबोधकस्यैव ग्रहणेनादोषात् यथाशक्ति इत्युदाहरणे तदर्थक एवासः यद्यपि यथा
शब्द उपमानत्वं द्योतयतीति सकलाभियुक्तोक्तेर्यद्विशेषवानित्यादि प्रागुक्तबोधोत्तरमुपमानदेवदत्ताभिन्न उपमेयोयं ज्ञदत्त इति बोधः गृहीतविशेषधर्मस्य
वचसाधारणधर्मः लक्षणामूलव्यंजनाजन्यबोधस्थल इवोभयोः शाब्दत्वंस्तुवच्चम् अत एवोपमानोपमेययोः समानविभक्तिकत्वसिद्धिः एवं च पूर्वपदार्थप्र
प्राधान्याभावेन नात्राव्ययीभावप्रसक्तिस्तथापि प्रसिद्धत्वात्प्रकारवचनस्यैवात्र ग्रहणे तत्सामर्थ्याद्धि मुनीत्यादाविव तदभावेपि समासः स्यादतोऽसादृश्य इ
ति सूत्रे कृतं तत्रकृतेनेतु तद्भिन्नस्याव्युत्पन्नस्यैवात्र सूत्रे ग्रहणं नेच यथाबलमित्याद्युदाहरणे प्रकारवाचियाल्तं तस्यैव ग्रहणमस्तु सादृश्यसंप्रतीत्यनेन च
समासोस्तु इदं सूत्रं च मास्तु पूर्वसूत्रे यथाग्रहणं च मास्त्विति वाच्यम् एतत्सूत्रारंभसामर्थ्येन तत्रतदप्रयोगात् तत्रार्थे साधोरन्यत्रार्थेऽसाधुत्वापत्तेश्च इद
मेव सूत्रमव्युत्पन्नस्य तदर्थकस्य यथाशब्दस्य सत्वे मानं तथा च भाष्ये असादृश्य इत्युच्यते तत्रेदं न सिध्यति यथाशक्ति यथाबलं प्रकारे यस्याल्तदं न

त.शे.
स.
३३

स्य सादृश्यस्य एव वृत्तेरित्याशंक्य वीप्सादिवाचिनोऽत्र सूत्रे यथावत्वमित्युदाहरणे च ग्रहणमित्यर्थे कोऽन्यः अनंतरमथयः प्रकारवचने थाल् तदंतस्य ग्रहणं कस्मान्न भवति पूर्वे
ण प्राप्नोति सादृश्यसंपत्तौ इति पूर्वपक्षिणोऽभिप्रायः प्रतिषेधवचनसामर्थ्यान्न भविष्यतीति उत्तरितम् नानेन भाष्येण प्रकृतसूत्रे प्रकारवचनथालंतस्य ग्रहणं शंक्यत इति वक्तुं युक्तं
असादृश्य इत्यस्य सूत्रे श्रवणात् यद्यपि तद्धि स्मरणेनायं पूर्वपक्ष इत्यपि वक्तुं शक्यं तथापि पूर्वेण प्राप्नोतीत्यादेरसंगतिः तस्मादुदाहरणे थालंतस्य ग्रहणं तत्र साद ।
श्यार्थे केन समासं ज्ञात्वान्यत्रार्थे प्रयोगबाधकाभाव इत्यभिमानेनार्थघटितं साधुत्वमित्यजानतोऽव्युत्पन्नस्यैवमानं चापश्यतः शंकेयमिति युक्तं प्रतिषेधवचनसा
मर्थ्यादित्यस्य प्रतिषेधयुक्तेन हि वचनसामर्थ्यादित्यर्थः एवं चाव्युत्पन्नतत्त्वेऽर्थघटितं साधुत्वमित्यत्र चैतदेव मानमिति भावः यत्तु प्रतिषेध इति प्रतीकमु
पादाय यथार्थे यदव्ययं तेन समस्यत इति पूर्वेण सिद्धे समासे सादृश्यप्रतिषेधार्थत्वादस्यारम्भस्येति कैयटस्तन्न सूत्रगृहीताव्ययेन तेन सूत्रेण समासात् नियमत्वा
पत्तेरेतदर्थज्ञापकत्वस्यैवोचितत्वात् न च सूत्रे यथार्थशब्देन सादृश्याग्रहणाच्च अत एव तत्र सूत्रे सादृश्यग्रहणं चरितार्थं अत एव भगवता सादृश्यसंपत्तौ
ति प्राप्नोतीत्युक्तं न च सादृश्यग्रहणं गुणीभूतसादृश्यग्रहणार्थं लक्ष्यानुरोधेन प्रधानन्यायाप्रवृत्त्योभयत्रापि तेन सिद्धेः यथायोग्यतायाय अर्थत्वेपि रूपस्य
योग्यमनुरूपमित्याद्यर्थे तदर्थकेनापि समासस्तद्वत् पूर्वसूत्रे यथार्थग्रहणं तदर्थकान्याव्ययग्रहणार्थं एवं च यथाशक्तीति एतदुदाहरणमेवेति भाष्यस्पष्टं
वीप्सादावपि यथाशब्देन समासो भवत्येव यदव्युत्पन्नं वीप्सावाचितस्येदं ग्रहणमिति भाष्यात् एवं चास्य पृष्ठमेवोपक्रमोपसंहाराभ्यामस्य सूत्रस्य विधित्वं भाष्य
लभ्यते अत्र सूत्रे यथाशब्देन यथार्थस्य न ग्रहणं मानाभावात् पूर्वसूत्रे तु वचनग्रहणात्तथा विभक्तिशब्देनेवेत्याहुः यावदवसंख्यादिनेयत्तापरिच्छेदो ।
वधारणम् तद्बोधकं यावदित्यव्ययं समस्यत इत्यर्थः अवधारणे किम् यावद्दत्तं तावद्भुक्तं किं यद्भुक्तमिति नावधारयामीत्यर्थः सुप्प्रतिना मात्रार्थे मात्राशब्दोऽस्य
पर्यायः पुनः सुपग्रहणमव्ययनिवृत्त्यर्थम् अन्यथा दोषामन्यमहरित्यादौ दोषादीनां वृत्तिविषये सत्त्वप्रधानतादर्शनात्तादृशाव्ययेनैव समासः स्यात् अक्षंप
ति इति लक्षणे प्रतिः कर्मप्रवचनीयत्वं तु प्रतेर्गतिर्गतावितिनिघाताभावायेत्याहुः अक्षशला समस्यंत इति शेषः पराजय एवेति पंचिकानाम द्यूतं पंचभिः । राम
क पर्दैर्भवति तत्र यदि सर्वे उत्ताना अवाञ्चो वा पतंति तदा पातयिता जयत्यन्यथा जीयते विपरीतवर्तने कर्तृत्वे नाक्षादेस्तृतीया अक्षोपरेत्यर्थः अक्षकृतपरी ५

त्वमलौकिकम् नित्यसमासत्वादस्वपदविग्रहः वैपरीत्यं च जयापेक्षयेति भावः अक्षेणेति अक्षाभ्यां विपरीतं वृत्तमित्याद्यर्थे न समासोऽनभिधानात् अक्षत्वेनैकाक्षबोधस्यैवा
स्य साधुत्वं न तु तेन रूपेणानेकाक्षबोधे एकत्वादिना बोधस्तु वृत्तौ नास्त्येवेति भाष्यस्पष्टं विभाषा यद्यपि एकार्थीभावे समासस्य व्यपेक्षायां वाक्यस्य च सिद्धेरिदं व्यर्थं एका
र्थीभाव एव समासप्रवृत्त्यादि विकल्पस्तु नेष्यते एवं समासनिषेधस्तत्राणि नित्यं क्रीडे इत्यत्र नित्यग्रहणं च व्यर्थं निषेधविषये एकार्थीभावाभावेन समासाप्राप्तेः नित्याधिकारे
विषयेऽस्याभावेन वाक्याप्राप्तेश्च तथापि लक्षणैकचक्षुष्काणां मंदानां प्रति वैकार्थीभावो नित्यः क्व पाक्षिकः क्व नास्त्येवेत्यर्थबोधनार्थं सर्वमावश्यकं ध्वनितं चेदं समर्था
नामिति सूत्रे भाष्ये लक्ष्यैकचक्षुष्कं प्रति समर्थ इति सूत्रे भाष्ये तत्प्रत्याख्यातम् एवं च विशेषणीभूतैकार्थीभावस्य विकल्पादिबोधकानीमानि अत एव पारेमध्ये इ
ति सूत्रे भाष्ये एकया वृत्तिर्विभाषापर्यायवृत्तिविषये नित्योपवाद इत्युक्तम् तत्र वृत्तिरेकार्थीभावः एतत्सामर्थ्यादिति अत्रैतत्करणात्प्राक्तदसंबंधेन तद्विषये ए
कार्थीभावस्यानित्यत्वमिति भावः नन्वेवं सुप्सुपेत्यस्यानित्यतापत्तिः एवं च भाष्ये सुप्सुपेत्युदाहरणभूते विस्पष्टपटुरित्यत्र विस्पष्टं पटुरिति विग्रहप्रदर्शनात्संग
तिरत आह सुप्सुपेति त्विति एतत्समासानुवादेनैवाव्ययीभावादिसंज्ञाविधाने न सिद्धे पुनस्तैः समाससंज्ञाविधानं तदनित्यत्वज्ञापकम् उपपदमतिङ् कत्रेक
रणे कृता आरम्भात् माख्याते नेत्यादावुद्देश्याप्रसिद्ध्या अनेकमन्यपदार्थे इत्यादौ त्यादिपदघटितसमासरूपोद्देश्याप्रसिध्या तेषु समाससंज्ञाविधानस्याव।
श्यकत्वेनार्थाधिकारानुरोधात्सर्वत्र तस्य विधेयसमर्पकत्वं प्रथमानिर्दिष्टमिति सूत्रे समासे इत्यस्य समासत्वव्याप्यसंज्ञाविधायके लक्षणयाऽव्ययादीनामुपस
र्जनत्वं साधयितुं शक्यमिति न तदर्थं समाससंज्ञाविधानं चरितार्थमिति भावः विग्रहप्रदर्शनपरोक्तभाष्यादपि तस्यानित्यत्वं बोध्यम् लक्षणेनाभि अभिप्रती आभि
मुख्यस्याग्नेर्ज्ञापकत्वसंबंधेनान्वयस्य च द्योतकौ अग्निं ज्ञाप्यं शलभकर्तृकं पतनमिति बोधः उदाहरणे तथा बोधे वाच्यभिमुखत्वं शलभपतनस्य लोकप्रसिद्ध्याम
नसा गृह्यते इत्याभिमुख्यद्योतकताभिशब्दस्य अग्निं ज्ञाप्यं शलभकर्तृकं प्रत्यासत्त्याभ्यभिमुखं पतनमिति बोध इत्यन्ये कर्मप्रवचनीयद्योत्यसंबंधेनान्वयाद्वा
क्येऽद्वितीया तदाह अग्निमभीति लक्षणेनेति किम् स्रुघ्नं प्रतिगतः स्रुघ्नादागत स्तमेव प्रतिनिवृत्त इत्यर्थः आभिमुख्ये किम् वृक्षं प्रति विद्योतते इत्यादावाभि
मुख्यद्योतनाभावे समासो माभूदिति अस्य समासस्य वैकल्पिकत्वेन पक्षे कर्मप्रवचनीयत्वं चरितार्थम् अभिप्रती इति किम् अग्नेः संमुखं शलभाः पतन्तीत्य

ल॰ श॰
स॰
३४

र्थे सं मुख्यार्थकसंशब्देन लक्षणत्वसंबंधेनान्वये समासो माभूदिति अनुये लक्षणेनेति वर्त्तते समयेत्यधिकरणशक्तिप्रधानम् यदिति सामान्ये नपुंसकम् द्विती
यांतम् यं पदार्थं समयेत्यर्थे द्योतको नुस्तेन लक्षणभूतेन तद्वाचकेन समस्यत इत्यर्थस्तदाह यमिति वनादेर्लक्षणत्वं समीपद्वारा सामीप्येन हि वनेनाशनिर्देशोऽज्ञा
प्यते लक्षणत्वं तु वस्तुसन्निमित्तं न तु तेन संबंधेनान्वयस्तदाह वनस्य समीपमिति यस्य दैर्घ्यमिति यद्दैर्घ्यं सदृशं दैर्घ्यमित्यर्थः अत्रापि लक्षणत्वं वस्तुस्वे वनिमित्तम्
तद्रूमयन्नाह गंगाया अन्विति तद्योत्यसंबंधेनान्वयाभावान्न द्वितीया उपलक्षितेति विशिष्टेत्यर्थः दैर्घ्यविशिष्टत्वमनोरर्थः तथा बोधे च गंगाया ज्ञापकत्वस्य गंगा
समीपे गत इति बोधे गंगाया ज्ञापकत्वस्य च नियमेन मनसा बोधादन्यलभ्यत्वेन नात्र तद्द्योत्यमिति तात्पर्यम् तेन संबंधेनान्वये तु वनमनु गंगामन्विति द्वितीयैवेति
बोध्यम् निविश्य गंगामनु तां महानदीं च मूमिति रामायणे प्रयोगात् वाराणस्याः स्वरूपेण ज्ञातत्वव्याप्यायामवेशिष्टेन ज्ञाप्यत्वं बोध्यम् तिष्ठद्गुप्र न्वैनेषां त्वप्रवेश
न आतिष्ठद्गु जपेत्संध्यां पश्चिमामाय तीगवादिति भट्टिश्लोके आतिष्ठद्गु आ आयतीगवादिति भिन्ने पदे इह उक्तोदाहरणद्वये तत्राद्यैशत्रा देशमात्रम् मय
मासामानाधिकरण्यात्तदप्राप्तिः यद्यपि पञ्चन्युरुष इति वक्ष्यति तथाप्युपयानान्तरमिदम् समासान्तश्चेति इदमन्ये चेनान्यपदार्थेऽव्ययीभावइति बोध्यम् पश्च
षष्ठीति अयंभावः महाविभाषैकार्थीभावस्य विकल्पबोधिका वृत्तिश्चैकार्थीभावे नित्यैवेति येन नाप्राप्तिन्यायेनाव्ययीभावस्तत्पुरुषं बाधेत यथैकदेशिसमासः
षष्ठीतत्पुरुषमिति पक्षे तदभावप्रयुनर्वाग्रहणमिति संख्येत्यादित्रिसूत्रीस्वभावात्समानाधिकरणविषयावंश इति एकस्वभावः संतानप्रबंधो वंशः द्वौ मुनी ॥
पाणिनिकात्यायनौ त्रिमुनि भाष्यकृत् तौ च स्वपदार्थप्राधान्य एवायं समासः नन्वेवं त्रिमुनि व्याकरणमिति सामानाधिकरण्यानुपपत्तिरत आह विद्येति अन्ये तु व
हुव्रीहौ त्रिमुनि व्याकरणमव्ययीभावे व्याकरणस्येति स्वरभेदश्चेष्ट एवेत्याहुः परे तु विद्यावंशो नाम गुरुशिष्यपरंपरा न चैतस्य मुनित्रयस्य तत्त्वमानमस्ति त्रिमुनिव्या
करणस्येति पदशिष्यनेकदेशंतिष्ठद्गुप्रभृतिषु पाठात्साध्यमित्याहुः मूलं तु वृत्त्यनुसारेण किंचन हि त्रिपुत्रो हि पुत्रव्यपदेशं लभत इति न्यायेन हि मुनीति व्यवहारा
संगतिर्बोध्या जन्मनोदाहृतिति एकविंशतीति एकविंशतिभरद्वाजा वंश्या इति विग्रहः वृतीनक्ती यासंप्रम्यो रितिसूत्रस्थ भाष्यप्रयोगात्तत्प्रामाण्ये मोपकोदिष्व रम॰
नयोः पाठात्पत्र त्रो श्चेति लुगभावो बोध्यः नदीभिश्च अत्र च बहुवचननिर्देशान्नसंज्ञाया ग्रहणं नापि शब्दस्वरूपस्य शब्दसंज्ञात्वाच्च किंतु नदीत्यर्थग्रहणं ६

तेनतद्वाचकेसर्वत्रप्रवृत्तिः एतच्चसंख्यासंज्ञासूत्रेभाष्येस्पष्टम् समाहारेचेति तत्रैवेत्यर्थः एवंचतदविवक्षायांपूर्वकालैकेतिसमासेएकनदीतरः सिद्धोऽन्यथासमाना-
धिकरणतत्पुरुषंबाधित्वाव्ययीभावेनपुंसकह्रस्वापत्तिः अच्चात्यन्वेवेतियोगविभागसिद्धोऽभियुक्तोक्तोगोदावर्याश्चनद्याश्चसंख्यायाउत्तरेपदेइत्यत्रतुनयोगवि-
भागस्येष्टसिद्ध्यर्थत्वात् अभ्युपकृतातदनुक्तेश्चेतिभावः अन्यपदार्थेसंख्येतिनिवृत्तं नदीग्रहणमनुवर्त्तते संज्ञानवगमादिति संज्ञेतिकर्मण्यड् तेनसंज्ञिनोदेशविशेष-
स्यानवगमादित्यर्थः नित्यसमासइति तत्सदृशइत्यर्थः तत्सादृश्यंचसमाससमानार्थकवाक्याभावेन समासघटकपदानांविग्रहस्त्वस्त्येवमहाविभाषायाअ-
संबंधेमानाभावात् अतएवद्वितीयतृतीयेतिसूत्रेऽन्यतरस्यांग्रहणेनोत्सर्गापवादयोर्महाविभाषाविषयत्वेऽपवादाभावेउत्सर्गप्रवृत्तिरित्यर्थेज्ञापितेउन्मत्तगं-
गमित्युदाहृतं अव्ययीभावेनमुक्तेबहुव्रीहिर्नेतिचोक्तंभाष्ये अस्यनित्यत्वेतेनमुक्तइत्यसंगतिःस्यादेव एवमन्यत्रापिबोध्यम् समासांताः अत्रसमासपा-
देतत्संबंध्यलौकिकविग्रहवाक्यपरमेवमव्ययीभावादिपदान्यपितत्पराणि अतएवबहुकुमारीकइत्यादौह्रस्वोनगोस्त्रियोरित्यत्रभाष्येस्पष्टमेतत् अंतइति
सूत्रेभाष्येच एवंचालौकिकविग्रहवाक्येसमाससंज्ञासमकालमेवसमासांताइतिसिद्धान्तः नचपूर्वंसमासांतेतत्तन्नियोगनिष्ठाद्युदात्तत्वेनदेकवाक्यतापन्ने
पूर्वस्यनिघातेचकृते पूर्वपदस्योदात्तस्वरितयोगित्वाभावेनपूर्वपदप्रकृतिस्वराप्रवृत्तौऽचश्चित्त्वंव्यर्थमितिवाच्यम् तत्सामर्थ्येनसमासांतविधावाद्युदात्त-
त्वस्यासंबंधज्ञापनात् तेनसमृद्धापूर्येस्यसमृद्धपुरोराजेत्यादौपूर्वपदप्रकृतिस्वरसिद्धिः द्वित्रिभ्यामितिसूत्रस्थंसमासेकृतेसमासान्ताइत्येतत्पर्यंभाष्य-
मेकदेश्युक्तिरुक्तभाष्यद्वयविरोधादित्यन्यत्रप्रपंचितम् अनशब्दश्चरमावयववाचीसचसमुदायावयवः अतएवोपशरदमित्यत्रनाव्ययीभावादित्य-
म् अव्ययानांमितिटिलोपाभावश्चसिद्धः पूर्वभागस्याव्ययीभावत्वाभावेनानव्ययत्वात् यत्तुकैयटेनगोस्त्रियोरितिसूत्रेसमासपदस्यसमासार्थविग्रहवा-
क्यस्योत्तरखण्डलक्षणयोत्तरपदावयवत्वमुक्तं तथासरूपसूत्रेउक्तंउत्तरपदावयवत्वमित्यपिभाष्यकारस्यमतमितितन्न फलाभावात् द्विपुरीत्यादौस्त्री-
त्वस्यलोकतःसिद्धेः लिंगमशिष्यंलोकाश्रयत्वाल्लिंगस्येतिभाष्येणलिंगप्रकरणस्यनियमार्थत्वाभावबोधनात् अतएवपरवल्लिंगमितिसूत्रसत्वेपिद्वि-
नावमर्द्धखारमित्यादौनपुंसकत्वसिद्धिः पंचराजमित्यादावपितत्प्रवृत्त्यापत्ता वकारांतोत्तरपदेत्यत्रोत्तरपदग्रहणस्यव्यर्थत्वापत्तिश्च अंतइत्यादिसू-

सा कौ. त्रस्थभाष्यविरोद्ध वोत्तरपदावयवत्वम् एवंहितत्रभाष्यम् समासस्यांतोदात्तत्वमुत्तरपदस्यवेतिविकल्पेत्र्याद्येइदम्प्रथमकाइत्यादौकपोनोदात्तत्वापत्तिमुक्त्वाअंत्येकर्
स. वइत्यत्रांतोदात्तत्वसिद्धिरित्युक्ताउभयोरपिप्रकरणेनलक्ष्यानुसाराच्चकचिदुत्तरपदांतस्य क्वचित्समासांतस्योदात्तत्वमिति सरूपसूत्रस्थभाष्यंतदनाश्रयणेपियोज॥
३५ यितुशक्यम् तथाहि कृत्तद्धितानांविभक्तौपरतएकशेषइतिपक्षेकक्चकक्वाचक्रचैौअसारूप्यादेकशेषोनप्राप्नोतिइतिभाष्येसमासांन्तानांसमासावयवत्वेपितत्त्रा
गभागस्यविभक्तिःपरत्वाभावस्तद्विशिष्टस्यनसरूपत्व मितितद्भावः नचतस्यानर्थक्येनतदनुक्त्याभाष्यस्यन्यूनता इद्वावयवानामर्थवतामेवैकशेषइत्यर्थे॥
मानाभावात् विशिष्टरूपोपादानाभावेनतत्परिभाषायाइहाप्रवृत्तेः भाष्यांतरंतुतादृशंनोपलभ्यतएवेतिदिक् सचसमासांतोवहुजसगोमत् जसित्यवस्थायाम॥
लौकिकेवाक्येसुपःपरत्वादेव ततःपूर्वत्वेतुवाच्यार्थविरोधः नहिसुवहितंसमासार्थकिंतुतद्विशिष्टमेवे नचविशिष्टस्यसुवंतत्वाभावेनसुवन्तात्तद्धितइतिसि
द्धान्तविरोधःतेषामर्थाभावेनपरिपूर्णपदमितितन्मूलभूतन्यायस्यात्रविषयाभावात् अतएवपुंयोगादितिसूत्रेऽन्यंतस्वार्थिकानांसुवुत्पत्तेःपूर्वमेवोत्पत्तिर्भाष्येउक्ता
किंचसमासांतप्रकरणेङ्याप्प्रातिपदिकादित्यस्याप्यसंवंधः तस्यावस्थायांवाक्यस्याप्रातिपदिकत्वात् तत्रकवुत्पत्तिकालेएवतत्पूर्वभागस्यसमाससंज्ञाविरोधाभा॥
वात् समासांतस्यचतद्वाक्यावयवत्वेनतद्ग्रहणेनग्रहणात् वहुकुमारीकइत्यादावुपसर्जनस्त्रीप्रत्ययांतप्रातिपदिकाभावान्नह्रस्वः कप् ह्रस्वादन्तरंगतरः तादर्थ्या
त्ताच्छब्द्यम् येषांपदानांसमासोनतावत्तेषामन्यद्भवतिकपंतावत्प्रतीक्षतइतिभाष्येणस्पष्टम् तथाभिधानात् तत्राद्यस्यतावदित्यस्यकपःप्रथममित्यर्थः अन्य
समाससंज्ञारूपं कपासहस्वभवनायकपंपश्यतीत्यर्थः पूर्वस्यप्रवृत्तौहितदर्थकवाक्याभावेनकप्शास्त्रवैयर्थ्यमियाहितद्भवनकालप्रतीक्षा अन्यथातदन
पेक्षत्वेनकप्प्रतीक्षोक्तिरसंगतास्यात् अतएवप्रत्ययस्थादितिसूत्रभाष्यादाहतेवहुचर्मिकेत्यादावापःसुपःपरत्वाभावादित्वसिद्धिरितिदिक् अथाव्ययीभावे
ऽसाधारण समासान्तानाह अव्ययीभावे अव्ययीभावे उत्तरपदतयावर्तमानं यच्छरदादिप्रकृतिकसुवंतं तदंतात्टच् सचसमासार्थविग्रहवाक्यस्यांतावयव
इत्यर्थः राजाहइत्यतष्टजनुवर्तते अन्तेनादव्ययीभावादित्यादितुफलितार्थपरतयाकथंचिन्नेयम् अत्रगणेयेङ्यंतास्तेषांङ्यइतिविकल्पेप्राप्तेनित्यार्थः॥ एम:
पाठइतिकेचित् प्रत्यक्षमिति लक्षणेनाभीतिसमासः परोक्षमिति इन्द्रियाजन्यं ज्ञानविषयेत्वर्शआद्यजंतः प्रयोगः नन्वत्राव्ययीभावाप्राप्तिरतआह सांमा॥ १७

व्योम्नि इति परस्योकारेति परशब्दस्य ओकारोन्तादेश इत्यर्थः एङ इति पूर्वरूपत्वं परस्योकारेति पाठे परस्याक्षिशब्दस्यादेरुकार इत्यर्थः आद्गुणः अशि आद्यचीति धर्मे
परादिति भावः अत्र गणसूत्रे परग्रहणं प्रक्षिप्तमिति परोक्षे लिडिति सूत्रस्थभाष्यकैयटस्वरसः तत्र हि स मासो तोपि निपातनात्साधितः पूजार्थमिति
वेति वर्तते तत्पूजार्थमपीत्यर्थः अन्यतरस्यांग्रहणस्य तु स्वरितत्वं नास्त्येव अत एव नदीपौर्णमासीति सूत्रे नदीशब्देन विशेषाणामग्रहणे शरदादिषु विपाट्
शब्द पाठस्य ज्ञापकत्वमुक्तं संख्यासंज्ञासूत्रे भाष्येन नदीत्यादेर्वैकल्पिकत्वे नित्यत्वाय पाठस्यावश्यकतया ज्ञापकत्वासंगतिः स्पष्टैव तत्र ज्ञ यन्तपाठ
स्तु प्रपंचार्थः तत्र नदीसंज्ञकस्य नग्रहणं पौर्णमास्यादिग्रहणात् नचाशब्दसंज्ञेति निषेधात्स्वरूपस्यापि ग्रहणं न स्यादिति वाच्यम् लक्ष्यानुसारेण सामर्थ्येन च त
स्यात्र त्यागात् अत एव तत्सूत्रे भाष्ये प्रत्याख्यातमिति प्रामाणिकाः ॥ ॐ ॥ इत्यव्ययीभावः ॥ ॐ ॥ चकारबलेनेति संख्यापूर्वो द्विगुरिति योगं विभज्य पूर्वेण सं
ख्यापूर्वस्य तद्धितार्थे त्यत्रोक्तस्य तत्पुरुषसंज्ञाविधानसामर्थ्यादेव पर्याये सिद्धे चकारः समावेशार्थ इति भावः श्रितेति श्रितादीनां सुवंतत्वासंभवात् श्रितादि
प्रकृतिकैरित्यर्थलाभः येन विधिरिति सूत्रस्थभाष्यप्रामाण्येन संबुद्धिस्त्रीलिंगप्रथमांतभिन्ने पि प्रवृत्तेरावश्यकत्वादिति भावः समर्थविशेषणत्वात् श्रितादी
नां प्राप्तौ पि तदंतविधिः समासप्रत्ययविधाविति निषेधान्न भवति तदंतविधौ हि श्रितायंतसमर्थप्रकृतिकैरित्यर्थे कष्टं परमश्रित इत्यादावपि समासापत्तिः
कष्टं श्रित इति नलोकेति षष्ठीनिषेधः पतितशब्देत निपतिदरिद्रातिभ्यः सनीवेट्कत्वेन यस्य विभाषेति नेण्निषेध प्राप्तावपि अत एव निर्देशाद्दिट् बोध्यः अ
योग्यत्वादिति स्वपमित्यात्मनेत्यर्थे कंकर्तृ शक्तिप्रधानमित्यर्थः स्वायंकृतिरिति असमासे कार्त्तिरिति स्यादिति भावः ऐकस्वर्यमपि समासफलम् ख
द्वा अस्य तत्प्रकृतिके लक्षणया द्वितीयेत्यनेन सामानाधिकरण्यम् जाल्म इति तेन केवलरूढत्वं तस्य सूचयति एतेन प्रकरणादिसहकृतवाक्येन निंदा
प्रतीतिसंभवान्न हि निंदा इत्ययुक्तमित्यपास्तम् योगरूढे तत्संभवेपि केवलरूढे तदभावात् न हि निंदेत्यस्य च विवक्षितानित्यर्थः सामीत्यर्धे कालाइति
॥ लवाचिन इत्यर्थः बहुवचनात् ननुक्तेनेत्यस्य निवृत्त्या क्तान्तान्तां न साधारणोत्तरसूत्रेण सिद्धे योगविभागो व्यर्थ इत आह अनत्यन्तेति परिच्छेत्तुमिति रमेर्योगे शकधृषेति तुमुन्
अत्यंत अत्यंतसंयोगान्त्यंतसंयोगसाधारणेन पूर्वेण सिद्धे इदं किमर्थमत आह क्तान्तार्थमिति क्तेनेति अत्र नानुवर्तन इति भावः तृतीया इदं सूत्रं कृतद्वा

श·कौ· रकएवसामर्थ्येप्रवर्तितेनसा स्रात्य रस्य ान्वये उत्तरसूत्रेण निपुणश्लक्ष्णाभ्यांसमासविधानात् तद्योगेहिहेतौतृतीयातत्कृतेत्युक्तेश्चस्पष्टंचैतद्भाष्ये गुणेत्यस्य
स· तत्कृतेस्येतत्सापेक्षत्वेपिसौत्रत्वात्समासः खण्डशब्दश्चखण्डगुणवत्वेनशकलबोधकइतिशंकुलाखण्डइत्यत्रकृतद्वारकमेवसामर्थ्यंशंकुलाकृतखण्डगुणवानित्य
३६ र्थः वचनग्रहणंतुगुणोपसर्जनद्रव्यवचनेनैवसमासार्थम् तेनकुसुमभेनकृतंरूपमित्यादौन घृतेनपाटवमित्यादौचनस्पष्टंचेदंभाष्ये यद्यपिजातिसंज्ञाकृदं
ततद्धितान्तसमस्तसर्वनामसंख्याशब्दभिन्नशब्दानामेवगुणवचनसंज्ञातथापिप्रकृतेव्याख्यानात्शुद्धयौगिकएवगुणवचनशब्दइतिबोध्यम् तृतीयां
तार्थेनकृतोयोगुणस्तद्वचनेनसमासइत्यर्थात् तत्कृतेत्यस्यगुणपदेनैवान्वयेनसंज्ञानुपादानाच्चगुणेनेतीयतासिद्धेवचनग्रहणात्कृपमुक्तवतेत्यर्थइतिभाष्य
च्चगुणपदेनधर्ममात्रमनेनखण्ड शब्दस्यक्रियावचनत्वेपिनदोषः धान्येनेति अर्थशब्दोधनपरोहेतुतृतीयेतिबोध्यम् पूर्वसदृ॰ यद्यपिसदृशशब्देनषष्ठी।
समासःसिद्धस्तुल्यार्थैरित्यनेनतद्योगेषष्ठ्या अपिविधानात्एतस्याश्चनप्रतिपदविधानत्वमितिवक्ष्यते अतःप्रतिपदविधानाषष्ठीनसमस्यतइतिनिषेधो
ऽत्रन पूर्वपदप्रकृतिस्वरोपिसदृशप्रतिरूपयोरितिसिद्धः तत्रहिंदास्याः सदृशइत्यादौषष्ठ्या अलुकिपूर्वपदप्रकृतिस्वरार्थंसदृशग्रहणमावश्यकंमनसा
सदृशइतिसंज्ञानास्त्येवेतिनतदर्थमिदमावश्यकंतथापिभोजनेहेतुकसादृश्यवानित्यर्थेभोजनसदृशइत्यत्रसमासार्थमिदमावश्यकं हेतोःशेषत्ववि
वक्षयाषष्ठीसमासेतुपूर्वपदप्रकृतिस्वरासिद्धिः सादृश्यग्रहणेनसदृशप्रतिरूपयोरित्यस्योपमानबोधकपूर्वपदकेएवप्रवृत्तेरितिस्पष्टंसदृशप्रतिरूप।
योरित्यत्रभाष्ये यदितु भोजनेनकृतःसदृशइत्यर्थेपूर्वसूत्रेणसमासेनत्वस्तुरूपेषु तुल्यार्थैरित्यनेनस्वरोपिसिद्धइत्युच्यतेतदासदृशग्रहणंव्यर्थमेवेतिप्रकृतसूत्र
कैयटेनध्वनितं सदृशेतिस्वरविधायकसूत्रशेषस्यभाष्यंतुएकदेश्युक्तिरितितदाशयः मिश्रंचेति पणबंधेनैकार्थ्येसंधिस्तत्रागम्यमानेमिश्रइत्युत्तरपद।
मनुपसर्गंकृतोयोनात्यरमंतोदात्तमित्यर्थः अवरस्येति यद्यप्ययमूनार्थोपितथापिव्यवस्थाविषयावरार्थमिदं भाष्येऊनार्थेत्यर्थग्रहणस्यतृतीयेतिसूत्र
भाष्यारव्यानात्समर्थसूत्रेतृतीयातत्कृतेत्युपन्यासोपादानविकल्पइत्युदाहरणाच्च अत्रोनर्थग्रहणंनतिवादिनांमतेसर्वथाप्यावश्यकत्वाच्चेतिदिक्. कर्तृ पस·
करणेचेति सूत्रेसमासाधिकारःद्वात्सप्तम्येकवचनमितिभावः तृतीयेति तृतीयान्तमित्यर्थः कृद्ग्रहणेइति यत्रगतिकारकसमभिव्याहारंकृदंतंतत्रकृदित्यादिशिष्ट ८

स्येव ग्रहणं अपिशब्दात्तदसमभिव्याहृते केवलस्यापीत्यर्थः इत्यन्यत्र विस्तरः कृतेति किमिति सुपेत्यधिकारेण तिङं तेनाप्रसंगात् कर्त्रीयास्तिप्रधानार्थे क्रियाबोधकत्वे
दंतेनैव भविष्यतीति प्रश्नः काष्ठैरिति अन्येतु कृदंतेनैव समासो यथा स्यान्न सुबंतेनेत्यर्थं त॥ दुक्तोदाहरणे तु शानजंतादिभिरेव बहुलग्रहणेन वारयितुं शक्यइति प्राहुः
अर्थवादः श्राशायितोर्थः काकपेयेति शक्यार्थे कृत्यः पूर्णभक्त्वेन कोमलत्वेन च नद्युत्तिरस्थां भस्त्वेन दुर्बलत्वेन निंदा वा इहांतर्भूतेति तां विना दध्नः संस्कार्यत्वेन प्रतीता
न्नसंस्कारकत्वानुपपत्तेरिति भावः तदुक्तं भाष्ये युक्तार्थसंप्रत्ययाच्च सामर्थ्यमिति दध्ना युक्तो योर्थ उपसेकादिस्तत्संप्रत्ययादित्यर्थः सर्वलोकव्यवहारप्रसिद्ध्या च तद
र्थांतर्भाव निश्चय इति च अन्नशब्देनात्रौदनः भिस्सा स्त्री भक्तमंधोन्नमिति कोशात् न तत्र तस्य रूढेर्योगाच्च रूढिर्बलीयसीति बोध्यं मिश्रणेति। तां विना मिश्रीक
रणत्वायोगादिति भावः तच्छब्देन चतुर्थ्यंतार्थ इत्याशयेनाह चतुर्थ्यंतार्थायेति तादर्थ्ये चतुर्थी बलिरक्षितग्रहणादिति तद्योगे हितादर्थ्ये चतुर्थी हितशब्दयोगे चास्मादे
व ज्ञापकाच्चतुर्थी हितसुखाभ्यामन्यापकाराजननेन तद्योगे तादर्थ्ये चतुर्थ्या असंभवात् एतत्सर्वं भाष्ये स्पष्टं षष्ठीसमासाइति रंधनाय स्थालीत्यादावभिधानस्वाभा
व्यात् तादर्थ्ये त्वेनैव तस्य भानेन संबंधत्वेनेति षष्ठ्यभावान्न तत्र षष्ठीसमासः चतुर्थीसमासवारणाय तु प्रकृतिविकृतिभाव एवेत्युक्तं अश्वघासादावुपकारकत्वेन
बाधे वाक्यमेव संबंधत्वेन बोधे षष्ठ्यंते न समासोपीति व्यवस्था रंधनार्था स्थालीति मध्यमपदलोपि समासोपि तत्र नानभिधानादिति भावः एतेन षष्ठीसमासेन रंधन
स्थाल्या अपीष्टत्वात् प्रकृतिविकृतिभाव एवेति व्यर्थं चतुर्थीसमासेपि चतुर्थी तदर्थ इति पूर्वपदप्रकृतिस्वरोन तस्य प्रकृतिविकृतिभाव एव प्रवृत्तेः अन्यथा गोर
क्षितमित्यत्राप्यनेनैव स्वरसिद्धौ क्तेनेति व्यर्थं स्यात् न च हितार्थं क्ते चेत्यत्रापि तदर्थ इत्यनुवृत्तेः अतएवास्योक्तार्थज्ञापकता परं भाष्यसंगच्छत इत्यपास्तं अर्थेन शब्द
स्य नित्यं पुंस्त्वेन परवल्लिंगमित्यस्य बाधायाह विशेष्यलिंगता चेति एतदेवात्र विधेयं नित्यत्वं तु चतुर्थ्योक्ता तादर्थ्ये स्योक्तत्वादर्थशब्देन विग्रहाप्रसक्ते र्न्यायसिद्धं
गुरोरिदं गुर्वर्थमित्यादाविव यदिलिंगमपि लोकतः सिद्धं तदेवं स्पष्टार्थं भयभीतेति निर्गतजुगुप्स्ये रप्युपलक्षणमिदं भोगोपरतवन्येतरादिषु सुप्सुपेति समा
सः मयूरव्यंसकादित्वाद्वा अल्पं पंचम्यंतमिति कानिचिदेव पंचम्यंतानि समस्यंत इत्यर्थः अमंगलसंबंधाभावेप्यल्प इत्यस्मादेव निपातनात् स्तोका
न्तिक स्तोकार्थोऽल्पशब्दएव न लेशादयो व्याख्यानात् स्तोकाल्पाभ्यां कृच्छ्राच्च करणे च स्तोकेति पंचमी दूरांतिकार्थेभ्यो द्वितीया चेत्यनेन तेभ्यइति बोध्यं प्रतिपदोक्तपरिभा

ल॰ शे॰ त्वान्नलोपः गुणान्तरेण इदंच पूरणाद्गुणेत्यस्यापवाद इति सर्वे गुण इति सूत्रे भाष्ये ततः सर्वे पदानुवृत्तेः सर्वेशब्द एवेदं गुणबोधकाद्विहितो यस्तरप्रदंतेन सर्वेशब्दस्य
स॰ समास इति व्याख्यार्थः गुणाद्विहिततरवंतं च गुणवाच्येवेत्याशयेनाह तरवंतं यद्गुणेत्यादिनतु यतो निर्धार्यते यश्च निर्धार्यते यश्च निर्धारणहेतुस्तत्त्रितयसन्निधान
३७ एवायं निषेधो युक्तो निर्धारणषष्ठी च युक्ता स्पष्टं चेदं तरब्विधायके कैयटे अतो नात्रास्य प्राप्तिः सर्वेषांश्वेततर इत्यादौ तमबापत्तिश्चेत्यरुचेराह पूरणेत्यादि द्रव्या
नराधेयश्चेन्नापेक्ष्यासर्वेषांप टानामधिकोयंश्वेतो गुण इत्युदाहरणार्थः एवंचत रबुपपन्नः कृद्योगा चेति प्रतिपदविधाना न समस्यत इत्यस्यापवादः न
निर्धारणे द्विजादिशब्देः प्राप्तस्य निषेधोयं पुरुषाणामुत्तम इत्यत्र त्रितयसन्निधानाभावान्न निर्धारणविभक्तिः किंतु संबंधसामान्ये षष्ठीति नयासमासः अत एव
हलादिः शेष इति सूत्रे किमयं हलामादिरिति षष्ठीसमास इति भाष्ये उक्तं गुणवचनेन निषेधस्त्वनित्य इति तरपूसूत्रे कैयटः उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदा
हृत इत्यादिगीतावाक्यादत्र कर्मधारय इति लभ्यते राजदंतादित्वात्परनिपातः प्रतिपदेति ज्ञोविदर्थस्येत्यादिकृत्वोर्थ इत्यन्तसूत्रविहिता प्रतिपदविधाना यत्तु
तेषु शेषपदस्य संबंधे च शेष एव तैः षष्ठीविधानेन तत्र च षष्ठी शेषस्य प्रेनैव सिद्धेर्न तत्सामर्थ्यात्समासाभावः कल्प्यते तेन प्रतिपदविधानेतिना पूर्वमिति तन्न तत्त
द्धातुयोगे उपात्तकारकातिरिक्तकारकाणां शेषत्वविवक्षाभावज्ञापने नापि चारितार्थ्यसंभवात् किंच कृत्वोर्थप्रयोगे ज्ञोविदर्थस्येत्यादिविषये समासनिषेधा
नापत्तिः तत्र शेषग्रहणनिवृत्तेः सर्वसंमतत्वात्कृत्वोर्थ इत्यत्र तत्संबंधे भाष्यानुग्रहाभावात् एवं ज्ञोविदर्थस्येति सूत्रेपि तत्संबंधेनात्यंतभाष्यानुग्रहः अधी
गर्थेत्यादौ मंडूकानुवृत्तिः एतद्वदिव इति सूत्रे विस्तरेणोपपादितं शानस्य देवितेत्यादौ तु न योगे कर्तृकर्मणोरित्यस्य निषेधेनानेनैव षष्ठ्याः समासनिषेधस्य भ
वत इष्टत्वात् अत एव भाष्येनेदं प्रत्याख्यातं अत एव प्रतिपदविधानाकेति प्रश्ने सर्वा प्रतिपदविधाना शेषलक्षणां वर्जयित्वा कर्तृकर्मणोः कृतीति च कृ
द्योगेति भाष्ये उक्तं तत्र शेषलक्षणामित्यस्य शेषमात्रलक्षणामित्यर्थः प्रतिपदविधानेत्यस्य कारकविशेषोपादानेन विहितेत्यर्थः तेन तुल्यार्थैरित्यादेर्न तत्व
मित्यलं पूरणाद्यर्थैरिति आदिना गुणसुहितौ अत्र पूरणार्थत्वेन पूरणात्स्वार्थे तीयादनिति अनंतस्यापि ग्रहणं व्याख्यानात् गुणार्थशब्देन केवलगुणवाची रम॰
सन्नगुणोपसर्जनद्रव्यवाची गुणिबोधकप्रकृतिकभावप्रत्ययांतश्च गृह्यते व्याख्यानात् तदाह काकस्येति आकडारसूत्रोक्तगुणवचनानां तु नेह ग्रहणं वचनप १

दानुपादानात् तदेव तिति। अन्यथा ब्राह्मणस्येयं दंता इत्यर्थे शुक्लपदेनासामर्थ्यात्समासप्राप्तिरेव नेति भावः इदानीं तु शुक्लशब्द एव विशेष्यसमर्पक इति नास्य
ये परंतु स्वमपि सामर्थ्यं दुरुपपादं षष्ठ्यंतं समर्थप्रकृतिकेन सुबंतेन समस्यत इत्यर्थे नादोषात् अत्र हि सुबंतेन शुक्ला इति पदेन वाक्यैकदेशन्यायेन शुक्ला दंता
इत्यर्थबोधः एवं च सुबुत्पत्तिः शुक्लशब्दात्स्वार्थे एवेति न समर्थप्रकृतिकता सुबंतस्य अत एव ब्राह्मणस्य ग्रामं गत इत्यर्थे के ब्राह्मणस्य गत इति वाक्ये प्रक
रणादिना ग्राममित्यर्थे स्यात् न्यायेन गत इत्यनेनोक्तो समासो नेष्यते च तत्र समास इति कर्मणि चेति सूत्रे भाष्यकैयटयोः तस्मात्काष्ण्यादय एवात्रोदाहर
णं गुणिपरतापि शुक्लादीनां विशेष्यद्रव्योपादाने प्रकरणादिना तद्वगतौ वा नान्यत्राभिधानस्वाभाव्यादित्याहुः अनित्योयं गुणेनेति पूरणार्थेनेति च बोध्यं।
इत्यादीति लोपे चेत्यादपूरणमित्यादिशब्दार्थः तेन कुंभपूरण भव उडुपषष्ठ इत्यादि सिद्धं परेतु एषु कुंभसंबंधिपूरणानुं व्रज्ञुसंबंधी षष्ठ इति मध्यमपदलोपी।
समासः तत एव भाष्ये नित्यत्वं नोक्तमन्यत्रास्यानभिधानमत एव सर्वे श्वेत इत्यादौ गुणेन नेति निषेधात्कथं समास इत्याशंक्य गुणोत्तरेण समासस्तर
लोपश्चेति वचनमारब्धं सर्वे गुणे जित सूत्रे भाष्ये संख्याशब्दास्तु भाववचनाः इति योजनशतादौ क्रोशशतादौ गोविंशतिरित्यादौ च नायं निषेधः तथा च पंक्ति
विंशतीति सूत्रे भाष्यं नेऽएते विंशत्यादयः समुदाये संतो भाववचना भवंतीति विंशत्यादिषु भाववचनेष्विति च यत्तु तत्रैषां गुणवचनत्वव्यवहारः सोपि सत्त्व
तन्सादृश्यात् अन्यथा गावो धनमित्युपक्रम्य धनमेको गुणः अपत्यमेको गुण इत्यपि भाष्योक्तेश्चैत्र धनं चैत्रापत्यमित्यादिनस्यादिति वदंति सूत्रे।
सुहितेति भावे क्तः तेन फलानां तृप्तिरित्यादावपि निषेधस्तदाह तृप्त्यर्था इति तृतीयेति तत्र करणत्वेन भानं षष्ठीसमासे संबंधत्वेनेति भावः श्रौत विशे
षमप्याह स्वरे विशेष इति तृतीयासमासे तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरस्यापवादः षष्ठीसमासे त्वंतोदात्तः तृप्त्यर्थानां सकर्मकत्वात्क
र्मणि क्तः द्विजस्येति कुर्वन्नित्यपेक्षया न कर्मणि षष्ठी न लोकेति निषेधात् नापि घटाद्यपेक्षया सामर्थ्यात्समासापत्तेः किंतु शेष इत्याह किंकर इत्यर्थः।
भृति रक्षित इति अत एव सर्वे पश्यादिति भाष्यप्रयोगः संगच्छते प्रकृतसूत्रे भाष्ये पि अक्तेद्व्ययैरुच्चैरादिभिः सामर्थ्ये न समासाभावे मुक्त्वा क्तेद्व्ययमे
वोदाहृतं तेनान्याव्ययैः सति सामर्थ्ये समास इष्ट इति गम्यते परे तु द्विजस्य कुर्वन् कृत्वेत्यादौ कारकषष्ठ्या निषेधात् कटाद्यपेक्षया शेषषष्ठ्यां त्व सामर्थ्या

ल॰ शे॰ समासप्राप्तिरेवनेत्याशंकाद्विजस्यद्विषन्पुराम्नर्ये स्योदेतोरित्यादौ द्विषः शतुर्वावचनंनोसुनकसुनोरप्रतिषेधइतिकारकषष्ठीसत्वात्तत्रोदाहृतंभाष्ये तस्मादेदृशवि

स॰ षयेकर्मणःशेषत्वविवक्षायाःतादर्थ्यस्यसंबंधत्वविवक्षायाश्चाभावएवपाणिनितात्पर्यनिर्णयायेवभाष्यकृतःप्रवृत्तेरित्याहुः स्वकर्त्तव्यमिति कर्तृषष्ठ्यासमासःतस्

३८ कस्येति परिनिष्ठितविभक्त्यासमासः अत्रपरत्वात्समानाधिकरणसमासंबाधित्वाषष्ठीसमासः प्राप्तः।किंदोपिकर्मभीष्माद योपीतिपक्षेपरस्परान्वयएवेतिनासामर्थ्यं

क्रियान्वयनियमश्चनसाक्षादेवकिंतुयतद्द्वाराकारकत्वंतद्द्वारकोपीत्युक्तं अतएवैतन्निषेधसामर्थ्यंतत्पक्षे नचसमानाधिकरणामसमर्थवदित्यसामर्थ्यं।

समानाधिकरणाधिकारेसमानमध्यमवीराश्चेतिपाठेनतस्यसमानाधिकरणाधिकारस्थसमासाविषयत्वेप्यन्यत्राप्रवृत्तौमानाभावादिति वाच्यं अधात्वभि

हितमित्युक्त्याधात्वर्थप्रत्ययेनकर्माभिधानेयजुषःपीयमानस्येत्याद्यर्थमावश्यकत्वात् स्पष्टंचेदंभाष्ये समर्थसूत्रभाष्यकृतःप्रकरणांतरस्थेइसुसोरितिष

त्वेपितत्प्रवृत्तिरित्यन्यत् ननुषष्ठीसमासस्यनिषेधेपिविशेषणसमासेनद्रुवोरइतिनिषेधेफलाभावोतआह।विशेषणसमासस्त्विति विशेषकविशेष्येणत्यु

भयोपादानेननत्वावच्छेदकधर्मयोःपरस्परंव्यभिचारएवविशेषणसमासप्रवृत्तिरितितुनयुक्तं कैलासाद्रिरित्यादौसमासानापत्तेरतएवोभयोपादानंस्पष्टार्थ

मितिकैयटः इह तक्षकस्यसर्पस्येत्यादौ तयोःसमासयोरत्रफलेविशेषाभावादितिभावः एवंप्रथमांतेनसमासइतिपक्षेपिषष्ठ्यंतेनतत्प्रयोगाभावएवानभिधा

नादितिबोध्यं

एतच्चभाष्यवृत्त्युदाहृतप्रयोगविषयं अतए

वान्यस्यपदस्यार्थेइत्यर्थेकोन्यपदार्थइतिसूत्रप्रयोगःसंगच्छते एवंचनीलोत्पलस्यगंधइत्यादिसाध्वेवनिषेधसामर्थ्यादितितुनोक्तं गमनस्यश्रेयसइत्या

दौकर्मधारयेप्रज्यावमकन्यायवत्सुभावेकर्मधारयइत्यनेनपूर्वपदप्रकृतिस्वरः षष्ठीसमासेत्वंतोदात्तत्वमितिभेदेननत्सामर्थ्यक्यात् फलांतरमप्याह।

गार्ग्येनोरितिनत्रहिषष्ठीसमासेगुणप्रवृत्तिनिमित्तकत्वेनाप्रधानत्वात्प्रथमानिर्दिष्टत्वाच्चधेनोःपूर्वनिपातोविशेषणसमासेतुगोरितिभेदइतिभावः आदि

नाभोज्यस्योसमस्येत्यादिसंग्रहः येतूपसर्जनसंज्ञामन्वर्थनाश्रयंतेतेषांषष्ठीसमासेपूर्वनिपातानियमइतितद्वारणायनिषेधोविशेषणसमासस्तुस्यादे राम॰

वेतिकैयटः परेतुप्रथमासानिर्दिष्टमित्यादिसूत्रभाष्योक्तरीत्याषष्ठीतिसूत्रेप्रत्यासत्त्यायेनसुवंतेनसमासस्तदर्थनिरूपितसंबंधाद्यर्थकषष्ठ्याग्रहणमेवं १०

च प्रकृतेन समासप्राप्तिरिति समानाधिकरणग्रहणं व्यर्थमेव ध्वनितं चेदमत्र भाष्ये तथा च भाष्यं समानाधिकरणे किमुदाहरणं एकदेश्याह राज्ञः पाटलि।
पुत्रकस्येमष्टाह नैतदस्ति। असामर्थ्यादत्र न भविष्यति उक्ताशय उदाहरणवाद्येकदेश्याह कथमसामर्थ्यं प्रेष्टेकदेश्याह समानाधिकरणमसमर्थवदिति उदा
हरणवाद्येकदेश्याह अ धात्वभिहितमिति तच्छेषात्सर्पिषः पीयमानस्येत्युदाहरणमित्युपसर्जनसंज्ञासूत्रस्थभाष्ये कवाक्यतया सिवंव्याख्यानस्यैवौचित्या
दित्याहुः व्याख्यानात्पूजायामिति सूत्रोपलक्षणमित्याह मतिबुद्धीति राज्ञां मत इति क्तस्य च वर्तमान इति षष्ठी अयं च कारकषष्ठीशेषषष्ठ्योरुभयोरपि स।
मासस्य निषेधः तयोः समासयोस्थाथादिस्वरसमासस्वराभ्यामन्तोदात्तस्यैव प्राप्त्या फले विशेषाभावात्तद्धु नयन्नाह भूतेक्तान्तेनेत्यादि न च वर्तमानेक्तो भू
तेक्तस्य बाधकस्तक्रकौण्डिन्यन्यायादिति वाच्यं भूतेक्तेऽवश्यं प्राप्ते वर्तमाने क्तस्यानारंभात् भूतत्ववर्तमानत्वयोर्युगपद्विवक्षाया असंभवात् दधिदानेऽवश्यं
प्राप्ते तक्रदानारंभाद्युक्तस्तेन दधिदानबाध इति बोध्यं कर्मणि च अस्य क्तेन न संबंधः पूजायां प्रतिषेधानर्थक्यात्तदाह कर्मणीतियाषष्ठीति चशब्द इतीत्यस्या
र्थ इति भावः एवं च क्तस्यानुवृत्तिरेव इक्षुभक्षिकेति धात्वर्थनिर्देशे ण्वुल् कर्मणि षष्ठ्याः समासः कर्तुः प्रयोगाभावेनोभयप्राप्तावित्यस्याप्राप्तेः कर्मणि चे
ति निषेधो न शंक्यः पर्यायार्हर्णोत्पत्तिष्विति भावे ण्वुजित्यन्ये पत्यर्थेति प्रसिद्धत्वेन तस्यैव तत्र ग्रहणादिति भावः कैयट इति प्रत्यासत्त्या कारकषष्ठ्या एव त
न्निषेध इति भावः गुणिविशेषक इति भाष्यप्रतीकमुपादाय वदत्स्विति सूत्रे कैयट एतत् कर्तरि च अत्र सामर्थ्यात्कर्तरि इति षष्ठ्याः स्वविशेषणं भवतः शायि
केति पर्यायेति एवं च धात्वर्थनिर्देशे ण्वुल् वा नित्यं क्रीडाजीविकयोर्निषेधस्य सिद्धे नित्यग्रहणाच्च विधिरयं दन्तानां लिखितेत्यादौ जीविकायां तृचोऽन।
भिधानात्क्रीडायां तृचः संभवाद्दित्युभित्त्वाच्च तस्यात्र संबंध इत्याह अकेनेति अके जीविकार्थ इत्यत्राकग्रहणं त्वर्थग्रहणवत्स्यष्टार्थं प्रतिपदोक्तत्वे
नेतद्विहितं समास एव तत्प्रशंसासिद्धेः संज्ञायामितीति यद्यप्यत्र धात्वर्थनिर्देश इत्येव सिद्धं संज्ञायामिति त्वधिकरणार्थमिति कैयटेन वक्ष्यते तथापि तदर्थ
स्य भावेऽपि प्रवृत्तिर्न्याय्या संज्ञायां विशेषविहितत्वाद्वारितार्थ्यो भावे पितस्य प्रथमं वुध्यारोहेण प्रवृत्तो नियामकत्वमस्तीत्यन्यत्र प्रपंचितं संज्ञायामिति।
ण्वुलित्येव पाठः उदाहरणेऽधिकरणे ल्युडिति तत्त्वं षष्ठीसमासप्रसंगे न तदपवादमेकदेशिसमासमाह पूर्वापरेति अवयवित्वं चावयवापेक्षं तद्वाचका।

ल॰शे॰ श्चोपस्थितत्वात्पूर्वादयएवेत्याह पूर्वादयइति अधिकरणंद्रव्यं एकत्वविशिष्टद्रव्येवर्तमानेनावयविवाचकेनेतिवाच्योर्थः फलितमाह एकत्वेति मध्यान्हइति।
स॰ राजाहइतिटच् अन्होन्हइत्यन्हादेशः अर्धनपुंसकं निर्देशादेवनपुंसकत्वेलब्धेनपुंसकग्रहणंसूत्रनिर्देशलिंगाविवक्षाज्ञापनार्थं नचसमांशवाचिनित्यनपुं
३९ सकग्रहणार्थंतत् एओङ्एचइगितिसूत्रेएचोह्रस्वशासनेअर्धैकारैकारयोर्विधानमाशंक्यनवेदेनैवलोकेर्धेएकारोर्धओकारोवास्तीतिभाष्यप्रयोगात्समांश
वाचिनोपिनित्यनपुंसकत्वाभावात् अवयववाचीतुपुल्लिंगएव अपूपार्द्धंग्रामार्धइत्याद्यपिसमप्रविभागएवेत्याहुः पिप्पल्याएकविभक्तौत्युपसर्जन
त्वाद्ध्रस्वत्वंस्यादतआह एकविभक्ताविति नन्वेवंपंचानांखट्वानांसमाहारइतिविग्रहेपंचखट्वीतिनसिध्येदतआह एकदेशीति इदंचापथंनपुंसकमिति
सूत्रेपंचखट्वीतिभाष्योदाहरणात्ज्ञायते निषेधंबाधित्वेति भागार्थेकानप्रत्ययांतोपिस्वार्थिकत्वात्पूरणार्थइतिभाष्यस्पष्ट पूर्वेत्यादिविहितएकदेशिसमा।
सःपरवल्लिंगमितिसूत्रस्थमेकदेशिसमासपरंतत्पुरुषग्रहणंचपरवल्लिंगमितिसूत्रेभाष्येप्रत्याख्यातं हंहैकदेशिनोरितिवक्ष्यामिप्राप्तादिषुचाप्राप्तिरेव तदेकदे
शिग्रहणमपिनकार्यंकथंएकदेशिसमासोनारभ्यते अर्धेपिप्पल्यास्त्यादिःसमानाधिकरणसमासः अवयवेसमुदायरूपारोपादर्धंचसापिप्पलीति नचभेदवि
वक्षायांषष्ठीसमासवाधार्थइष्यतएवषष्ठीसमासोग्रामार्द्धमित्यादिवत् पिप्पल्यर्द्धमित्यादिभवितव्यमेवेतिभाष्यात्। द्वितीययाऽइति नचात्रप्रश्लेषेद्वि
तीयांतस्येवाकारःस्यान्नप्राप्तापन्नयोरितिवाच्यं प्राधान्येनतयोरेवादेशात् चकारश्चभिन्नक्रमइतिभावः प्राप्तापन्नेइत्युत्तरमकारप्रश्लेषः प्रगृह्यत्वंसौत्र।
त्वान्नेतिभाष्यस्वरसः एकादेशस्यपूर्वांतत्वेनग्रहणात्प्राप्तशब्देनसमासः जीविकाशब्दस्यैकविभक्तौत्युपसर्जनत्वाद्धोस्त्रियोरितिह्रस्वेतदंतादावितिवोध्यं
वहुव्रीहिणात्तुनगतार्थतास्वरेविशेषात् कालाःपरिमाणस्यजातइतिषष्ठीसमासेनसिद्धेजातमासइत्यनिष्ठनिवृत्तये इदं यद्यपिबहुव्रीहिणेदंसिद्धेजातिका।
लसुखादिभ्योनाच्छादनात्क्तोवाजातइत्यनेनांतोदात्तत्वेनस्वरेविशेषाभावात् जातिकालसुखादिभ्यःपरानिष्ठेतिवचनात्नजातस्यपूर्वनिपातःतथापिजातवक्र
त्वेनसमासेमांसेजातवानित्यादावंतोदात्तार्थमावश्यकमिदमितिकेचित् परेतुपरिच्छेद्यपरिच्छेदकसमभिव्याहारेपरिच्छेद्यादेवषष्ठीस्वीकारेणमासस्यजात राम॰
इतिविग्रहस्यतत्रषष्ठीसमासस्यचखपुष्पायमाणता अतएवभाष्येउत्तरपदार्थप्रधानत्वेनसमासात्षष्ठीमाशंक्यसंवंधस्यप्रातिपदिकार्थत्वेनाशेषत्वात् १९

रिहता ॥ अन्यथामासस्य जात इति विग्रहेण तत्प्राधान्यं दर्शितं स्यात् यत्र षष्ठीप्रसक्तिरेव न षष्ठीति सूत्रेण सिद्धे इदं सूत्रं जातमास इत्येतन्निवृत्त्यर्थं न वेवम मापि कालाः प
रिमाणिनां समस्यंते ननु परिमाणी कालेनेत्यर्थात् किं च मासो जातो यस्येति बहुव्रीहिणा अतीतमाससंबंधिजननक्रियाकर्तुरिव तत्संबंधिगमनादिकर्तुरपि मासजातशब्दा
त्प्रतीत्यापत्तिरित्यनयोर्बहुव्रीहेरनभिधानमेव अत्र विग्रहवृत्तौ चोभयत्राप्युत्तरपदार्थप्रधानत्वं । न च विग्रहेपि तत्त्वे जातान्न षष्ठ्यनुपपत्तिर्विशेषणादेव षष्ठीविधा
नादिति वाच्यं वाक्यस्य वृत्त्यर्थबोधकत्वविवक्षायां विशेष्यविशेषणभाववैपरीत्येपि पूर्वं जातसंस्कारानिवृत्तेः अन्यथा समासे जातप्रधान्येन विशेषणविभक्ति
षष्ठ्यापादनस्य भाष्ये असंगत्यापत्तेः मम तु न दोषः विग्रहे तस्यैव प्राधान्येपि तत्स्थितिवत्समासादपि तदापादनसंभवात् तदुत्तरषष्ठ्यैव तत्र मासविशेष
णकसंबंधप्रतीतिवत्समासेपि विशिष्टोत्तरषष्ठ्या तत्संभव इत्याशयात् शब्दस्वभावस्यैव च तद्व्यत्यासे बीजं यत्तु एकार्थीभावबलाद्वृत्तौ विशेष्यविशेषणभाव
व्यत्यास इति तन्न एकार्थीभावफलेषु भाष्ये ऽस्यागणनात् वृत्तिविग्रहयोः समानार्थत्वभंगापत्तेश्च किंप्रधानोयं समासः उत्तरपदार्थप्रधान इति भाष्ये वृत्ति
विग्रहोभयपरं समासपदेन तस्याप्युपलक्षणात् अन्यथा मासजातो दृश्यतामित्यादौ जातस्यैव कार्यसंबंधदर्शनेनौत्सर्गिकत्वाच्च तत्पुरुषत्वेनोत्तरपदार्थप्र
धानत्वनिर्णयेन किंप्रधानोयं समास इति प्रश्नस्य निर्दलत्वापत्तेः तस्माद्वृत्तिविग्रहयोः समानार्थत्वनिर्वाहमपश्यत उभयविषयोयं प्रश्न उत्तरं चेत्युचितं ॥
अन्यथोत्तरपदार्थप्रधानोयं तत्पुरुषस्तेनान्यैरुत्तरपदार्थप्रधानैः सधर्मेणा भवितव्यं अन्यत्र चोत्तरपदे यां तद्वर्त्तिनी विभक्तिः सैव समासेपि भवति इह तु वा
क्ये षष्ठी समासे प्रथमा केनैतदित्यवाशंक्येत प्रातिपदिकेनोक्तत्वेन प्रातिपदिकार्थतयाऽशेषत्वान्न षष्ठीत्युत्तरं तुल्यमेवेत्याहुः मासजात इत्यादौ मासत्वेनैकमा
सव्यक्तिरेव बुध्यते ऽन्यथा परिच्छेदकत्वं न स्यात् मासो जातस्येत्याद्यर्थे तु न समासोऽनभिधानात् उत्तरपदेनेति इदं वार्त्तिकं एतत्सूत्रविषयमेव तद्धितार्थेति ॥
सूत्रे पाठेपि एतद्विषयस्यैव भाष्यकृतोदाहरणात् पूर्ववत्त्विति द्व्यहजात इत्यत्रेत्यर्थः अक्षशौंड इति अधिकरणकारकस्य कर्तृकर्मद्वारा क्रियान्वयाच्छौं
डादिभिः सामर्थ्यं । आसत्त्यादिक्रियांतर्भावेण सामर्थ्यमिति तु न युक्तं तदप्रतीतेः सांकाश्यसिद्ध इति संकाशेन निर्वर्त्तितं वनं तत्र प्रसिद्ध इत्यर्थः सांका
श्येन गरे सिद्धो जात इत्यर्थो वा ध्वांक्षेण क्षे व्याख्यानादर्थग्रहणं तदाह इवेति तत्र स इव योगरूढकुलादौ न त्विरं तिष्ठति स एव मुच्यते एवं हि निंदा भवति ऋणग्रा

ल॰शे॰ स॰ ८०

हणमावश्यकोपलक्षणमित्याह आवश्यकेइति तत्फलितमाह पूर्वाह्णेगेयंसामेति तत्पुरुषेकृतीत्यलुक् अयंसमासोयत्प्रत्ययांतेनैवाभिधानस्वाभाव्यात्
त् तत्रेत्येतत्सप्तम्यंतमिति अधिकाराबाधायाधिकरणशक्तिप्रधानादपिसप्तमीतिवृत्तिकृत् तेनपूर्वपदप्रकृतिस्वरसिद्धिः अवतप्तेनकुलस्थितमिति अव्य
वस्थितत्वंप्रतिपत्त्यात्रबिंदा गेहेनर्दीति नदेशब्देइत्यस्मात्सिनिः तत्पुरुषेकृतीत्यलुक् सर्वत्रसमासांतरेइतिसमासप्रकरणादितिभावः तेनपात्रेसमितिरि
त्यादिभवत्येवसमासश्चानंतरत्वात्कर्मधारयएवेत्याहुः प्रवेशानेति तेनपरमाः पात्रेसमिताइत्येव समितेति निरनुस्वारं पूर्वकालेक अत्रपूर्वकालशब्दोऽ
र्थपरोऽन्यषट्स्वरूपपराः पूर्वःकालोयस्यतद्वाचक शब्दःप्रत्यासत्त्यापरकालवाचकेनसमस्यतइत्यर्थः सिद्धेपूर्वनिपातेति एषांविशेषणत्वस्यानैयत्ये
पिएषामेवतत्त्वार्थमितिभावः नियमबाधनार्थंचेति मुख्याद्यर्थैकैकशब्दस्यतु अप्रसिद्धत्वान्नात्रग्रहणमितिभावः नवशब्दःपुराणसाहचर्यान्नूतनार्थः
जरन्वृद्धः समानाधिकरणेनेतिकिं एकस्याःशौक्ल्यं।नियमार्थमिति विशेषणमित्येवसिद्धेनियमोयमितिभावः विशेषणमित्यस्यैवायंनियमः तेनप्रवृद्धःपं
चगवमितिचसिध्यति पूर्वसूत्रमित्यादौसंज्ञात्वाभावेपिकालवाचकत्वात्समासः एवंदेशवाचकेनापीतिबोध्यं तद्धितार्थेति वैषयिके आधारेसप्तमीविषयत्वेचा
नेकप्रकारैरित्याह विषयेइत्यादि तद्धितार्थेवाच्यइतितुनोक्तंपांचनापितिरित्यादौसमासेनोक्तत्वात्तद्धितानापत्तेः अतएवद्विगोस्तद्धितस्यलुग्वचनंचारिता
र्थं तद्धितविषयेइत्येवसिद्धेऽर्थग्रहणंस्पष्टार्थं मत्वर्थेनायं अनभिधानात् तदर्थेपरेणबहुव्रीहिणाऽस्यबाधाच्च समाहारःसमूहः भावघञंतत्वात् अतएव
पंचानांखट्वानामितिनियमेनषष्ठ्यामेकविभक्तित्वेनोपसर्जनत्वात् ह्रस्वोऽदंतद्विगुत्वात्पंचखट्वीत्यत्रङीप्सच्चावयवाभिन्नोबुद्धिकल्पितभेदवानपि समूह
स्यतद्धितार्थत्वेपिसामूहिकस्यलुकिपंचगवमित्यत्रगोरतद्धितलुकीतिटच्नस्यात् पंचकुमारिरित्यादौलुक्तद्धितलुकीतिस्त्रीप्रत्ययलुक्स्यादितिपृथक्प्र
हणं तत्सामर्थ्यादेवात्रवाच्येइतिव्याख्यातं उदात्तइतिसतिशिष्टत्वात्तत्पुरुषप्रयुक्तसमासांतोदात्तत्वेनेतिभावः विकल्पेप्राप्तइति महाविभाषयेतिभावः ततश्च
पक्षेटजभावेपंचगोधनइत्याद्यपिस्यादितिभावः स्पष्टंचेदंभाष्ये।एवंचोभयत्रापिनित्यत्वमात्रबोधकंवार्त्तिकमितिबोध्यं अतएवैतद्वार्त्तिकमुक्त्वाकिंप्र राम॰
योजनंसमुदायवृत्तावयवानांकदाचिदप्यवृत्तिर्माभूदित्येवप्रयोजनमुक्तंभाष्ये तत्रतत्पुरुषोबहुव्रीह्यवयवोत्तरपदेइवतत्पुरुषावयवोत्तरपदेपि अतएवो। १२

नतएवेनपरिभाषितोनाद्विगुत्ति इयेइत्युक्तं द्वंद्वस्तु बहुव्रीह्यवयवोत्तरपद एव वागद्दृषदप्रियइत्यादौ प्रियशब्देनोभयोः सामानाधिकरण्यं न द्वंद्वावयवोत्तरपदे चर्म्मो द्वंद्वे होतृपोतृ
नेष्टोद्गातार इति भाष्यप्रयोगेण तदनभिधानात् पदयोर्निष्कृष्यैकार्थीभावाभावेपि समासादिप्रवृत्तिरस्तीति निरूपितम् एवं नयोर्निष्कृष्य सामानाधिकरण्याभावेपि यथा
कथञ्चित्सामानाधिकरण्यं नियामकमादायैव तत्र वृत्तिरत एव पश्चिमशालाप्रिय इत्यादौ पुंवत्वसिद्धिः पुंवत्वे यथा कथंचित्सामानाधिकरण्यं नियामकं समासेन निष्कृ।
ष्यैवेत्यत्र न विनिगमकं अस्य प्रत्याख्यानपक्षे एकविंशतिभारद्वाजावंश्याः प्रियापस्येत्यादि बहुव्रीहावव्ययीभावादि तु नानभिधानात् वस्तुतो नित्यत्वांशेपि न्यायसिद्धः अयाण
मेकार्थीभावे ह्येयोव्ये येष्ठा यादृरूपपादत्वादित्यन्यत्र विस्तरः गोरतान तत्पुरुषस्येति राजाह इत्यतष्टच्चानुवर्तते गोंतस्य तत्पुरुषस्य समासस्यांतष्टजित्यर्थस्तत्फलितमाह गो
तादितिबन्त्विति नतु तद्धितलुग्विषयइत्यर्थः तेन पंचभिर्गोभिः क्रीतः पंचगुरित्यत्र न एकापूपीत्यत्रापि समाहारे द्विगुः एकमप्यपूपं कश्चित्कृपणो ददने केंमन्यतइति तत्रा
पितबहुत्वाश्रयसमाहारसत्वात् एकभिक्षीतितुं नानभिधानात् द्विगुरेकवचनमिति कर्तरि ल्युट् सामान्येन नपुंसकं इदं स्त्रसमाहारद्विगावेव अनुवादत्वेलाघवात् अतएव पं
चपूलीनामेकशेषेन अनुवादफलंतु द्विगुवाच्यस्य समाहारस्य न कदाप्युद्भूतावयवभेदस्येति बोधनं तेन द्वंद्ववाच्ये तथा विवक्षायामपि बोधनं उद्भूतावयवभेदः ——
समाहार एवेतरेतरयोग पदेनोच्यते सनपुंसकमित्यत्र तच्छब्देन समाहारद्विगो द्वंद्वस्य च परामर्शस्तदाह सनपुंसकमिनीति कुत्सितानि कर्मणैक्याख्या
नात् कुत्सने इति करणे ल्युट् दुर्दुरूढो दुष्कर्मकर्तरि रूढः ब्राह्मणिकमिति अतएव समानाधिकरणाधिकारस्याबाधः येन वस्त्वं तरं स्ववृत्तिधर्मवत्वे
नपरिच्छिद्यते तदुपमानं सामान्यवचनत्वं चोपमानोपमेयसाधारणधर्मविशिष्टोपमेयवचनत्वं प्रकृते तु समभिव्याहृतनिष्ठमुपमानत्वमिवादि द्योत्यं।
साधारणधर्मसंबंधस्योभयत्र बोधे तात्पर्यग्राहकता चोपमान श्याम घनाभिन्नः श्यामउपमेयइति बोधः अतएवोपमानोपमेययोः समानविभक्तिकत्व
नियमः समासेत्वस्यार्थस्य समासशक्तिबलाद्बोधः उपमानानीत्यस्योपमानत्वेन बोधकानीत्यर्थः अन्यथा संबंधिकत्वात् सामान्यवचनैरित्येव वक्तव्यं
समासलाभेतद्वैयर्थ्यस्पष्टमेव एवमुत्तरसूत्रे उपमितमित्युपमेयत्वेन बोधकमित्यर्थकं एवमेव भाष्यस्वरसइत्याहुः उपमितं उपमेयत्वमुपमानं परि
च्छेद्यत्वमुपमानोपमेययोः समभिव्याहारे उपमानस्य विषणतेव तदाह विशेष्यस्येति एतच्चोपमितमित्येतत्स्वारस्यात् तस्योपमानेन नित्यसाकांक्षत्वा।

त्र॰शे॰ स॰ ४९

व्याघ्रादीनामुपमानत्वेनैवउभयोः समानलिंगत्वएवचप्रवर्त्तते अतएवपरवल्लिंगमितिसूत्रेद्वंद्वैकदेशिनोरितिन्यासंकृत्वातत्पुरुषग्रहणंप्रत्याख्यातं अन्य
यास्य पूर्वपदार्थप्रधानस्यभाष्याब्धिरित्यादौदृश्यमानपरवल्लिंगस्यसिद्ध्यर्थंतत्पुरुषग्रहणावश्यकत्वेनतत्संगतिः स्पष्टैव भाष्याब्धिःकातिगंभीरइत्यादौसामा
न्यधर्मप्रयोगेपिलिंगभेदेपिमयूरव्यंसकादित्वात्सिद्धं सचराजांतरमित्यादौपूर्वपदार्थप्रधानोपिदृष्टःपरवल्लिंगतापितत्पाठेनैव विशेषणसमासेनतुनसिद्धिरु
पमानस्यविशेषणतयापूर्वनिपातापत्तेः एवंचभाष्याब्धिरित्यादौरूपकमेव यत्तु अनुपात्तधर्मेणसाम्यविवक्षणादनेनसमासइतितन्न एतदुपादानवैयर्थ्यापत्ते
रुपात्तधर्मसत्वेनैवसाम्यप्रतीतेरनुभावात्सकलःपुरचंद्रोराजतेइत्यादावुपात्तधर्मातिरिक्तधर्मस्यसाम्यप्रयोजकस्याभावाच्चेतिदिक् पुरुषव्याघ्रइति उपमानशूर
व्याघ्राभिन्नःशूरःपुरुषउपमेयइतिबोधः व्याघ्रइवशूरइति नचशूरस्सापेक्षत्वेनासामर्थ्यादत्रसमासाप्राप्तिः प्रधानस्यसापेक्षत्वेप्यसामर्थ्याभावात् विशेषण
मुपमानंतुनित्यसापेक्षमितितत्सापेक्षत्वन्नदोषः साधारणधर्मवत्वेनपरिच्छेदकत्वंहितत्वम् तच्चतत्वेनज्ञातस्यैवयद्यप्युपमेयपुरुषनात्वेन
परिच्छेद्यत्वमेवतथापितस्यतत्वंविधेयमेवेतितन्ननित्यसापेक्षमितिदिक् विशेषणं अत्रविषयताविशेषरूपंविशेषणत्वादिग्राह्य
नेव्याख्यानात् वृत्तौभेदकभेद्यशब्दाभ्यामपितदेवव्यावर्तकत्वरूपंतत्तुनीलइतिसामान्योपक्रमेउत्पलस्याप्यस्तीत्यव्यावर्त्तकं अत्रजातिसंज्ञयोर्गुणक्रिया
भ्यांसमभिव्याहारेविशेष्यतैव गुणयोः क्रिययोर्गुणक्रिययोश्चानियमएव व्याप्यव्यापकभावानापन्नजात्योरप्येवं यथाभूतमूर्त्तयोः तद्भावापन्नयोस्तुव्याप
कस्यविशेष्यतैव यथाशिंशपावृक्षइति यत्रैकोऽवयवशब्दःपरःसमुदायशब्दः तत्रावयवस्यविशेषणत्वमेव अतएववर्णोवर्णेनेतिसूत्रेभाष्येकृष्णसा
रंगइत्युदाहृत्यतृतीयासमासेनेदंसिद्धमित्युक्तमन्यथाकर्मधारयेपूर्वनिपातानियमेनतृतीयासमासेतन्नियमेनतदसंगतिःस्पष्टैव द्वयोरप्यवयवशब्दत्वे
त्वनियमः एवंचसोमयाजिडित्थइत्येवोचितं डित्थसोमयाजीत्याद्यसाध्वेव कुब्जखञ्जःखञ्जकुब्जइत्यादौविषयतायाअपिशाब्दबोधेभानाद्बोधेविशेषइ
तिदिक् पूर्वापरबहुलग्रहणानुवृत्त्याक्रियाशब्दैःपाचकादिभिरेषांनसमासइतिसमर्थसूत्रेभाष्ये एवंचापराध्यापकइत्युदाहरणंचिंत्यं अपरमीमांसकइत्या
द्युचितमुदाहरणं भूत्येनरणीयादौविशेषणामितितुप्रवर्त्ततएवत्यपितत्रैवभाष्येस्पष्टं च्व्यर्थेइति तेनश्रेणीनामेवदंडनादिरूपकरणेनसमासः श्वंतानां

यंसमासः नञ्ग्रहणं चर्कियागता समासनिषेधात् काव्ययोपलक्षणं तेनक्तातापकतादिसंग्रहः पूर्वनिपातनियमार्थंचेदं देवब्राह्मण इति देवपूजको ब्राह्मण इत्यर्थः य
च्यपिपूर्वपदस्य तन्नदर्थे लक्षणायां विशेषणसमासेन सिद्धं तथापि मुख्यार्थे शाकप्रियपार्थिव इत्यादिनिवृत्त्यर्थं इदं सन्महत् महापापमित्यादौ पूजाभावेपि विशेषणा।
समासेबोध्यः अत्रापि महत्त्वेन पापस्य स्वगुणाशे पूजात्वेपि वेत्यन्ये वृंदारकनाग· वृंदारकशब्दो देवजातिविशेषवाची द्वितीयो गजसर्पवाची अन्त्यो गजवाची तेषामुपमानत्वेनै
बपूजावाचित्वादाह व्याघ्रादेरिति कतमोस्य मान्यैति गोकुंजरः स्थूल इत्यादौ कतरकतमौ द्वयोरेकस्य वा बहूनामिति सूत्रयोरुपाधिप्रत्याख्यानात् कतमो भवतां पंडि
न इत्यादौ समासाभावाय जातिपरिप्रश्न इति यथान्यासेपि कतरार्थं तत् ·किंराजेति किमः क्षेप इति समासांतनिषेधः क्षेपे किं को राजा पाटलिपुत्रे तत्पुरुषः
तत्पुरुषाधिकारे एतत्करणेत्वेकसंज्ञाधिकारात्तस्या अनया बाधः स्यादिति बोध्यं समानाधिकरणपदावयवक इत्यर्थो व्याख्यानात् पुंवत्कर्मधारयः स्त्रियाः पुं
वद्भाषितपुंस्कादनूङ्·इत्यनुवर्तते अपूरणीप्रियादिष्विति तु नानुवर्तते व्याख्यानात्तदाह पूरणीत्यादि एतेन स्त्रियाः पुंवत्तसिलादिष्विति सिद्धे इदं व्यर्थमित्य
पास्तं महानवमीति पुंवत्वे आन्महत इत्यात्वं तथा कोपधादेरिति एतेन निषेधप्रकरणात्पूर्वमेतत्पाठ्यं पुंवदितिच न कार्यमित्यस्य पास्तं मध्येपवादन्याये
नपरनिषेधबाधानापत्तेः नकोपधायाः संज्ञापूरण्याश्च वृद्धिनिमित्तस्य स्वांगाच्चेतः जातेश्चेति पंचसूत्रेत्यर्थः विध्युन्मूलकत्वरूपयुक्तिमूलकस्य निषेधाश्च
वलीयास इत्यत्र तु न विषयस्तद्बाधं विना कर्मधारयांशेऽस्य विधेरचारितार्थ्यात् बाध्यसामान्यचिंतया च सर्वबाधः इभीपोटेत्यादिविग्रहः जातेः पूर्वनि।
पातार्थं तु पोटायुवतीति सूत्रं प्रशंसावच· जातिरिति वर्तते ननु मतल्लिकादेः स्त्रीत्वात् प्रशस्त इत्यर्थो न युक्तः प्रशस्ता गौरित्यर्थ इतिपाठे उत घादेः पुंस्त्व
प्रकांडस्य क्लीबत्वादयुक्तोऽत आह नतु विशेष्यनिघ्ना इति युवत्यामेवेति जरत्यां युवतीधर्मारोपे तु युवतीशब्दस्य विशेषणत्वेन विशेषणमिति समासेपिपू
र्वनिपातनियमसिद्धा जरतीग्रहणस्य वैयर्थ्यमेव स्यादिति भावः कृत्यतु· क्तात्प्रत्ययांनास्तुल्यवाचकाश्च जातिभिन्नवाचकेन समस्यंत इत्यर्थः तुल्यमहानित्या।
दौ परत्वादनेनैव समासः पूर्वनिपातनियमार्थमिदं सत्कात्यंपरमपूज्य इत्यादौ षष्ठीसमासो बोध्यः यद्वा बाहुलकादेतद्विषये सन्महदित्यस्यैव प्रवृत्तिः साम
र्थ्यादिति पूर्वनिपातस्योभयत्रापि समत्वादिति भावः जातिभिन्नवाचकेन समासे हि पूर्वनिपातानियमे प्राप्ते तन्नियमार्थमिदं सार्थकमिति अजा ·यैतच्चार्थं

स·शे· ल्यादिति तत्सामर्थ्याद्विशेषणसमासबाध इति तात्पर्यं इदं प्राचामनुरोधेन परे तु अजात्येत्युक्तार्थस्य स्पष्टतयालाभायैवात एव कुरुगार्हपतेति सूत्रभाष्योदाहृते नेपथ्यकं
स· दंतः पेयपहस्तीत्यत्र विशेषणमिति समाससिद्धिः भोज्य ओदन इत्यत्रासमासस्येष्टत्वे बाहुलकाद्बोध्य इत्याहुः समानाधिकरणेनेति वर्णवाचिना तादृशेन वर्णे वाचिन्म
४२ मत्यत इत्यर्थः सारंगश्चित्रः कृष्णशब्दस्तदवयवके लाक्षणिक इति सामानाधिकरण्यं विशेषणमित्येव सिद्धे इदं व्यर्थं न च वर्णो वर्णेष्वनेत इति स्वरविधायके प्रतिप।
दोक्तस्यासंज्ञाग्रहणार्थमिदं अत एव सारंगस्यावयवः कृष्णः सारंगकृष्ण इत्यत्र तेन पूर्वपदप्रकृतिस्वरो नेति वाच्यं कर्मधारयस्वरप्रकरणे तत्पाठेन सिद्धेरिति दिक् बहु
वचननिर्देशाद्गणायथावगतिरित्याह कडारादय इति कर्मधारये किं कडारपुरुषको ग्रामः। एतदेवेति एतदपीत्यर्थः युवाखलतीति सूत्रे जरतो ग्रहणस्यापि ज्ञापक।
त्वात् चतुष्पादो जातिग्रहणं कर्तव्यमिति वार्त्तिकलब्धमर्थमाह जातिवाचिन इति मयूरव्यंसक इति केचित्तु मयूर इव व्यंसक इत्यर्थे उपमानसमासापवादोऽयं प्रतिप।
दोक्तोपमानसमासविषयकपूर्वपदप्रकृतिस्वराभावायेत्याहुः उच्चावचमिति उच्चावचादेशोऽत्र उच्चनीचमित्यर्थे इदमित्यन्ये निश्चितप्रचितयोर्निश्चप्रचंदि[illegible] एतद्
नगेयासूत्राण्याह आख्यातमिति क्रियाप्रधानमित्यर्थः अत्रेहीडादय इत्यतोऽन्यपदार्थ इत्यनुवर्तते गणे तस्य पूर्वपाठात् इहत्वसातत्यार्थतांतस्य ध्वनयितुं त
स्य व्युत्क्रमपाठस्तदाह यत्राभिधीयत इति अश्नीतपिबतेति अन्यपदार्थस्य क्रीडादिरूपत्वेन स्त्रीत्वात् समासत्वेन प्रातिपदिकत्वाच्च टाप् खादतमोदतेति।
मोदंतामित्यस्य स्थाने मोदतेत्यादेशः एहीडादय इति लडुत्तमपुरुषैकवचनस्य ईडे इत्यस्य ईडादेशः एहि यवमित्यत्र यामीत्यस्य यवादेशः उद्धरकोष्ठादिति उद्धु
रोत्सृजेति विग्रहः उत्सृजेत्यस्य विवरणं देहीति कोष्ठादिति तूद्धरेत्यस्याकांक्षापूरणाय इह पाठ इति एहीडादिषु तिङंतपूर्वपदोत्तरपदकसमुदायानामित्य
र्थः कर्त्तेति उक्तेरित्यादिः जहि जोडमित्याभीक्ष्ण्ये नय आह स जहिजोडः चिन्मात्रमिति अत्रानुनासिकनित्यतानिपातनात् एवार्थमात्रशब्देनात्र समासः म
यूरव्यंसकादयश्चेति चकार एवकारार्थः तेन एषां समासांतरघटकता नेति परमो मयूरव्यंसक इत्याद्येव ईषद्गुणेति अकृतेत्यस्य स्थाने इदं तदाह ईषद्रक्तमिति
नञ् नकारो निषेधार्थकनशब्देन समासे तत्पुरुषत्वाभावाय तेन नैकधेत्यादौ पूर्वपदप्रकृतिस्वरो न अत्रैव नलोपं वारयितुं लोपविधायके नकारोच्चारणं प्रसिद्धतर ला
त्वान्न नञा व्ययं न तु स्त्रीपुंसाभ्यां नञ् ये तु नेत्यव्ययं नञ्कृति अत एव नलोपो नञ इति सूत्रे नञः सानुबंधकस्य ग्रहणं व्यर्थं नस्येत्येव सिद्धं न च प्र[illegible]पुत्रे दोष ९

सानुबंधकत्वात् अव्ययेष्वपि नेत्येव पाठ्यं इत्याशयः पामन पुत्र इत्येतद्वारणार्थं तु सानुबंधकः पठित इति भाष्यार्थं संगच्छते इति वदंति च तेषामुभयत्रापि ञकारः स्पष्टा
र्थः नैकधेत्यादिनांतरीयकमिति च पृषोदरादित्वात्साधु नलोपो नञोऽस्यैति सिद्धे लोपवचनं साकच्कार्थं तेनाकब्राह्मण इत्यादि सिद्धमिति एके नैनेत्यादौ हि।
त्वे बहुव्रीहिवद्भावे पि नानेन लोपः उत्तरपदशब्दस्य मुख्यसमासचरमावयवे एव रूढेरित्याहुः तस्मान्नु नञोनुडभावाय नाकनासत्ययोर्न लोपाभावेन तद्वारणा
य च तस्मादिति ततो व्याख्यानाद्वा चेति षष्ठ्यर्थे सप्तमी सप्तमीनिर्देशस्तु यस्मिन्विधिरिति परिभाषाप्रवृत्त्यर्थेत्यदाह अजादेरिति नुकृतुनक्वतः ङमुडप्रसंगात्
अनश्व इति आरोपिताश्व इति बोधः नञ्तु द्योतकः तत्र तादात्म्यारोपस्य भेदसादृश्ययोः सतोरेव सत्वेन संसर्गारोपस्य तदभाव एवत्वेनारोपितत्वबोधे सादृ।
श्याभावादिना मर्यतो बोध इति नाब्राह्मणपदात्क्षत्रियादिप्रतीतिरित्यत्र विस्तरः अर्थाभाव इति तत्राप्यारोपितो घट इत्येव बोधः भेदेन तदारोपबोधेऽत्यंताभावबो
धस्तादात्म्येन तदारोपबोधे भेदबोधोऽत्र च प्रकरणादिकं नियामकं इति बोध्यं विकल्प्यत इति पूर्वपदार्थप्राधान्ये व्ययीभाव उत्तरपदार्थप्राधान्येऽयमिति
भावः न्यायसिद्धेर्थे लिंगमप्याह रक्षोहेति असंदेहादित्यस्य आरोपितः संदेह इत्यर्थः संदेहाभावः प्रयोजनमिति यावत् अव्ययीभावेन द्वंद्वे हि परवल्लिंगे।
नासंदेहा इत्यनुपपन्नमिति भावः इदं पस्पशायां भाष्ये असंहितमिति संहितासंज्ञासूत्रे वार्त्तिकं द्रुताभिन्नायां मध्याविलंबिताऽवृत्तौ संहिताभावमिति तदर्थः प
रतु भाष्ये नञ्समासस्तु बहुव्रीहिर्वान्यपदार्थप्रधानः उत्तरपदस्य धर्मपरतया न विद्यते ब्राह्मण्यं यस्मिन् सोऽब्राह्मणः बहुव्रीहिस्तु तस्य धर्मिपरत्वे चरितार्थः अत एव ना
ञोऽस्त्यर्थानामुत्तरपदलोपश्चेत्यनेकमिति सूत्रस्थं वार्त्तिकं संगच्छते एतेन तत्वे अपवादत्वादयं बहुव्रीहेर्बाधकः स्यादिति कैयटोक्तमपास्तं असइत्यादौ सर्वो
विकार्यैतु एतत्तदोः सुलोपो कोरनञ्समासे इति ज्ञापकात्सिद्धं
अअपक्षेऽवर्षा हेमंत इत्यादौ विशेष्यगतलिंगवचनापत्तिर्दोष उक्तः तत्र यद्यपि लिंगदोषो लिंगमशिष्यं लोकाश्रयत्वाल्लोकस्येति परिहर्त्तुं शक्यते तथापि व।
चनदोषः स्थितः ततः पूर्वपदार्थप्रधानस्तर्हि भविष्यति अत्रापि पक्षे असइत्यादिसिद्धिः प्राग्वदेव। न च पूर्वपदस्याव्ययत्वेन तदर्थप्रधानस्यास्य लिंग।
संख्याभ्यां कथं योग इति वाच्यं शब्दशक्तिस्वभावाद्वा केचन ञोऽसत्वभूतार्थाभिधायित्वेपि समासे सत्वभूतार्थाभिधायित्वेन तद्योगसंभवात् येऽब्रागुणवच

ल॰ शे॰ नञ्समाश्रयतो लिंगाद्यन्वितसमासार्थः प्रतियोगितयायतद्द्रव्यं श्रितस्तत्स्थलिंगादिस मासस्य भविष्यति एतेनात्र पक्षेऽवर्षा हेमंत इत्यादौ हेमंताद्याश्रयगतलिंगसंख्याप्रसंग।
स॰ इति कैश्चिद्यदुक्तमपास्तं अभावेन प्रतियोगिनोपि स्वज्ञाने याश्रयणेन तस्याप्याश्रयत्वात् स्वघटितसमासघटकेनोपस्थित्या च तस्यैवाश्रयस्य ग्रहणौचित्यात् अन्यथा तद्दोषदू
४३ षितपक्षोऽर्द्धमाश्रितेपि पक्षे तद्दोषानुवृत्तौ भाष्यस्य निर्दलता पत्तिः एतत्समकक्षतयाऽथवा पुनरस्तु उत्तरपदार्थप्रधान इत्युक्तेरसंगतिश्च त्वदुक्त्या हि अस्तु तर्ह्युत्तरपदार्थे।
तिवक्तुमुचितं एतत्पक्षद्वयेप्यनेकमित्यादावेकवचनासिद्धिं वस्यमाणांमनसि निधायोत्तरपदार्थप्रधानत्वं सिद्धांतितं तत्पुरुषस्योत्सर्गतस्तत्प्रधानत्वाच्च अत्र पू
र्वपदार्थप्रधानत्वपक्षेऽपवादत्वेनाव्ययीभावस्य वाधनात् अत्राव्ययीभावाभावोऽवश्यं स्वीकार्यः अन्यथाव्ययीभावासिद्धिरूपदूषणानुपन्यासेन भाष्यस्य न्यूनता।
पत्तिः तस्मादत्यंताभावार्थकनञः क्रियादिप्रतियोगिकाभावबोधकत्वेनोत्तरपदार्थे नानन्वयात् सामर्थ्येन नाव्ययीभावोऽमक्षिकमित्यादौ न संदेह इत्यादौ
संदेहस्य गुणत्वेन भवत्येव तदभावबोधो नञा एतदेवाभिप्रेत्य भाष्ये उक्तं प्रसज्यायं क्रियागुणौ ततः प्रतिषेधतीति असंदेह इत्यादौ चारोपितसंदेह इति भेदेनारोपज्ञा
नात्तदत्यंताभावप्रतीतिः किंचार्थाभावशब्देन नञो घटकतयास्य सूत्रगृहीताव्ययतयानेन नाव्ययीभावः सूत्रगृहीताव्ययेनाव्ययमिति समासाभावस्य तत्रसूत्रे उपपा
दितत्वात् अनचेदं भाष्यमपिमानं असंहितमित्यत्र संधानं संहितमिति भावेक्तः आरोपितं संधानं आरोपितः परः सन्निकर्ष इत्यर्थे तदभावात् संहितासंज्ञा न प्रा
प्नोतीत्यर्थ इति न तदसंगतिः संहितशब्दः परः संनिकर्ष इति सूत्रबलात् स्त्रीलिंगो वार्त्तिकप्रामाण्यात् क्लीबोपि अत एव संहितवदिति प्रातिशाख्ये तद्भाष्ययोः प्र।
युक्तं अत एव परः संनिकर्षः संहिता चेद्द्रुतायामसंहितमिति वार्त्तिकं परः संनिकर्षः संहिता चेद्द्रुतायां वृत्तौ हि संहितासंज्ञा न प्राप्नोतीति शेषपूरणेन व्याख्या।
यद्द्रुतायामेव हि परः सन्निकर्षो वर्णानां नाद्रुतायामित्यनेनासंहितमित्यंशे थ्यतो हेतुत्वेन व्याख्यातो भाष्ये न प्राप्नोतीत्यंशस्य तद्व्याख्यानत्वेन स्व सामर्थ्यात् समासानापत्तिः त्व
द्वृत्त्या हि संहितासंज्ञाभावः प्राप्नोतीत्येवं वदेत् वार्त्तिककृतो हेतुत्वकथनेन न न्यूनता चेत्याहुः प्रसंगादाह नञो नलोप स्तिङीति तिङंतेन समासाभावात् प्राप्तौ वचनं अ
पचसीत्यस्य कुत्सितं पचसीत्यर्थः अत एव नञ्समानार्थोऽशब्दोऽव्ययेष्वप्रामाणिक इति बोध्यं नञ्समासे अनेकधेत्येव स्यादत आह नशब्देनेति एकशब्दस्ये एम॰
तिभावस्ततो धा प्रकारेऽकारोऽनेकसंख्यात्वप्रतीतिः एवमेव नमेरुनाराचनांतरीयकादयः साधवः शत्रंत इति पातेः क्विपि निपा रे तनाच्च नुगित्युभे वनस्पत्यादि ९५

तिसूत्रेवृत्तिः नासत्यादयस्तानि चत्वारि पृथक्पदानि एते निपात्यंत इत्यर्थः समासे हि नवेदा नसत्या इति स्यात् नासत्या इति बहुवचनं वैचित्र्यार्थं न तु बहुवचनांतस्यैव साधु
त्वार्थं नासत्यावश्विनौ दस्रावित्यमरविरोधात् अश्विनोरेवायं साधुस्तेनान्यत्रानसत्य इत्येवेति हरदत्तः नभ्रुचिशब्दे औणादिकः किप्रत्ययः। सीयतेरिति पाठे सी।
षूहिंसायामिति दिवादिस्तस्याकृतिगणत्वात् क्षियतेरिति ह्रस्वपाठे क्षि निवासगत्योस्तुदादिः एषु नञ्जैवसमासः पूर्वपदप्रकृतिस्वरार्थः निषेधार्थकनशब्दांत एभा
वाच्च कुगतिप्रादिकुशब्दः पापार्थोऽव्ययमेवात्र गत्यादिसाहचर्यात् तेनाव्ययपूर्वपदप्रकृतिस्वरः समर्थेनेति समर्थपदं तृतीयया विपरिणम्यत इति भावः ऊर्यादि
क्रियायोग इति उपसर्गा इत्यतस्तदनुवर्तते अत एव संज्ञाविधावपि च्विडाजंशे न तदंतविधिः ऊर्यादयो निपाता भवंतीति निपाताः संतः क्रियायोगे गतिसंज्ञा इत्यर्थः का
रिका क्रियेति मर्यादास्थितियत्नरूपेत्यर्थः धात्वर्थनिर्देशे ण्वुल् दासीश्लोकवाचिनस्तु न ग्रहणं व्याख्यानादिति भावः अनितिपरं किमिति ते प्राग्धातोरित्यस्य सं
ज्ञानियमार्थत्वे व्यर्थमिति प्रश्नः प्रयोगनियमार्थत्वाभिप्रायेणोत्तरं भाष्यकृतानुसंज्ञानियमार्थत्वमाश्रित्येवं छेदसि परेपि व्यवहिताश्चेति सूत्रद्वयं च प्रत्याख्या
तं अत एव सुकटंकराणि स्वाहाऽभवमित्यादि भाष्यप्रयोगः संगच्छते कटंसुकराणीत्यादि त्वनभिधानेन वारणीयमत्र पक्षे खाडितीति एतद्विशेषणाभावे प्रयोग
नियमशास्त्रावेवं प्रयोगोच्छेद एव स्यादिति भावः अनितिपर इति चात्र बहुव्रीहिरनितौ वितिवकव्यपरग्रहणं तु अनुकरणाकृतावनितिपरत्व [illegible] षड्
षडिति कृत्वेत्यत्रोऽव्यवहितेपि निषेधसिद्धिरेतद्वलादेव तत्प्रागित्यादावपि गत्याकृतिनिर्देशः एतत्प्रकरणे आकृतिपरतायां तस्य तात्पर्यग्राहकत्वादत एवाभ्युद्र
रित्यादावुभर्याः पूर्वं प्रयोग इति दिक् आदर अनादर इति बहुव्रीहिरतः पाषंडिनमसत्कृत्येत्यादि सिद्धं तत्पुरुषे हि यत्रादरप्रसक्तिस्तदीयानादर एव स्यात् गुरुम
सत्कृत्येत्यादौ कणेमनसी शब्दस्वरूपे इति विशेष्यं कणेहत्येति परावरयोगे चेति क्त्वा पुरोऽव्य पुरोभूय पुरोगत्येत्यप्युदाहरणं कृञ्योग एवेति नियमे मानाभावात्
अव्ययपदमनुवर्तत इत्याशयेनाह मांतमव्ययमिति तेन कांडमस्तं कृत्वेत्यत्र न अस्तं सिप्रं जलमस्तं गच्छतीति प्राग्रीश्वरादित्यधिकारान्निपातत्वेऽव्ययत्वा
द्विभक्तिलुक् स्यादिति भावः सप्तमीनिर्देशेपि तस्मिन्निति परिभाषा न प्रवर्तते क्रियायोग इत्यनुवृत्तेः एतेनानुस्वारव्यवधानात् कथमत्र प्राप्तिरित्यपास्तं उ
पाजेन्वजेशब्दौ एदंतौ विभक्तिप्रतिरूपकौ निपातौ दुर्बलस्य बलाधाने वर्तेतेऽव्यथ्ये इति च्व्यंते तु पूर्वविप्रतिषेधेन नित्यैव संज्ञेति भाष्ये स्पष्ट इदं प्रायिकं अत एव

नमस्करोतीत्यादौ च्व्यर्थाभावेपि अनेन गतित्वमाहुः अन्येतु सउर्यादौ स्वरादौ चेतिं विकल्पफलसिद्धिमाहुः मां तत्त्वमिति गतिसंज्ञासंनियोगेन लवणमुरसं शीतमुद
कमार्द्रमितिपंचानामित्यर्थः उरसिमनसीति विभक्तिप्रतिरूपकौ निपातौ मध्येपदे विभाषाकृञीति अनत्याधान इति चानुवर्त्तते एतत्र च एषामेदंतत्वं निपात्यते
सप्तमीतु नेमध्येपदे कृत्वा वाचं नियम्येति च प्रत्ययेन तस्य अनन्वितत्वात् अनत्येति किं हस्तिनः पदे कृत्वा शिरः शेते नित्यं हस्ते उदाहरणे तत्पुरुषे कृतोत्व
लुक् उपयमने किं हस्ते कृत्वा कार्षापणं गतः प्राध्वं इदं मांतमव्ययं बंधनेनानुकूल्ये वर्त्तते कृञोन्येव जीविका जीवनोपायः सुपुरुष इति क्रियायोगाभावाद्गति
त्वं अत्रेति अव्यवस्थया समासप्राप्तौ व्यवस्थार्थोनेतिभावः कर्मप्रवचनीयानामिति सा संज्ञा तु प्रतिस्तवनमित्यादौ षत्वाभावाद्यर्थेति बोध्यं भाष्ये तु कर्मप्रव
चनीयानां प्रतिषेधः वृक्षं प्रति विद्योतते व्यवेतानां च प्रतिषेधो वक्तव्यः आमंद्रैरिंद्र हरिभिर्याहि इत्युक्त्वा सिद्धं तु क्वाङ् सुदुर्गतयः प्रादयः कार्थे इत्यनेनेदं व
चनद्वयमपि प्रत्याख्यातं एतदेव सौनागैः विस्तरतरकेण पठितं स्वती पूजायां दुर्निंदायां आङीषदर्थे कुः पापार्थे प्रादयो गताद्यर्थे इत्यादि उक्तं एवं च ज्ञापकत्वस्य
कत्वेन कर्मप्रवचनीये प्राप्तिरेव नेति तदाशयः तत्रोपपदं अयमधिकारः अत एवामेव तुल्यविधानमित्यादि संगच्छते येनाप्राप्तेर्वा विधीयते तेन यस्योपपदसं
ज्ञा विधीयत इति तदर्थात् कर्मण्यणित्यादौ कर्मणीत्यादिः सोत्र प्रथमार्थे सप्तमी धातोरण् भवति कर्म चोपपदसंज्ञमिति तदर्थः अत्र सूत्रे सप्तमीपदं तद
तपरं तत्स्थं तद्वाच्यं तदाह सप्तम्यं तेपद इति महासंज्ञया प्रथमार्थे सप्तमीबलेन च लब्धमर्थमाह तद्वाचकं पदमिति पदमत्र विभक्त्यंतं स्तवकर्णयोरित्यादौ सुपी
त्यधिकारात् प्रकृतिके सुबंते लक्षणा अन्यथोपपदमिति

महासंज्ञालब्धोपपदसंज्ञकसुबंताभावात्स्तंबेरम इत्यादौ समासानापत्तिः समासविधायके उपपदप्रकृतिकसुबंतग्रहणे सुप्यजाताविति
निनौ राजदृश्वेत्यादौ समासानापत्तिः तत्र हि सुबंतमेवोपपदं न तु तत्प्रकृतिकमात्रं स्यात् द्वयपरत्वे गौरवं महासंज्ञाविरोधश्च सुप्यजातौ विंस्यादिविषये
सुबंतस्य सप्तम्यंतपदवाच्यत्वरूपं तत्स्थत्वमादायोपपदत्वं बोध्यं विभाषाग्रे प्रथमेत्यादौ सुपीत्यधिकाराभावेपि महासंज्ञाबलात्तेषां तत्प्रकृतिकसुबंते लक्षणैवा एम
ध्या अत एवोपपदमिति सूत्रे तिङ् ग्रहणादनयोर्योगयोः सुप्सुपेति निवृत्तमिति भाष्ये उक्तं उपसमीपे उच्चारितं पदं उपपदं सामीप्यं च सप्तम्यंतपदघटितसूत्र ५६

विधेयप्रत्ययप्रकृत्यर्थेऽन्वयित्वमेव न त्वानुपूर्व्येव्यवधानं कर्मण्यण्सूत्रे उष्ट्रप्रणाय इति भाष्योदाहरणात् आतोनुपसर्गे इत्यत्रानुपसर्गग्रहणाच्च गुरुनमस्कारो
ति कन्यामलंकरोति इत्यादौ हिमवंतं शृणोति त्यादाविवानभिधानान्नाण् अभिधानलक्षणाः कृत्तद्धितसमासा इत्यकर्तरि चेति सूत्रे भाष्योक्तेः नन्वेवं तत्र ग्रहणं व्यर्थं
प्रकृतिधात्वधिकारविषयतात्वाधिकारेणैव सिद्धेरत आह अस्मिंश्चेति अनेनोपपदसंज्ञासंनियोगशिष्टत्वम् त्ययविधेर्बोधयति अन्यथा चान्वयशिष्टत्वसंभा
व्येत प्रातिपदिकार्थे सप्तम्यामेवास्य प्रवृत्त्याभुवो भाव इत्यादौ न प्रवृत्तिः तद्व्यवस्था त्वनुनासिकत्वादिवल्लक्ष्यानुरोधेनैवेति वाध्यम् उपपदं सुबंतमिति महासंज्ञा
वललब्धं अत एव राजपुरुष इत्यादौ न लोपः सधानाहारको व्रजतीत्यत्र अतिङिति बहुव्रीहिणा तिङंताघटितः समास इत्यर्थेन तदप्रवृत्तेस्तदाह अतिङंतश्चसमास
इति कथमपि तिङंताघटित इत्यर्थः समास इति तत्संज्ञकः समुदाय इत्यर्थः कुंभकार इति नन्वंतरंगानपीति न्यायेनेत्संज्ञालोपयोर्लुका वाधादिदमयुक्तमिति
चेन्न इत्वलापवाधावाधयोः फलेविशेषाभावेनान्तरंगानपीत्यस्याप्रवृत्तेः । अलौकिकं प्रक्रियावाक्यमित्यसमा
सप्रवृत्तियोग्यं लोके प्रयोगानर्हमित्यर्थः हरिङ इत्यत्रापीत्संज्ञाद्युत्तरमेव समासो लोके प्रयोगानर्हत्वस्योभयत्रापि सत्त्वेनाविशेषादन्तरिक्षसंज्ञालोपमेवोच्चारितमित्य
लं कृद्योगलक्षणा चात्र षष्ठी न चांतरंगत्वाद्धिती याप्रकल्प्यापवादविषयमुत्सर्गप्रवृत्तेः अत्र षष्ठीसमासो न उत्तरपदे विभक्त्युत्पत्तेः पूर्वमेवास्य प्रवृत्त्यांतरं
गत्वात् कारकषष्ठीत्वेन षष्ठीसमासस्यापि ततः पूर्वं प्रवृत्तौ तु अलुक् सः अस्य नित्यत्वेन तत्कृतत्पुरुषसंज्ञाप्रयुक्तकार्याभावाभावेप्यतत्कृततत्संज्ञाप्रयुक्तस्वर
स्यानपगमेनादोषात् एकस्या एव संज्ञाया उभाभ्यामपि प्रवृत्त्याऽविरोधेन युगपदेवोभाभ्यां सास्य ष्टं चेदमत्र भाष्ये एवं च द्वितीयाश्रितेत्यादिसमासोप्युत्तरपदे सुबु
त्पत्तेः प्रागेव अत एव कारकेति सामान्यत एवोक्तं भाष्यकृता च तदंशे प्रमाणेनोपन्यस्तं परिभाषानकर्तव्येति प्रकृतसूत्रभाष्यं तु विशिष्टाया अकर्तव्यत्वपरमे
व अत एव भाष्ये प्रत्याख्यानोत्तरमपि गतिकारकेति समासवचनादित्युक्तं तेन कारकांशे वाचनिकत्वमेव बोधितमिति दिक् माभवानिति समासे सति व्यवहितत्वप्र
योगो न स्यादिति सूचयितुं भवानिति इदमुपलक्षणं कारको व्रजतीत्यादेर्भाष्योक्तस्य किंच माङ उपपदत्वे महासंज्ञाकरणबलात् माकदाचिद्वर्णो भूदित्येव इ
ष्टं नि सूत्रस्थभाष्यप्रयोगमाकदाचिदप्प्रवृत्तिर्भूदिति तद्धितार्थेति सूत्रस्थभाष्यप्रयोगे हि त्रिपदव्यवधाने प्रयोगो न स्यात् यथा कर्तुं देवदत्तो घटं ग्रामं व्रजतीति न प्रा

ल॰शे॰ सेह्यावश्यकेति दिक् अतिङ्ग्रहणमिति नच कारकोगतङित्यत्र सुबन्तोपपदस्य समासव्यावृत्तये तिङन्तार्थक्रियाबोधकाघटितङित्यर्थकं तदिति वाच्यम् तस्य ङ्
स॰ सेवाचितया तिङन्तार्थत्वाभावेन तेन तद्वारणस्याशक्यत्वात् किंतु गतादेर्द्रव्यवाचितया क्रियावाचकोपपदत्वाभावेन ण्वुल एव तत्राप्राप्तेः क्रियावाचकं शब्द
४५ रूपेण क्रियायाः साध्यामात्रावस्थाया एव ग्रहणस्य गतिकारकोपपदादिति सूत्रे प्रकृतसूत्रे च भाष्ये ध्वनितत्वात् प्रकृतसूत्रे उपपदमक्रियेति न्यासे ऽक्रियेत्य ।
स्येदं प्रत्युदाहरणमाशंक्यास्य क्रियावाचित्वाभावाद्दूषितं तत्र क्रियावाचित्वाभावादत्र प्रत्युदाहरणत्वेन तुमुन्न तु भवतीत्यस्यान्याय्यत्वात् नच धातोः क्रियावा
चित्वेन तन्निवृत्तये न स्तुमुन्स्यादेवेति वाच्यम् उपपदमिति महासंज्ञया तुमुन्विधावपि पदत्वपर्यन्तनिवेशनात् तस्मात्तत्र तुमुन्ण्वुलोरसाधुत्वमेव भाष्यतात्पर्यं ।
अर्थमात्रग्रहणेन तु गुणीभूतादेरपि ग्रहणमिति गतपाकादियोगेपि कारकं विभक्तिकृत्वसुजन्ताद्दो नासाधुत्वं भवत्येवेति भाष्यप्रदीपोद्योतेषु स्पष्टम् कारको व्रजति
तरामित्यादेस्त्वनभिधानमेवेति भावः सुपेत्येतदिति सुबित्यस्याप्युपलक्षणमिदं किंच कारको व्रजतीत्यस्यैव भाष्ये प्रत्युदाहृतत्वेन तत्राप्यावृत्तेः सुबिति प्रथमान्ता
नुवृत्त्यैव सिद्ध्या तद्वैयर्थ्यमिति प्रथमान्तनिवृत्तिरेव ... तेन बोधयितुं युक्ता परिभाष्ये प्रत्युदाहृतत्वेन तत्राप्यावृत्तेः सुबिति प्रथमान्तानुवृत्त्यैव सिद्ध्या तद्वैयर्थ्ये ।
मिति प्रथमान्तनिवृत्तिरेव तेन बोधयितुं युक्ता परिभाषाऽकरणलाघवानुरोधेन तु भाष्ये सामान्यापेक्षज्ञापकमाश्रित्योभयोर्निवृत्तिरुक्ता पूर्वसूत्रेपीति तत्र गत्यं
शेऽतिङिन्त्यस्य संबंधे फलाभावेन तिङन्तार्थघटितः समास इत्येवं समासविशेषणनेव अत एव प्रपचतितरामित्यादौ न गतिसमासः किंतु ह्यागवतागतिमनाच्
तिङेति वार्तिकेन समासः तेनातिङन्त्यस्य तिङ्घटितेनेत्यर्थः सहेति योगविभागेन त्वात्तत्रार्थाधिकारानुरोधेनात्रापि अतिङन्तः समास इति व्याख्यातं अत एवान
वच्छस्य मर्षयोरिति सूत्रे किंवृत्तस्यानधिकारादकिंवृत्तग्रहणमनर्थकमित्युक्त्वा सामर्थ्यादुपपदसंज्ञार्थेन हीत्याशंक्यातिङिति प्रतिषेधात्संज्ञानर्थक्यमित्युक्तं संग
च्छते अतिङिन्त्यस्योपपदविशेषणत्वेन तदसंगतिः स्यादेव उपपदमतिङन्तेनेति तु नार्थः अतिङिति ज्ञापयति अनयोर्योगयोर्निवृत्तं सुप्सुपेति केनेदानीं समासः सुप
र्थेनेति भाष्यासंगतेः लुप्तनृतीयान्तत्वकल्पने मानाभावाच्च भाष्यरीत्या प्रत्युदाहरणाभावाच्च नचैवं नरवं नेतद्वारणाय तत्र तस्य चारितार्थ्यं कथं तत्र सुपेत्यस्यासंबंधा। राम॰
त्तस्य ज्ञापकत्वमिति वाच्यं उपपदमिति सूत्रसंबंधेनैवानेन तिङन्त्यावर्तकेन प्राचीनपठितपरिभाषानुरोधेन सूत्रद्वयेपि सुपेत्येतदसंबंधज्ञापनात् तदुक्तं भाष्ये १७

अतिङ्ग्रहणं ज्ञापयति अनयोर्योगयोर्निवृत्तं सुप्सुपेति तत्र पूर्वसूत्रे गत्यंश एव तत्संबंधः परिभाषानुरोधादेव तदाह तथा चेति कारकांशेऽप्येकदेशानुमत्येष्ट इति
गम्यते भाष्याच्च कर्तृकरणे इति सूत्रविहितसमासो बहुलग्रहणात्क्वचित्सुबुत्पत्त्यनंतरमपि यथा साहितस्य धनक्रीतेत्यादौ प्राक्सुबुत्पत्तेरिति स्त्रीप्रत्ययोत्प
त्ते प्रागित्यपि बोध्यं अश्वक्रीतीति अश्वेन क्रीतेति करणस्य क्तान्तासमासः क्रीतात्करणपूर्वादिति ङीष् सुबंतेन समासे पूर्वे टाबन्तत्वाभावात्सनस्यादिति भा
वः व्याघ्रामपि आङो घ्रशब्देन वा घ्रशब्देन गतिसमासः कच्छपीत्यत्रापि सुपीति योगविभागात्के कच्छे पिबतीत्यर्थे उपपदसमासः अमैवेति तुल्यविधा
नमित्यध्याहारलब्धं संज्ञायास्तुल्यविधानत्वमाश्रित्य तत्संज्ञकस्य तुल्यविधानत्वमुक्तं येनामैव विधीयते तेन यस्योपपदसंज्ञा विधीयते तदुपपदमव्ययेन
न समस्यते नान्येन तुल्यविधानमित्यर्थस्तत्फलितमाह तदेवेति कालादेरग्रेप्रभृतेश्चामैव तुल्यविधानत्वाभावान्न दोषः अमिति णमुल्ख्णमुञोः सामान्यग्रहणं
तेन स्वादुंकारमित्युदाहरणं तृतीयाम वा समस्यते इति यद्यप्युपपदनिमित्तकाद्विधौ समर्थपरिभाषोपस्थितेरुपपदसंज्ञासूत्रे भाष्ये उक्तत्वेनोपपदकृदन्तयो
र्व्यपेक्षादुरुपपादा कृतोऽसाधुत्वापत्तेः अत एव महान्तं कुंभं करोतीत्यत्र सविशेषणत्वेनासामर्थ्यान्नाणिति तत्रोपपदमित्यत्र भाष्ये स्पष्टं विशिष्टस्य तु नोपपा
पदसंज्ञाऽपदत्वात् तथाप्येकार्थीभाव एव वा ग्रहणात्संज्ञाभावोऽत्र यथा मंगापारमित्यत्राव्ययीभावत्वाभावः न च संज्ञाभावाभावविषये तेऽतिप्राप्ये महाविभा
षयेति शेषः एवं च महता मूलकेनोपदंशं भुंक्ते इत्यसाध्वित्याहुः उपदंशे मूलकादेरर्थकर्मत्वस्यापि सत्त्वात्सामर्थ्यं विभक्तिस्तु प्रधानक्रियानुरोधित्वात्त्या
रत्वाच्च तृतीयैवेति निरूपितमन्यत्र क्त्वा च क्तेति तृतीयान्तं अलंकृत्वेति अलंखल्वोरिति सूत्रमुपदंशस्तृतीयायामित्यतः पूर्वमिति भावः अथ तत्पुरुषासाधारण
समासान्तानाह तत्पुरुषस्यां द्व्यंगुलमिति तद्धितार्थेति समासः द्वांद्वार्थमिति ब्रह्मणोऽन्त्योऽवयवीभूतामानुषीरात्रिरित्याद्यर्थे षष्ठीतत्पुरुषाद्यनभिधानमिति भा
वः सर्वरात्र इति पूर्वकालैकेति समासः पुंवत्कर्मधारयेति पुंवत् सर्वनाम्नो वृत्तिमात्रे इति वा अतिराजीति उत्तरपदावयवत्वस्य भाष्यासंमतत्वेन टितोऽनुपसर्जनत्वात्
ङीप् अह्नोह्न इति समासान्तविधेरनित्यत्वान्न टच् अत एव द्विगोर्वेत्यनुवर्तमाने रात्र्यहः संवत्सराच्चेति चरितार्थे समासान्ते हि रात्र्यहरं तद्द्विगोरप्रसिद्धेरिति बो
ध्यं अनित्यत्वादिति अत एव समासान्तप्रकरणे सानेतिकृपाश्च सूत्रे भाष्ये उक्तं मद्रराज्ञीति टचि भस्याढे इति पुंवत्त्वे टिलोपे मद्रराज्ञीति स्यादिति भावः अहोदं अ

त्व·शे· नेदृत्येव पूर्वपदविशेषणतया सामानाधिकरण्येनान्वयेऽदेत पूर्वपदेत्यर्थलाभेन ग्रहणं स्पष्टार्थं अह्न इति नोतानुकरणात्षष्ठी द्व्यन्हेति द्वयोरन्होर्भवेत्यर्थः इदं
स· तद्धितार्थद्विगोर्विशेष्यनिघ्नत्ववादिनां मते । वस्तुतोऽस्य स्त्रीत्वमेव नास्ति रात्राह्नाहाः पुंसीति पुंस्त्वेन बाधात् न चेदं सूत्रं रात्राह्नाहादिशब्दघटितसमासमात्रनिमित्तलिंगस्य
४६ तरंगस्यैव बाधकं न तु बहिर्भूततद्धितार्थनिमित्तलिंगस्यापीति वाच्यं सूत्रोपस्थितरात्राह्नादिशब्दार्थविशेष्यत्वप्राप्तस्यैव बाधापत्त्या बहिर्भूतसमाहारविशेष्य-
त्वप्राप्तस्य बाधानापत्तेः न च पुंस्त्वाधिकारेऽन्हाहान्ताः स्वरेडभेदा रात्रान्ताः प्रागसंख्यकाः इत्यनेन तत्र समर्थिताः प्राद्यलंप्राप्तापन्नपूर्वाः परोपगाः तद्धितार्थे द्विगुः संख्यासर्वनामतदंतका
इत्यमरोक्तेन परं विरोधः शेषं तु ज्ञेयं शिष्टप्रयोगतः इत्युक्तेरन्हाहान्ता इत्यनेन प्राप्तस्य पुंस्त्वस्य तद्धितार्थे द्विगुरिति परोपगत्वेन परत्वाद्बाध इति वाच्यं कोशस्य लोकव्याकरण
सिद्धलिंगानुवादकत्वात् व्याकरणैकवाक्यतया तद्धितार्थे द्विगुरित्यत्र रात्राह्नाहान्तातिरिक्तस्यैव ग्रहणात् अन्यथा प्राद्यलंप्राप्तेत्यनेनापि परत्वाद्बाधे प्राह्णः परागत
मह्नः पराह्न इत्याद्यसिध्यापत्तेरिति दिक् सुखादिषु च तत्पुरुषातिरिक्तोऽहन्शब्दान्तः समासः सर्वोऽपि सुखादौ युवादिरपि सुखाद्यन्तर्गणएवेति युवादिषु पाठ इति।
भाष्यविरोधस्तु इत्यन्याह अहं तानुकरणेति तत्पक्षे षष्ठ्याः स्थाने व्यत्ययेन प्रथमा स्पष्टार्थमिति समाहारेत्यस्य वृत्त्यभावात् पुण्याहमि पुण्यसुदिनाभ्यामि-
ति क्लीबत्वं अग्न्याख्या अग्नेभवोऽग्न्यामुख्य अग्न्यादिकं देवदत्तस्योरो देवदत्तोरः उपानसमिति प्रादिसमासः अनिस्व इति ततोऽधिकवेगवानित्यर्थः सेवेति नौ
चेत्यर्थः आकर्षश्च इति पंचांगुलो धान्यादिकर्षकः काष्ठविशेष आकर्षः उपमानात्किं पुनेनिष्क्रान्तो निः ष्वा फलकसक्थमिति मयूरव्यंसकादित्वात्समासः
नावो मंडूकप्लुत्या तद्धितलुकीत्यनुवर्तते परवल्लिंगतया स्त्रीत्वं प्राप्नोतीत्यत आह क्लीबत्वमिति द्विगोरिति खारीशब्दान्तात् द्विगोरित्यर्थः अत्राप्यतद्धितलुकी
त्येव तेन द्वाभ्यां खारीभ्यां क्रीतो द्विखारीरित्येव उदाहरणे अर्धखारमित्यादौ क्लीबत्वं प्राग्वत् अर्द्धखारीति एकविभक्तावषष्ठ्यंतेति वचनादुपसर्जनत्वाभावेना-
न ह्रस्वः ह्रस्वपाठे तु लोकतो नपुंसकत्वेन पुंसवद्ह्रस्वत्वं अंजलिभ्यामिति तत्परिमितधान्यादिनेत्यर्थः अस्य परिमाणत्वाट्ठञोऽध्यर्द्धेति लुक् जनपदे भवो जा
नपदः भावप्रधाननिर्देशस्तदाह समासेनेति प्रत्यासत्तिलभ्यमेतत् कस्येत्याकांक्षायां सन्निधानाद्ब्राह्मण इति लभ्यते सुराष्ट्र इति अधिकरणस्य शेषत्वविव राम·
क्षया षष्ठीसमासोऽत्र बोध्यः सप्तमीति योगविभागस्तु भाष्यानारूढः जानपदेति किं देवब्रह्मा नारदः कुब्रह्म इति ब्राह्मणपर्यायो ब्रह्मशब्दः श्मश्रुणाद्यधिक्तो १८

त्रह्मेतिवार्थः तत्रापिमूर्तित्रयस्तातायास्तंत्रेषुप्रसिद्धत्वात् आन्महतः ग्रहीष्यतइति एवंचसमानाधिकरणपदंव्यर्थमितिभावः। महाबाहुरिति बहुव्रीहिः ननूत्तर
सूत्रे द्व्यष्टनोरेवग्रहणात् एकादशेत्यत्रात्वंनस्यादत आह आदिनीति योगविभागस्यभाष्यानारूढत्वादत आह निर्देशाद्वेति अन्येषामपिदृश्यतइतिदीर्घ।
त्वमितिपरे कृते आत्वमिति आन्महतइत्यत्रलिंगविशिष्टपरिभाषाभावस्यकृत्वा सूत्रेभाष्ये उक्ततयापरत्वात्पुंवत्त्वंबाधित्वात्वंस्यादितिनशंक्यमितिभावः
महद्भूतश्चंद्रमाइत्यादौच्व्यंतेगौणत्वान्नात्वमितिभाष्येस्पष्टं महतोमहत्यावेति पुंवद्भावश्चेति चोन्वाचयइतिभावः समुच्चयेचशब्दः पुंवत्वसंनियोगेनैव।
चात्वं अतएवभाष्येस्त्रियामेवादोहृतमितिमतांतरंकैयटेस्पष्टं अष्टनः क·हविषि किं अष्टानांकपालानिअष्टकपालानि बहुव्रीहौनतत्पुरुषएवसमासांतः
सुलभइतिनयतोबहुव्रीहावप्यच्समासांतः सुलभइतिभावः एतेनास्यसाधारणत्वात्बहुव्रीहावपीतिचिंत्यमित्यपास्तं योगविभागस्यभाष्येऽदर्शना।
दाह समाहारइति एवंचगोरतद्धितेतिटजितिभावः एकादिनवांतानांद्वंद्वतत्पुरुषयोश्चार्थेद्वंद्वइतिसूत्रस्थभाष्यध्वनितानभिधानादाह द्वादशेति द्वाविं।
शतिरितिसमाहारद्वंद्वे स्त्रीत्वंलोकात् इतरेतरयोगस्तुनतत्सूत्रभाष्येएवध्वनितानभिधानात् द्व्यधिकाविंशतिरितितत्पुरुषोवाद्व्यधिकेत्यत्रसंख्या।
संख्येयंवान्यपदार्थः एकादीनांवृत्तिविषयेविंशत्यादीनांचसर्वत्रसंख्यापरत्वस्यापिसत्वात् तेनद्वाविंशतिर्गवांद्वाविंशतिर्गावइत्युभयंसिद्धंतत्रद्वंद्वेसं
ख्येत्यनेनपूर्वपदप्रकृतिस्वरत्वंतत्पुरुषेसमासांतोदात्तत्वमितिबोध्यम् भाष्येद्व्यधिकाविंशतिर्द्वाविंशतिरितिसमानाधिकरणसमासेस्वरोनसिध्य
तिसंख्येत्यस्यद्वंद्वविषयत्वादस्तुतर्हिद्वंद्वइत्यस्यद्वंद्वोपीत्यर्थः स्वरोनसिध्यतीत्यस्यसोपिदुष्टःस्वरोनसिध्यतीत्यर्थइतिकेचित् परेतुभाष्येसमानाधिकर
णसमासेतिएकदेशिनःसाचस्वरएसिध्यादूषिता ततोस्तुतर्हिद्वंद्वइतिसिद्धांत्युक्तिः तस्मादितरेतरयोगद्वंद्ववत्समानाधिकरणतत्पुरुषस्याप्यनभिधा
नेएवभाष्यस्वरसइदमप्यन्वाख्यानोपायमात्रं वस्तुतःसंख्यांतराणिनिर्वृत्तावयवान्येवैकविंशत्यादीनि अतएवतेभ्यःकृत्वसुजादिसिद्धिः अन्यथास्वागमसुद
येस्वागमकार्यभाववदिहापिसंख्याकार्यंनस्यादित्याहुः त्र्युपसितिसंतादेशोव्याख्यानादत आह त्रयस्यादिसुजर्थेइति संख्यायाव्ययेतिसमासः सुजर्थेनेतिपाठेतदर्थेन
त्रिशब्देनेत्यर्थः व्यवहितत्वादष्टनःसंबंधायसर्वेषामिति एकादिश्चैव अत्रैकशब्दःसंख्यावाच्येवप्रसिद्धत्वात् तृतीयेनेति सहेतियोगविभागात् मयूरव्यंसकादित्वा

लघुशे· द्वितीनुत्पाप्ता धाश्विति धाप्रत्ययस्यैव व्याख्यानात् तेन षड्ढा धातीति षड्धेत्यत्र न आतो नुपसर्गे इति कः स्विपंटाप् धासुवेत्यनेनोत्वस्यैव विकल्पः तेन षड्ढ्वं
स· जित्यमेव तेनोत्वाभावेपि षड्डेत्येवेति कैयटः उत्वपक्षे सिद्धत्वं पुत्वमिति तदनुसारेणाह षड्धेति अत्रैकैयटोक्तं युक्तं भाष्येपि षड्डेत्येव पाठस्य प्रायेणो।
५७ पलंभात् षोडन्निति बहुव्रीहावेव सिद्धं तस्येति दत्रादेशः परवल्लिंगं समाहारे सन पुंसकमित्यस्य बाधकत्वात् द्वंद्वपदमितरेतरयोगविषयं तत्रोङ्गावय
वस्य समुदायस्य तत्र द्वंद्वार्थे तयोः वयवलिंगेनानियमे प्राप्ते नियमार्थमिदं तत्पुरुषेत्वेकदेशिसमासे पूर्वपदार्थप्रधाने परवल्लिंगप्रा सा विध्यर्थं द्वं
द्वतत्पुरुषयोरितिषष्ठ्यंतमर्थपरं तेनानुप्रयोगेपि तल्लिंगं शब्दार्थयोरभेदाध्यवसायेन तथा निर्देश इत्याह परपदस्येवेति परपदार्थस्येव समासार्थस्य लिंगमित्य
र्थः द्विगुप्राप्तेति द्विगुग्रहणमेकविभक्तीति सूत्रस्थ कैयटानुरोधेन वस्तुतस्तदर्थे परवल्लिंगमित्यस्य परपदाश्रितप्राप्तस्थितपूर्वपदप्रयुक्तलिंगमात्र।
बाधकत्वेन तत्प्राप्त्यर्थो द्विगावेतदप्राप्तेः समाहारद्विगोर्नपुंसकत्वमेव प्रायेणेष्यते अतएव भाष्ये निषेधवार्तिके द्विगुग्रहणं नोक्तं यत्तु अलंशब्देन पर्या
दयोग्लानाद्यर्थे इति समास इति तन्न तस्य नित्यसमासत्वेनालं कुमार्यै इति भाष्योक्तविग्रहानुपपत्तेरत आह अतएव ज्ञापकादिति अतएवालंशब्द।
योगे चतुर्थीविधानं सार्थकं गतिसमासपदं गतेः समासो येनेति बहुव्रीहिणा कुगतीति सूत्रपरं तत्रान्यत्र फलाभावा प्रादिप्रसमेवेत्याह निष्कौशांबिरिति
द्वंद्वैकदेशिनो रितिन्यासेनायं प्रतिषेधो भाष्ये प्रत्याख्यातः अत्रेति अतएव पूर्ववदिति चरितार्थो अन्यथा निपातनादेव सिद्धे किं तेन समुदायस्य पू
र्ववल्लिंगं वेपि उत्तरपदेऽश्ववडवपूर्वापरापरोत्तराणामिति निर्देशा ज्ञापनिवृत्तिः अश्ववडवाविति तु समुदायस्य आवंतत्वाभावाच्छीमाना प्राप्त्यद्ध्या।
सिद्धमिति निर्देशस्त्वनुप्रयोगे चरितार्थः स्यात् अश्ववडवशब्दार्थः पूर्ववल्लिंगं लभत इत्यर्थात् रात्राह्ना द्वंद्वतत्पुरुषपदमनुवर्तते इदं प्राप्तापन्नालंप्रादिसमासेष्वपि
अतएव परवदिति सूत्रे एकदेशिग्रहणं कृत्वा प्राप्तेत्यादि भाष्ये प्रत्याख्यातं अतिव्रत तत्पुरुषग्रहणं कार्यमिति तत्तद्भावः अतएव प्राह्णः सर्वाह्णः इत्यादिसिद्धिः
पुण्यसुदिनाभ्यामिति च चरितार्थं अस्यैकदेशिसमासविषयत्वे तु तद्वैयर्थ्यस्पष्टमेव ह्यह इति अकारांतोत्तरपदत्वाभावान्नस्तोत्वं गणसूत्रमिति समा सम·
हारद्विगुः द्वंद्वतत्पुरुषाधिकारे लिंगानुशासनेपाठात् प्रतिप्रसवविधिलाघवानुरोधाच्च समाहारद्विगावेव प्रवर्तते इति भावः तत्पुरुषइत्येवेति तादृश द्वंद्वा २९

संभवादिति भावः अपथा इति पथो विभाषेति समासान्तनिषेधः भविष्यति मर्यादेति ह्रस्वत्वं शद्रात्रः पंचदशरात्र इति भाष्यप्रयोगो लोकाश्रयत्वाल्लिंगस्य
सिद्धः अर्धर्चाः बहुवचनादप्यर्थावगतिः ननु लिंगप्रकरणं व्यर्थं अर्धर्चादीनामित्याद्यर्थे लोकाश्रयत्वाल्लिंगस्येत्यस्यावश्यकत्वादिति चेत्सत्यं जात्या
ख्यायामित्यादिसूत्रसमूहवदिष्टापत्तेः लक्ष्यानुरोधेन तस्यानुपयुक्तान्यपि तानि व्याचष्टे जात्याख्यायामित्यादि जातेः प्राधान्येनाख्यायामित्यर्थः भावप्रत्य।
यं विना प्राधान्येन जातिबोधे गवादिशब्दानां साधुत्वे इदमेव सूत्रं मानं तस्याविशेष्यत्वे च व्याहायन्वयो व्यक्तिघटितपरम्परया बोध्यः तत्र जातेरेकत्वेनैकवचन
मेव प्राप्तौ तोऽयमारंभः एकत्वं चानवबहुवचनार्थः एकस्मिन्नर्थे वर्तमानः शब्दो बहूनामर्थानां वचनं बोधको भवतीत्यर्थोऽदश्यातिदेशोऽयमित्याहेकोप्यर्थ इत्य
ादि बहुक्तं भाष्ये यावद्ब्रूयादेकोऽर्थो बहुवद्भवतीति तावदेकस्मिन्बहुवचनमितीति एकत्वेऽर्थे बहुत्वप्रयुक्तं कार्यमतिदिश्यत इति अयमपि कार्यातिदेश एवेत्यन्यत्र वि।
स्तरः एतच्च भाष्ये प्रत्याख्यातं जातौ संख्यान्वये एकवचनस्य व्यक्तौ संख्यान्वये बहुवचनस्य सिद्धत्वात् एवं च पृथ्वीतरं मुनीनां प्रामाण्यातं सूत्रोक्तार्थप्रयोगाणा।
मसाधुत्वमेव एतेन यत्र वने एक एवाम्रवृक्षस्तत्र जातिपरत्वे आम्राः संतीति प्रयोगसाधुत्वार्थमिदमित्यपास्तं सविशेषणस्येति इदं मुख्यार्थे बहुवचननिषेधाय
यदा त्वसमवृद्धस्य स्वघटिते उद्भूतावयवभेदे समुदाये लक्षणा तदा बहुवचनं भवत्येव तेन त्वं राजा वयमप्युपासितगुरुप्रज्ञाभिमानोन्नता इत्यादि सिद्धं गार्ग्योहं
ब्रवीमीत्यादावप्ययं निषेधः उत्तमपुरुषानुरोधेनात्राहमित्यस्यैव विशेष्यत्वात् फल्गुनी नक्षत्र इति प्रथमा द्विवचनं नक्षत्रे यद्यभिधीयेत इत्यर्थः चेन द्वयो
रित्यनुकर्षः फल्गुन्यो माणविक इति फल्गुन्यां जात इत्यर्थे फल्गुन्यषाढाभ्यां टानाविति टः टित्वान्ङीप् एकस्यां तु तारायां नैतयोः प्रयोगः उद्भूतावयवभेदे स
मुदायवृत्तित्वात्॥ तिष्यपुनर्वस्वोः नक्षत्र इत्यनुवर्तनेनेति ष्यपुनर्वसुशब्दयोरभिधेये नक्षत्रे कोऽपि नास्ति यो नक्षत्रवाचकानां द्वन्द्व इत्यर्थस्तेन पर्यायाणा।
मपि तिष्यपुनर्वसू इति तिष्य एकतारा पुनर्वसू द्वितारेति द्वंद्वे पुनर्वस्वोरिति निर्देशात् तदाह तिष्यश्च पुनर्वसू चेति विशाखेति विशाखाश्चानुराधाश्चेति द्वं
द्वः माणवका इति नक्षत्रेण युक्तः इत्यणो लुबविशेष इति लुपि जातार्थे संधिवेलेत्यणि तस्य श्रविष्ठाफल्गुनीत्यादिना लुक् बहुवचनस्य किं इदं तिष्यपुनर्वसु
समाहारद्वंद्वः अत एव समाहारद्वंद्वः प्राण्यंगादीनामेवेति द्वंद्वश्चेत्यादीनां नार्थः न चैवमप्यत्र जातिरप्राणिनामिति नित्यैकत्ववद्भावे बहुवचनाभावात्तत्रं।

ल·शे·
स·
४८

र्थमिति वाच्यं तद्वैकल्पिकत्वस्याप्यनेन ज्ञापनात् न चैते प्राणिन इति वाच्यं आपोमयः प्राण इति श्रुतेरद्भिर्विनाम्लायमानप्राणानामेव प्राणित्वात्स्पष्टं चेदं भाष्ये।
न स्त्रत्रसमासे इति तु नोक्तं यत्तिष्यस्तौ पुनर्वसू येषां ते तिष्यपुनर्वसवः उन्मुग्धाः अवयवभूतास्तिष्यादयो वर्तिपदार्थस्तेषामेव विपर्यासबुद्धिविषयाणां समुद-
ना(?)वयवभेदः समुदायः समासार्थः उन्मुग्धा इत्यस्य विपर्यासबुद्धिविषया इत्यर्थः अस्मद इत्यादौ न्यपि व्यर्थानि आचार्याः कथयंतीत्यादौ शक्तिगतस्यावयव
गतस्य वा बहुत्वस्यारोपेणैवेहापि तदारोपेणैव सिद्धेरिति स्पष्टप्रतिपत्त्यर्थमिति चेल्लिंगानुशासनमपि तथेति भावः उच्चंकुखलास्तु कालोपसर्जने इत्यत ए
कशेषप्रकरणांतं तुल्यपदानुवृत्त्या प्रधानप्रत्ययार्थवचनेन तुल्यमित्यर्थो त्सर्वमिदं सूत्रकृतैव प्रत्याख्यातमित्याहुः स नपुंसं तच्छब्देन समाहारद्विगुद्वंद्वौ
परामृश्येते व्याख्यानात् अकारांतेति अत्र द्विगुः समाहारद्विगुरेव स नपुंसकमित्यपवादत्वात् पात्रादीति स्त्रीत्वं नेत्यर्थः त्रिसूत्रीत्यादिप्रयोगदर्शनात्सूत्र।
शब्दस्यात्र पाठ इति कैयटश्चिंत्यः बहुसूत्रमिति भाष्यप्रयोगस्तु प्रकरणेन्यपदार्थे बहुव्रीहिणा साध्याः पुण्येत्यादि रात्रान्हेत्यस्यापवादः।पथः सं कृतसमा
सांत इति पथ इति कृतसमासांतैकदेशानुकरणं प्रथमांतमिति भावः प्रतिपदोक्तपरिभाषा न प्रवर्तते व्याख्यानात्तदाह त्र्यागतं पंथा इति ऋक्पूरिति समा
सांतः विपथा नगरी अतिपथे त्यादौ चनेदं अर्धनावमिति वत्स्त्रीकाश्रयत्वाल्लिंगस्य एतेन कापथविपथौ व्याख्यातौ आवश्यकत्वादनेनैव सिद्धे अपथं नपुंस
कमिति सूत्रं न कार्यं।सामान्ये नपुंसकमिति अनियतलिंगविषयं तेनादिः पचतीत्यादेव। आदिशब्दो नित्यं पुमान् आद्यपाकानुकूलक्रियेत्यर्थः न्यायसिद्धमेतत् वि
शेष्यविशेषासन्निधाने लिंगसर्वनाम्नो नपुंसकस्य न्याय्यत्वात् लिंगसर्वनामनपुंसकमिति दाक्षिनायनेति सूत्रे भाष्ये स्पष्टं अनेनैव क्रियाविशेषणानां नपुंसकत्वे सि
द्धे क्रियाविशेषणानां क्लीबत्वं द्वितीयांतत्वं चेति नापूर्वं धातूपात्तभावनां प्रति फलांशस्य कर्मतयात्तत्समानाधिकरणे क्रियाविशेषणे द्वितीयांतत्वस्यापि सिद्धेः न
स्य क्रियाजनकत्वमपि स्वज्ञानद्वारा बोध्यं तद्बुद्ध्या पूर्वमुद्दिश्य क्रियायां प्रवृत्तेः संप्रदानादेरिव ज्ञानगतजनकत्वस्य च तद्विषये आरोपः वाचनिकत्वं तु यत्र धा।
त्वर्थस्य करणत्वेनान्वयस्तत्रापि स्यात् यथा तृप्तिकामस्तोकेनौदनं पचतीत्यादौ तृप्तिविषयकामनावत्कर्तृकः स्तोकविक्लित्तिकरणक ओदनकर्मकः पाक इति बो
धः तद्विषयकामनावत्कर्तृकत्वेन तस्या उद्देश्यत्वमर्थसिद्धं केचित्तु प्रादिषु कर्मत्वव्यवहारस्तूद्देश्यत्वसामान्यादिति दिक् न स्तुरुषो न परवल्लिंगमिति या।

एम·
२०

॥
वदधिकारोयं ञ्चनञ्कर्मधारयइत्युक्तेनञ्तत्पुरुषस्यनकर्मधारयत्वं आरोपमात्रस्यनञ्द्योत्यत्वेनसामानाधिकरण्याभावात् यद्यप्युपस्थितयोःसामानाधिकरण्यव्यवहा
रः नञ्समासेहि आरोपितोन्तरपदार्थे आरोपितधर्मकेर्थेवोत्तरपदस्यवृत्तिः नञ्तुद्योतकइतितदभावः संज्ञायांकं अमोदिरिहसंज्ञासाचोशीनरेषुतत्पुरुषाभिन्नान
न्समासकर्मधारयरूपाचनास्तीतिनान्नाधिकारप्रयोजनं इदंप्रकरणंपरवल्लिंगत्वस्यविशेष्यनिघ्नत्वस्यचापवादः उपज्ञोपक्रमनाशाल्लेविवक्षैवनियामिकानव
व्यस्थितिरितिसूच्यते तेनत्वदुपक्रमसौजन्यव्यवहारइत्यपि तत्रयद्यपिविवक्षाहिविधाप्रयोक्तोलौकिकोच प्रयोक्तृशब्देनव्यवहारार्थंप्रयोगकर्तारःऽसमदाद
यः लोकपदेनविदितवेद्यःपरावरज्ञःशिष्टोलोकःएतदेवशिष्टत्वंएषोवरादिसूत्रेभाष्योक्तं तथाप्यत्रनाद्यविवक्षा तेषामपभ्रंशप्रयोगेबाहुल्येनप्रवृत्तेः तस्मादंत्यैव
नेहियन्नार्थेयंशब्दःधर्मबुद्ध्याप्रयुंजतेतेषांशास्त्रविषयतेतितदस्यनद स्त्रियादितीनिसूत्रेभाष्येस्पष्टं तेषामेवाभिधानानभिधाने अपिवोध्येइहषष्ठीतत्पुरुषंविना।
तदादित्वासंप्रत्ययान्नाधिकारफलं उपज्ञायतेइत्युपज्ञा कर्मण्यङ्पाणिनेरुपज्ञेतिकर्तृषष्ठ्यासमासः उपक्रमेकर्मणिघञ्पाणिनिसंबंध्याद्यज्ञानविषयइत्य
र्थः छायाबाहुल्येसतियाछायातद्वाचीयच्छायांतस्तत्पुरुषइत्यर्थः तत्रकस्यबाहुल्येइत्याकांक्षायामाश्रयद्रव्यनिमित्तत्वात्छायायास्तदाश्रयस्येतिगम्यतेत।
श्चपूर्वपदार्थकृतमेवेत्याशयेनाह पूर्वपदार्थेति पूर्वपदार्थबाहुल्यस्यषष्ठीतत्पुरुषएवसंभवात् नात्राप्यधिकारफलं पर्यायस्येतिपर्यायवचनस्येतिवाच्येपर्याय
स्येत्युक्तिः सत्यासत्यभामेतिवत् एवकारेणस्वरूपस्यविशेषाणांचव्यावृत्तिः रूपोति पर्युदासवृत्त्येत्यपिकश्चित् नेहकाष्ठसभा अत्रापिनाधिकारोपयोगोन्यासं
भवात् सभाशब्दःशालायांसंघेचतत्राद्यप्रतिषेधादाह संघातेति अशालेत्यस्याशालार्थेत्यर्थः अत्राप्यन्यासंभवान्नाधिकारोपयोगःप्रथमार्थेषष्ठीत्याशयेनाह।
एतदंतइति द्वंद्वेसमाहारेतरेतरयोगाभ्यांरूपद्वयस्यदुर्वारत्वेनबहुव्रीहौप्रत्युदाहरंति दृढसेनङ्गाइतितत्पुरुषः द्वितीयाश्रितेत्यादिनेति व्याख्यानात्तच्छेषइत्य।
स्यप्रथमांतत्वाच्चप्रथमांतपदोपात्तापेक्षशेषस्यैवग्रहणमितिभावः अन्यस्येति अस्यत्वंचोपस्थितसमस्यमानप्रथमांतापेक्षत्वंतच्चयस्ययस्मिन्नित्यादितदाह।
अप्रथमेति तदंतार्थइत्यर्थः यद्यपिपदेनप्रकृत्यर्थोपसर्जनैः क्रियाकारकभावादिसंबंधरूपोविभक्त्यर्थःप्राधान्येनाभिधीयतेप्रकारतानिरूपितत्वाच्चसंबंध
स्यापिप्राधान्यव्यवहारः एवंचदेवदत्तादिपदैःसामानाधिकरण्यानुपपत्तिस्तथापिव्याख्यानात् विभक्त्यर्थोस्मिन्नसंबंध्यंतर्भावेणापिशक्तिकल्पनयाऽदोषात् तत्र

स॰शे॰ कस्यसंबंधिनःसमस्यमानपदैरुक्तत्वेनद्वितीयःसंबंधीयस्येत्यादिप्रकृत्यर्थभूतोगृह्यतेइतिस्पष्टंभाष्ये चित्रागावोयस्येत्यादौलौकिकेवाक्येचित्राणांगवांस्वाम्यपि हृ॰
स॰ नोतदर्थबोधकविग्रहवाक्येचविशेषणविशेष्यभावव्यत्यासस्ततःशिष्टानांतथैवबोधात् तत्रषष्ठीसप्तमीविभक्त्यंतातिरिक्तार्थेकर्तृकर्मवचनसुबंतानामेवसमासः
४९ मत्वर्थेबहुव्रीहिःकर्तृकर्मवचनेनाप्रथमायाइतिवार्त्तिकात् नःपुत्रोयस्मादितिविग्रहेमत्वर्थएव तत्रपंचम्याःषष्ठ्यपवादत्वेनषष्ठ्यर्थकत्वात् एवंचन्याइत्तरेये
ष्वइत्यत्रापिमत्वंतस्यैवबहुव्रीहेरप्यस्त्यर्थानभावेणशक्तिरितिमनुसूत्रेभाष्येस्पष्टं प्राहवतीनदीत्यादेःपदसमुदायस्यमास्त्वाहेतिवाक्यार्थेवर्त्तमानस्यबहु।
व्रीहित्वात्स्त्यर्थपदग्रहणं अन्येत्यादिकिं बहुपदोबहुव्रीहिःस्वपदार्थेमाभूदिति द्वयोःपदयोःसमानाधिकरणत्वेस्वपदार्थेवृत्तौतत्पुरुषेणबाधात् किंचबहुषु।
सावकाशंबहुव्रीहिंस्वपदार्थेपिसमानाधिकरणतत्पुरुषोबाधेतसतित्वस्मिन्स्वपदार्थेसावकाशंतत्पुरुषमन्यपदार्थेबहुव्रीहिर्बाधतइतिनदोषः अनेकंकिं बहूनाम
र्थेपदस्यात् तेनचित्राजरद्गुरित्यत्रचित्रापदेपुंवत्त्वेन कपिंजलाधिकरणन्यायस्यात्रशास्त्रेऽनाश्रयणात् चतुरादिपदानामप्ययं यदितुतद्धितार्थेत्यनेनोत्तरपदे
समासस्यविधानात्तज्ज्ञापकात्बहूनांसमासोयथाभिधानेसिद्धः चित्रगुरित्यादौगोशब्दादेरुपसर्जनत्वमप्येकविभक्तीतिसूत्रेणसिद्धं तच्चात्रैवोपपादितंस्पष्टंचे
दंप्रकृतसूत्रेभाष्येइत्युच्यतेतदास्यछार्थमनेकग्रहणंसुपेतिनतोयत्तुनेहसंबध्यतेद्वयोःस मासानापत्तेः प्राप्तमुदकमित्यादि अत्रयदुक्तव्यंतकारकेउक्तंत
त्रान्यपदार्थःसमासघटकसर्वपदशक्यःपरस्परसमभिव्याहारएवचतच्चतुल्यबोधकः अतएवान्यपदार्थेवर्त्तमानंअनेकंसुबंतमितिसंगच्छते नञोस्त्यर्थाना।
मिति नञःपरंयदस्त्यर्थवाचिपदंतदंतस्यपदांतरेणबहुव्रीहिः अस्त्यर्थवाचिनांतुवालोपइत्यर्थः एवंप्रादिभ्यइत्यपिव्याख्येयं उच्चैर्मुखइत्यादावुच्चैरित्य।
स्याधिकरणशक्तिप्रधानत्वेपिवृत्तावाधेयप्रधानत्वात्सामानाधिकरण्यंअस्तीत्यस्यतिङंतत्वेनसुबित्यनुवृत्तेःसमासोनस्यादतआह विभक्तीति विद्यमानस्तीरे
त्युदाहरणार्थः निपातनादिति अन्यथाप्राप्तस्यान्यथोच्चारणंनिपातनंप्रसज्यप्रतिषेधार्थकनञासमासोपिततएव भाषितःपुमान्यस्मिन्नर्थेतद्भाषितपुंस्कं प्रवृत्ति
निमित्तस्याधारत्वविवक्षयासप्तमी ततस्तदस्यास्तीत्यर्शआद्यच् अतद्गुणसंविज्ञानश्चायंबहुव्रीहिः पुंस्त्वविशिष्टस्यस्त्रीलिंगवाच्यत्वाभावात्शब्दस्वरूपस्यमर्थकत्वे राम॰
स्तस्यव्यतिरेकेणस्त्रीवाचकसमानानुपूर्वीकःसमानार्थश्चगृह्यतेप्रत्यासत्तेः तुल्येप्रवृत्तिनिमित्तेइति यदर्थज्ञानेनतद्विशिष्टेशब्दस्यप्रवृत्तिस्तत्प्रवृत्तिनिमित्तं॥ २१

भाषितः पुमान्येनेति तु नोक्तं कुटीजीविक इत्यादावतिप्रसंगात् कुटशब्दो घटे पुमान् गेहे स्त्री गर्भिभार्यः प्रसूतभार्य इत्यत्र तु गर्भो व्रीहिः प्रसूतोयमित्यादिप्रयोगात्पुंस्त्वविशि
ष्टस्यापि विवक्षितत्वान् भाषितपुंस्कत्वमस्ति उभयत्रापि गर्भसंबंधोऽपत्यापत्यवत्संबंधः प्रवृत्तिनिमित्तमिति समानायामाकृतौ तत्त्वमस्तीति कैयटः अन्ये तु पुंसि
गर्भो व्रीहिरित्यत्रावयवभूतगर्भसंबंधः स्त्रियां त्वनवयवभूतगर्भसंबंधस्तथा प्रसूतादिशब्दानामपि स्त्रियां गर्भविमोचनं पुंसि गर्भाधानमिति समानाकृतित्वाभाव एव पुंव
द्भावाभावे तु स्त्रियाः पुंवदिति योगविभागरूपो यत्नः कार्यः अग्रिमेण च तस्य काचित्कत्वं बोध्यते एतदेव ध्वनयितुं पुंवदिति आदौ मध्ये पठितं अत एव भाष्यकर्तेत्यत्र
यत्न इत्युक्तं न हि शब्दस्य प्रवृत्तिनिमित्तं यत्नसाध्यं शब्दार्थसंबंधनित्यताहानेः एवं च प्रवृत्तिनिमित्तविशेषे गर्भिणीशब्दो नित्यस्त्रीलिंग इति गर्भिण्यो नार्य एव।
स्त्रीदाराद्यैर्यैर्हि शब्द्यं यादृशैः प्रस्तुतं पदैः गुणद्रव्यक्रियाशब्दास्तथा स्युस्तस्य भेदकाः इत्यमरोऽनियतलिंगविषय एव यादृशैर्यैर्लिंगसंख्याबोधकैः तथा तल्लिंगसं
ख्याबोधकाः भेदकाः विशेषणभूतार्थप्रतिपादकाः शुक्लादयो गुणशब्दाः दण्ड्यादयो द्रव्यशब्दाः पाचकादयः क्रियाशब्दाः शृणुत जनककल्पाः क्षत्रि
याः सर्व एते दशवदनभुजानां कुंठिता यत्र शक्तिः नमयति धनुरैशं यस्तदारोपणेन त्रिभुवनजयलक्ष्मीर्मैथिली तस्य दाराः इत्यादौ दाराः इत्यादेरेव विशेषणत्वेन न
[illegible] वदंति अनूङिति च प्रसज्यप्रतिषेधः तेनेडविडभार्ये न दोषः पुंवाचकस्येति प्रत्यासत्त्या पुंवद्भावभाजः शब्दस्य प्रयोगांतरे पुमांसमाचक्षाणस्य यद्रूपं
तदेवातिदिश्यते तेन जरतीशब्दे न विग्रहे वृद्धगुरिति न (वरटाभार्य इत्यत्र हंसभार्य इति न) अत्र च रूपातिदेशो न तु स्त्रीरूपार्थपुमर्थयोरतिदेशः स्वोत्तरपदपरत्वा
भावात् भाषितपुंस्कात्परत्वस्य चासंभवेन वरटाभार्यस्य स्थाने हंसभार्यस्यापत्तेर्भाषितपुंस्कादित्यस्यासंगतेश्च स्त्र्यर्थस्य पुमर्थो भवतीत्यर्थेऽतिदिष्टे दावि
शब्दप्रवृत्तिरत्र पक्षे इति बोध्यं यद्यपि रूपातिदेशेऽर्थानिवृत्तिरेवं च वातंड्य पुंवत्त्वे स्त्रियादौ वतंडाच्च लुक् स्त्रियामिति यञो लुगापत्तिस्तथापि अतिदिश्यमानरू
पविशिष्टस्य स्वाश्रयस्यातिदेशविषयेऽप्रवृत्तेर्न दोषः स्पष्टं चेदं स्त्र्यर्थवत्सूत्रे कैयटे किं च स्त्रीत्वविशिष्टार्थवाचकस्य शब्दस्य स्थाने पुंस्त्वविशिष्टार्थवाचकरूपाति
देशे तदर्थविशिष्टस्य निवृत्त्यार्थस्यापि निवृत्तिरिति न कश्चिद्दोषः ध्वनितं चेदं तृतीयादिष्विति सूत्रे भाष्ये समानाधिकरण इति सामानाधिकरण्यं चैकार्थविशेष्य
कप्रतीतिजनकत्वमात्रं न तु भिन्नप्रवृत्तिनिमित्तत्वगर्भं मतं एव युगपदधिकरणवचनतापक्षे पट्वी मृद्व्यावित्यत्र पुंवत्त्वमाशंक्य वृत्तौ वृत्तेः प्राक्त्वयत्र सामाना

त्त·शे· धिकरण्यंतत्रैवनतत्रवृत्तिः प्रकृतेचनततःप्राक्सामानाधिकरण्यमित्युक्तरीतेर्द्वंद्वसूत्रेभाष्ये नामंत्रितेसमानाधिकरणइतिसूत्रेचभाष्येसामान्यवचनमित्यस्याग्रे
म· द्विविकरस्वतीतिपर्यायेषुप्रत्युदाहरणंदत्तमितिदिक् चित्राजरतीति वृत्तौसंख्याविशेषाभावेपिगोत्वेनात्रानेकव्यक्तिभानात्भूमरूपमत्वर्थेत्र बहुव्रीहिरितिभा
५० व नेहेति अतएवात्रसूत्रेपट्वीमृद्वीभार्यायस्येतिद्वंद्वगर्भबहुव्रीहौपट्वीमृदुभार्यइतिभाष्येउदाहृतं तत्रहियःपूर्वपदं द्वंद्वोनसभाषितपुंस्कः अतएवप्रा
ङीशब्दोत्तरङीषोननिवृत्तिः मृद्वीशब्दस्यकेवलस्य भाषितपुंस्कत्वेपिनपूर्वपदत्वमितितदाक्षेपेनैतत्सिध्येदितिभावः परेत्वाक्षेपेपिनदोषः धर्मादिनि च सूत्रे।
केवलादित्युक्त्यातस्ययौगिकत्वबोधनात् तद्धिमध्यमपदव्यावृत्तयेसमासास्तिन् पूर्वपदस्यविशेषणमित्याकरइत्याहुः चित्राजरद्गवीत्यस्यप्रयोगइतीतिशेषः
भार्यमित्यस्यसूचयतीतिशेषः पट्वीमृदुभार्यइतिभाष्येणेदंध्वनितमितिभावः जरद्गवीत्यत्रगोरतद्धितेतिटच्ङीष्प्रत्ययश्चित्राशब्देनबहुव्रीहौनष्टतश्चेतिकप् वामो
रूभार्यैसहितशफेत्यूङ्प्रधानमितिभावस्तुडंतेनित्यनपुंसकं अप्पूरणी पूर्वपदप्रकृतिस्वरेणप्रत्ययस्यानुदात्तत्वसिद्धेपि अपःपित्त्वसुपंचमाइत्यादौनञ्सुभ्या
मित्यंतोदात्तबाधनार्थस्त्रीलिंगनिर्देशात्पंचमशब्देनसमासेसुपंचमोइत्यादावप्न तेनतत्रान्तोदात्तमेवरात्रयइति उद्भूतावयवभेदोरात्रिसमूहोऽन्यपदा।
र्थः प्रमाणीति करणेल्युडंतदंतस्यविशेष्यनिघ्नतयाङीप् प्रधानपूरण्यामेवेति पुंवद्भावविधौवार्तिकात्कल्याणपंचमीकःपक्षइति
थ्योदाहरणात्समासांतश्चतत्रैवेतिभावः वाच्याचेति अ।
न्यपदार्थघटकतयासमासवाच्याचेत्यर्थः उद्भूतावयवभेदस्यरात्रिसमूहस्यप्रधानत्वेनयथाप्रथमाद्यास्त्रयःसमासाभिधेया एवं पंचम्यपीतिवर्तिपदार्थस्यान्यपदा
र्थेनुप्रवेशात्प्राधान्यमितिभावः नद्युत्तरपदादिति नद्यंतादितिनोक्तं बहुधीवरीतिनद्यंतबहुव्रीह्यर्थेवहुअसधीवन्अस्तीतिवाक्येककबापत्तेः नचबहुधीवरीतिनद्यं
तस्यनबहुव्रीहित्वंलिंगविशिष्टपरिभाषयासत्वात् तथाहि प्रातिपदिकत्वतद्व्याप्यधर्माणांलिंगप्रत्ययरहितेदृष्टानांतद्विशिष्टेऽतिदेशःक्रियतेध्वनितंचेदंबहुव्रीहे गम·
रूधसइत्यत्रभाष्ये पुंवद्भावइति पूरण्याअप्रधानत्वान्निषेधाप्राप्तेरितिभावः केणः अत्रकस्तद्धितएवव्याख्यानात्तेनराकेत्यादौनह्रस्वः दृढमिति अदार्ढ्येनिवृत्ति २२
मात्रपरत्वेनलिंगविशेषविवक्षाभावेनेतिभावःनहिवक्षायांदृढभक्तिरित्यादिसिध्यर्थंप्रियादिषुतत्पाठः अव्याप्रतिव्याप्तीति निलष्यन्शसांतसिलादिषुपाठाभावात्तद।

तेः व्याप्तिः दृश्यन्दे: पाठात्तदंतेति व्याप्तिरितिभाव: तिलष्यनोः परिगणनसामर्थ्यात्तदुदाहरणेटकतिरजष्ट्येत्यत्रजातेश्चेतिनिषेधात्त जातीयरावित्ति नन्वत्रजातीयदेशीया।
ग्रहणं कर्मधारयेत्यनेनतत्रसिद्धेः पाचकजातीयादौ चनकोपधाया इत्यादिनिषेधंबाधित्वा तेनैव परत्वात्पुंवत्त्वसिद्धेः कर्मधारयांशे निषेधापवादत्वेपि जातौ।
यावंशेन तदपवादत्वे मानाभावादितिचेन्न कर्मणि डितिसूत्रभाष्योक्तेनविध्युन्मूलकत्वमूलकेननिषेधास्यबलीयांसइतिन्यायेन परत्वबाधात पुनर्ग्रहणंतुकर्मधारयइवात्रापि
यावादत्वेननिषेधंबाधित्वाप्रवृत्तिः अत्रकप्रत्ययोपिवाध्यः पुंवत्त्वात्प्रबलत्वंविप्रतिषेधेनेति पुंवत्कर्मधारयेतिसूत्रस्थविप्रतिषेधनिरूपणे पुंवद्भावावकाशोदारदि।
कादहोभयंप्राप्तौ निपाद्विकेतिभाष्योक्तेः दारदिकेत्यत्रजातेश्चेतिनिषेधोन दरदोऽगोत्रत्वेनाजातित्वात किंचस्वांगाच्चेतइतिसाहचर्येण व्याख्यानेन चजातेरित्यस्य
पंचम्यंततया जातेः परोपः प्रत्ययस्तदंतास्त्रीनपुंवदित्यर्थेनादोषात अन्यथाजातिरित्येवब्रूयात् तस्यां वेलायां तदेन्यादौ सर्वनाम्नोवृत्तिमात्रइत्येवसिद्धे आत
सुबोऽकाराभावे दक्षिणाशब्दात सिद्धक्षिणतइत्यसिद्धमाशंक्य सर्वनाम्नोवृत्तिमात्रइत्येवसिद्धमितिभाष्योक्तात् नहितेपि नन्सरते: त्वतलोः अत्रसंज्ञाकृदंततद्धि
तांतसमस्तसर्वनामसंख्याशब्दातिरिक्तः शब्दोगुणवचनस्तदेनोच्यते आकडारसूत्रभाष्यतस्तथैवलाभात अतएवैकतद्धिते चेतिसूत्रभाष्यप्रकृत्वमितिपुंव
मित्यादावनसिध्यति सर्वनाम्नस्तु यागुणवचनसंज्ञाबाध इतितदाशयः सर्वोत्वं सखिलक्षणोपमितित्व।
सखिकमिति अचितत्सलोनिष्ठक्पयसोतिलोपेन तु न निर्वाहः तस्याभीयविनासिद्धत्वात स्थानिवत्त्वाच्च नलद्धितइतिटिलोपापत्तेः ठक्कृत्सो नेना
पिनसिद्धेः तस्यभवतद्धक ग्रहणात रोहिणेयइतिरोहिताद्वा दनुदात्तादितिङीप्प्रकारेप्यसति पुंवत्त्वसिद्ध्य प्रत्ययविधावितुत्पत्स्यवोत्पत्तेः
पूर्वमेवतस्याप्रनिवृत्ताविनि रोहितिरितिस्यादितिभावः स्त्रीभ्यइतिव्याख्यानमत्र मूले अपायीति नन्वस्यपुंसिप्रवृत्ताववृत्तित्वप्रवृत्तिनिमित्तं स्त्रियां त्वग्निसंबंध इति
प्रवृत्तिनिमित्तिनेवभाषितपुंस्कत्वाभावात्कथंपुंवत्त्वंनकोपधायाइतिसूत्रभाष्येत्रापि तत्संबंधस्योक्तत्वादिति गोपितशक्यतावच्छेदकस्यवस्त्रियांतस्यतावच
च्छेदकत्वेनादोषात् अग्न्यादिशब्दास्तुतस्यंतटमपिशास्त्रीयत्वेन विशिष्टमेवप्रत्याययंतीतिनकदापिभाषितपुंस्कादनितगंगाभार्येइत्यादौपुंवत्त्वमितिदिक् शत्रुपर्क्ष्या
दिति अयंभाषितपुंस्कः विद्येति अयंपारक्षणेइतिधातुस्थमाधवानुरोधेनोक्तः तत्र द्विभावकर्मणोः पत्यंतेतियकिसापत्यंअभाषितपुंस्कत्वात्पुंवत्त्वं नित्यस्य

श·शे· पत्यादिष्विति येन न साधुत्वमिति तेनोक्तं परे त्वयं नास्त्येव भस्य ढक् यात्राविढ इत्युच्यते तन्न सापत्ने पुंवत्त्वं प्राप्नोतीत्याशंक्य सापत्नः प्रकृत्यन्तरत्वात् सपत्नशब्दः प्रकृत्यन्तरम्
स· त्नीति भाष्येण सपत्नीशब्दद्वयस्य लाभेऽप्यस्य लाभात् किं च स्वामित्व एव बोधकः पतिशब्दः यदा तु स्वामित्वं प्रकरणादिना यज्ञफलनिरूपितं बुध्यते तदा पुमान् एव पतिः शु
५१ द्धस्त्रियां पत्नीति रूपात् तथा च पतिर्नाथो धवो विश्वो ईश इति कोशः विवाहजन्यसंस्कारविशिष्टे रूढौ तु न मानमित्याहुः स्वामिपर्यायेति अस्य च योगार्थप्रवृत्तिनिमित्तकस्य
अत एव नित्यं सपत्न्यादिष्विति समुदायोच्चारणेन लोकव्यवहारेण च स्त्रीविशेषरूढिः सर्वमानस्वामिकदास्यां तथा व्यवहाराभावात् क्वचित्तथा व्यवहारस्तु गौणः योगार्थ।
मादाय च भाषितपुंस्कत्वं पुंसि तु सपतिरित्येव अत्रापि स्यापि शत्रुत्वेन स्त्रीविशेषरूढिः अत्रोक्तं भाष्यमेवमानं तत्र भाष्यैकदेशे नैवं व्याख्यानं सपत्नप्रकृतिप्र
सपत्नीशब्दाभावं मन्यमानस्य सपत्नीशब्दादणि सापत्न इति प्राप्नोतीति पूर्वपक्षः प्रकृत्यन्तरात् पत्नीशब्दात् ... निष्पन्नसपत्नीशब्दादणि पुंवत्त्वेन
सापत्ने सिद्धिरस्तु तरामिति परे तु एवं सति तृतीयार्थस्य गौणत्वेन सापतदुर्गोः नैव ... तृतीयस्यापि स्त्रीविशेषरूढिसत्त्वात् न चासापते इ
ष्टापत्तिरिति तिकैतदाशयः शार्ङ्गरवादिगणपाठाच्च ज्ञानकल्पनामेव सापत्नशब्दस्यापि ... भाष्यव्याख्यायाम् औचित्येन तस्या अयुक्तत्वात् सपत्न
शब्दस्य भाष्यकारेण निरूपितप्रकृत्यन्तरत्वमेव लभ्यत इति तस्यान्यथाव्याख्याने मानाभावश्च तस्मात् चित्रवादे सपत्नीति ... सपत्नप्रकृतिकसपत्नीशब्दादणि
सापत्नसिद्धावपि तृतीयादणि सपत्नोपि प्राप्नोतीति पूर्वपक्षः उत्तरं सापत्न इत्यादि अन्या प्रकृतिर्यस्य स प्रकृत्यन्तरं तस्मात् सापत्नः सिद्धः प्रकृत्यन्तरं सपत्नीति ए
वं च त्वदुक्ता सपत्नीति प्रकृतिः शिवादिगणे न पठ्यते किंतु सपत्नीति एवं च ततोऽणः प्राप्तिरेव नेति न सापत्नप्राप्तिः सपत्नीति पाठेऽपि लिंगविशिष्टपरिभाषयाणि न तार
प्यं बाध्यसामान्यचिंतया चायमण् स्त्रीभ्यो ढकोऽप्यपवाद इति तद्भावे ढगापत्तिः ... तृतीयस्त्वनपत्यत्वात् आद्ययोरिति सपत्नशब्दतत्प्रकृतिकसपत्नीशब्दयोरित्यर्थः लिंगवि
शिष्टेति एवं च अन्त्ययोः विशेषलक्षणाद् अणपवादात् पूर्वविप्रतिषेधेनेति ण्य इति भावः पत्युरित्यादित्यदित्येति सूत्रे दैत्यादिते ययोः सिद्धये लिंगविशिष्टपरिभाषाभावस्याक
र उक्तत्वेन तेषाम् ... चर्यात्पत्युत्तरपदांशे पितद्प्रवृत्तिस्तदा सापत्नेयोऽन्यथा मूलोक्तरूढयोरेवेति सपत्नशब्दतत्प्रकृतिकङीनेनतयोरित्यर्थः यत्तु मूलोक्तत्रयाणामध्ये एम
आद्ययोरित्युभयत्राप्यर्थ इति तन्न तृतीयस्यापि रूढे मनोरमायामुक्तत्वात् द्वितीयस्यानतिप्रसक्ततया रूढौ मानाभावाच्च सापत्न्यमित्यपि सपत्नप्रकृतिकाद्व्रलण २२

दिव्यात्स्य निबोध्यं अस्मात्तु पत्यं तल्लक्षणयकि पुंवत्त्वे यस्येति लोपे सापत्यमेवेति दिक् ठक् ठक्सोश्चेति अभत्वादारंभः भाष्यकार इति ठावस्थायामेव पुंवत्वे इकारे श्रवणापत्वा
तोत्तल्लक्षणः कुः इकारे शतुकादेशः सन्निपातपरिभाषया ठादिष्वकारस्योच्चारणार्थत्वेनालिंविधित्वेनस्थानिवत्वाभावाच्च दुर्लभ इति भावः भाष्यकारस्येति अष्टाध्याय्याम
पाठात् अन्यवार्तिकानामिवाग्रप्रकरणेऽपाठात् अन्यकर्तृकत्वानुक्तेश्च भाष्यकारीयत्वमेवेति भावः इद्दं चद् क्षिणोत्तराभ्यामिति सूत्रे भाष्ये स्पष्टं गतार्थत्वादिति नैवे
कशब्दादकचि त्वाद्दोरेकिकत्वमित्यादौ पुंवत्वे इकारो न श्रूयेत पाचकजातीयेति वत् ह्रस्वे तु प्राप्नजीविकवत् च्छुवणमित्येक तद्धिते चेति नगतार्थ एकेत्यविभक्ति
कनि दैशानलोपः प्रातिपदिकांतस्येति वत् नस्वरूपविवक्षार्थ इति वाच्यं तादृशप्रयोगाणामनभिधानं इत्यभिमानात् सर्वमयेनत आगत इत्यर्थे मयट् अत्यंत
स्वार्थिकोवा इत्येमात्र प्रख्याद्यस्य कश्चित्सर्वनामत्वं दृष्टं तस्य हत्वौ पुंवत्वमित्यर्थः अत एव उत्तरपूर्वायै प्रथमद्वितीयकस्यपारित्यादि सिद्धं तृतीपास मन्याभित्यादावनि
सर्वा पुत्र इत्यादौ च न संज्ञोपसर्जनयोः कदापित्वादर्शनात् तेनाकचीति उपलक्षणमेतत् तदितरादेः कुक्कुट्यादीनामंडा जातिमात्रपरायांनोदनायांजात्यंतरनि
वृत्तिपरत्वात् कुक्कुट्यादिशब्दै रेव समासेन सिद्धेरिदं प्रत्याख्यातं भाष्ये कुक्कुट्यादिशब्दैस्तु नसमासोऽनभिधानात् एतायत इति कत्रुः क्यङि पुंवत्वे ऽत्रैत्सौर्वेति।
लोपे: अत्रकाङः प्रत्ययस्य निमित्तत्वात्पूर्वेः कार्यायस्मात्स विहितः सपृह्यतेतेन पड्ड मृद्वीशब्दात्क्यङि न पुंवत्वं प्रकृतिभूतस्य समुदायस्य भाषितपुंस्कत्वाभा।
वात् मृद्वीशब्दस्य तत्प्रकृतित्वाभावात् प्रत्ययस्य निमित्तत्वे पूर्वो यस्मात्स विहितस्तु सादि रोह्य ते इत्यंगस्येति सूत्रे भाष्ये स्पष्टं मानिन्ग्रहणमसमानाधिकरणार्थमल्प
र्थाथे चेत्युदाहरति स्वभिन्नामित्यादि मन इति णिनिर्नीनत्वान्ङीप् नकोपधा सोतौमसंख्यानिकपुंवत्वमात्रस्य निषेधोयं तेन विलोपिकायाः धर्म्यं वैलोपिकमित्यादि
भस्याढ इति पुंवत्वं न उत्तरनिषेधास्तु सौत्रविषयका इति बोध्यं तदुक्तं भाष्ये न कोपधायाः इत्ययं योगः पुंवद्भाष्याऽस्य विषये तत्तदुत्तरमेव मा चानुक्रमणमाद्यस्य याभस्या
विषयकृदिति आद्यस्येति पाणिनीयस्येत्यर्थः एतद्भाष्यप्रामाण्यादेवार्तिकानामपि सूत्रसमत्वमाहुः तदुक्तमभियुक्तैः सूत्रेष्वेव हि तत्सर्वं यद्वृत्तौ यच्च वार्तिके इति यमुक्तः।
याचहोरीतिसूत्रे किमर्थमिदं कर्मणि द्वितीयासिद्धेः सुपां सुपो भवंतीति तृतीयायाश्च सिद्धेरित्याशंक्यास्त्येतस्मिन्सुपांसुपोभवंतीति तृतीयार्थोयमारंभ इति भाष्ये केनां
तस्य तस्मिन्नुद्धावनं तत्त्वार्थः नहि पाणिनेः सूत्रकरणकाले कात्यायनवचसो भाव इति कैयटस्यापि तद्वचसो नियमेन बुद्धौ भाव इत्यर्थः एवं चोपायांतर परमिदं सूत्रं।

ल॰ शे॰ मितितद्भावः पाणिनिष्च तजज्ञानेप्यन्याभ्यां तस्यवाच्यत्वात् स्वयंवार्त्तिकभाष्योक्तानर्थान्नोक्तवानितिसांप्रदायिकाः पाचिकेति स्वुलकादेशादावित्वानिरासिकेति अतइ
स॰ नीतिअन्तद्धितेष्विति तद्धितग्रहणंवृग्रहणंचेत्यर्थः पाकाबाला पंचमीपाशेति याप्येपाशप् तसिलादिष्विति प्राप्तिः वृद्धिशब्देनेति वृद्धिशब्दस्त्रावर्त्ततइतिभावः स्त्रौघ्नीति
५२ भवार्थेऽणिङीप् मध्यमेति भवार्थेमध्यान्मः कांडलावेति कर्मण्यण् ब्रेदयं तावद्भार्येइति तत्परिमाणमस्याइत्यर्थेत त्कुल्वादृत्तुपित्रासवेनाम्नइत्याकारोनवृद्धिशब्द
विहितइतिभावः काशायीति कशायेणरक्तेत्यर्थेऽण् हेम्नोविकारेनुदात्तादेश्चेत्यञ् पर्णीषधेति व्याख्यानादेतत्राभइतिभावः अतएवप्रवाहणस्यपरस्यवृद्धिनेपूर्वस्य
तुवेत्यर्थकेप्रवाहणस्येतिसूत्रे प्रवाहणेयीभार्येइत्यत्रवृद्धिनिमित्तस्येति पुंवत्त्वनिषेधोनप्राप्नोति माभूदेवंजातेरितिभविष्यतीतिभाष्येउक्तं तेनाईप्रस्थिकीभार्येइत्यत्रापि
निषेधोनअत्रहि नातःपरस्येत्युत्तरपदवृद्धिनिषेधात्पूर्वस्यवैकल्पिकत्वेनाभावाच्च फलोपधानंचयांकांचिद्वृद्धिंप्रतिबोध्यं तेनपारिषद्या भार्येयंनिषेधः अ
पयोपत्तिमापदोप्यस्यावृद्धिंप्रतिफलोपधानाभावेनदोषः स्यात् वैयाकरणभार्येइति एचोप्युनवृद्धिशब्देनविधानंनाप्यैचौप्रतितद्धितोनिमित्तंनिषेधस
न्नियोगशिष्ठ तयैवातिप्रसंगभंगादितिभावः स्पष्टश्चायंमयोगानद्याभ्यामित्यत्रकैयटे परेतुभाष्येतावद्भार्येदोषवारणायवृद्धेनिमित्तंयस्मिन्नित्यर्थाश्रयणं वृ
त्तंनिमित्तग्रहणसामर्थ्यादेकव्यपदेशिवद्भावानाश्रयणमितिशब्दव्यापाराश्रयणेनमानं एचोप्रतिचतद्धितस्यनिमित्तत्वमस्त्येवाधिकारप्राप्तत्यागेमानमा
नुभावात् किंचैचसूत्रेवृद्धिपदावृत्त्यापैचोरपिवृद्धिशब्देनविधानमस्ति अतएवदाविकीभार्येदेविकाशिंशपेत्यात्वे पुंवत्त्वनिषेधः भाष्येदेविकेत्यस्यप्रथमा
ध्यायेकरणेनैषामाकारस्यवृद्धिसंज्ञांविधायतद्धितेष्वचामादेरित्यनेनतद्विधानमितिपक्षांतरस्योक्ततपात्तदेकफलत्वायतत्र वृद्धिपदसंबंधसत्वात्सूत्रभेददूष
णमात्रेणचतद्दूषितमित्यन्यत् एवंचैजविधायकेप्येजंशेपितत्संबंधइत्यर्थायातंमड्कानुवृत्तौमानाभावात् एवंचवैयाकरणीभार्येइत्येवसत्यभिधाने अतए
वनद्याभ्यामितिसूत्रेयद्यपिनित्यत्वादैचिवृद्धित्तयोरेवस्यादितिनिषेधवैयर्थ्यमाशंक्यविषयार्थेदाध्यष्विरितिसमाहितं तत्पक्षेपुंवत्त्वनिषेधलाभात् यद्यप्य
पवादोवृद्धिरस्त्वितिवृद्ध्याक्षेपेवनिषेधवैयर्थ्यंवक्तुंयुक्तं तथापिविषयभेदान्नापवादत्वमसंभवएवापवादत्वमितिवार्त्तिकमतेएवमुक्तं किंचात्रपुंवत्त्वइष्टेनि एमः
षेधवारणायशब्दव्यापाराश्रयणास्यावश्यकत्वेनवृद्धिरादैच्सूत्रेतावद्भार्येदोषवारणायव्यधिकरणबहुव्रीहिपर्यंतंभाष्यकृतोधावनंविफलंस्यात् एतेनतद्भावि २४

तानामेव संज्ञेति पक्षेऽपि पुंवत्त्वनप्रतिषेधाप्राप्तिरूपदोषानुद्भावनेनावगतन्निषेधोऽनिष्ट इत्यपास्तं मन्तुक्त्वीत्यास्यापि तद्भावितत्वेनैतद्दोषानुपपत्त्या स इत्यस्य कर्तुं शक्यत्वादित्या
हुः तदेतात्स्वीति यदेतस्य स्त्रीवाचकस्य शब्दस्येत्यर्थः स्त्रियाइति षष्ठ्यन्तानुवृत्तेरेवमेवौचित्यात सुकेशीतिस्वाङ्गाच्चेति ङीष् अमानिनीति निषेधाद्दीर्घ सुस्वमानिनीत्यादावपिसि
गविशिष्टपरिभाषया मानिनग्रहणेन मानिनीशब्दस्यापि ग्रहणात् यतो यो विहितस्तद्विशिष्टस्यैव तेन ग्रहणमिति नियमे मानाभावादिति ध्वनितं भाष्ये तन्नु न यत्नाह सुके
शमानिनीति जातेः परइति स्वाङ्गादित्येतत्साहचर्याद्यावत्यानाच्च जातेरित्येषा पञ्चमीति भावः अत एव दारदिकेत्य नायं निषेधो न। स्त्रियाः पुंवदिति सूत्रे नूङ् इत्यस्याप्यु
दासन्त्वे ऐडविडभार्य इत्यादौ षानुद्भावने ऐडविडं दारिके त्यादावेव तद्भावनन्तु पुंवदिति सूत्रेऽप्येतद्नुवृत्तिं तत्रापीदृशार्थे कत्वमेवेति ध्वनयितुं न तु पुंवत्त्वाप्राप्त्या। यत्तु ना
त्रजातेश्चेति निषेधः पुंवत्कर्मधारयेति तु निषेधविषय एवेति तदाशय इति तन्न इडविडादीनामनन्तरापत्य परत्वे भाष्यमते जातित्वाभावादिति दिकृत्यत्र ख्यमानिनीत्येव
ढमानिनीति धृत्वा वृत्तं तत्तु भाष्यानुपलम्भान्मूलकृतोपेक्षितं सौत्रस्यैवायमिति नकोपधाया इति सूत्रव्यतिरिक्तः सर्वोऽपि निषेध इत्यर्थः उपदशाइति दशसमीपवर्तिन
इति बोधः दशसमीपार्थाभिधानस्वाभाव्यात स्ववृत्तिदशत्वसमीपसंख्यावत्तत्र एव तदाह नवैकादशवेत्यर्थ इति अत एव नित्यं बहुवचनान्तोऽयं आसन्नविंशा इति ति
नोमर्त्तत्वं समुदायस्य पदभिन्नत्वस्यांतेऽकारसत्त्वात् यस्येति लोपस्तु नाभीयतयाति लोपस्यासिद्धत्वात् द्वौवेति संशयविषयोऽहि नियमेन परस्परप्रतिक्षेपकौ तत एवसं
शयेपरस्परप्रतिक्षेपकानेकधर्मवत्त्वं धर्मिणि गृह्यते तदेव विषयनिष्ठं बाध्यः अयं स्थाणुर्नवा ब्रीहिभिर्यवैर्वेत्यादौ संशयात्मक एव बोधः स च परस्परप्रतिक्षेपकत्वं तद
नुमानित्याकारः तत्रत्वचिद्द्वत्वसमानेनैकाकोटिर्बोध्यैव यत्र तु न तथा बाधकं तत्रैवविदे द्विकपासिकानुष्ठानं कचिद्व्यवस्थितं लक्ष्यानुरोधादित्यन्यत एवं च
नियमतः पञ्चास्मादुपतिष्ठंत इति बहुवचनं वस्तुतो द्वित्र्येऽन्यतरा इत्यादिरीत्या बोधः अत एवार्थप्राधान्यात्पूर्वसूत्रेणैव सिद्धमिति भाष्योक्तं संगच्छते द्विदशत्रा इति शब्द
शक्तिस्वभावात्सुजर्थान्तर्भावे पूर्वपदस्य वृत्याश्रयणात्सुचोऽप्रयोगः द्वित्वसंख्यात्पत्तिकाऽऽवृत्तिविषया दशेति बोधः न चात्र संख्येयं वार्थश्चान्यपदार्थ इति पूर्वस
त्रेणैव सिद्धमिति वाच्यं अधिकदशा इत्यर्थे सूत्रसत्त्वात् कवभावार्थमस्यावश्यकत्वाच्च शेषाधिकारस्य नानेकमिति सूत्रेण समास एव कप्प्रवृत्तेः शेषादिति सूत्रे बहु
व्रीहौ स कष्प्रत्ययो नित्यायोपस्त एव शेष इति भाष्ये स्पष्टं एवं च ड्विषये पूर्वसूत्रेऽप्यसमासे पाक्षिकः कविष्ट एवेति बोध्यं संख्ययेति किं चत्वारो विप्राः अव्ययेन त्रास्तिकोपि

प्राः पंच संख्येय इति किं अधिकविंशतेर्गवां संख्येति अंतराल इति अंतरालशब्देन दिगेव प्रत्यासत्तेः अत एवास्य नित्यस्त्रीलिंगता इदं स्वत्वमसमानाधिकरण्यार्थेकवभा
वार्थे च दक्षिणपूर्वेति सर्वनाम्नो वृत्तिमात्र इति पुंवत्त्वं तत्रतेनेदं सप्रसंपत इत्यादेः प्रथमाद्विवचनांतानि ग्रहणविषय इत्यादेर्ग्रहणक्रियायां तर्भावेण वृत्तिमत्त्वमित्यर्थः
इदं युद्धं प्रवृत्तमित्यर्थ इति तत्र विशेष्य इत्यर्थः अत एव केशाकेशियुद्धमिति संगच्छते यत्र न तदुपादानं तत्राध्याहारः इदं क्रियामात्रोपलक्षणं भाष्ये क्रियाभिधानादित्युक्तेः ग्रह
णप्रहरणेत्यप्येवं अत एव कर्णाकर्णी प्रथित मयशः हस्ताहस्ति मिषात्स्पृशन्तु च तदेहमित्यादि संगच्छते अयं विषयविशेष इति ग्रहणादिरूपोन्यपदार्थे क्रियारूपः
कर्मव्यतिहारः रूपश्चेत्यर्थः इति शब्दश्चात्र प्रकाशनत्वं च लोकप्रसिद्धत्वं तदुच्यते इति शब्दो लौकिकी विवक्षामनुसारयतीति कर्मव्यतिहारः परस्परग्रहणा
दिरूपः कर्मव्यतिहार इति समासांतस्येनद्विषपते वइति शब्दबलेन तत्रास्य प्रतिपादितत्वात् इतीति तुराषाडित्याद्यर्थमावश्यकेनानेन नसूत्रेणेत्यर्थः तिष्ठद्गु इ
ति प्रख्यवृत्त्यादिप्रमाणं विभक्त्यश्रवणायाव्ययत्वं केशाकेशि कुर्वन्नित्यादौ परांगवत्त्वायाव्ययीभावत्वमव्ययानां नेति निषेधस्याव्ययीभावे भावादिति बो
ध्यं केचित्तु इजत्ययस्य स्वरादिषु पाठादव्ययत्वमव्ययीभावत्वफलांशेन दृष्टं तं मानेनापितस्य योगः प्रमितइत्याहुः गृहीत्वेति त्वाप्रत्ययोध्याहृतस्थित्या
दिक्रियापारायबोध्यः केशेषु केशेषु गृहीत्वा स्थितयोरिदं युद्धं प्रवृत्तमित्यर्थात् गृहणकर्मत्वं प्रत्यासत्त्या केशादि विशिष्टपुरुषाणां बोध्यं युद्धस्यानेककर्तृ कत्वा
त् इदंसूत्रं वैयधिकरण्यार्थं सरूपत्वात्प्राप्तैकशेषश्चानवकाशेनानेन बाध्यते ओरोदितीति ओरवित्यस्याप्युपलक्षणमिदं संज्ञापूर्वेति इदं केयदहरदत्ताद्य
नुरोधेनोक्तं भाष्ये तु न दृश्यते स्वयंभुव इदमित्यर्थेण् स्वायंभुवो लोके साधुरेव भाष्यानुक्तज्ञापितार्थस्य साधुतानियामकत्वे मानाभावात् भाष्याविचारितप्रयोजनका
नां सौत्रास्त्राणां पारायणादावदृष्टमात्रार्थकत्वकल्पनापाएवौचित्यात् शोवाद्रष्ठामणिरित्यत्र स्वायंभुवरीत्या निसूत्रस्याभाष्यप्रयोगादन्येषामपि दृश्यत इत्यनेन तत्रदी
र्घसत्वात् श्वपुत्रमिति वत्दीर्घाभावेः ण् एवमेवागमशासनमनित्यं नञ् घटितमनित्यमातिदेशिकमनित्यं सर्वविधिभ्यो लोपविधिर्बलीयानिति विधिश्च बलवानित्यादिभा
ष्याउक्तं बोध्यं केनसहेति तुल्ययोग एकेन गमनादिना योगस्य द्योतकं सहेत्येतदित्यर्थः वोपस अत्रोपसर्जनस्येति मत्वर्थीया प्रत्ययांतं उत्तरपदे वसंनिधापितस्य स राम॰
मासस्यावयववाचकं विशेषणं लक्ष्यानुसारिव्याख्यानात् सर्वत्र च कश्चिदवयवः उपसर्जनमेवेति विशेषणसामर्थ्यादुपसर्जनसर्वावयवस्येत्यर्थस्तदाह बहुव्रीह्यव २५

यवस्येति व्यधिकरणा षष्ठीति भावः तेनेह न सहकृत्वा राजनि युधि कृञः सहे चेति क्वनिबुपपदसमासः सहकृत्वप्रिय इत्यत्रापि न उपसर्जनसर्वावयवके बहुव्रीहौ यद्
त्तरपदं प्रियशब्दः सहशब्दस्य न तत्परत्वाभावात् सहशब्देन द्वन्द्वस्तु नास्त्येव चार्थे वृत्तेरभावात् अनभिधानाच्च व्याख्यानादेवोपसर्जनपदेन शास्त्रीयं लौकिकं च गृह्यते ते
न सपुत्रादेरप्युपसर्जनसर्वावयवकत्वं बोध्यं व्यधिकरणत्वात्पूर्वेणाप्राप्तौ वचनं कर्मभावार्थं च सपुत्र इति सप्तमी विशेषणा इति न पुत्रस्य पूर्वनिपातः प्रथमानिर्दि
मित्यनेनोपसर्जनत्वाद्यत्र पूर्वनिपातानियमप्रसक्तिस्तत्रैव तत्प्रवृत्तेः प्राप्तिकमिति इति पाठ्वादिदं लब्धं सकर्मक इति स्वार्थेकः अत एव अर्थेन संहनितन इ
त्यर्थकः सार्थको निवृत्त इति द्वन्द्वसूत्रस्य भाष्ये प्रयोगः संगच्छते एतच्च प्राचामनुरोधेन परे तु सकर्मक इत्यादौ विद्यमानवाची कर्मादिसमानाधिकरणः सह
शब्दस्तत्र च षष्ठ्यपवादस्तृतीयाया असंभवान्नानेन समासः सहैव दशभिः पुत्रैरित्यादौ तु विद्यमानतावाची तेषां विद्यमानत्वेपीत्यर्थ इति न दोषः प्रकृते तु न सः ।
कर्मणो विद्यमानत्व इत्यर्थाननुभवात् एवं चानेकमन्यपदार्थ इत्येव समासः सपूर्वाया इत्यादिनिर्देशो वोपसर्जनस्येत्यत्र प्रतिपदोक्तपरिभाषाया अप्रवृत्त्या
सादेशः सुलभः सपूर्वेत्यत्र सर्वनामसंस्पर्शो रित्यस्याप्रवृत्तिरनित्यत्वात् अत एव संहितशफेति सूत्रे सह लोम्नेत्यस्य सह विद्यमानानि लोमानि यस्या इति विग्रहप्रदर्श
नं कैयटवृद्धिभिः कृतमित्याहुः प्रकृत्याशिषि पुत्रस्य यजमानस्य स्वर्गाभिवृद्धिरस्त्वित्याद्याशीर्वचनमसाध्वेवेति बोध्यं बहुव्रीहौ संख्येये एवं वर्तमानसंख्याशब्दे
नोपा बहुव्रीहिरित्यर्थः पंचम्यर्थे सप्तमीत्याह उपगणा इत्यत्र डविसत्यसति च रूपे विशेषाभावादाह स्वर इति डच्प्रत्ययान्तो दात्त अन्यथा पूर्वपदप्रकृतिस्वरः ।
त्यर्थः बहुगणयोर्यदा चतुरादिबोधकतात दा तत्समीपत्वादौ नावहुत्वाद्बहुवचनं अशिष्यः संख्योत्तरपदः संख्येयं वार्थाभिधायित्वादित्यनेन तत्प्रत्याख्यानेन तु
संख्येये एवं वर्तमानबहुव्रीहेत्यर्थान्न दोषः मूलेपि संख्येये यो बहुव्रीहिरित्यनेन न सूचितमिदं स्पष्टं चेदं समर्थसूत्रे संख्ययाव्ययेति सूत्रे च भाष्यकैयटयोः अत्र पक्षे का ।
र्वम्भाष्ये नं तत्र बहुव्रीह्यपेक्षया शेषस्य ग्रहणात् अत एव बहुव्रीहौ सक्थ्यक्ष्णोरिति प्रकरण एवेदं न कृतं संख्याया इति अव्ययादेरिति बोध्यं तेन गोविंशतिः ।
रित्यादौ न स्पष्टं चेदमत्रैव भाष्ये अत्रान्यत्राधिकलोपादित्यपि भाष्ये उक्तं द्व्यधिका विंशतिरिति चोदाहृतं तत्तु वार्तिककृता स्वरीत्योक्तं भाष्यकृता तु तत्र द्वन्द्वसे
वागीकाराजत्वीत्यादनावश्यकं । तत्पुरुषे हि पूर्वपदप्रकृतिस्वरासिध्या द्वन्द्व एवात्रेति भाष्यकृतोक्तं द्वन्द्वसूत्रे द्व्यधिकेत्यादावव्ययादित्वाभावाच्च अव्ययादे

स·शे· त्याश्रित्यान्यत्राधिकलोपादिति न वक्तव्यमिति चात्र भाष्ये उक्तमित्याहुः व्यत्ययेन षष्ठीति सप्तम्यप्येवमेव तदाह बहुव्रीहाविति स्वांगमद्रव्यवन्मूर्तिमदित्यादि षचः षोडीषर्थे।
शे· त्त्वमुदाहरति जलजाक्षीति क्वित्वमंतोदात्तत्वापत्ते पूर्वपदप्रकृतिस्वरेण स्थूलाक्षेति अस्य त्वपूर्वे यथि श्चविहि ङीष् स्यात् अंगुलीसदृशेनि दारुणोऽप्राणितया मुख्यांगु
५४ ल्यसंभवादिति भावः छंयलेति मात्रचोदूयसचो वाद्विगोर्नित्यमिति लुक् द्वित्रिभ्यां षष्वीप्रकृतेः षविधानं द्विमूर्ध इत्यादौ द्वित्रिभ्यां पाद्दन्मूर्धस्विति पा स्विकांतोदात्तत्वा
भावे पूर्वपदप्रकृतिस्वरार्थं षचि हि कित्वसामर्थ्यात् पूर्वपदप्रकृतिस्वरं बाधित्वा नित्यमंतोदात्तत्वं स्यात् विकल्पस्तु अनित्यतया समासांताभावे चरितार्थः अनित्यत्वं
च मूर्धस्विति निर्देशादेव ज्ञायते अन्यथा प्रक्रमाभेदाय मूर्ध्न इत्येव वदेदिति द्वित्रिभ्यामिति सूत्रे भाष्ये कैयटयोः स्पष्टं द्वित्रिभ्यामित्यस्य ताभ्यां परो यो मूर्धन् शब्दस्तदु
त्तरपदक बहुव्रीहेरित्यर्थात् समासांते कृतेपि न स्वरवृत्तिरित्युक्तं अन्होदंतादित्यंतग्रहणात् ज्ञापकादत्रप्रकरणे वर्णग्रहणे तदंतग्रहणं नास्तीत्याशयेनाह पूर्वपदस्था।
दिति समानपदे इत्यस्याखंडपदे इत्यर्थात् समासेऽप्राप्तौ विध्यर्थमिदं भाष्ये इति प्रागयनं ऋग्भवनमित्यादौ नांत्वनभिधानमिति भावः रघुनाथादिशब्दे तु णत्वे संज्ञा
त्वभंगापत्तेर्न णत्वं कृतणत्वेन चेत्संज्ञारूढ्यर्थो गम्यत इति सूत्रार्थः तदुक्तं भ्रूणोसंज्ञायामिति सूत्रे भाष्ये यस्ते तेसंज्ञायां विधीयंते तेषु नैवं विज्ञायते संज्ञायामभिधेयाया
मिति किं तर्हि प्रत्ययांते न चेत्संज्ञा गम्यते इति प्रत्ययांते न यदि रूढिर्गम्यते ततः प्रत्यय इति कैयटः रूढिः रूढ्यर्थः भाष्ये प्रत्ययांते निमित्त [illegible] विधेयकार्ये यल्लक्षणं
एतन्मूलकमेव पठ्यतेऽभियुक्तैः संज्ञाशब्दा ह्यनादि प्रयुक्ता नियतानुपूर्वीका एवं सिद्धास्तत्रेदानीं कस्तद्विपरीतं प्रयोक्तुमर्हतीति खुरखराभ्यां अस्यादेशस्यैवस्थानि
दाः समासांतत्वेनाशेषत्वाच्छेषाद्विभाषेति कवत्र विषयेन पक्षेऽजपीति भाष्ये त्वेतन्न दृश्यते उपसर्गाद। अनोत्किं प्रनोमुच तमित्यत्रणत्वं माभूदिति नद्वत्केति अनो
त्यस्वत्यपनीय बहुलग्रहणं कृत्वेत्यर्थः अन्यथा प्रणोनपेत्यादावव्याप्तिः प्रनः पूषेत्यादावतिव्याप्तिश्च स्यादिति भावः अत्राप्युपसर्गग्रहणं प्राग्वदेव प्रणस इति
प्रगता नासिका यस्येति विग्रहः विगतया नासिकयेति तत्रचपद्भिनिति नसादेश इति भावः सुप्रातादौ अव्ययानां भमात्र इति टिलोपः शारिकुक्षेपस्येति लोपः कुक्षी
कारांतपाठस्त्वपपाठः अश्वप्रकरणविरोधात् चतुरश्रेति तालव्यमध्यः एणीपदादिषु यङ्भावो निपातनात् अहस इति अस्य वैकल्पिकत्वेप्यनुक्तसमासांतत्वाभावादत्र राम·
नकप् नित्यम संख्यात्ववारणाय चकारकृतः अकारोच्चारणं सुप्रजसावित्यर्थं नित्यग्रहणं स्पष्टार्थमिति भाष्यस्वरसः धर्मादकेवलात्किमिति बहुव्रीहिणापूर्वपदाक्षेपे २६

तस्य च समासप्रथमावयवे रूढत्वेन ततः परत्वाभावेनैव त्रिपदबहुव्रीहौ न दोष इति प्रश्नः उत्तरं तु पूर्वपदशब्दस्य तत्प्रथमावयवे रूढौ तु नमानं तदाहापेक्षिकमिति परम।
स्वधर्म इत्यत्र स्वशब्दस्य सर्वनामसंख्ययोरिति पूर्वनिपातो नाहिताग्न्यादित्वात् एवमेव जहत्स्वार्थत्यत्रापि केवलत्वं च सजातीयान्याभाववत्वं इदं चेजादेरिति सूत्रे भाष्ये
स्पष्टं अनिचोऽकारोऽदृष्टार्थः कृतसमासांतमिति अनिजंतमित्यर्थः धनुषश्च जुसाहचर्यात् ङित्करणाच्चास्यादेशत्वं निश्चित्याहानङादेश इति लोपो व्यो वलादौ।
प्रत्यय इति त्वयुक्तं प्रत्ययस्याप्रकृतत्वात् गोधेर इत्यसिद्धेश्च पूर्वोक्तरसाहचर्यादिकार आदेशः समासांता इत्यधिकारादादेः परस्येति न प्रवर्तत इत्याशयेनाहांतादेश
इति एकदेश इवेति तदेकांतग्रहणमिति वार्तिकं गुणसमुदायो द्रव्यमिति पतंजलिमते गंधोवयव इति तद्भाव इत्यन्ये अल्पाख्या तथा च लेशवाचिनो गंधशब्दस्य ग्र
हणमित्याशयेनाह सूपस्य गंधो लेश इति तत्र प्रमाणं कोशमाह गंधो गंधक इति नन्वभावस्य कथं समासांतत्वमत आह स्थानिहरिणेति पादस्य पादिति नोक्तं
प्रतिपदोक्तत्वात् स्यैव पादः पदित्यत्र ग्रहणापत्तेः पाद्यते क्विपि पद् इत्याद्यनापत्तेः कुंभपदी बहुवचननिर्देशाद्गणपाठसामर्थ्याच्चायं यथावगतिः स्त्रीलिंगानामे
वगणे पाठादाह स्त्रियामिति यदिहोपमानं पूर्वसंख्यापूर्वे च तस्य सिद्धे लोपे नित्यं ङीवर्थे वचनं अष्टापदीत्यत्र निपातनाद्दीर्घत्वं द्विदन्निति शिशुत्वावस्थाप्रतो
तिः समदंतीति नासिकोदरेत्यादिना ङीष् श्यावः श्यामकपिशः अरोकः दीप्तिरक्तिश्चावा ककुदस्या। कालाहारादिकृता अवयवोपचयादयो वस्तुधर्मा अवस्थेत्यु
च्यंते अजातककुत्वेन बाल्यं पूर्णककुत्वेन तारुण्यं गम्यते अवस्थायामित्युक्तेन ककुदः संज्ञेषति एवं च पर्वत इत्यस्य न विशेष इत्यर्थः व्यूढं विशालं तद्धितत्वात्कस्य
नित्यं सोपदादाविति सः प्रियसर्पिष्क इणः षः एकवचनांता इति सर्वत्र गणे निर्विभक्तिकपाठस्यैव दृष्टत्वेन केषांचित्सविभक्तिकानां पाठस्तद्वि स्वार्थस्तदाह द्वि
वचने त्यादिरत्रानुक्तसमासांतादिति सामान्यतः समासांतापेक्षयैव शेष इत्यभिमानं संदधस्यति प्रियपथ इति परे तु नैव कवपेक्षं शेषग्रहणं नापि समासांतापेक्षं किंत
र्हि नेनतरोयं बहुव्रीह्यधिकारः सोपेक्ष्यत इति भाष्योक्तेस्तदपेक्षयैव शेषग्राह्यः समासांताश्च कब्भावे सावकाशा इति समासांतैः स्वस्वविषये कपो बाधेनोपपन्नो शे
षग्रहणं व्यर्थमिति न वाच्यं एवं च प्रियपथिक इत्यपि अत एव बहुव्रीहौ संख्येये इत्यस्यान्यत्र पाठः सार्थक इत्यन्यत्र विस्तर इत्याहुः शेषाधिकारेति इदं संख्या
यि त्यादौ कब्भावार्थमिति भाष्योक्ते ज्ञापते सकृदुच्चारितादर्थद्वयलाभोऽसंभवीत्यत आह तंत्रादिनेति उच्चारयित्रा तंत्रेणोच्चारितं वा द्वित्वावाध इति बोध्यं आ।

ल॰ शा॰ श्रे॰ स॰ ५५

पोन्ये नकपीत्यतः कपीत्यनुवर्त्तते अनंतरस्येति न्यायाच्छेषादित्यस्यैव निषेध इत्याह शेषादिति । इति विश्वेदेवा इति विश्वाख्यदेवगणविशेषा इत्यार्थः उद्भूतावयवभेदस्यापि हव
चनं विग्रहे दिश्वदेवइति विश्वेदेवइति तु पाठः न संज्ञोपसर्जनयोरित्येव वक्तव्ये योगविभागसामर्थ्यादीयसश्चेति न दृश्यतस्त्वन्यस्यापि निषेधकमित्याह नकोविति ईयसो बहुव्रीहौ
पुंवदिति वचनं ईयसः परस्य स्त्रीप्रत्ययस्य बहुव्रीहौ विद्यमानस्य पुंवत्त्वविषयस्यैकारस्य यथा न ह्रस्वस्तथास्यापीति तदर्थस्तदर्थतः पठति ईयस इत्यादिना अत्र सू
ने ईयसउपसर्जनस्त्रीप्रत्ययस्य दीर्घत्वं वाच्यं नवक्तव्यं पुंवद्वचनात्सिद्धमिति भाष्ये तेन नेन नपुंसकह्रस्वस्यापि निवृत्तिः स्यथावचनेनवचनप्रत्याख्यानासंगतिः ममतु नपुं
सकह्रस्वनिवृत्त्यर्थमावश्यकेन युज्यते प्रत्याख्यानमिति दिक् कहुश्रेयसीति लिंगविशिष्टपरिभाषया निषेधः न घृतश्चेति नित्यं कप्प्राप्तः अभिवादृस्तुतिरू
पोभयार्थकवदि धातुनोभयसाधारणपूजालक्ष्यत इत्याशयेनाह पूजित इति एतेन स्तुत्यर्थकस्यैवात्र ग्रहणमिति कैयटादिध्वनितं निर्बीजमिति ध्वनितं सुश्रीति
तिन घृतश्चेति कप्प्राप्तः स्त्रीप्रत्ययांतत्वाभावादिति अवितृस्तृतंत्रिभ्य ईरित्यौणादिकत्वादिति भावः ल्युडिति श्रीयतेस्यामित्यधिकरणे इति भावः समाप्तवा
निति समाप्तवानंवपनक्रियायस्येत्यर्थः सप्तमीवि सप्तम्यंतस्यकर्त्रन्वयद्वारैव क्रियान्वयाद्विशेषणत्वेन सिद्धेर्वैयधिकरण्येपि समासज्ञापनार्थं सप्तमीग्रहणं विशे
षग्रहणं च ब्राह्मणवशिष्ठन्यायेन तदतिरिक्तविशेषणपरं तदाह अत एवेति चित्रगुरिति उभयोरपि प्रथमानिर्दिष्टत्वेन एकविभक्तित्वेन वानियमे प्राप्ते उत्तरपदा
र्थविशेषणस्यैव पूर्वनिपातार्थं विशेषणग्रहणमिति भावः सर्वनामसंख्ययोरिति श्वेतशुक्लयोरुदाहरणे विशेषणत्वं बोध्यं वन्येन राहस्तदक्षिण इत्यादौ गजदंता
दित्वात्परनिपातः सर्वश्वेत इति वचनसामर्थ्यात् भूतपूर्वगत्या सर्वनामत्वं बोध्यं त्रिशुक्ल इतिपाठः द्विशुक्ल इत्यादौ द्विशब्दस्य सर्वनामत्वादेव सिद्धेः शब्दपरेति।
अत एव वार्तिके स्याचोपि परनिपातः संख्यायाइति संख्यावाचकानां समासे सार्थवाचिकाया इत्यर्थः द्वंद्वे घीति सूत्रे पठितमपीदं द्वंद्वाद्वंद्वसाधारणं तदाह द्वि।
त्रा इति द्वादशेति च सहस्राणां शतमित्यर्थेपि शतसहस्रमित्येवस्पष्टं चेदं तदस्मिन्नधिकमित्यत्र भाष्ये वाप्रियस्येति इदं बहुव्रीहावेवेतेन सहेत्युदाहरणं स
हप्रियइत्यत्र नसप्तमी विशेषण इत्यत्रोपसंख्यानात् गड्वादयाहिताग्न्यादौ आकृतिगणो अत्रवेत्यनुवर्त्य व्यवस्थितविभाषाश्रयणादाह कचिन्नेति एतद्दंतोसपंग॰
कृत कृत्ययोः क्रियाशब्दत्वादनियमे प्राप्ते वचनं चारुस्मितेत्याहिताग्न्यादित्वात्साधु जातिकालेति जातिकालसुखादिभ्यो नाच्छादनात्क्त इत्यं नोदात्तविधाय

केनज्ञापितं वाग्रहणानुवृत्तेराह प्रायिकमिति क्वचिन्नेति तेषामाहिताग्न्यादित्वमिति भावः इति बहुव्रीहिः चार्थे अनेकमन्येयत्तोनेकमित्यनुवर्तनेतेन तत्फलं लक्षयन्नाह षड्दे हो
तृपोतृनेष्टोद्गातार इत्यादौ यथायथं समासांतानङेर्मध्ये प्रवृत्तिर्नेत्यं ते एव च तत्प्रवृत्तिः अत्र वदंति द्वंद्वः प्रथमांतानामेव न परिनिष्ठितविभक्त्यंतानां चैत्रेण मैत्रेण वक्त
नमिति वाक्ये अवयवकर्तृत्वस्यैव प्रतीतेश्चैत्रमैत्राभ्यां कृतमिति समासे समुदायकर्तृत्वस्यैव प्रतीतेस्तस्य वाक्यस्य समासस्य मानार्थत्वाभावेन तस्य तद्वाक्यत्वाभा
वात् अत एव यदग्नये च प्रजापतये चेत्यादौ व्यस्तप्रत्येकं देवतात्व प्रतीतिरग्नीषोमाभ्यामित्यादौ समुदाये देवतात्वप्रतीतिरिति व्यवस्था सिध्यति तस्यापि त
द्वाक्यत्वे तु समास इव तत्रापि समुदाये देवतात्वप्रतीतिरेव स्यात् अत एव न ङिसंबुद्ध्योरिति सूत्रे भाष्ये ङिसंबुद्ध्योरनुत्तरपदे इति वार्तिके संबुद्धिग्रहणं न।
कार्यं राजवृंदारकेत्यादौ संबुद्ध्यंतानां न समासः इह तावत्समाससमानार्थकेन वाक्येन भवितव्यं समासेन च यश्चेहार्थो वाक्येन गम्यते नासौ जातुचित्समासेन गम्यते अवय
वसंबोधनं वाक्येन गम्यते समुदायसंबोधनं समासेनेत्युक्तं संबोधनविभक्त्यंतस्याभिमुखीभावफलकत्वेन प्रत्येकमेवाभिमुखीभावप्रतीत्या क्रियान्वयेन परस्परसामर्थ्य
मिति तत्र भावः यदा समानाधिकरणस्थलेपि समासो न तदा व्यधिकरणानां द्वंद्वः सुतरां नेति परिनिष्ठितविभक्त्या समासे पि राजपुरोहिताविति न तदुदाहरणमेवं च व्यधिकर
ण तृतीयाद्यंतानामपि क्रियादावेवान्वयेन क्रियाजनकत्वरूपकारकत्वस्य प्रत्येकमवबोधनेन वाक्यसमासयोर्न समानार्थकत्वम् एतेन कटं भीष्ममित्यादौ प्रत्येकं कर्मत्व
योभयोः क्रियान्वयेपि पार्ष्टिकपरस्परान्वये न सामर्थ्यमादाय समास इति मीमांसकनव्योक्तमपास्तं राजवृंदारकेत्यादावपि पार्ष्टिकान्वये न सामर्थ्यमादाय समासापत्तौ भा
ष्यासंगतेः तिङ्समानाधिकरणे प्रथमा अभिहिते प्रथमेति न्यासेपि समुदायद्वारा अन्वय वा नामपि तिङ् सामानाधिकरण्येन समुदायकर्तृत्वोक्तावपि अवयवकर्तृत्वस्याप्यभि
हितत्वेन समुदायप्राधान्येपि अवयवेभ्यः प्रथमा भवत्येवात एव तत्र चैत्रो मैत्रश्च गच्छतस्तौ पचत इत्यादि नित्यद्विवचनाद्यं नारव्यातस्तत्प्रयोग एवेति दिक् प्रस्परेतिरपेक्ष
स्येति तत्वं चैकस्य क्रियान्वये तत्र परस्पराकृत्या तदन्वयात् अनेकस्येति तेनैकस्य सापेक्षत्वेपि न दोष इति भावः समुच्चये च शब्देन स्वसमभिव्याहृतपदार्थे इतरसापे
क्षत्वं बुध्यते तत्समभिव्याहृते तु न अत एवात्रैकत्वेन शब्दप्रयोग एव एकस्मिन्निति एकधर्मावच्छिन्ने इत्यर्थः अन्वय इति यत्रैवमन्वयस्तत्र समुच्चयश्चशब्दार्थ इत्य
न्वयः तत्त्वन्वय एव समुच्चय इति भिन्नमितव्यं अन्वयो विशेष्यतया विशेषणतया वा तत्रान्त्यो वक्ष्यमाणोदाहरणे आद्यस्तु देवदत्तः पचति हसति चेत्यादौ क्रियासमन्वये आ

ल॰ श॰ शे॰ सु॰ ६६

नुषंगिकत्वमनुद्देश्यत्वं अन्यस्य प्राधान्यं च तत्तं वधिक्रियायां अवश्यकर्तव्यत्वरूपं अन्वाचये आनुषंगिकत्वं व्याप्यत्वं च समभिव्याहृतक्रियागतं चार्थः। मिलितानामिति
परस्परापेक्षाणामुद्भूता वयवभेदसमूहरूपाणामित्यर्थः अन्वय इति एकधर्मावच्छिन्नेनान्वय इत्यर्थः तेन नी धातोः संयोगजनकव्यापारानुकूलव्यापारवाचकतया द्विकर्मकत्वा
त्वेप्य जां ग्रामं नयति इत्यादौ न चकारप्रयोगो नापि समासः एकधर्मावच्छिन्नेन्वयाभावात् अत एवात्रानेक चकारप्रयोगः यत्रैवमन्वयस्तत्रेतरेतरयोगस्तादृशसमूहश्चार्थ इत्यन्व
यः समूहे उद्भूतावयवभेदत्वं चावयवगतसंख्यारोपकत्वं प्रत्यवयवं समूहरूपत्वारोपो वा समूह इति अनुद्भूतावयवभेदः समूह इत्यर्थः तत्रेतरेतरयोगे उद्भूतावयव
भेदसमूहस्य प्रतीत्या प्रत्येकवृत्तिधर्मद्वयं प्रवृत्तिनिमित्तं समाहारे त्वतिरिक्तत्वेनैव समूहस्य भानात्समूहत्वं प्रवृत्तिनिमित्तमिति विशेषः असामर्थ्यादिति अनेकसु
बन्तानां चार्थकृत्यभावेनैकार्थीभावरूपसामर्थ्याभावात् किंच तत्र चार्थस्य समभिव्याहृते विशेषणं समासस्तु अन्यपदार्थप्राधान्य इव चार्थप्राधान्य एवस्य स्पष्टं चेदं सर्व
मत्र सूत्रे भाष्ये तत्र हि चार्थस्यासत्त्वभूतत्वात्तदर्थसमासस्याप्यलिंगासंख्यत्वं प्राप्नोतीत्याशंक्य स्वभावेन परिहृतं गुणवचनेनवच्चार्थे द्रव्याश्रितः समासार्थस्तद्देद्रव्यलिं
गसंख्याग्राहक इति च समाहितं अतो नेदं भाष्यं समाहारादिविषयं तेषां समूहे द्रव्यलिंगादिग्राहित्वाभावात् नन्वेवं परवल्लिंगमिति सूत्रस्थस्य अवयवा वेवापेक्षित
परस्परा द्वंद्वार्था न तु तद्व्यतिरिक्तः समुदायोस्तीति कैयटग्रंथस्यासंगतिरिति चेन्न तस्यात्यंतव्यतिरिक्तो नेत्यर्थात् अपेक्षितपरस्परावित्यनेन च समूहरूपता उद्भूता
वयवभेदता च दर्शिता अत एव पद्यावयवव्यतिरिक्तः समुदायोर्थः स्यावयवलिंगेन लिंगवानिति तदुक्तपक्षांतराद्वैधाविशेष इत्यन्यत्र निरूपितं अहरहर्नयमानो गा
मश्वं पुरुषं पशुमित्यादौ न समासः अहरहःपदेन विनिगमनाविरहात्परस्परसाहित्यावगतावपि तस्य च काराव्वाच्यत्वात् यत्र विग्रहे चैनैव द्योत्यमुक्तोर्थः तत्रैव
समासो नान्यत्रेति स्पष्टं भाष्ये चार्थवलो देवमतिनात्पर्ये समभिव्याहृतक्रियायामेककालिकत्वादिगम्यत इतिदिक् राजदंतादिषु इदं सर्वसमासविषयं षष्ठीसमास
कर्मधारयद्वंद्वानां तत्र पाठात् धर्मादिष्विति द्वंद्व एवेदं राजदंतादौ तद्गणसूत्रमेतत् जंपतीति अभ्यर्हितत्वात्पत्युः पूर्वनिपातः प्राप्तः निपात्यत इति राजदंतादौ तत्
गणेपाठेनेति भावः अयं राजदंतादिरित्यर्थः अल्पाच्तरं यथाकथंचिदतिशयमारोप्य गरीयांसमित्यादिभाष्यप्रयोगे ईयसुनि चेद्दतरप् अत एवात्र तरनिर्देश इति मा एम॰
ष्यं संगच्छते उच्चैस्तरामिति सूत्रे च भाष्ये स्पष्टमिदं तत्रेयोगश्चादृष्टार्थः अत एव स्वरितात्संहितायामनुदात्तानामिति सूत्रे नुदात्तानामित्यत्र शब्दसंस्कारार्थमेव बहुत्वं वि २८

वक्ष्यते न तु तत्कार्यान्वयीति कैयटः मृदंगशंखपणवा इत्यादौ द्वंद्वो नरपदो द्वंद्व इति बोध्यं तंत्रं तरनिर्देश इति भाष्ये तत्पक्षांतरे मुख्यातिशयोऽर्थ इत्यर्थः तदापि प्रकृतसूत्रे तिशयप
वा विवक्षितो न तु द्वयोरित्यंशः तेन शंखदुंदुभिवीणानामिति बहुष्वपि सिध्यति यदेतदल्पाच्तरमिति तदल्पाजिति वक्ष्यामीति भाष्यस्याशयं ततः कुतश्चित्सर्वेषाम्प्यल्पाच्त्वात्साम
र्थ्यादतिशयार्थे भविष्यतीत्यर्थः अत्र पक्षे स्याच्त्वं यत्किंचिदपेक्षयातिशयस्तूपात्तापेक्षया अतंत्रपक्षे तु अतिशयः सर्वथाऽविवक्षित एवाल्पाच्त्वं चोपात्तापेक्षये
वेति स्पष्टं भाष्ये तंत्रपक्षेपि द्वयोरित्यंशाविवक्षणादतंत्रपक्षस्यैव ज्यायस्त्वमत्र अस्यात्यंतस्वार्थिकत्वं ज्ञापकत्वमिति तु न युक्तं तत्रातंत्रविचारस्य भाष्येऽसंगत्यापत्तेः
न हि सर्वथार्थाभावे एवं विचारः संभवति मम तु आरोपितत्वेऽतंत्रत्वं मुख्यत्वे तंत्रत्वमिति न तत्संगतिः कृत्वचुत्वयोरभावश्च निपातनात् अत्रापि बहुष्वनियमः आनुपू
र्व्येणेति ऋतूनामानुपूर्व्ये प्रादुर्भावकृतं नक्षत्राणां तूदयकृतं बोध्यं अनित्यमिदं प्रकरणं लक्षणहेत्वोरिति निर्देशात् घ्येतादिभि अजाद्यंताच्चाल्पाच्तरं लघ्वक्षरं
तु नक्षत्राणामित्यभ्यर्हितं चेति भ्रातुर्ज्यायस इति च विप्रतिषेधेन सर्वतोऽभ्यर्हितं पूर्वे वासुदेवार्जुनाभ्यामिति निर्देशात् द्वंद्वश्च अत्र तूर्यांगशब्देन वादकास्त्वेति अल्पा
च्तरमित्यत्र भाष्ये ध्वनितं अंगशब्द आद्यं तयोरवयवपरो मध्ये तूपकारकपरः अंगशब्दस्य च प्रत्येकमन्वयः तत्रैकप्राण्याद्यंगकद्वंद्वासंभवेनान्यपदग्रहणस्यावश्यकत्वे प्र
त्यासत्त्या तत्तद्वाक्योपस्थितप्राण्यंगाद्यवाचीतीयं गृह्यते तेन मार्दंगिकाश्वारोहाविति सिद्धं एवमेवाध्वर्युक्रतुरित्यादौ बोध्यं एकवचनशब्दश्च योगेनैकत्वविशिष्टबोध
कपरस्तदाहैकवदिति एकार्थबोधकपदवदित्यर्थः पाणिपादमिति प्राण्यंगत्वेन प्राणित्वाज्जातिरप्राणिनामित्यनेन न सिद्धिः नियमार्थमिति एतच्च विभाषावृक्षेति सू
त्रे भाष्यकैयटयोः स्पष्टं न चैतानि इतरेतरयोगे एकवद्भावविधानार्थानि कुतो न भवंति पाणिपादा इति च तत्फलमिति वाच्यं द्विगुरेकवचनमिति साहचर्येण पूर्वव्याख्याने
न चानुवादत्वस्यैवौचित्यमत्र तस्य द्वंद्वपदस्य समाहारद्वंद्वपरत्वात् तत्र तदनुवादे नैकत्वविधाने फलाभावात् प्राण्यंगाद्यनुवादेन एकवचनद्वंद्वविधयो नियमार्था इत्येषां स
माहार एवेति तत्राह समाहार एवेति ध्वनितं चेदं विशिष्टलिंग इत्यादौ समाहारे द्वंद्वः स्यादिति व्याख्यानेन द्विगुरेकेति सूत्रेऽनुवादफलं तु तत्रैवोक्तं विपरीतनियमाभावश्चेति
प्यपुनर्वस्वोरिति सूत्रे उक्तं अनुवादे यत्प्रतिपन्नप्रमाणांतरावगतमप्यर्थं कायो तदर्थं प्रयोक्ता प्रतिपाद्यते तदानुवादस्तदाह सिद्धस्येति प्रकृते चोदयप्रसिद्धयोरनु
वादः असिद्धज्ञापनेन तद्गुः कठकालापा इत्यपि चरणशब्दोऽत्र शाखाध्येतृपरः स्थेणोरिति लुङ् तस्थेणोः प्रयोगे सतीत्यर्थः अध्वर्युक्रतुरिति पठ्यर्थे [illegible]माथ

ल.श. विप्रकृष्टेति छेदस्तदाह प्रत्यासन्नादिति अध्ययनगता प्रत्यासत्तिरध्येयेतद्द्वारा तदध्येतरि चारोप्यत इति भावः पदक्रमशब्दयोस्तु जातित्वादेव सिद्धमिति तदध्येतृपुंस्पर्शिवाचके।
शे.स. ष्यप्रवृत्तिः जातिरु षष्ठ्यर्थे प्रथमा तदाह जातिवाचिनामिति यद्यपि स्तनप्रग्रहणाद्विना वृक्षादीनामपि प्राणित्वं तथापीह लोकप्रसिद्ध मनुष्यादय एव प्राणिशब्देनग्र
५७ ह्यन्त इति विभाषा वृक्षेतिसूत्रस्थभाष्यस्वारस्यतः जातिः किं नेदं कपाञ्चजन्योहरेः खड्गो नन्दकः शंखश्च पाञ्चजन्यः एकव्यक्तिवृत्तित्वान्न जातिः द्रव्येति अप्राणिनामिति पर्युदासे।
सादेतल्लभ्यते जातिप्राधान्येति प्राधान्यं च तज्जात्याश्रयसकलव्यक्तिबोधनरूपं द्रव्यविशेषेत्यस्य नियतद्रव्यविशेषेत्यर्थः इदं च तस्यादित इत्यत्र कैयटे यद्याप्राधान्यं।
नामविशेष्यत्वं तदा द्रव्यं विशेषणं वा हा चान्वयः परंपरया जातौ तत्र तात्पर्यं ग्राहकमेकवचनं द्रव्यप्राधान्ये त्वितरेतरयोगोपीति बोध्यं स्त्रीरोदकं सप्तक्त इत्यंतादि वर्जेति सूत्रभा
ष्यप्रयोगोत्रमानं वदरामलकानीति फलत्वव्याप्यजातिवचनावेतौ विशिष्टलिंगो अग्रामा इति पर्युदासः ग्रामभिन्नसर्वावयवग्रहणमत्र इह ग्रामपदेन ग्रामेनाध्येयं उदी।
च्य ग्रामाश्चेत्यादावि वनगरं न गृह्यते व्याख्यानात् तेन मथुरापाटलिपुत्रमित्येव अत्र नदीदेशविषये द्ववाक्ये न तत्र द्वन्द्व इत्येति सूत्रोक्तरीत्या न चादि सर्वावयवग्रहणमतो ग
गापाटलिपुत्रे इत्यादौ न तदाह ग्रामवर्जेति नदीग्रहणेन नदस्यापि ग्रहणं अत एव तत्र भिन्नलिंगत्वसंभवः शब्दच्छुव्वलैकाल्पेत नोभवार्थे निपातनाद्वृत्तिरिलोपकारे
शयोरभावः अव्ययसंधिवेलादिषु पाठात्कालाध्वतमपि स्वाभाविकइत्यर्थः परत्वादिति पशुशकुनिद्वन्द्वावकाशो गोमहिषहंसचक्रवाकादिः अस्यावकाशो ऽहिनकुलादि
अत्र विरोधो वैरं न तु सहानवस्थितिस्तेन छायातपाविति सिद्धं पात्रादिति येर्भुक्ते स्मृत्युक्तसंस्कारेण पात्रं न शुध्यति ते निरवसिता इत्यर्थः यथाचारितानीति गणपाठेरू
पमेषां विवक्षितं न तु पूर्वोत्तरपदनिर्देशमात्रं तात्पर्यं तेन परत्वपक्षे गोश्वं गोश्वा इति दासीदासमित्यत्रात एव निपातनात्पुमान् स्त्रियेत्येकशेषाभाव अश्वपशुद्वन्द्वविभा
षाप्राप्ता केषांचिद्बहुप्रकृत्यर्थः पाठः केषांचित्सामान्यतः प्राप्तनियमार्थः वृक्षादौ विशेषाणामेवेति स्वंरूपमिति सूत्रे भाष्ये तथोक्तेरिति भावः आदिमृगमादिषट्के प्रा।
गुक्तरीत्या मृगादिसर्वावयवकसमुदाये एवैतद्बोधितं न तद्वाक्यप्रवृत्तिः व्रीहिकुशास्त्रसमित्यादौ तु जातित्वान्नित्यमेव फलसेनेति बहुप्रकृतिर्बहुवचनान्तावयवक इत्य
र्थः अत्र वनस्पतिशब्देन वृक्षग्रहणं सेनाशब्देन तदंग इदं प्रकरणशेषभूतं एष्वेकवचनं द्वन्द्वविषयं यद्य च्छात्रं प्राप्नोतीति तद्द्वचनान्तावयवकसमुदायस्यैवेतेनाव एम.
बहुप्रकृतौ तितेनत्त्वयोगर एव तेन सप्राणमहत्त्यश्वरथपदातिमिरिति येन विधिरिति सूत्रस्थभाष्यप्रयोगः पातितेरथनागाश्वैरिति चापपन्नं तदाह जातिरिति सेनांगत्वान्नित्यं प्रा २९

प्ते इति विकल्पार्थमित्यनुषज्यते गामहिषमित्याद्युदाहरणं तु प्राप्तिमात्राभिप्रायेण चार्थे द्वन्द्व इत्येव सिद्धेः परे तु फलसेनेति वार्त्तिकव्याख्यानभाष्ये एषां द्वन्द्वो विभाषैकवद्भवति
बहुप्रकृतिरिति व्याख्यानाद्बहुप्रकृतिकद्वन्द्वस्यैवैकत्वैकवत्त्वे फलादिविषयेऽपि अत एव बदरामलकं बदरामलकानीत्युदाहृतं भाष्ये एवं चोक्तप्रयोगाः सर्वथा निर्बाधास्त्वात्
एवैतद्वचनं विभाषापदानुवृत्तये पठितं न तु द्वन्द्वश्चेति सूत्रे इत्याहुः नन्वेवं मृगशकुनिग्रहणं व्यर्थं चार्थे द्वन्द्व इत्यनेनैव सिद्धेरत आह मृगाणां मृगैरेवेति तेषां तैरेवैकवचनाद्वं
द्वः नान्यैः स च विभाषेति नियम इति भावस्तदाह नान्यैस्त्विति एवमिति पूर्वापरशब्दयोरधरोत्तरयोः परस्परमेव समाहारद्वन्द्वो नान्यैस्त्वितरेतरयोग एवेत्यर्थः विप्रतिषिद्धं चा वि
रोधोऽत्र सहानवस्थानलक्षणः अद्रव्याणां तस्यैव संभवात् अधिकरणं द्रव्यं चो विभाषानुकर्षणार्थः अद्रव्येति अद्रव्यवाचिनां चेद्विरुद्धार्थानामेवेति विपरीतनिय
मस्तु न व्याख्यानात् इतरेतरयोगश्चैवेति विरुद्धार्थानां चेदेकवचनद्वन्द्वो द्रव्यवाचिनामेव स च वेति वचनव्यक्तेरिति भावः भवत्येवेति विप्रतिषिद्धग्रहणाभावे तु सुखना।
स्यात्सामान्यतोऽद्रव्यवाचिनामेवेति नियमादिति भावस्तत्रोदाहरणं तु शीतोष्णं शीतोष्णे सुखदुःखं सुखदुःखे इत्यादि विप्रतिषिद्धमेतावन्मात्रोक्तौ शीतोष्णे जले इत्यत्रा।
भयोपपत्तिः नंदकपांचजन्यं नंदकपांचजन्यावित्यादौ समाहारद्वन्द्वापत्तिश्चेति बोध्यं नदधिपय नियमप्रक्रमेऽपि नानेन नियमस्यैव निषेधः ब्रह्मप्रजापत्यादिषु।
नियमाप्राप्तेः तत्साहचर्यात्प्रकरणाच्च चार्थे द्वन्द्व इति सूत्रविहितसमाहारद्वन्द्वस्य नियममात्रस्य च निषेधः गणे हि वचनान्तानामेव पाठाच्चेनदाह नैकवदिति यद्यदे।
कवचनद्वन्द्वविषयं शास्त्रं विधायकं नियामकं वा प्राप्नोति तन्नेत्यर्थः तेन दधिपयसी इत्यादौ जातिरप्राणिनामित्यपि नेति बोध्यं अधिकरणेति नियमो नेति पूर्वसूत्रव
त्सामान्यतो निषेधे मानाभावान्नियमप्रकरणाच्च नियमस्यैव निषेधः किं च वर्तिपदार्थस्य संख्याविशेषबोधनीये सापेक्षत्वेनासामर्थ्यात्समाहारद्वन्द्वप्राप्तेरेवाभावे
न तन्निषेधो व्यर्थः प्रधानस्य सापेक्षत्वादितरेतरयोगस्तु भवत्येव मम तु प्राण्यंगादिनियमादितरेतरयोगस्याप्राप्तौ तद्विधानेन चारितार्थ्यस्य स्पष्टमेवेति मातः परे तु दतो
ष्टहारकसंबंधेऽत्र शात्रस्य समाहारेऽन्वयविवक्षायामस्त्येव समाहारे द्वन्द्वप्राप्तिः किं च समाहारद्वन्द्वस्याप्राप्तौ द्वन्द्वश्चेत्यस्याप्यत्राप्राप्तिरिति कस्यानेन निषेधः नियमो न त
त्प्राप्तिविषय एवेतरेतरयोगनिषेधनात् तस्मात्पूर्वसूत्रद्वय मप्युभयोर्निषेधः अत एवोत्तरसूत्रविषयसमाहारद्वन्द्वसिद्धिः सामर्थ्येनासामर्थ्ये समासकल्पनापक्ष
ये वा समन्वयकल्पनस्यैवौचित्यात् तन्मूले नियमो न स्यादित्यसमासेऽपीत्यर्थः समाहारे साक्षादृशत्वान्वये तु दंतोष्ठानीति समीप इत्यस्य सामीप्येन परिच्छेदे लक्षणानुवृत्तस्य च प

ल·श·
शे·ष·
५८

सुप्यापिशलेरणामइत्याह त्वस्यसामीप्येनेति उपदशमिति नवैकादशदंतोष्ठसमूहइत्यर्थः तत्रसमाहारद्वंद्वेसमानलिंगवचनत्वादव्ययीभावस्यैवानुप्रयोगः आसन्नापदशंद
तोष्ठस्येतिसिद्धंतत्रसामानाधिकरण्यंतुसमीपसमीपिनोरभेदविवक्षयाबोध्यं इतरे नरयोगेतुबहुव्रीहेरेवानुप्रयोगः तस्यसमीपिप्रधानत्वात्समानलिंगवचनत्वाच्चेतिबोध्यं
आनङ् ऋतोविद्यायोनीत्यतोविद्यायोनीत्याद्यनुवर्तते ऋद्वंतानामिति ऋतइत्यनुवर्तमानेपुनर्ऋतइत्युक्तिः सर्वावयवद्वाराद्वंद्वविशेषणार्थातेनपितृपितामहादीनामानङ्
नकारएच्चारणमुरणपरत्वात्इत्यर्थः अत्रऋकारस्यनिर्दिश्यमानत्वेपिङकारोमित्रावरुणावित्यादौदेवताद्वंद्वविषयेऽत्यादेशार्थः उत्तरपदेइतिचाधिकारः होतेति एषां।
विद्याकृतकेकयज्ञत्विक्कृतःसंबंधः उत्तरपदास्मिन्पूर्वपदशब्दः केवलयौगिकइतिध्वनयन्नाह होतृपोत्रितिमातेति अत्रयोनिकृतः मंडूकेति अतएवमध्येनसं।
बंधः वाक्यभेदेनचसंबंधः ऋद्वंतस्यपुत्रेआनङित्यर्थः तेनतातपुत्रावित्यादौनइत्याद्यावदिति स्कंदविशाखावित्यादिशब्दार्थः अग्नेःस्तुत्सात्यद्यावोरित्यस्यापवा
दः इद्वृद्धौ देवताद्वंद्वेवृद्धिरूपोत्तरपदासंभवात्सौत्रलोपेनलुप्तमत्वर्थंवृद्धिपदमित्याह वृद्धिमतीति नन्वेनरंगत्वात्पूर्वमानङीत्वेस्यानामतआह अलौकिकेइति
तद्धितालौकिकेइत्यर्थः परिनिष्ठितात्तद्धितोत्पत्तेः वृद्धिमत्त्वेचोत्तरपदस्यभाव्येवनिमित्तमित्यर्थः आग्नावैष्णवमिति इत्वाभावादानङ् द्यावाक्षामेति द्यावाक्षामारुक्मो।
अंतर्विभातीत्यत्रत्यमिदं तत्रद्वंद्वेद्यावादेशोषष्ठ्याः सुपांसुलुगितिडादेशः देवताद्वंद्वेचेतिपूर्वोत्तरपदयोःप्रकृतिस्वरइतिवेदभाष्येस्पष्टं द्यावाचिदस्मैइति द्यावाचिद
स्मैपृथिवीनमेतेइत्यत्रत्यमिदं चिदस्मैइत्यनेनव्यवधानात्समासाभावनिर्णयः इतरेतरापेक्षयाद्विवचनंप्रमित्रयोर्वरुणयोरितिवत् अतएवपदकालेपृथिवीइती।
तिप्रगृह्यंपठंतिवाक्यंदसीतिपूर्वसवर्णः अन्येत्वत्रद्योशब्दस्यैवद्विवचनेणित्वसुपांसुलुगित्याकारइत्याहुः मातरपितरा एकशेषस्यवैकल्पिकत्वाद्द्वंद्वः अत्रपूर्वप
देऽरङादेशोनिपात्यतेउत्तरपदाधिकारात् उत्तरत्रतुऋतोङीतिसिद्धंपदद्वयेपितन्निपातनमित्यन्ये इतिद्वंद्वः अपवादसंगत्याह अथेतिगुप्रत्ययमात्रेति गोत्रयुवत्व
प्रतीतिमात्रेत्यर्थः तेनगार्गोश्चगार्ग्यायणश्चगार्गाइतिसिध्यतिमात्रपदेनप्रत्ययार्थकुत्सनादेःप्रकृत्यर्थस्यचप्रतीतेर्व्यवच्छेदः तदाह कृत्स्नमिति एतदेवकारलभ्यंन
त्कृतएवविशेषश्चेन्नतुतत्कृतातिरिक्तइत्यर्थात् तल्लक्षणःकिमिति तल्लक्षणएवेतिकिमित्यर्थः भागवित्तिकेकुत्सनेठक् कृत्स्नंकिमिति एवकारेणप्रकृत्यर्थस्या। सम·
पिव्याप्तिःकिमर्थेतिप्रश्नः तल्लक्षणेविशेषइत्येवसामर्थ्यात्तल्लक्षणएवेतिलब्धेचेदेवग्रहणंस्पष्टार्थं स्त्रीपुंस्त्रीत्वस्यवैरूप्यकारणस्याधिक्यात्पूर्वेणाप्राप्तेर्वचनंत ३०

त्लक्षणश्चेदित्यादौहापिसंबध्यतेतेनभागवित्तौचभागवित्तिकश्चगार्गीचवात्स्यायनश्चेत्यादौन अर्थे पुंवत्त्वातिदेशफलमाह अनुवर्तमानेइति तद्राजस्यबहुष्वित्यतः
पुमान्स्त्रिया अत्रविभक्ताविन्यनुवर्ततेविभक्तौतदितरक्तनविशेषविहारश्चेदित्यर्थः। अतएवजननीपरिच्छेत्तृवाचकमातृशब्दयोर्नैकशेषः हंसाविति स्त्रीव्य।
क्तेरपिहंसत्वेनस्त्रीत्वानालिंगितायाएवबोधेननात्रङीप् ब्राह्मणीवत्सश्चब्राह्मणवत्साचेत्यादौतुनेदंप्रधानेकार्थेसंप्रत्ययात्प्रधानस्त्रीमात्रवृत्तविशेषएवेतत्प्रवृत्तेः।
नपुंसकमन्यतरस्यामित्येकवच्चेत्यनेनैवसंबध्यते आनंतर्यात्तत्त्वर्थे चशब्दाच्चेत्यत आह तच्चेति अनपुंसकेनेति किं शुक्लं च शुक्ला शुक्लौ अस्यग्रहणमसत्येवैकवद्भा
वइतिबाधनार्थं नान्यस्त्राणांसमाहारद्वंद्वविषयेन प्रवृत्तिः घटघटमित्यादित्वनभिधानान्न एवंचानभिधानस्यावश्यकत्वेनद्वंद्वमात्रस्यैकशेषविषये तदाश्रि
त्यैकशब्दस्यानेकार्थत्वंचाश्रित्यैकशेषप्रकरणंभाष्येप्रत्याख्यातं अन्यथैकशेषारंभेपिगार्ग्यगार्ग्यायणयोर्बाधोनस्यात्तस्यतदर्थकत्वाभावादितिदिक् गुणेषु।
क्लादिपदानांपुंस्त्वाद्गुणिपरताप्रकटनायप्रकटादिपदोपादानं एवंचगुणपरतायांनीलोरूपमित्यादावेवप्रयोगाः गुणिपरतायांतुविशेष्यनिघ्नता गुणेषुशुक्लादयः
पुंसिगुणिलिंगास्तुतद्वतीत्यमरोक्तेस्तद्वतीत्यस्यद्रव्यविशेषणतापन्नाइत्यर्थ प्रामाणिकाः तल्लक्षणएवेति किंहिमहिमान्यौ अत्रमहत्त्वादिकृतोपिविशेषः मातृ
पितराविति पितुर्दशगुणंमातागौरवेणातिरिच्यतेइत्युक्तेर्मातुरभ्यर्हितत्वात्पूर्वनिपातः आनङ् ऋतइत्यानङ् श्वश्रूश्चापिमातृतुल्यत्वाल्लोकेरभ्यर्हितत्वं त्यदादीनि स
र्वैः त्यदादिभिरन्यैश्चेत्यर्थः यत्परमिति गणीयमत्रपरत्वं अत्रद्विपर्यंतानामितिनियमोनास्ति अहंचभवांश्चावामितिभाष्योक्तेः पुंनपुंसकतइति स्त्रीशेषेतिभावः
पुंनपुंसकयोस्त्विति तयोःसहोक्तौपुंनपुंसकतइतिवचनेपरत्वान्नपुंसकंशिष्यतइत्यर्थः इदंकैयटादौस्पष्टं अतएवनपुंसकमितिसूत्रेभाष्येशुक्लंचवस्त्रंचशु।
क्लाचकंबलस्तदिदंशुक्लंतेइमेशुक्लेइत्युदाहृतंसंगच्छते त्यदाद्यंतर्गतयोरपि एकद्योर्नैकशेषोऽनभिधानात् ध्वनितंचेदंसरूपसूत्रेभाष्ये द्वंद्वाप्येतयोर्नैकाद्दिन
वीतानांद्वंद्वाभावश्चवार्थइतिसूत्र —शेषभाष्येध्वनितत्वात् एवंचएकद्विकरणेहेतुःमहापातकपंचकेतृणवन्मन्यतेकोपकामौयःपंचकास्यनइतिनैषधपद्ये एकद्वि
करणेइत्यसाध्वेवयोलोभः अनेकपदः षष्ठीतत्पुरुषोप्यसाधुरेवेतिदिक् अस्यापवादमाह अद्वंद्वेति कुक्कुटमयूर्याविति द्वंद्वतत्पुरुषयोःपरपदलिंगत्वेनतदधीन
नैवविशेषणस्येतिबाध्यंतत्पुरुषेद्वपिप्रसक्ताइत्यत्रविशेषोबाध्यः तच्चिंतोयोगइत्यादौतदित्यव्ययं ग्राम्यप अत्रानपुंसकेनेत्यनुवर्ततेतदाह। पुमानिति एतोगा

ल॰ श॰ वाचित्वेसंघशब्दस्य बहूनां समुदाये शक्त इति भावः वत्सा इति अपत्यमात्रवाचिनो वत्सशब्दस्य प्रकरणादिना तरुणपरत्वे इदं बोध्यं वर्करा इमे इति प्रसिद्धोदाहरणं
शे॰ सू॰ वर्करस्तरुणः पशुः एकशेषः कृत इति अंतरंगत्वाद्विभक्त्युत्पत्तेः प्रागित्यर्थः तेनेति द्वंद्वत्वसमासत्वयोरभावेनेत्यर्थः एकवदिति द्वंद्वश्च प्राणीत्येतत्कृतो नियम इत्य भा
५९ र्थः पंथानाविति द्वितीयाद्विति सूत्रं तु पथ्यादित्यत्र मथिनादौ चचरितार्थं कृतद्वंद्वानामेकशेषविद्वंद्वा लौकिकविग्रहवाक्ये अकृत्रिमित्यनेन तत्प्राप्तिर्दुर्वारैवं चैवैरूप्यादे।
कशेषो न स्यात् एकं पथीति अपरं पथेति नचोत्तरमनर्थकं विशिष्टरूपोपादानाभावेन सरूपसूत्रे अर्थवत्परिभाषाया अप्रवृत्तेः एवं चैतद्भाष्यप्रयोजनार्थमुत्तरप
दावयवत्वस्वीकारः कैयटोक्तो विफल एव किंचैवं विरूपाणामपीत्येकशेषस्य दुर्वारत्वाद्भाष्यासंगतिः मम तु तरवं ङस्यानर्थकत्वान्न तत्प्राप्तिरिति भावः इत्ये
कशेषः प्रसंगादाह कृदितिपरार्थाभिधानमिति करणे ल्युट् सामान्ये नपुंसकं परशब्दस्तदर्थपरस्तेन युक्तो र्थः परार्थः एवं च परस्यार्थेन संबद्धो यः स्वार्थस्तस्या।
भिधाभिधेयोपस्थितिस्तत्करणमित्यर्थः इतरार्थान्वितस्वार्थस्यैवोपस्थितिर्यत्घटकैरिति यावत् यद्वा परेणाप्रधानशब्देन शब्दांतरार्थस्याभिधानं विशेषणं।
त्वेन ग्रहणं तत्करणमित्यर्थः यत्रत्यप्रधानपदेनेतरविशेषणकस्वार्थस्यैवोपस्थितिरिति यावत् मंजूषायां चेदं विस्तरेण निरूपितं यद्वा परेणाप्रधानशब्दे
न शब्दांतरार्थस्य विशेष्यत्वेन ग्रहणमित्यर्थः सा चावयवशक्तिसहकृतसमुदायशक्तिसाध्या अवयवशक्तिर्लोकसिद्धा शास्त्रकल्पिता च अंत्या तद्धिता।
दिप्रत्ययेसमुदायस्य वृत्त्याश्रयत्वेनैषामौपचारिको वृत्तिव्यवहारः प्रायः सा च समर्थः पदविधिरिति परिभाषाबललभ्या तत्र समासतद्धितयोः पदोद्देश्यक।
विधित्वस्य स्पष्टत्वेन मानांतरसिद्धे कार्याभावस्य च सत्त्वेन परिभाषाप्रवृत्तिः स्पष्टैव कृतां मण्डुपपदनिमित्तकानां पदविधित्वस्य स्पष्टमेव नत्वाह चर्वा चान्यत्रापि॥
अत एव धावकादेनोक्रियाकारकभावसंबंधप्रवृत्तिनिमित्तकत्वमूलकः क्रियाशब्दत्वव्यवहारः कृत्तद्धितेनेति शब्दस्तद्धितसमुदायपर एव बहुकचोर्नदोषः ए
कशेषेपि द्वंद्व इत्यनुवृत्त्या तद्विषये एतद्विधानेनैकार्थीभाव आवश्यकः चार्थांतर्भावेण बोधनार्थ इत्यभिमानः वस्तुत एकशेषे परार्थान्वितस्वार्थोपस्थापकत्वाभावाद्वृ
त्तित्वेन मानं शिष्टपदेन स्ववृत्त्यैव तत्तत्सरूपार्थोपस्थापनस्य भाष्ये स्पष्टमुक्तत्वात् अत एव समर्थसूत्रस्याधिकारत्वपक्षे एकशेषासंग्रहो भाष्येनोक्त इति बोध्यं। लम॰
सनादिषु क्यजादेः पदविधित्वं स्पष्टमेव। सनि स्वभावत एव वृत्त्यवृत्त्योः सिद्धत्वाद्वाक्यवचनं न कार्यमिति तत्प्रत्याख्यानपरभाष्यप्रामाण्यात्सः प्रातिपदिकप्रकृतिकणिच्यपि। ३१

सः मुंडयति माणवकमित्यत्र सापेक्षत्वेनासामर्थ्याद्वृत्त्यानभाव्यमित्याशंक्यमौंड्यपरमुंडशब्दात्प्रत्ययः तस्य च साध्यत्वेन प्रतीयमानतया क्रियात्वात्कारकैर्नित्यसा।
कांक्षत्वान्न दोष इति भाष्यात् एवमेव व्याकरणं सूत्रयतीत्यादावुपपद्यते सूत्रशब्दस्य सूत्रणक्रियावचनत्वेन व्याकरणे तन्निरूपितकर्मत्वोपजननात् षष्ठी तु न सूत्रण
क्रियाया ण्यंतार्थत्वेपि कृत्प्रकृत्यर्थत्वाभावात् क्रियापरत्वं चैषां वृत्तिविषय एवमौंड्याद्यर्थकादिक्त्वाक्तवतुनत्वनभिधानात् वृत्त्यर्थबोधकमिति आख्यातंतद्धितांतस्य यत्
किंचिदुपदर्शकं गुणप्रधानभावस्य तत्र दृष्टो विपर्यय इति न्यायेन सर्वत्र विग्रहे वृत्तिसमानस्य विशेष्यविशेषणभाव इति भावः हरिकारिकायां तत्रेत्यस्याख्याते इत्यर्थः
स्वरस्तः प्रतीयते स्य इष्ट्या यमर्थस्तु वृत्तौ इति सूत्रे समर्थसूत्रे च भाष्ये इति निरूपितं मंजूषायां वाक्यमिति तत्तत्समासघटकपदानां तत्तत्समासप्रवृत्तियोग्यविभक्त्यंतानां
पृथक्प्रयोगरूपमित्यर्थः संज्ञाविषयसमासे वाक्येन संज्ञानवगमेपि वृत्तिघटकपदज्ञापनाय समस्यमानपदार्थबोधकवाक्यप्रयोगो भवत्येव नित्यसमासत्वव्यवहा
रस्तु तस्य वाक्यस्य वृत्तिसमानार्थकत्वाभावेन गौणो बोध्यः लौकिक इति शक्तस्तत्सदृश इत्यर्थः एतेन तदर्थोपदर्शकं न लोके प्रयुज्यते पचतीति पाचक इत्यादेः पाक
कर्त्ता पाचकपदबोध्य इत्यादिक्रमेणार्थादिति परास्तं अविग्रह इति लौकिकविग्रहरहित इत्यर्थः नित्याधिकारीयैः समासैः समासघटकपदानां व्यपेक्षाया अभावेन लौ
किकवाक्यस्याभावात्तद्वत्तत्सदृशवाक्याभावादिति भावः एवं च वृत्तिवैकल्पिकत्वबोधनं वृत्तिघटकपदस्वरूपबोधनं तदर्थबोधनं च विग्रहप्रदर्शनफलं बोध्यं अ
स्वपदेति समस्यमानयावत्पदाघटित इत्यर्थः दंतोष्ठमिति समाहारस्य प्राधान्यात् यद्यपीतरेतरयोगेपि समूहस्यैव प्राधान्यं तथापि तत्र तस्योद्भूतावयवभेदस्यैव भा
नात् उभयपदार्थप्रधानत्वमिति भावः अत एव तत्र वर्तिपदार्थस्याप्युपसर्जनत्वं न तद्रूपेणैव तस्य भानात् अत एव द्वंद्वे चेति सर्वनामसंज्ञानिषेधः सार्थकः समाहारद्वंद्वे तूपस
यस्य निमित्तत्वे चोपितत्वं यणि अचो निमित्तत्वे जादिप्रत्ययस्यापि सत्त्वेऽतिव्यस्य च ... तत्वेऽपि मनो द्वित्वप्रयोजकत्वमस्ति तत्र लोके समवायिकारणातिरिक्त एव निमि
त्तकारणत्वव्यवहारादरिरिषतीत्यादौ नेसरस्कारस्य वा द्वित्वनिमित्तत्वमिति न गुणनिषेधः इत्सो द्वित्वाश्रयत्वात्तदाहुर्न हि कार्यमनुभवन्कार्यनिमित्तत्वेनाश्रीयते तस्य समवा
यिकारणत्वादिति नितरां वायुः एतेन ज्ञापितरित्रंतरदति ज्ञापकसिद्धं परिभाषान्तरमिति वदन्तः परास्ताः भाष्येऽस्यानुक्तेश्च व्याकरणेऽपि कार्यिणोपश्लिष्टस्यैव निमित्तत्वव्य
वहाराच्चेन चारिरिषतीत्यादावित्यथा उपश्लेषस्य समीपसंबंधरूपस्य भेदनिबंधनत्वात् अचि किं अधिजगे गाङ् लिटीत्यत्र द्वित्वकारकनिर्देशेन लाववस्थायां गाङादेशस्य

सत्वाल्लिटि आर्द्धधातुके इत्यादीनां विषयसप्तमीत्वेपि तद्भावभावित्वेन वतद्वृद्धिभावभावितामात्रेणापि निमित्तत्वस्य वक्तुं शक्यत्वात् अत्र सूत्रोपात्तलिड्वृद्धिभाव एव निमित्तमित्यपि
मित्तत्वाभाव सर्वत्रैव चात्र शास्त्रे वृद्धिकृतमेव निमित्तत्वादिदमेवाचीति ई इत्यनिमित्तत्वाश्रयणे लिंगं आवृत्त्या कालत्रयवधारणं मतीत्याह हिल्वे कर्तव्ये इति अच इति किं ई
जायेत तत्र हि कित्वनिमित्तत्वात्संप्रसारणस्यादेशेषु कृतेषु प्रवृत्त्यान्निमित्तत्वात् अत्र तन्निषेधे हिल्वे हलादिः शेष उत्तरखंडे संप्रसारणं पूर्वखंडे संप्रसारणं न स्यात् न सं
प्रसारणे इति निषेधात् लावस्थायां तु न कित्वं परैस्तिवादिभिर्बाधात् अत एवासंयोगादित्यत्रापि दित्यनुवृत्तिश्चरितार्थेति दिक् उरत् चं च्छ इत्युरित्यादावभ्यासविकारे
वाध्यवाधकभावाभावेन पूर्वं हलादिः शेषे ततोंतरंगत्वात्तु कि उरदत्वसिद्धये आह अभ्यासऋवर्णस्येति इदं चरीचर्कित इति सूत्रे भाष्ये स्पष्टं न नृते इत्यादौ तेनैवम्
नोरदत्वे कृते हलादिः शेष इति बोध्यं प्रत्यये किमिति अंगेन प्रत्ययाक्षेपः किमर्थमिति प्रश्नः एवं प्रश्नेति अन्यथोरदत्वस्यापरनिमित्तत्वात्स्थानिवत्वाभावेन न संप्रसार
णे इति निषेधानापत्तिः अत एवासप्तमसमासे रंगाधिकार उक्तो भगवता न च प्रागभ्यासविकारेभ्योंगाधिकारेपि अभ्यासे न प्रत्ययाक्षेपो भविष्यतीति वाच्यम् अभ्यासे
संज्ञैकवाक्यत्व यालिटि परे ये द्वे तयोः पूर्वस्य ऋतो दित्यर्थलाभेपि अत्वस्य परनिमित्तत्वानुपपादनात् किं च सन्यङोरित्यस्य षष्ठीत्वेन तद्विषये सत्वं तस्य पदेहेरित्य
र्थेन सर्वेषां परनिमित्तत्वं इहपादे अंगसंज्ञैकवाक्यतया तु प्रत्यय इत्यस्यावृत्त्या न दोषः अजर्घाश्चर्करीत्यादौ यङ्लुगंते न लुमतेति निषेधानित्यत्वेन न सामिरिति
भावः वस्तुतस्तेन तदाक्षेपाभावेपि अंगसंज्ञाद्वारा स्य परनिमित्तत्वं नियमतः परवृद्धेः पूर्ववृत्तितया परनिमित्तत्वात् एवं च चर्करीत्यजर्घा इत्यादौ दोषस्तं केचनेति दि
क् ननु प्रदेशे उदात्तस्यैकाच्त्वाव्यभिचारात् किं तेनेति पृच्छति एकाच इति किमिति॥ न च वधिव्यावृत्त्यर्थं तन्न तत्सामर्थ्येनोपदेशमात्रे एकाचो ग्रहणादिति वाच्यं आ
धुदात्तनिपातनेनैव सिद्धेरित्यभिमानात् एकाज्ग्रहणे नेति तदर्थकेनाच इति पदेनेत्यर्थः अन्यथोपदेशे नेकाचामुदात्तत्वस्यैव सत्वेन तद्वैयर्थ्यस्य स्पष्टमेवेति भावः ननु
वधादाद्युदात्तनिपातनेपि न सिध्यति हंतु परे शतस्यानुदात्तत्वात् तेन च तत्सामर्थ्यं गौरवादत आह अच इत्येवेति उपात्तविभक्त्यर्थेन्वयमानाभावेन तद्विवक्षेति
भावः तद्वत इति समुदाये एकत्वविशिष्टाज्वत्त्वारोपेणेति भावः सिद्धे इति शब्दविशेषमनादृत्यार्थविशेषपुरस्कारेणैवोक्तपरिभाषाप्रवृत्तेः सूपपादत्वादिति भावः साम
र्थ्यादिति उपदेशमात्रे य एकाजेवेत्यर्थकत्वनयेत्यर्थः अनेकाच्त्वादिति हनो वधेति सूत्रे स्यादंततायां भाष्ये उक्तत्वात् अत एवावधीदित्यत्रातो हलादेरिति वृद्धिर्न एवं चाद्यु

पा·
शे·
७

दात्तनिपातनं तस्य निष्फलत्वमिति भावः वस्तुत आरोपितार्थबोधकत्वेनान्यर्थग्राहकाभावेनाजं तस्येत्यर्थवारणाय चैकपदस्यावश्यकत्वेपि अवच्छेदकावच्छेदेनान्वय
स्यौत्सर्गिकत्वेन लस्यानुरोधेन च तथैवान्वयाद्विध्यावृत्तिः स्पष्टा चेयं रीतिरुपदेशेऽत्वत इति सूत्रे भाष्यकैयटयोः तत्र हि घसो प्रतिषेधाभावाय हलादिग्रहणं कर्त
व्यमिति भाष्यमुपादाय उपदेशग्रहणमुभाभ्यां संबध्यते उपदेशे योऽत्वान् हलादिश्चेति न च घसिरुपदेशे हलादिरिति कैयटेनोक्तं यद्यपि अस्य साक्षादुपदेशः संभव
ति तस्य मुख्यत्वात्स एव गृह्यते न तु स्थान्युपदेश इति न दोषः इयमपि रीतिरुपदेशेऽत्वत इति सूत्रशेषे अनो भारद्वाजस्येति सूत्रे च भाष्ये परत्वे कान्यग्रहणं व्यावर्त्योऽत्र व
धिरेव किं च उत्तरार्थमेकाज्ग्रहणं अत एव जागरितवानित्यादावुपदेशोऽगं तत्त्वमादाय श्रुकः इति इण्निषेधो न तत्रोपदेशानुवृत्तिश्च स्तीर्णमित्यादावपि इण्निषेधायेत्याकरे
स्पष्टं चेति पाठे पेति नास्त्येव भाष्यानुक्तत्वात् न च भाष्ये यङ्लोपे वेभिदितेत्यादाविट्प्रवृत्त्यर्थमुपदेशेऽनुदात्तादेकाचः श्रूयमाणादित्यर्थसत्त्वी इट्प्रतिषेधो वक्तव्यो वि
भित्सतीति दोषापत्त्या सवाच्यङ्लुकि दोषानुपन्यासेन तत्रेडिष्टः यङ्लोपे इत्यादिभाष्यं नूपक्रमोपसंहारबलेन न यङ्लुग्विषयं किं च तस्य तद्विषयत्वे यङ्लोपे स्यानि
वत्वस्येव यङ्लुक्युपायापदर्शनेन न्यूनतापत्तिरिति वाच्यम् इड्विषये यङ्लुको लोकेऽनभिधानेन छंदसि सर्वविधीनां वैकल्पिकत्वेन च तत्र दोषानुपन्यासेनादोषा
त् अन्यथैकाज्ग्रहणं किमर्थमिति प्रश्नस्योत्तरत्र जागर्त्यर्थमित्युत्तरस्य च भाष्ये निरालंबनतापत्तेः अजर्घा वेभिदीतीत्यादौ श्नम् इयनादयस्तु षर्केरीतं वेसस्यावदो
पाठेन यङ्लुगंते गणं तरप्रयुक्तस्याप्राप्त्या नच्छांदसत्वादेव कार्यान्तराणामपि छंदसि दृष्टप्रयोगे घटिष्टानामभावो बोध्यः भाषायां तु तादृशानामभाव एव क्विपादि
निर्देशास्तु लिङादिनिमित्तकभवतेरित्यादिस्थतन्निर्देशवन्नार्थसाधका इत्याहुः इणः षीध्वं षीध्वमिव कारोच्चारणं तु ब्रुवीध्वमित्यादावेकदेशविकृतन्यायेन
मः सत्वे नढत्ववारणाय अंगात्किं वेविषीध्वं अस्य षीध्वमोऽनर्थकत्वेपि अर्थवत्परिभाषाया अनित्यत्वज्ञापनायेदं तेनानिनस्मन्ग्रहणानीति सिद्धमिति केचिन्नास्त्व
तिंषुपिकृञ्जि नु कौ लाघवमलितथाप्येकस्यैव लाभार्थं प्रत्याहारग्रहणं कृञोऽदुर्बयनाचेति भावः तदुक्तमत उत्सार्वधातुके इति सूत्रे भाष्ये अनुप्रयोगे तु भुवास्त्व
धनं स्मरंतिकर्तुर्वचनान्मनीषिण इति। पररूपापवाद इति। पररूपपदमेकादेशोपलक्षणं आनृजेरित्यादौ गुणस्यैव प्राप्तेः अभ्यासविकारे बाध्यबाधकभावाभावेन पूर्वोप
स्थितहलादि शेषोत्तरं दीर्घ इति भावः अत्र लिटीति वर्तते तेन ऋधातोरृधातोश्च यङ्लुकि नायं दीर्घ इति केचित् आदिग्रहणं तदंतविधिनिरासार्थं ॥ धिवांश्चारी म

न्ययइतितेनपयाधावनिपयोधावनमित्यादौनलोपः अतएवभाष्येसङीत्युक्तंसनःसकारमारभ्यमहिङोङकारेणप्रत्याहारः चकाधीत्येवेष्यतेइतिभाष्योक्तेरयंमि
चोलोपइतिसङीत्यस्यैकदेशस्युक्तंप्रत्याख्यानंनयुक्तंतत्रसङेत्यस्यधारेःसांतात्संभवेनप्रत्ययइत्येवाध्याहृतंमूलकृतापत्पुपदस्येत्यधिकारेणप्रत्यासत्त्याव्याख्यानेनचारंभ
उकपरस्ययोर्निमित्तनिमित्तिनोर्ग्रहणमितिकैयटेमोक्तंतत्त्वातिक्लिष्टंततोवचनमवश्यायइतिपरेहणेनितासस्त्योर्लोपइत्यनेनतासस्त्योर्हिनिसःसीसतःसइतिचवर्णितेलो
टइति।लोडादेशस्यैनर्थे।सलोपइतिलिङःसलोपइत्यनेन॥इटोत्॥तकारउच्चारणमात्रफलकोनविभक्त्यावित्यस्योच्चारणमात्रफलकेःप्रवृत्तेरत्वघटित्यन्योपपादितत्वा
दितसंज्ञयानिवर्ततेषत्वमिति लक्ष्यभेदात्पुनःप्रवृत्तिरितिभावः युगपदेववोभयोःषत्वंढधयोरितिमतभेदेनेति शेषः ढस्येत्येवयुक्तंइतिमतेत्वित्यनेनतन्मतेभाष्यमनुपइति
रूपस्यपुंभावरूपस्यचास्वरसस्यबोधनार्थंऊदितइतिनिर्देशोकारांतानामुदात्तत्वादिववभूयात्तत्त्वेतिरत्नभावनिपातनमारभ्यैकाचइतितेनजागृदीधीत्यादीनांव्यावृत्तिःश्य
क्लितिभाष्येत्वनुबंधरहितःपाठोदृश्यतेपचितिडुपचष्पचःप्रसिद्धत्वात्सृजिदृशिवादित्सुदादिश्ववुध्यतीतियद्यपिभाष्येश्यनानिर्देशोनास्तितथापिमाधवादिप्रामाण्याद्युक्तः
तृप्यतिदृप्यतीतिअतएवक्रमुचादीनामितिसूत्रभाष्येतृपितोदृपितइत्युदात्तत्वंलुपतुदादिरेवनदिवादिर्व्याख्यानात्तत्रापृधातोर्भ्वादेर्दिवादेश्चग्रहणंक्लिष्यतीतिश्य
नानिर्देशःश्लिषआलिंगनइतिसूत्रभाष्यप्रामाण्यात् तत्रहिश्लिषइतिविभक्तिविहितक्तस्यपुषादिअङ्बाधकत्वमुक्तंअनिटइत्यनुवर्तनादाहार्थस्यसेटोग्रहणाभावइ
तिकैयटःमृषेर्भाष्येनार्थःपाठःमृषस्तितिक्षायामितिसेट् निष्ठायांअकित्वविधानात् अतएवमूलेमृषिर्नोक्तःपुष्येतिश्यनानिर्देशोमाधवादिप्रामाण्यात्वसतिर्भ्वादिःव
सिःप्रसारणीतिभाष्यात्शकइतिचंद्रदुर्गाभिमतेनवस्तुनोभाष्येलटित्याठाभावेनदिवादेरप्यनिट्त्वमेवविद्यतिर्विनदिर्त्तिविकरणनिर्देशात्स्यवाव्यर्थ्यावर्ण्यानरस्वंडनव्या
मेनइदर्थपठितोविंदतिरितिभाष्यपीतोविंदतिविनत्तिविद्यतीतिपाठइतिभावः संप्रत्युपलभ्यमानेविंदिविद्यतीतिपाठेपिविंदिग्रहणेनोभयोर्ग्रहणंविन्तिविंदतीतिप्रयोगस्यविंदे
रनुकरणोदिकःसत्त्वात्अतएवयस्यविभाषाअविदेरितिवक्तव्यंइहमाभूत्विदितःतत्रहिवक्तव्यंनवक्तव्यंयदुपधेर्विभाषातदुपधेःप्रतिषेधःत्वविकरणस्यविभाषा
लुग्विकरणश्चायमितियस्यविभाषेतिसूत्रेभाष्येउक्तंतौदादिकस्यापिसिद्धेअविदेरितिवार्त्तिकेतद्ग्रहणमेवस्यात्एवंचयदुपधेरित्याश्रयणेपितदर्थेवार्त्तिकस्यावश्य
कत्वेनतत्प्रत्याख्यानासंगतिःममतुत्रयाणामनुदात्तत्वेनवार्त्तिकेलुग्विकरणस्यैवग्रहणमितिनदोषःतएवज्येष्ठंपरित्यज्यदारानग्नींश्चलब्ध्वानित्यर्थेपरिवेत्तेति

सूत्रं तत्प्रयोगः संगच्छते यत्तु कैयटेन तत्रत्यं भाष्यमुपादाय केनिरत्र विवक्षितो विरला भ इत्यस्य तु प्रतिषेधो भवत्येव विन्न इति विघ्नितो विनत्यो इत्यनुदीनत्वादिट्प्रतिषेधः सिध्य
तिन इत्येतेन प्रशस्तं तौदादिकस्यापि सिद्धे अविशेषेणेत्यनेन वेत्तेरेव ग्रहणे बीजाभावात् नवेत्तीति नरक्तं तदस्मिन्नन्नं प्रायेणेत्यत्र कृतमित प्रतिपन्नाः शुष्कधृष्टौ तेन नत्र विशिष्टेनेति
निर्देशात् तुन्नो मूर्त्तः पुष्टो मत्तो मंक्तव्यमित्यादि भाष्यव्यवहाराच्च वसतिक्षुधोरिट् नु इति विशेषं दत्वा मत्सिनत्रो लीत्यादिगमकाच्च ततत्र च्छतु न वक्ष्येति भाष्यप्रयोगाच्चेति भा
र्कः अकर्मक इतीष्ट वदनीयं तत्र दत्तं स्पर्द्धते इत्यत्र स्पर्द्धापूर्वक शब्दे नवृत्तिर्बोध्या शर्पूर्वाः हलादिशिष्यत इति शेष इत्यनुवर्तते अत्रादिरित्यनुवर्तते तत्र शब्दातिरिक्त वर्णोपि स्यायाधा
त्वादिभूतादिन्नार्थः तेन वत्र श्चेत्यत्र चस्य न शेषः खयः किं सस्संभ शर्पूर्वाः किं सपूर्वा इत्युक्तौ उत्सादिष्वपि स्वयः शेषापत्तेः आशिक्ष्येवेति आशीः प्रतिपादकतायत्वेतिवाच्या
र्थः अर्थान्तरे त्वप्रमादितिपरस्मैपदमेव अत एक एकशब्दः सहायवाची द्विवचनांते न समासः द्वयोरेव मध्यसंभवादित्याह असंयुक्ते त्यादि लिटीत्यादेशविशेषणे एकदे
शान्वयेपि सो त्वाह हलि साहा लिस्ति मित्ते तन्निमित्तादेशादिभिन्नमित्यर्थः निमित्तं च प्रत्यासत्त्यो पस्थितो लिडेवेत्याशयेनाह किति लिटीति गमहने त्यादितोयद्यपि किती
त्यनुवर्तनं तथापि लिटोऽडित्वासंभवात्किती त्युक्तं अभ्यासलोप इतीति विशिष्टविधिरत्र प्राप्ताप्राप्तविवेकेन चलोपमात्रे विधेयतापर्यवस्यतीति यद्वा समासेष्वद्देश्यविधेयतवत्र
योस्मिसतितात्सर्थं क्वचित् लिटीति किं पापच्यते अभ्यासविकारे बाध्यबाधकभावाभावेन दीर्घात्पूर्वं कृते नाभ्यासदीर्घ एत्वाभ्यासलोपौ प्राप्नुतः किं च परत्वादेत्वाभ्यासलोपस्य
दीर्घत्वेन बाधः सकृद्गतिन्यायाच्च न पुनस्तौ इति भाष्ये उक्तं शब्दान्तरप्राप्त्या चलोपो न नित्यः अभ्यासविकारेषु न बाध्यबाधकभाव इति तु ज्ञापकसिद्धस्यासार्वत्रिकत्वान्नात्राश्री
यत इति तदाशयः एतेन यत्रान्यतरस्मिन्कृते सर्वेषां प्रवृत्तिस्तद्विषयः स न्याय इति कैयटोक्त मपास्तं दीर्घकृते इत्वस्याप्राप्त्याची करदितिगुणोयङ्लुकोरिति सूत्रोक्तन ददाहृ
लपर भाष्यविरोधापत्तेः चलि चसैसे टीत्येव सामर्थ्यादेकाकिद्विशिष्यत्वेलब्धे यत्प्रहणं स्पष्टार्थं नेधिवितीं देधेरित्यादिषु दकारादिषु सत्स्वपीत्यर्थः एकेत्सादिकि मितिं आर्त्तु
रित्यादौ हल्मध्ये इत्येतावतापि वारणसंभवादिति प्रश्नः न च वमलतुरित्यत्राभ्यासे चर्त्वस्यासिद्धत्वादेत्वादिस्यादिति वाच्यं फलिभजिग्रहणे नैत्वाभ्यासलोपयोरभ्यासादेशस्यासि
द्धत्वज्ञापनात् अनादेशादित्यादिग्रहणं तु हलादिः शेषमादाय सूत्रस्यासंभववारणाय स्पष्टार्थम् अस्खलनमनुस्खलनमनु त्यगमनं इदितो इदित इतिकर्मधारयेण धातोर्विशेषणं तेनेदिंतस्य
धातोर्नुम् विधानाच्च सिद्धा दीनदोषः धातोरिति धातूपदेशावस्थायां नुम् अर्थं तेन हुंडित्यादौ गुरोश्च हल इत्यप्रत्ययसिद्धिः अनुवर्तमानमंगस्येत्यंगत्वयोग्यस्येत्यर्थकं बोध्यं गासो

तुनस्तोष-आसएववक्तुं शक्यत्वात् सिच्यपि न दोषः स च एव वक्तुं शक्यत्वादिति स्पष्टं भाष्ये श्विंदते रूतिं श्वेतो भवतीत्यर्थः अभिवादनं नतिस्तत्पूर्वकमाशिषां प्रा वचनं चास्य मआल
संनिद्धागतावस्या विशेषश्च न शासंगुणश्च ब्दो मनारेड् मात्रपरः शासिरदिग्रहणे वैयर्थ्यापत्तेः व्यपदेशिवद्भावेन गुणावयत्वे संभवात् । अतो व्याख्यानाच्च लक्षणया गुणश
ब्देनभावित परःसरतिबोध्यम् अयमित्यादि आस्वादनमनुभवो ह्रचिश्च धात्वादेः अत्र सुव्याख्यातु व्यावृत्तये उपदेशादित्यनुवृत्तेरावश्यकत्या षडित्यादेरपि तेनैव व्यावृत्तौ
धातुग्रहणं स्पष्टार्थं आदेरितिलक्षणानि व्यावृत्तये वोपदेशफलं त्वसिष्वदादिति उर्दमाने मानं सुखं चादास्वादने उपधायां चसिपिधातोरित्यनोधातोरिति वीरुपधायाः
म्नतोर्वौरिक इति हलि चेत्यवो हलीति चानुवर्तते धातोरित्यस्याभावेपदाधिकारस्य सत्वे न पदस्य धाभूतयोरित्यर्थ उर्द्दत इत्यसिद्धिः सूत्रं तु क्विवंत उर्द्दित्यादौ चरितार्थम्
कुर्दखुर्दगुर्देति पृथग्धातुः सगिति भाष्ये क्वचित्तु सांतस्य क्वचिल्लृ इति दीर्घांतस्य पाठदर्शनादुभयोपादानं यद्यप्येकाच इत्यत्र भाष्येन दृश्यते तथापियङि घोसौ सूच्य
तरतिभाष्योदाहरणात्पूरितं सगादिपर्युदासाद्धा तल्लाभः यद्यपि भाष्यषकतिर्न दृश्यते तथापि सुव्यातुष्टिवुष्वष्कतीनां प्रतिषेध इति वार्तिकवलात्पठितः ष्टिवेस्तु न
सत्वं यादित्वादिति बोध्यम् नरपरेति सूत्रे सृपिसृजिस्पृशिस्पृही नाम षोपदेशत्वेपि पूर्वपदादिति सूत्रेण प्राप्तषत्वनिषेधार्थं ग्रहणं तत्र हि आदेशप्रत्यययोरिति न संबध्य
ते अतएव हि षासह स्वमित्यादौ छंदसि तेन षत्वसिद्धिरिति दृग्नो स्पष्टं पूर्वपदादिति सूत्रे च छंदसीति संबध्यते यद्यपि छंदसि दृष्टानुविधिस्तथापि छांदसान्यनिषेधवदिम
पीतिबोध्यम् यपि कौटिल्ये कौटिल्यं शाठ्यं वक्रतावा श्लाघायामिति । अविद्यमानगुणसंबंधख्यापनं श्लाघा अथाष्टात्रिंशदिति अष्टत्रिंशदिति पाठे भिन्नेपदे इट इटि सपो
शांतस्येत्यतोलोपइति रान्तस्येत्यस्येति चानुवर्तते वदव्रजा हलंतत्वादेव सिद्धेः नो हलादेरित्यस्य बाधनार्थमनयोर्ग्रहणं नदंतविधिनैव सिद्धेरन्तग्रहणं स्पष्टार्थम् नन्वज्ग्रहण
सामर्थ्यान्नेटीति निषेधाबानं त्याचोग्रह लोसिद्धे हलंतग्रहणं व्यर्थमिति चेन्न इतआरभ्य वृद्धिभाज एव सिच्यत्वेन विशेष्यंतरत्यर्थख्यापनार्थं तत्सत्वात् एवं चारांक्षीदित्यादिसि
द्धये वर्णग्रहणे जातिग्रहणाय तदावश्यकं अतएव स्वावस्थायामडागमेः पाक्षीदित्यादावटो न वृद्धिः विलोडनं क्षोभणं निषेधे प्रा मेदपि तिरदमुपलक्षणं अवृदृभातीत्यादावपि
मस्यविधानात् "उपसर्गात्सु" अभिषावयतीति एयंतेपिषत्वं भवत्येव तत्रावद्धाक्ति स्वभावेनोपसर्गाणां प्रकृत्यर्थविशेषणतायाएवस्वीकारात् तदुक्तं भाष्ये सुनोत्यादीनांप
त्वे एयंतस्योपसंख्यानमधिकत्वादभिषावयति न वाः नन्यत्वात् न च नात्र सुनोतिं प्रतिक्रियायोगः किंतर्हि सावयतिं प्रतीति सुनोतिं प्रत्येव क्रियायोगो नासावेवं प्रष्यंते सुनुभ

सि॰
ष॰ को॰
९

अभीतिकिंतर्हिउपसर्गविशिष्टमसौपेप्सते अभिषुण्वितीति अत्रवचनप्रत्याख्यानयोः समफलत्वायनासावेवमित्यादिभाष्येणचमदुक्तेएवंतात्पर्यंलभ्यतेसुंदरि प्र"
अप्रतेः किंप्रतिसमादनुसरेदालंबनाविदूर्ययोरन्यभावादेवासंबंधः सिद्धेः तआहौ किंचेति अवाच्चा॥ आविदूर्यंसामीप्यं अवष्टभ्यागौः निरुद्धासन्नौसमीपेआसन्न
त्यर्थः परिनिविभ्यः सेवन्यवाकार उच्चारणार्थः सितसयोः पिञ्प्रकृतिकौ व्याख्यानात् स्यादिष्वभ्याकुसितादित्यस्यसंबंधार्थप्राक्सितादित्युत्तरमिदंपठितंनचाभ्यासस्यैवे
त्वर्थकामास्यषत्वाप्राप्त्याकथमस्यनियमार्थत्वमितिवाच्यं ष्ठिवः प्रयोगत्वादभ्याससकारस्यापि अर्थवत्सुनोत्यादिसंबंधित्वात् सतेः अर्थवत्सुनोत्याद्यवयवत्वमिवतत्संबं
ध्यवयवत्वस्यापि अचवषष्ठ्यर्थत्वात् यद्वा अत्रप्रकरणे तत्तद्धातोरिवतदानुपूर्वीकस्यचग्रहणंव्याख्यानात् अतएवानुषस्यंदेरित्यादावनुविपर्यभिनिभ्यइतिअ
भ्यासस्यषत्वं॥ स्यादिष्विति नियमसुप्राक्सितादेरभ्यासस्यषत्वंतदास्यादिष्वेवैवमितिनात्रतस्यप्राप्तिः सुपिसूतिसमाइतिसूत्रेभाष्येसर्वमिदंस्पष्टंतत्रहिभाष्येवि
सुषापेति अभ्यासस्यषत्वंप्राप्नोतिनचस्यादिष्वितिनियमान्नभविष्यति प्राक्सितसंशब्दनान्नियमः उत्तरश्चसुपिः एवंतर्ह्यनर्थकत्वान्न नचैवंविषुषुपुरितिनसि
ध्यतिइतिवाच्यं सुपिभूतस्यद्विर्वचनादित्युक्तंसुपिभूतस्येतिप्रतीकेयद्यपिकैयटेनष्ठिवः प्रयोगेसएवसुपिर्द्विरुक्तइतिसमुदायाश्रयमेवषत्वमितिव्याख्यातंतथापि
दृयतेर्दिगीतिसूत्रस्थभाष्यविरोधात्समुदायस्यसुपित्वानुपपत्तेश्चमदुक्तव्याख्यानेएवभाष्यतात्पर्यंदिगीतिसूत्रस्थभाष्यंत्वपेलन्नादिगणेस्फुटीकरिष्यते॥ गंगांविसेधा
तीति॥ विप्रतिषेधइत्यत्रसेधतेर्गताविति निषेधानतस्यविरोधार्थत्वेनगत्यर्थत्वाभावात् सिषेधेत्यादावादेशप्रत्यययोरितिषत्वंभवत्येव अनंतरस्येतिन्यायेनसेधतेर्गता
वित्यनेनादेशप्रत्यययोरित्यस्यानिषेधात् इतिकेचित्सिचोयङीत्यादिसाहचर्यात्सर्वषत्वनिषेधउपसर्गादित्यस्यतुनात्रसंबंधोविच्छिन्नत्वात्तेनगंगांविसिसेधेत्येवप्रत्य
भिधानमस्तीत्यन्ये॥ स्वरतिसूति। सूतीत्यत्रगुणाभावः सौत्रः धूञः सानुबंधकनिर्देशोधूविधूनने इत्येतस्यापरत्यर्थः इट्सनिवेत्यनुवर्तमानेवाग्रहणेलिङ्सिचोरात्मनेपदेष्वि
त्यस्यनित्यर्थे नचस्वरतिग्रहणेसामर्थ्यादेवतन्निवृत्तिः सिद्धाऋतश्चेतीड्विकल्पस्यसिद्धत्वादितिवाच्यंस्वरतिग्रहणंनित्यार्थंस्यादितितस्याज्ञापकत्वादितिकैयटः" अकारगु
दिति॥ ननुकलं तु नाग्लोपीति ह्रस्वनिषेधः" अतोहलादेः" अत्रांगान्त्यः कारासंभवाद्धलादेरितिसामर्थ्याच्चांगस्याकारइतिवैयधिकरण्येनान्वयः हलः परस्यांगावयवाकारस्येत्य
र्थेनसिद्धेआदिग्रहणंस्पष्टार्थं अचकासीदित्यादौतुचकाराकारेनातिप्रसंगः सिच्परत्वेनाकारविशेषणात् नन्वेवंलघोरितिव्यर्थं अलक्षीदित्यत्रापियेननाव्यवधानस्या

येनैव वारणसंभवादिति चेन्न स्पष्टार्थत्वात् अत एव तु अकुटीदित्यादौ वृद्धिवारणाय नेर्गदः अत्राड्व्यवायेपीति वर्त्तते तेनाकाराद्व्यवधानेपि णत्वं यद्यपि तत्र सूत्रे रेफष
कारयोर्निमित्तयोर्निमित्तिनश्च नस्याड्व्यवाय आश्रितस्तथापि यत्र यन्निमित्तं निमित्ती च तयोरप्यड्व्यवाये णत्वं अस्ति चात्र गदादेर्निमित्तत्वं नेर्निमित्तित्वमि
ति स्पष्टं भाष्ये कैयटयोः धात्वादेरित्यनुवर्त्तनादाह धात्वादेरिति अत्रोपदेश इत्यनुवृत्त्या णत्वादिनामधातुव्यावृत्तिर्बोध्या नाटीति नट अवस्यंदने चुरादिरेव व्याख्यानात्
नेर्भ्वादिर्णोपदेश एव आहुरिति भाष्यविरोधो नाहृक्विः उपसर्गाद्पूर्वपदात्संज्ञायामित्यतः पूर्वपदादित्यनुवृत्तौ तदाक्षिप्तसमासे एव स्यादतो समासेपीति नत्वं
पूर्वपदाधिकारस्यात्र निवृत्त्यर्थं व्याख्यानत एव सिद्धाविदं व्यर्थं न चासंज्ञायां पूर्वपदादिति नियमव्यावर्त्तितणत्वप्रतिप्रसवाय समासासमासयोर्विशिष्य विधानार्थं पू
र्वपदादिति तिरस्कार्यसमासरूप्यस्यासिद्ध्या नियमेनव्यावृत्तेः कर्त्तुमशक्यत्वात् न चैतत्प्रकरणे प्रकरणमसिद्धं न तु सूत्रे सूत्रमित्यर्थे ज्ञापकमिति वाच्यं रक्षाभ्यामित्यत्र
समानपदे इत्यस्यास्वं उपदेश इत्यर्थेन पूर्वपदादित्यस्य विध्यर्थत्वेन ज्ञापकासंभवादिति चेन्न स्पष्टार्थत्वात् तस्मात् तच्छब्देनात आदेरिति कृतदीर्घः परामृश्यते उपस्थि
तत्वात् दाह दीर्घोभूतादिति अत्रापि लिटीति वर्त्तते दंदशूकस्याकित्वादाह दंदशूक क्रियायामिति दंदशूको विलेशयः वदनैकदेश इति तत्क्रियायामित्यर्थः
आदिर्ञिटोः कारीयतीत्यादौ नेदं तेषामनभिधानात् यत्तूपदेश इत्यनुवृत्तेस्तत्र न दोष इति तन्न तस्यास्वरितत्वात् किंच तदनुवृत्तावादिग्रहणवैयर्थ्यापत्तिः यद्वादि
त्वदेउपदेशाभावादेव न तत्प्रवृत्तेरित्याहुः द्विचत्वारिंशादिति विभाषा चत्वारिंशत्प्रभृताविति विकल्पविधानादात्वाभावः अयोपदेशत्वादिति सिकः पर्युदासादस्य
योर्दस्याजं नत्वादित्वाभावादित्यर्थः ऋदुपधेभ्य इति यद्यपि विमिदतुरित्यत्र कित्वं नित्यं तथापि ऋदुपधे तदनित्यं गुणे संयोगात् परत्वात् तत्र परत्वात् गुणे प्राप्ते इदं
कित्वमवकाशं ईजतुरित्यादिः गुणावकाशश्चेततीत्यादिः परेतु ऋदुपधविषयैतल्लक्षणोपप्लवकृतकित्वस्यानवकाशत्वमेव तदुक्तं भाष्ये उक्तं वाकस्यानवकाश
त्वादपवादो गुणस्येति यथाकस्य कित्वसामर्थ्याद्वा लिङ्सिचावित्यादौ गुणो बाध्यते तथेह ऋदुपधविषयैतल्लक्षणोपप्लवप्राप्तिनातिदेशसामर्थ्यादित्यर्थ इति कैय
टः न च परत्वाद्गुणस्यैतद्विषये लक्षणोपप्लव एवेति वाच्यं असंयोगादिति कित्वस्यैतद्विषये निषेधातिदेशकत्वेन निषेधाश्च बलीयांस इति न्यायात्तद्विषये विशेष
धाप्रवृत्तेः न च संप्रसारणविधौ कित्वस्य कृतार्थत्वात् दुर्बलेनानेनातिदेशेन प्राप्यमाणो गुणनिषेधो दुर्बल इति विधिरनेन स्पर्द्धत इति परत्वप्रवृत्तिरस्त्येवेति वाच्यं

सि.
पा. टी.
१०

विचनिगृह्णातीत्यादावतिदेशात्प्राप्तङित्वस्य संप्रसारणेन कृतार्थतया तदनंतरप्राप्तगुणेन त्वदुक्तरीत्यातिदेशप्राप्तगुणनिषेधबाधापत्तेः एवं च विषम उपन्यासः अन्यकारां
क्तस्य किलं रहपुनरुभयं सावकाशमित्यादिरुत्तरभाष्यग्रंथस्य एकदेश्युक्तिरित्याहुः उवोरुवेति द्विर्वचने चीति निषेधात्पूर्वं द्वित्वे कृते उकारस्य वार्णादांगस्य बलीयस्त्वा
त्सवर्णदीर्घं बाधित्वा गुणे कृते उवङ् एतेन गुणस्य स्थानिवत्त्वेनांतरंगत्वात्सवर्णदीर्घः स्यादित्यपास्तं पूर्वस्यैव विधौ स्थानिवत्त्वात् उवङि तु न स्थानिवत्त्वमसवर्णग्र
हणे सामर्थ्यात् संनिपातेति अमिमीतेति धातोर्णेल परत्वव्याघातः स्यादिति भावः वार्णादिति अत्र त्वभ्यासस्येति सूत्रं ज्ञापकं तद्धि इयेषेत्यादौ वियङ्घं तत्र पूर्वप्राप्तगु
णे वृद्धौ द्विर्वचने चीति निषेधे द्वित्वोत्तरं प्राप्तगुणवृद्धी बाधित्वांतरंगत्वात्सवर्णदीर्घे तद्धैयष्यंस्य ह्रस्वमेवेत्यन्यत्र विस्तरः परत्वाच्चेति अस्य परकालप्राप्तिकत्वादित्यर्थः एवं चा
भ्यासविकारे बाध्यबाधकभावाभावेन न हलादिः शेषयोर्युगपत्प्रवृत्तौ ततः परकालो दीर्घ ह्रस्वं तत्र गत्वा दीर्घत्वं स्यादिति न वाच्यमिति भावः अनिदितामिति इदं कुं
चधातुविषयं कुंचेत्व निदितामिति न प्रवर्तते परेश्च घेति सूत्रस्य भाष्यप्रामाण्येनास्य ज्ञोपधत्वान्नकारजावनुस्वारपंचमाविति तु प्रापिकं तदाह कुंच्यादिति सका
रहितपाठस्त्वपपाठः इति मतेत्विति इदमेव युक्तं तपरकरणफलस्य भाष्यानुक्तत्वात् अजेर्व्य अत्र वा लिटीत्यतो वेत्यनुवर्तते तेन व्यवस्थितविभाषा तेन घञपि
कप्युनस्त्युटि वा वलाद्या वा ईधातुके वा अन्यत्र नित्यमेव अघञपोरिति न वक्तव्यं स्पष्टं चेदं भाष्ये एवं चैतद्विकल्पसामर्थ्यादीधातोरप्यर्थे सार्वधातुके एव प्रयोगो
नार्धधातुक इति बोध्यं ह्रस्वदीर्घजिपूर्वत्वासिद्धीय इति निषेधस्याप्ययं नियम इति भावः चतुर्णामिति कृत्वादिना च तु हुं विनिगमनाविरहेण तेषां सर्वेषां नियमार्थमेव तत्
द्वन्द्वे तु विध्यर्थत्वसंभवान्न तदर्थत्वं प्रकृत्याश्रयः एकाच उपदेशे इति कादिषु त्रिषु प्रकृत्याश्रयः श्र्युकः किनीति इधातोः प्रागुक्तः प्रत्ययाश्रयस्य नियमे इदं प्रह्ल
प्रेवमानं यात्वानितिनन्वाशःव्वात्मतरप्रापित इत्यर्थः तेन नपि धूञित्यस्यामिपविधिर्थ्येकमेव यदित्तु नेदूशीति प्रक्रमान्न्याप्रापितस्यैव नियमः स्यात् तदोपदेशत्वत इति सूत्रेणि
त्वानिदृश्यत्यस्यां जिर्ध्वावर्स इत्यर्थपरभाष्यासंगतिः तत्र निष्ठानिट इत्यस्याभावे ऽजेजातोभारद्वाजस्येति विकल्पः स्यात् तत्सत्वेप्यूदित्वप्रयुक्त विकल्पस्यैव सत्वेन तत्
दसंगतिः ममंतु कादिनियमेन नित्य इडिति भावः क्रादिभ्यश्चेदिण्न तर्हि लिधेवेति विपरीतनियमस्तु नक्तेपरिहत इत्यादिलक्ष्यविरोधात् अत्र सूत्रे कृञोऽसुट् १०
इति वक्तव्यं तेन संचस्करिवेत्यादि सिद्धमिति स्पष्टं भाष्ये ततश्च तुर्णामिति नियमाद्विधिर्बलवानिति भावः उपदेशेऽजंत इति उपदेशग्रहणमस्य सूत्रस्थं तद्यावसू

च विभाषा दिदीवक्तिं यत्वन्निति क्रमो भारद्वाजस्येति सूत्रे भाष्ये स्पष्टं एवं च वेडादेर्दीधित्यादिसिद्धये ग्रहणमावश्यकं अन्यथोपदेशेऽजन्तानामात्वविधानेनाजग्रहणमेव कुर्यान्न ना
सो नित्यानिटः इति तासौ सतस्तत्र नित्यानिटस्त्वर्थः यस्मात्तासौ वलि नित्यानिट् चेति भाष्योक्तेरिति भावः तास्वदिति सप्तम्यन्ता वृत्तिः यथा तासौ नेट् तथा थल्यपीत्यर्थः नित्यानि
टः किं दधविथ अयं स्वरतीति सूत्रेण तासौ विकल्पितेट् अतो थल्यपि नित्यमिट् नित्यग्रहणाभावे भारद्वाजनियमेन विकल्पः स्यादिति वृत्तिः तासावितिकिं घस्लादेशोऽजघसि
थ्नादौ नित्य एवेड् थल्यास्यादिति उपदेशोऽत्वउपदेशे किं कष्टे चकर्षिथ अत्वत इति किं भेत्ता बिभेदिथ तपरः किं
दारराधिथ तासौ किं जिघृक्षति जग्रहिथ नित्यानिटः किम् आनञ्जिथ इति भाष्यं चकमिथ इत्यपि प्रत्युदाहरणं तुक्रमादिति नियमेनात्वेन परत्वात्तासाविड्भावेऽपि परत्वेपरे
नत्वात्तत्र तासि भावस्य तासवदित्येव सिद्धे नियमोऽयमित्याह क्रादीनां देवेति। न च कृरंते विकल्पेन निषेधार्थमिदमिति वाच्यं अचस्तास्वदिति सामान्यसूत्रेण एतेन भारद्वा
जातिरिक्ते एवं कृते निषेधस्यैवांगीकारेण स्मृत्यंतरानुसंधानद्वारा विकल्पस्य वक्तुमशक्यत्वात् तत्रादिषु परत्वान्नित्यत्वाच्च गुणेऽरपरत्वे कृते तत्त्वाभावे षुपदेशग्रहण
स्य तथा सूत्रविभागेऽप्य वलास्वदित्यत्रैव तत्कारणेन प्राप्तिनियमफलितार्थमाह तेनान्यस्येति अत्रापि भारद्वाजस्येति संबध्यते अन्यस्येत्यस्य अकारान्तभिन्नस्य तासौ
नित्यानिट उपदेशेऽजन्तस्याल्वतश्चेत्यर्थः एतेन ययियेत्यादावजन्तसन्निपातेन जातस्य सन्निपातपरिभाषया आलोपनिमित्तत्वस्यादित्यपास्तं उपदेशे इत्युक्ते लदाह् अ
जंतरत्यादि अस्योपदेशे रसादिः ईदृक्तासौ नित्यानिट् ननु सृज दृशोः वां थलि भारद्वाजनियमादिट् स्यात् क्रादिसूत्रस्थस्वाद्ग्रहणेन तु येन नाप्राप्तिन्यायेन क्रादिनि
यमप्रापितस्यैव बाधो वित्यादित्याशयेनाह न चेति समाधत्ते योग इति अयं भावः थल्यनिटो नित्यमित्यस्यानुवृत्त्या तस्य रसंबंधवान्यर एन निषेधः स भारद्वाजमते क्रा
दितस्यैवेति नियमेन क्रादिनियमस्य नायं निषेध इति एतेन भारद्वाजनियमो येन नाप्राप्तिन्यायेन अचस्तास्वदित्यस्यैव बाधक इति जघनिथेत्यादाविट् न स्यादित्यपास्तं प्र
नितं चेदमत्रैव सूत्रे भाष्ये किं च पुरस्तात्प्रतिषेधकांडारंभसामर्थ्यादपि स्वादिनिषेधेनानंतरस्यापि भारद्वाजनियमस्य बाध इति नेटुश्रीत्यत्र वसेरजादित्यत्र भाष्ये स्पष्टं
सिषिवृह्निः वृह्निश्रुत्योपस्थितमिक इति अंगस्य समानाधिकरणं विशेषणमित्याह इगंतांगस्येति तत्फलं त्वकोषीदित्यादौ व्यंजनस्य स्थानाभावान्न चेटीति निषेधः न तु हलं
तस्यैवानुवृत्तहि विषये परत्वाद्धलन्तलक्षणा स्यादृद्धेर्बाधेनानयायेन नाप्राप्तिन्यायाभावेनास्यास्तेन निषेधेनाबाधात् अवसरन्यायस्तु नास्यैव नांतः पादमिति पाठे

नि·
शु·शे·
११.

पिएङोः ती॰स्यनुवर्त्यएङोः तियद्यत्ताप्नोति तस्यनिषेध इत्यर्थस्यनोत इतिसूत्रेभाष्येउक्तत्वेनफलाभावात् कूजिनेतिअर्थेक्यादितिभावः हम नत्वाणइडादौकिं अघा धातरूप
तुरितिइकारोत्रह्रस्वः हिलेकृतेएरनेकाचइतियण् सवर्णदीर्घयोः प्राप्तयोर्वार्णादांगमितिपरिभाषयायणितिबोध्यं केचित्तुन्यारभ्योदाहरंतीत्यंतमहचिग्रस्तमितिकेचि
ताकुडिवैकस्यमविवेकः तुडातोडनं दारणं हिंसनं चक्लयोश्चेति अत्रेकोदुःस्पृष्टः सच शिक्षादौप्रसिद्धः सिद्धसिचारको यल् हलंताच्चेति असंयोगादित्वतः किदि
तिचानुवर्त्तते आत्मनेपदेष्विति किम् अद्राक्षीत् अत्रहि किलेः स्यात् अर्थभेदादितिपूर्वोद्दिष्टर्थस्यार्थ इतिभावः तृफलगुणप्राप्ते नभाविता कारवत्वाद्धि रूपादेशादि
त्वादेकहल्मध्यस्थत्वाभावाच्च यथा यथमप्राप्तेविधिरयं तहीजं त्विति पूर्वसवर्णप्रवृत्तिषत्वाप्रवृत्त्योर्वीजं त्विस्यर्थः अर्थविशेषानिर्देशादाह स्वार्थ इतिधातोरेकाचइ
त्यातो धातोरित्यधिकारादस्यार्द्धधातुकत्वं आयोः कारांतः तस्य त्वं तु गोपायतमित्यादौ गोपाये त्यस्यधातुस्वरेणांतोदात्तत्वे प्रवकारे णैकादेशस्याप्यंतोदात्तत्वे तमित्यस्यानु
पदेशत्वात् लसार्वधातुकत्वेनानुदात्तस्योदात्तादनुदात्तस्येति स्वरितत्वं।। सनाद्यंता।। संज्ञाविधौ प्रत्ययग्रहणे न इदं तद्ग्रहणं निषेधार्थं तद्ग्रहणं यस्मात्सविहितस्तदादेरित्यस्य
लुप्रवर्त्तनएवतेन दैवदत्तश्चिकीर्षतीत्यादौ देवदत्तादेः समुदायस्य न।। एतत्साध्यधातुसंज्ञकघटकानां सूत्रादीनां समुदायानां च क्रियावाचकत्वं तु स्वभावाद्बोध्यं स्पष्टं चे
दं सुप आत्मनइति सूत्रे नमोवरिव इति सूत्रे च भाष्ये विवक्षायामिति विषयसप्तमी तिभावः परसप्तमीत्वे हि आर्द्धधातुकोपदेशकाले यङकारांतमिति णोपायिनेत्यत्रलोपान
स्यात् गोपायेति च न सिध्येत् पूर्वं क्ति न एवापत्ते कास्प्रत्ययांतेभ्यश्चेति धातुभ्य इति शेषः सूत्रेप्रत्ययग्रहणमपनीयेति एतच्च हरदत्तग्रंथेस्पष्टं परे तु कासीतिसप्तम्यंतं तद
घटितं सूत्रे इत्यर्थः भाष्ये कासग्रहणे च कास उपसंख्यानमित्युपक्रमस्वारस्यात् अतएव भाष्ये तन्न कर्त्तव्यमिति नोक्तं अतएवाचार्यर्वगल्भेति वार्त्तिके धातुभिरेवसिद्धि
मात्रं क्या वगल्भांचक्रे इत्यादौ कास्प्रत्ययादाम मंत्रे इत्याम्यथा स्यादित्युक्तं भाष्ये तत्राकारस्यानुबंधत्वे नैकाच्त्वात् न च भीतपूर्विकानेकाच्त्वं गृहीत्वा तत्त्वा मितिवाच्यं आ
मर्थवार्त्तिकमित्युत्तरं मपर आह सर्वप्रातिपदिकेभ्यः क्विब्वा वक्तव्यः एवं तर्त्खवगल्भाद्यनुक्रमणं न कार्यं कार्यं चानुबंधानासंक्ष्यामीति अवगल्भक्लीवहोडेति भाष्योक्त्या
तदर्थं तस्य चारि तार्थे न भीतपूर्विकानेकाच् आमित्यर्थे मानाभावात् अनुबंधासंगश्च सर्वप्रातिपदिकेभ्य इत्यनेन क्विपि अवगल्भतीत्यादीनां वारणं यावश्यकः ह्र
स्वस्मिन्नतेनैभ्यः क्विपयेन नाप्राप्तिन्यायेनास्यतद्बाधकत्वात् सर्वग्रहणं त्ववगल्भेति वार्त्तिकापेक्षयाबहुविषयत्वबोधनायेत्याहुः अत्रेदं बोध्यं प्रत्ययग्रहणापनयवा

रिन्नोपि कान्यः अचारन्वि पोनभिधानमावश्यकं अन्यथाऽ इं म प्रत्याख्यानयोः फलभेदः स्यात् इति हरदत्तो दाहृतानि सखोच काविंस्यादीनि चिंत्यान्येवेति अतो लोपः आईधा
तुके किं वृक्षस्य चुन्धाति पसेस प्रत्यय उपदेशेऽ कारांतः चुण चूर्णे अस्य दीर्घपाठः प्रक्रियालाघवार्थः अन्ये तु ह्रस्वमेव पठंति मृता विन्येवेति यद्यपि पृथक् निर्देशो यथा
संख्यनिवृत्त्यर्थ इत्यपि वक्तुं शक्यं तथापि संप्रदायानुरोधादेवमुक्तं स्तुतावनुबंधस्येति आईधातुकविषये आयादीनां वैकल्पिकत्वेन तदभावे चारितार्थ्यमिति भावः च
ह्रसेइति अनुनासिकस्येति दीर्घस्तु न प्रक्रियासाहचर्यं णितिङ् भिन्नस्यैव स्त्रलादेर्ग्रहणात् कामयत इति अनिग्लक्षणत्वान्नोपधावृद्धिनिषेधः अयामं लोपापवाद इति णि
लोपापवाद इत्यर्थः वस्तुतोय द — नुवादोयं तदनुवादवलाच्चाणिलोपवाधः ध्वनितं चेदं मन्कनसूत्रे भाष्ये इति उणादय इति सूत्रे निरूपयिष्यामः ननु परत्वादियङादि
षु णिलोपो न स्यादत आह एव स्त्रोपाविति णिजंतमिति णि तु दुर्लभोऽ प्रत्ययादित्वसनेन वाधात् एवं शीप्सतीत्यप्यवकाशः इउ भाविडको सूर्लिति किल्वात् यत्तु यदि पुनः
प्रसंग आश्रीयते स्थानिवद्भावेन च णित्वं तदा णिलोपांशो वार्त्तिकमनावश्यकं अत एव सम प्रमशोव एयं ता एत्लोप रत्वा स्मिणि चिवृद्धिः वृद्धौ कृतायां लोप प्रसन्नाम्लोप्यं गमिति
भाष्य उक्तमिति तन्न श्रुणिनिप्रत्याहारग्रहणसामर्थ्येन कृतायां वृद्धौ लोप इत्यर्थस्य णौ चङीति सूत्रभाष्येऽ वीवददित्युपपन्नम्येव सिद्धांतितत्वेन एयत्त्रोपाविति पूर्व
विप्रतिषेधपरभाष्यविरोधेन च परत्वाद्वृद्धिरित्यत्रत्य भाष्यस्य एकदेश्युक्तित्वात् किंच वृद्धौ णिलोपापि दुर्लभः णेरभावात् न च स्थानिवद्भाकः वृद्धिस्थानीकारस्याल्
विधर्मणित्वाश्रयलोपस्याल्विधित्वेन न तत्र स्थानिवत्वाप्रवृत्तेः स्पष्टाचेयं रीतिर्भोभगो इति सूत्रे भाष्ये एयं ता साववीवददित्यादावित्वदीर्घलोपधाह्रस्वत्वसिद्धये णौ णिच्यु
पसंख्यानमेव कार्यं सन्वत्सूत्रे णौ णि च्युपसंख्यानं मिमिवचनाभावेन सिध्यंति णि वाव्यवहि तत्वाद ग्लोपित्वाच्चेत्येव सिद्धं त्युक्तिरग्रिमभाष्ये त्वेक देश्युक्तिः एवमतोलो
प इति सूत्रे एयल्लोपाविति पूर्वविप्रतिषेधमुक्त्वा नवक्तव्यः एषु विधिषु कृतेषु स्थानिवद्भावाणित्वेन लोपो भविष्यति नैवं शक्यं इयङादेशेऽन्त्यलोपापत्तेरित्युक्तं भाष्ये तदप्ये
कदेश्युक्तिरेव भोभगो इति सूत्रस्थन्यायसिद्धभाष्यविरोधात् किंच णेरनिटीत्यस्य एयंतांगस्य निर्दिश्यमानो योन्त्यस्तस्य लोप इत्यर्थः इति एकाचोद्वे इति सूत्रभाष्याल्लभ्य
ते तत्र हि स्थाने द्विर्वचने आटिटदित्यादौ णिलोपो न स्यादित्यापादितं एवं चेयङः अंत्यस्य निर्दिश्यमानधर्मावच्छिन्नत्वाभावात्समुदायस्य चांत्यालरूपत्वाभा
वाल्लोपाप्राप्त्यातस्यैकदेश्युक्तित्वावश्यकत्वात् वचनसामर्थ्यादिति परत्वाद्गुणादीनां णिलोपबाधकत्वे इडादावपि गुणेन बाधप्रसिद्धिरिति भाक्तेन कारणेति सिद्धिः

ति॰
पू॰ पू॰
९२

के त्वेवमनेकवर्णव्यवधानात्सामर्थ्येन तत्तद्बाधकत्वं नापेक्ष्यते पूर्वविप्रतिषेधकल्पकतायाः एवानिटीत्यस्यौचित्यमित्याहुः । णौ चङीति णिना अङ्गस्याव्यवहितपर्वं चङ
इति सामर्थ्याद्व्यवहितपरत्वं लब्धमिति तमाह चङ्परे णाविति णाविति किं चङ्परोपधाया ह्रस्वभाविन्या असंभवेन सूत्रवैयर्थ्यापत्तेः न च लृइ अरीति ऋकारस्य संभवः तत्रा
प्यन्तरंगत्वाद्वृद्ध्या वा देशयोः कृतयोस्तदसंभवात् न च ह्रस्वो वृद्धेरपवादः ह्रस्वप्रवृत्तिकाले वृद्धेर्निष्पन्नत्वेन तस्य तद्बाधकत्वासंभवात् परसंस्कारपक्षेऽपि निमित्तनिमित्तिभा
वापन्नशास्त्रकार्याणां क्रमेणैव ज्ञानेन धातुसंज्ञातिङुत्पत्तिचङुत्पत्तिसमये एव वृद्ध्यादेर्निष्पन्नत्वज्ञानेन चङुत्तरकालिकह्रस्वेन तद्बाधायोगात् न च सामर्थ्येन चङि ग
म्यमानस्य तस्मिन्नुपधाया ऋत्यर्थो भविष्यतीति वाच्यं तदपेक्षया सकलबोधकवाक्यसमत्वेन णाविति अस्यैव लघुत्वात् चङि किं कारयति उपधाया इति किं अचकांक्षत् प
त्यपस्यां मा भूत् अस्विना कोसल्या तण्णाविति संगस्यैव विशेषणं नाचरति बोध्यं तदुक्तं पूर्वो इति सूत्रे कैयटेन नित्यत्वेपि उपाया नामस्य अस्या अत्र यणीयो तरंगवहिरंगभावरह्वि
निमित्तः शब्दो वा व्यपदेशः तदन्वाख्यानेपीत्यर्थः अवयवेति अन्यथान्वाख्यानविलय इति तदर्थः बहुव्रीहिरिति परग्रहणसामर्थ्यादिति भावः तद्धि शेष्यं चणिर
वनलघु अङ्ग स्येत्यावर्त्य अङ्गसंज्ञानिमित्तमिति व्याख्यानात् एव श्रीप्रभृतीनां नसन्वत्वं तदाह्यङ्गसंज्ञेत्यादि तत्परं यल्लघ्विति ॥ सन्निधानाच्चङ्परे णाविति लघो
रेव विशेषणमिति भावः अत एवेह कस्मान्न भवति अजजागरत् लघुनि चङ्परे इत्युच्यते व्यवहितं चात्र लघु चङ्परं इति भाष्यं संगच्छते चङ्परे णौ यल्लघुतर
भ्यासस्य व्यवहितमित्यर्थः एवं चाचचकासदित्यादौ नैव सन्वत्त्वं ओदिदृदित्यादौ नैव दीर्घत्वं ओर्णूनवदित्यत्र च भवत्येव सन्वत्त्वं अचिखदत् चिक्षणदित्यत्रा
स्मृदृत्वरेत्यमेनैव बाधनार्थेन संयोगव्यवधाने प्रवृत्तिज्ञापनान्न दोषः अङ्गस्येति अवयवषष्ठ्यर्थः असफलं नित्यं तत्परं लघु परोऽभ्यासस्यैव सिद्धेः माधवानुरोधे
ने तु मूलकृतानुक्तं तन्मते फलं त्वग्रे स्फुटं णाविति चङ्परे इत्यस्याहृत्तेरिति भावः अथ चेति चङ्परे इत्यस्याङ्ग विशेषणत्वे ङ्गत्वस्य प्रत्ययनिमित्तत्वे नैव णिरूपवि
शेष्यलाभ इति भावः अयं पक्षस्तु उक्तभाष्यविरुद्धः ओदिदृदित्यादौ दीर्घापत्तिश्चात्र पक्षे चङ्परे लोपदङ्गमींदिदितित दीर्घो भ्यासश्च ङमादायणिलोपस्यस्थानि
वद्भावेन णिमादाय वा लघुपर इति बोध्यं ननु मीमादीनां तु अभ्यासस्य लोपः प्राप्नोति अमीमपत् सिद्धं तु सन्निपातपरिभाषया अभ्यासरूपं दर्शयता दृश्यस्यैवात्राभिदेशेन तु का
र्यान्तरं च मीमादीनां सन्यभ्यासरूपमस्ति लोपश्च नरूपमित्युक्तं कार्यगान्यत्वाद्वा सिद्धमिति भाष्ये उक्तं तत्र कैयटः मीमादीनामङ्गानामभ्यासलोपो विहितः यत्व

भ्यासे। एवं तानां अन्येनु चङ्परे णौ यदंगं तदभ्यासस्य सन्वत्त्वं णौ मीमादीन्येवांगानि तस्मादंगान्यत्वादित्यस्यायमर्थः येषामंगानामच इस्मरत्वादिर्विधीयते ता
भ्यासाच्चग्रहणं लोपोन स्विसादिरहितानाममीमपरिस्मादौ धातोः सन्वत्त्वाभावादभ्यासस्यैवत्वेनेन सन्वत्त्वमिति एवं च कैयटेनाप्यक्षंयस्य उक्तं इति चेन्न अंगस्याभ्या
सूत्रत्वत्रांगांकिं निरूपितं यास्वं चङ्निरूपितं णौनिरूपितं वा तत्रोपस्थितत्वात्प्राधान्याच्च णौ निरूपितमेव गृह्यते इत्येवं परतया पूर्वभाष्याविरोधेन तस्य योज
यितुं शक्यत्वात् अन्यथा एकस्यैव प्रयोगस्य सूत्रव्याख्यानभेदेन साधुत्वासाधुत्वयोरापत्तौ न वेति सूत्रस्थभाष्यविरोधश्चेति दिक् सन्यतः सनः किंतु घु स्ततितपर
त्वं स्पष्टार्थं अभ्याससंबंध्यकारस्येत्यर्थः इति दीर्घो कित इति सूत्रे भाष्ये स्पष्टं अत एव चिच्छादयिषतीत्यादावंतरंगत्वात्तु कोपि इत्वसिद्धिः सन्यतोभ्यासस्येत्यर्थः
द्धिः प्रयोगत्वाद्द्विर्वचनस्याधीषिषतीत्यादौ सन्यरत्वमभ्यासस्य यङ्लोपस्यस्यानिवत्वात्यापचिषते इत्यादौ न दोषः ध्वनितं चेदं स्तौतिण्योरिति सूत्रे भाष्ये
तत्र हि अभ्यासादित्यस्य सनियोभ्यासस्तस्माद्याप्राप्तिस्तस्या नियमो यथा स्यात् यङि योभ्यासस्तस्माद्याप्राप्तिस्तत्र नियमो मा भूत् सोषुप्यते सनूसोषुपिषते
अथवाभ्यासाद्याप्राप्तिस्तस्या नियमो यथा स्यात् धातोश्च या प्राप्तिस्तस्याश्च नियमो मा भूत् अधीषिषतीति प्रयोजनमुक्तं संज्ञायाः कार्यितत्वस्य हि पूर्वोभ्यास
इत्यस्य एकाच इत्यनुवृत्तसहितस्य कार्यदेशत्वेन संनिधानं अंगं च तत्र संनिहितं तत्रांगस्येति कर्मणि षष्ठी कारकविभक्तेर्बलीयस्त्वात् एकाच इति च तत्समानाधिकर
णं एवं चांगसंज्ञकैकाच कर्मके ये द्वे उच्चारणे तयोः पूर्वोभ्याससंज्ञस्तस्य च सन्वदित्यर्थः इत्येकाह्वेव प्रवृत्तिरेतदर्थमेवांगस्येत्यस्यावृत्तिरिति भावः इदं चा
अजागरदित्यादौ सन्वद्भावापादानपरभाष्यविरुद्धमित्यरुचेराह वस्तुत इत्यादि अत्र पक्षे अंगस्येत्युपरंजकतया कथंचिन्नेयं ऊर्णोतेर्दीर्घ इति स्यादित्यपरु
ध्यते सन्वत्त्वमत्र नोपयुज्यते अर्थापयताविति अर्थं अल्पाद्वा णिचि प्रकृतेरापुगिति भावः वस्तुत आपुगागम इति भाष्योक्तपक्षे नैरणफलाभेदायलुङि ।
अस्यानभिधानमेवोचितं मूलं तु कृत्वाचिंतास्याये नेति दिक् नस्यादिति । नस्यादेवेत्यर्थः व्यवस्थयेति अथवेत्याद्यर्वाचीनोक्तपक्षेणेत्यर्थः कैयटेनैवेति ए
तन्निष्कर्षश्चोक्तः अगितामिति कमिप्रभृतीनामित्यर्थः ये विभाषा जनसनेति सूत्रे जन्ग्रहणे न यथा जुहोत्यादिदिवाद्योर्ग्रहणं तथा सन्ग्रहणे नापि सनोतेः स
नोतेश्च ग्रहणं अत एव सनोतेरनुनासिकलोपादात्वं विप्रतिषेधेनेति वार्तिकव्याख्यावसरे आत्वे सनोतेर्ग्रहणस्य कोवकाशः सनि च ये विभाषा च आत्वस्या

ति॰ भा॰ वकाशोऽन्येजनादयरत्युक्तं भाष्ये अन्यथाऽन्ययोर्जनखनोर्ईयारेव सत्वेनजनादयरतिवहुवचनासंगतिः स्यात् ममत्वेनं सनमादायतदुपपत्तिः स्यादेवएते
वृ॰ भाष्ये सनोनेरित्युक्तयोः स्यननत्रग्रहणमित्यपास्तंनचाङोयीतिवन्निर्दैशकार्यः कारोच्चारणेनयगादावेवास्यप्रवृत्तिर्नतुयासुडादाविति वाच्यं अजाति आशामेजस्या
९२ ञामित्यत्रयत्वियेविभाषेत्यात्वंप्रामोतीत्यचः परस्मिन्निति सूत्रस्थभाष्यविरोधापत्तेः तस्मात्कारोत्रादृष्टार्थएवेत्का मत्विति उक्तामेसग्रहेलुकिरीर्घीभवत्ये
वकमरतिसूत्रेनुवृत्त्यांगस्यपरस्मैपदपरशिन्निरूपितस्यैवग्रहणेनहेलुक्वापितन्निरूपितांगस्यकार्याभावेननलुमतेत्यस्याप्रवृत्तेः प्रत्यासत्तिन्यायेनलुमतालु
तेप्रत्ययेपरंगंतस्यकार्यएवनिषेधस्तेः स्लुक्रूमोरश्लुक्रमोरितिप्रथमार्थेषष्ठी अनात्मनेपरनिमित्तरतिप्रसज्यप्रतिषेधः स्लुक्रमीयत्रात्मनेपरमिमित्तेनभव
तीत्यत्रप्रत्यासत्त्यातांभ्यांपरस्याईधातुकस्येडित्यर्थः उदात्तत्वादिटिसिद्धेनियमोयंतदाह अत्रैवेतिप्रलुतरत्यादौश्रुकः कित्वीतिनिषेधएवपुरस्तात्प्रतिषेधकां
डारंमसामर्थ्यान्निमित्तत्वेचात्रफलोपहितंनयोग्यतामात्रंतेनप्रस्लवितेत्यादाविटभवत्येवस्लुक्रमोरनात्मनेपदेरतितुमसूत्रितंतत्रहिपरस्मैपदेरडित्यर्थैवि
क्रमिषिष्यतीत्यसिद्धिः स्येनव्यवधानात् आत्मनेपदेनेडित्यर्थेतुप्रचिक्रंसिष्यतेरत्यसिद्धिरतोनिमित्तपदोपादानमितिदिक् ततः परेषामितियद्यपीटः षीध्वम
वयववत्वात्ततः परत्वंदुरुपपादंतथापिश्रुतिकृतानंतर्यमात्रेणसामर्थ्याच्छास्त्रप्रवृत्तिर्बोध्या अन्येतुरटः परस्येषीधस्येत्यर्थः षीकारव्यवधानेतुसामर्थ्यात्प्रवृत्तिरि
त्याहुः अत्रांगादितिनिवृत्तं अतएवोपदिदीयिध्वेरत्यत्रविकल्पः अन्यथायुटाव्यादित्वात्स्यात् रयंचप्राप्तविभाषालुङ्यपिधिचैतिसलोपेरवर्णान्तमंगंध्वमिजातमि
तीणः षीध्वमित्यस्यप्राप्तेः परस्योपसर्गस्येतिश्रुतत्वादयतावित्युपसर्गविशेषणं अतएवनिलयतेप्लायतेपलायनेरत्यादौसर्वत्रलत्वसिद्धिः रेफविशेषणत्वेतुप्लायतेनिल
यतरत्यत्रश्रुतिकृताव्यवधानएवस्यादितिभावः प्लायनरतिअचः परस्मिन्नितिस्थानिवत्वाद्व्यवर्गैरतिस्पष्टंभाष्येरलोपः सूत्रमितिसूत्रस्यगृहीतेतुनअनभिधानादितिभि
प्रटः कथमुदयतीतिशानचस्यादितिप्रश्नः अनित्यमितिरदंभाष्येनदृश्यतेरटकिरेत्यत्रप्रश्नेषाभाववादिनांमतेत्वयंप्रयोगोऽसाधुरेवेतिबोध्यंउदः लेटद्नंपुनः
प्रसंगेतिद्वित्वेकृतेपिसावकाशरत्यभिमानः लिठीतिविषयसप्तमीतिपरेरीपजनवुधेतिवुध्यतेरेवग्रहणंनस्येवात्मनेपदित्वात् चिणोलुक् अकारितरामित्या ९३
देशरपीनलुक् प्रतिलक्ष्यंलक्षणभेदेनपूर्वचिणोलुक् उत्तरचिणोलुक्वासिद्धत्वात्अतोचांनाक्वचिद्भाष्येतोर्लीनस्येतिपाठोदृश्यतेरतिकश्चित् आगंतुनाका

गोल्ल निर्देशः संकोचरति। नेत्रसंकोचरहस्यार्थः तत्रैव पञ्चरप्रयोगान् गतिचातुर्यमश्वीयं वा ध्वंछ्यगतिः कपटगतिः हूर्छनं कौटिल्यं सद्धिरेणिनमित्तेति। संल्लिटेरितिस
तस्मी अभ्यासविशेषणं चेति भावः संल्लिट्परोऽयोऽभ्यास इति वक्तुमुचितं उप्रत्ययश्चेति॥ सन्नियोगशिष्टत्वेनोभयोपदेशाकाल्पस्येकत्वादीदू धातुकोपदेशका
ले ईत्तत्वादतो लोप इति भावः तस्य स्थानिवद्भावादिति एतेन वस्य लोप एव विधीयतामित्यपास्तं धिन्वतीत्यादौ वस्य स्थानिवत्त्वे नाईदू धातुकत्वादिण्न उकार इत्यपा
ईदू धातुकत्वस्याल्धर्मत्वेनानल्विधाविति निषेधात् स्पष्टा चेयं रीतिर्भीमगो इति सूत्रे भाष्ये अचः परस्मिन्निति सूत्रे भाष्ये वभ्रुपस्य स्थानिवत्त्वं पञ्चमीसमासेन परि
त्हनमेकदेशिनेति वोध्यं मस्य योकार इति असंयोगपूर्वादित्यनेनावध्यवधिमतोः साजात्यादुकार एव विशेष्य इति भावः असंयोगपूर्वो य उकारस्तदन्तो यः प्रत्यय
इति वक्तुमुचितं अमवीरमावीदिति यत्विको गुणेति सूत्रे भाष्ये नोत्वेति सूत्रे वकारप्रश्लेषमुक्त्वा मा भवानवीन्मवीदित्यत्रेषमाशीकस्यं तेन्यत्राविमव्योर्नेत्यु
क्तेरत्र नित्यनिषेध एव लभ्यत इति तन्मध्ये पवादन्यायेनास्य निषेधस्यातोल्लेसेतन्मात्रबाधकत्वात् जागर्तौ तुल्यस्यानुसारा द्वाष्यसामान्यचिंताया एवांगीका
रात् हमयांतादिविषये तु सामर्थ्याद्धि कल्पस्यैव निषेधात् अत एव सूत्रभाष्ययोर्न विरोधः इक इति सूत्रस्थभाष्यं पूर्वोक्तयुक्तिरिति परे इति दिक् दीक्ष॥ मोडया
दयः पंचाद्यर्थाः ईषगतिः॥ दानेष्विति पाठान्तरं परिभाषणमनृतभाषणं आघ इति अत एव व हद्मभोंपघातिनीत्यादि संगच्छते गादेतिलोपेष्टत्वासिद्धत्वं न लोपविधानसा
मर्थ्यात् झलइगु अनिटश्चेति। धातुविशेषणत्वे तु गुह ऊपस्य सेट्त्वाद् घुसदित्यादौ क्तो न स्यात् पाक्षिके डभावमादाय निष्ठात्वे तु नित्यमेव स्यात् न ह्यारम्भवादि सूत्र
मतेऽस्मेनिट् इति विशेषणात् देवकस्य नादितरत्तीट् न च गुहादेर्ब्रूवस्थायां गुणः स्यात् इगुपधत्वाभावे पि कस्य विधानं भूतपूर्वगत्या चरितार्थमिति वाच्यं कस्य कित्व
सामर्थ्यान्न दप्रवृत्तः न च ककाराभावे तृणादिभ्यश्चातुरर्थिके सति तृणसावित्सादौ कस्यासी विलोपापत्तिः तत्रोत्तरसूत्रस्थात्मनेपदग्रहणापकर्षणेन दोषाभावादाहाजादे
तङीति अत एव ककारे कृतेपि दृशोः क्तो गादृष्ट्वावित्यादौ न लोपः उत्तरसूत्रे ज्यादेशकस्यैव ग्रहणेनार्थाधिकारानुरोधादत्र तस्यैव ग्रहणेन वर्क्तीति निष्फलं नि
मूलं चेत्यस्य अंघृष्टातामिति लोपाभावे आनोडिः तइति स्यादिति भावः प्रतिज्ञानमिति तच्छब्देन स्वाभिप्रायप्रकाशनं अपपाठत्वे हेतुरुवृत्तेत्यादि सूत्रेणमाद
रत्नतोऽन्वस्यमूर्खेणमिति तदर्थः नीषसर् इषेणकारेस्यन्यपान्नतिषेध इति वार्तिकादत्रैव ग्रहणेनेछ्तीत्यासोरेवग्रहणं अत्र सूत्रे धातुपाठे चेषु इत्यादि त्या

सि॰भा॰ ष्ठेनार्थः नाट्टीरिति ननु नादेरित्यर्थो दुर्लभः वलादेरित्यादिग्रहणसामर्थ्येन विशेष्यविशेषणयोरुभयोरपि सममुच्चारणे एव यस्मिन्विधिरित्यस्य प्रवृत्तेः अत एव ङसि सुडित्या

श॰शे॰ दौ सादेः पदस्येति नार्थ इति चेन्न सूत्रत्वात् वलादेरित्यनुवृत्तविशेषणीभूतवलादार्थस्य तकारेण विशेषणात्तकाररूपवलादेरिति वा व्याख्येयः एवं सेसिचीत्यादावपि बोध्यं

२४ समनीतु प्रथमार्थ एवेत्यलं उपविद इत्यत्र प्रातिविभाषा प्रत्ययान्ताधात्वंतराणीति नेवेति सूत्रे भाष्ये स्पष्टं कैयटादय इति श्लिष आलिंगन इति सूत्रस्थारवित्विति बोध्यम्।

अत्रैव पाठे इति न च धातुसंज्ञार्थः पाठः घुतान्पूर्वपाठे नैव सिद्धेः अत्र पाठस्य ज्ञापकत्वात् एतेनायं घुतान्पूर्वपाठः पुषादिसूत्रे घसादीति पाठस्य लृदित्वं च न कार्यमि

त्यपास्तं पाठस्याङ्संपादकतया चारितार्थ्येन तत्रापि परस्मैपदे प्रयोगानापत्तेः लृदित्करणमिति यद्यपि घस्लादेशेनैवाघसदिति सिद्धं तथाप्यघात्सीदिति प्रयोगवार

णार्थमस्य लृदित्त्वं बोध्यं आशिषीति इदमुपलक्षणं यङ्क्लोर्विषये च प्रयोगाभावस्य परे तु लिट्यन्यतरस्यामित्येतत्सामर्थ्याल्लिटि मा त्नु प्रयोगोन्यत्र न भवत्येव ज

घस्येति रूपवारणेन तत्सार्थकं जघस्येत्यस्य स्पष्टत्वे हि असार्वत्रिकत्वबोधनेपि न कथमपि सार्थकमत एवोपदेशेत्वत इति सूत्रे घसिः प्रतिषेधो वक्तव्यो जघसियेति वार्ति

कं नारब्धमित्यानि रूपभाषावयवभाष्ये अन्यथाः स्य प्रतिषेधार्थवार्तिकं स्यादिति तत्प्रत्याख्यानासंगतिः अद्यन्त्ययेव स्लादेशाविधानं तदन्ते तद्रूपवारणार्थमि

त्याहुः अद्यविदन्नाथीदिति यद्यपि इको गुणेति सूत्रे तोत्वे तत्र वकारप्रश्लेषस्त्वात् फलं तथापि पूर्वपक्षत्वात्तस्य सिद्धांते प्रश्लेषमानाभावेनात्र विभाषा वृद्धिरिति भावः म

हन्पूजायां अयं दाने इत्यादि श्वानिनिस सूत्रे भाष्यं घुतिस्वाप्योः प्रत्यासत्त्यांगाभ्यासयोरेकनिमित्तत्वे एवास्य प्रवृत्त्या द्योतकीयिषतीन्याद्यौ संप्रसारणाभावः व्यदिद्युतदित्यत्र धु

च्चर्श्चेति समाहारद्वंद्वगर्भद्वंद्वाश्रयणेन न दोषः इकारेणोपस्थित घुतेरेवेकाराणं तस्य ग्रहणं इकारश्चेत्पि च एवं [illegible] प्रसाहचर्यादिति [illegible] नुसारिणः अत्र मानाभावात् घुतेर्वि

ताच्छिडि संप्रसारणं न भवत्येवेति भाष्यानुसारिणः स्वापिर्नाम धातुर्णिजन्तः साहचर्यात् न चाभ्यासस्य प्रकृतिभूत घुतिस्वाप्योः प्रत्यासत्त्याभ्यासनिमित्त प्रत्यये नयोः संप्रसारण

मित्यर्थे नोक्तदोषप्राप्तिः स्पष्टा चेयं रीतिर्हः संप्रसारणमिति सूत्रे भाष्ये इत्यंगाधिकारपाठो व्यर्थ इति वाच्यं अभ्यासस्य संप्रसारणलाभानापत्तेः अभ्यासस्येत्यनुवृत्त्यर्थे तत्रपाठस्य

अदोषत्व वनिकान्यायाच्च एतेनाभ्यासाक्षिप्तप्रत्ययस्य प्रकृत्याकांक्षायामुपात्तधातोरेव ग्रहणे नाभ्यासनिमित्तप्रत्यय प्रकृतिभूत घुतेः संप्रसारणमित्यर्थेन नांगाधिकारे एतन्सू

त्र पाठे फलमिति परास्तं किं चाभ्यासस्योत्पत्तौ प्रत्ययापेक्षत्वेपि ज्ञानेन तदपेक्षत्वाभावेन शास्त्रेन तदाक्षेपे मानाभावात् त एवाभिषिषेचयिषतीत्यत्रस्याद् [illegible] इति नियतत्वं भवत्येवे

रादिकं धुञ्जो लुङि वद्वचचवा दावर्थो वगतिः यक्षार्थे तु जनितिसमीतरा हत्युत्तादिभ्य इति वञ्चः स्यसा प्रतिप्रसवविधिरयं अन्तरङ्गमपीति सकारादि विशेषापेक्षत्वादन्य
नैमित्तिकत्वाभावं निमित्तत्वाच्च निषेधस्य वहिरङ्गत्वमित्यभिमानः। चतुर्ग्रहणसामर्थ्यादिति तेन हि सर्वेषु प्रत्येकं निषेधस्य [illegible] परो ऽप्यते अन्य [illegible] नवञ्च इत्येतावतैव सिद्धौ
तद्वैयर्थ्यं स्पष्टमेव रूपिण्या वृत्तिस्तु न फलं तासि चेति चकारेण साधार्द्धधातुकेनस्यापि निषेधसत्वात् तत्करणेन घुत्तादेरि परस्मै [illegible] बोधयितुं [illegible] अतएव वञ्चः स्यसनोरि
ति सूत्रं [illegible] इति वचनं तु येन नाप्राप्तिन्यायेनार्द्धधातुकलक्षणे ड्वाधेन चरितार्थं रूपे तु तासि चेति सूत्रारंभसामर्थ्या [illegible] विकल्पानेति भावः वञ्चुनश्च तुभ्य इति ण्य
[illegible] निषेधाश्च बलीयांस इति न्यायेनान्तरङ्गाणामपि बाधसिद्धेः वृत्तादिभ्यो यद्यप्यासंतत्तन्नेति वचनं व्यक्तया सर्वे [illegible] अतएव [illegible] इत्यस्य [illegible] त्याख्यानं भाष्योक्तं संग
च्छते किं च वहिर्भूतत्वान्निमित्तकस्येव वहिरङ्गत्वमिति परत्वेनापि तद्वाधो नेत्यादिक उ इति [illegible] इति स्पष्टं चेदं [illegible] इत्यपि पदमित्यर्थः सूत्र
मिवन्ये आवृत्तिफलं वा क्वाभेदः वृद्धिरिति वृत्तेः कर्तरि क्विप् षषितश्चेति अतिदेशां फलं तु षिड्गिरादिभ्य इत्यङ् तत्र येऽन्यविकरणाः अनूद्यते तेषां [illegible] एव विकरणः
यन्वादिस्य एवानूद्यते स्वतन्त्रा वा पक्षे ने तेषां त्रा लेख कच तस्यैवेति एवं च विघटयतीत्यादे मित्वं न स्यादिति भावः नान्ये मित इति अनुवाद सामर्थ्येन तद्बाधकल्पनापेक्ष
यास्वातंत्र्यकल्पनस्यैवोचितत्वादिति भावः न च षित्वार्थमयं तु [illegible] अनुवादः तत्रैव घटिषित्विपठितुं युक्तत्वात् एवा सत्रं प्रयोजनं च एव [illegible] फलाभावाच्च हलादिः शे
षापवादः [illegible] हलादिः शेषापवाद इत्यर्थः [illegible] अभ्यासविकारे बाध्यबाधकभावाभावेनेदमसंगतमजीगणदित्यादौ हलादिः शेषेरित्व [illegible] प्रयोजन
भा [illegible] पस्थापित त्रिविकारग्रहणे [illegible] ग्रहणात् एवं च वसै वसंप्रसारणे [illegible] ति वाच्यम् [illegible] अभ्यासस्य त्रोभयेषां ग्रहणेन सामान्यत एवाभ्यासलोपाभ्यास
संप्रसारणविषये तन्न्यायाप्रवृत्तेर्लोपनेनादेशात् संप्रसारणं तदाश्रयं च वलवदिति तु उभयेषां ग्रहणेनैव [illegible] पत्यालित्यभ्यासस्येति सूत्रे भाष्य एव प्रत्याख्यातमिति
तदुपन्यासः [illegible] विरयुक्तमेवमित्यादिक मित्वसामर्थ्यादिति असंजातविरोधन्यायेनेति भावः। अस्तंसीति एयन्तात् [illegible] तत्राद्रस्य लुक् [illegible] जमिति [illegible]
एमुल् [illegible] समभिहारे द्वित्वे एतत्सर्वं दृष्टादित्यपि बोध्यं मित्वार्थ इति षित्स्याप्युपलक्षणं गुरोश्च हल इत्यप्रत्ययेनापि सिद्धेः षित्वफलाभाव इति कश्चित् मित्वार्थं आत्म
नेपदार्थश्चेति चेन षित्वमप्युपलक्ष्यम् निदित्याठ इदित्याठे तु [illegible] वन उत्तश्रान्तुवं घ इति [illegible] उकारेः कार उदात्त उच्चारणार्थः अनुवादत्वेलाघवेनेत्यय

वतिनोकु[illegible]र्तिभावः अन्नागमेऽन्यत्रपठितानांसतिसंभवेऽनुवादएवेति शृतंपाकेइतिसूत्रेभाष्यकैयटेच ध्वनितंतत्रहिश्राश्रप्योः शृभावोनिपात्यतेइतिभाष्यमुपादाय श्रा
श्रपकः [illegible]केइतिभ्वादौघटादिषुमित्वार्थं श्रापकइतिपठ्यतेइतिकैयटः अतएवभाष्येश्राश्रपिश्रापीनामितिनोक्तं प्रागेवेति त्वरतेरग्रहणस्यार्थः पित्वंत्रयोदशाना
मेवअनुदात्तेत्वंलभ्यतेषामंयस्त्वितिभावः परस्मै पदमितिनचैतदर्थंपाठस्यचारितार्थ्येनकथमर्थविशेषनियमलाभइतिवाच्यं घटादिषुपाठेनूतनअपूर्वकार्यस्या
प्यानयनस्यकर्त्तव्येनविजातीयार्थपाठेनचतस्यापिलाभात् एवंचमित्वंपरस्मैपदेवेष्टनएवेतिबोध्यं अहिडि अहीडीति चिण्णमुलोरितिदीर्घः एतदर्थमत्रह्रस्वएवनवि
कृष्टितः पक्षेह्रस्वविकल्पेनैवसिद्धेचिण्णमुलोरित्यत्रदीर्घग्रहणंव्यर्थमित्याशंक्यग्लामेर्थ्य[illegible]ण्णिचिञ्शमीत्यादौणिलोपस्यस्थानिवद्भावाद्ध्रस्वोनस्यात् दी
र्घग्रहणेतुदीर्घस्यस्थानिवत्त्वनिषेधान्नदोषइति कमेर्णिङ् सूत्रेभाष्येउक्तं तदनुपपन्नंप्रकृतोदाहरणार्थंदीर्घविधानस्यावश्यकत्वेनशंकोत्तरयोरुभयोरपि
निर्दलत्वापत्तेः तस्मादस्यात्रासांप्रदायिकःपाठः कैयटादयस्तुचिन्त्याएव ऊकालइतिसूत्रेभाष्येप्येतद्दुनितमितिभाष्यप्रदीपयोर्निरूपितं द्विर्वचनादीनिन
वन्स्थानिवद्यलोपस्वरवर्जमितिनपठितंतत्सूत्रभाष्येवर्ज्येकोटौदीर्घोप्युपलक्षणीयः किंचयदापिपाठस्तदापिउत्सृष्टानुबंधेत्याद्यसंगतं अपूर्वत्वेबाधकाभावात्
अर्थविशेषस्यज्ञापिनमानं किंचसर्वेषामनेकार्थत्वेनमानं। एवंचोपात्तार्थएवमित्वमितितत्रफलाभावएवमन्यत्राप्यनेकार्थत्वनिर्णयकाभावे किंचभ्वेधस्पर्धे
तिधातुपाठस्यभूवादिसूत्रभाष्येजेर्थेस्वल्पिआचार्यश्चित्रयतिक्वचिदर्थानादिशतिक्वचिन्नेतिनमोवरिवरतिसूत्रभाष्ये[illegible]धात्वन्यार्थनिर्देशस्यपाणिनीय
त्वमेवेत्यत्रनदृढतरंमानंएवंचनियामकस्यापिनिर्मूलता अतिप्रसंगपरिहारस्त्वनभिधानात्प्रयुक्तानामेव[illegible]नांकिंच[illegible]दिभ्यः प्रागग्रेवापाठेनकिंचित्
गौरवंलाघवंवाएवंचतत्रानुवादमात्रेणपरस्मैपदकल्पनापिनिर्मूलेत्याहुः ननुविशेषानानिर्दिष्टत्सामान्यार्थाभावेनक्रियासामान्यार्थत्वमयुक्तमतआह अनेकार्थत्वादि
तिनिपात्यतइति॥ तत्रणिश्रक्तिधातोरेवग्रहणंनघञंतस्यव्याख्यानात् [illegible]वेतिसाहचर्याच्चेतिभावः धातुपाठेह्रस्वोच्चारणे[illegible]दीर्घणिचोरमाच्चारितार्थं नन्वत्रपाठवैय्य
र्थ्यंनतमाह मित्वस्त्विति निपातनेनचिण्णमुलनिरिक्तविषयेचरितार्थंतदभावेपिनह्रस्वः फलेविशेषाभावेनदीर्घणबाधस्यैवापत्तेः तत्रापिह्रस्वस्यानेदभावेपिता ९१
न्यर्थमितिभावः उदित्करणसामर्थ्यादितितदनुवादेननादेरुदित्वेनपुनरत्रतत्करणंव्यर्थमित्यर्थः विशिष्यार्थोनोक्तः तदर्थस्तुतथानियमस्यवक्तुमशक्यत्वेनत

इत्यर्थमिति भावः अत एव पूर्वपठितवचनोपि नानुवादः उक्तरीत्यार्थनियमासंभवेन तत्र वचनपाठस्य वैयर्थ्यापत्त्या तदनुपादेसंभवात् उद्देश्यफलं तु लिङ्गभावे॥य
रतुपूर्वपाठः संभवो ग्राह्ये च वचनो नीतिरूपव्याख्यस्यार्थः अन्यथानेनैव वचनेनीत्यादिसिद्ध्या तत्रापि तद्वैयर्थ्यं तदवस्थमेव तत्र [illegible] व नुषाचनेरपि पाठः अत्र तु वचन ग्राह्येव
नचात्र संभवोपि उद्देश्यमस्य तु नानादिकस्यैवात्रानुवाद इत्यर्थबोधनाय तेन पूर्वपठितस्य प्रवानयतीत्येवनानादिकस्यादित्वेन पूर्वपठितस्यानुद्देश्येन निषेधा॥
यांसस्य इयं तवापीष्टमेवेत्याहुः विकल्पो वस्यत इति म्लाम्लावनुवमांचेत्यनेनेति भावः क्वादेरिति दिषादेरित्यपि बोध्यम् [illegible] लिकमके रणां तेऽस्य द्विवाद्वितीय
अपि भाष्यसंमतत्वात् अरंयतलेहणां तिदीर्यतिवारतिमतेरतिरिदमेव युक्तमिति भावः एवमन्यत्रापि [illegible] अत्र पठि [illegible] नामन्यत्र पठितानामपि नानेका
र्थत्वमित्यन्ये पाकारस्य त्रेनाचयि चिंत्यमर्थान्तरे वृत्तौ मानाभावात् परिभाषाभ्यामिति विरोधेः नित्यत्वादुभयोरप्यप्रवृत्तेरिति भावः मारणे त्यादि मारणे संपूर्वकस्य
वप्रयोग इति पुरुषकारे एतत्क पमिति माधवान्यमते आक्षेपलब्ध नयनाह माधवेति अत्र माधवमतं न्यायः कंपने चलिरिति कंपनेर्थे चलधातुरित्यर्थः एवमन्य
त्रापि स्वार्थे णिजभावे इति आधृषाद्वेति वैकल्पिकत्वादित्यर्थः स्वार्थे णिचि विहितानान्येमित इत्यस्य प्रवृत्तेरिति भावः जिह्वामिति जांद्रापयतीत्यर्थः जिह्वयेति तया ताप्य
तीत्यर्थः लडयति हानुमिति ज्वालयतीत्यर्थः दधीति उज्वालनिविलाडयतीत्यर्थः देवादिकस्येति अस्यैवानुवाद इत्यर्थबोधनार्थमादित्वमिति भावः घटते त्यादिरिति लोटिलो
पमिति [illegible] स्यानि वस्त्रान्नमि तां हस्वह इति भावः हनि हदिति [illegible] हस्यन इति भावः भासे इति वनः पूर्वपाठसहमो मनत्वादिति भावः अत्र व [illegible] नानादिकस्यापि ग्रहणमित्य
न्यानिर्मांघयारिवेग्रणं भोजनमनुकूलः पानेः [illegible] पनादिरूपोस्यापारः इति बोध्यं नियमस्य [illegible] व्याप्तिरिति न च मतुवुलोपे टेरिनस्य [illegible] पुगापत्तिः नियमवदित्यर्थः कार्य
आधृजंतनिषु [illegible] द्दित्यर्थमावेणात्रपेच्यामिति नियमयन्निरस्यत्वैः सामर्थ्यस्येनात्रमते उपपन्ने त्वाचे बोपदस्या वितिकश्चित् असंभवादिति [illegible] संभवादित्य
र्थः फलोपाय [illegible] यो व्यतीर [illegible] युनामुपदाग्रेव इत्यादिश्रोतमयोगोमानुकूल इति बोध्यं तत्र हेतिशब्दाविधावित्यर्थः इलइलवेदे [illegible] संभवादिजवितो [illegible] गः तथा
कार इति वंधुस्वानुकूलो व्यापार इत्यर्थः अवक्यीदिति [illegible] रिश्वान्न हठिः सुषाकर इति अस्यैवमर्थसहितस्य पाणिनिना पाठे प्रमाणाभाव इति अत्राहचिः तद्वा [illegible] त्वविं
तिवमुरित्याह पक्षे [illegible] एवेति भावः मर्षणं क्षमासा चापराधे सत्यपि कोपानाविष्करणं ढलोप इति वहुव्रीहिपक्षे निमित्तत्वेनाश्रयणादेवष्टुत्वादीनामप्रवृत्तं

ति·भ्वा· नायद्वात्रधिकारात्षष्ठी तत्पुरुषत्वेन ढ्लोपे इति विषयसप्तमी तत्र क्त प्रत्ययं विना तद्विषयत्वाभावादूढ इत्यादौ न तत्र ढ्लोपे इति संप्रसारणोत्वयोः प्राप्तौ परत्वात्सत्वे संप्रसारणे
श·शे· पूर्वत्वेन कृते लक्ष्ये लक्षणस्येति न्यायेन पुनरोत्वाप्रवृत्त्या वर्णस्येति भाष्ये प्रत्याख्यातं र लोपस्य त्वसंभवान्निवृत्तिः सोढः न रपरेत्यतो नेत्यनुवर्त्तनेसोढः किंप्रसिद्ध ते
१८ सिवादीनां सिवुसहसुट्स्तुस्वंजः सिवादयः विसर्जनीयामिति विसर्गेण इत्यर्थः ननु त्रातनं तदनुकूलो व्यापारः एवं च तेनार्थकथनमसंगतं सकर्मकत्वापत्तेरता।
आहत्रातनं निर्वर्तितिविषयतयेति विषयता त्रजकेनेनारूपाएवं च तत्र अन्यविशारणमर्थ इति भावः पादेः श्रितः त्रादेः सिकुत्पत्तेः पूर्वं शिनोः संभवाच्छितरत्यस्य शि दि
व्येष्वप्राणाते दाह तद्भाविन इति श्रिहिश्रितृल स्वार्णानां शितः त्रावादेः सार्वधातुकाश्रयत्वेन परस्मैपदे जाते भुक्तवंतमिति न्यायेनास्य सूत्रस्य वैयर्थ्यापत्तिरितिभा
वः वोदितेति वुध्यते रेकानिट्त्वमिति भावः वृदिति परेतु ज्वलितिकसंतेभ्य इति सूत्रादत्र वृत्करणमनार्षं अन्यथा ज्वलादिभ्यो ण इत्येव सूत्रयेदित्याहुः अवुदरि
तिररलै पि इदित्वाभावान्नतु मस्वेदत्वादौ स्वरितेत्वप्रयुक्तमात्मनेपदं तु भवत्येव स्वरितत्वप्रतिज्ञासामर्थ्यात् प्रत्येकमिरोरितत्वमितिपक्षेपि नतु मकर्मधारयेणा
त्यदितएव तद्विधानात् अनिदितामित्यस्याप्रीत्संज्ञके कारांतभिन्नांगानामित्यर्थ इति न लोपो भवत्येवेति बोध्यं उदुपधाया उपधायाइत्युत्तरार्थं प्रकृते लोः सुपीत्यत
श्रोरित्यनुवृत्त्यापि सिद्धं गोहइति विषयार्थं तदाह गुणे हतावितितेनजुगुहतुरित्यादि सिद्धं इत्येत ऊ इति वर्णग्रहणात् प्रसिद्धविधिरिति न्यायाच्च दंतादेः तत्र इत्यर्थः अं
तलोप इति अत एवायुक्तानामित्यादयोपि सिद्धिरिति तृतीयादि शेन॥ ऋदुनोः॥ एकाच इति निषेधे प्राप्ते इत्यादि ऋया॥ अयङ्यीत्यनुयायीति अकृत्सार्वधातुकेति सिद्ध एवेति
श्रेषणं नो संभवात् यदि वेयर्थ्यात्तदाह याताविति इगागमे न सिद्धेः रेफोच्चारणं निर्दिश्यमानपरिभाषया सिद्धे मारोच्चारणं चस्य स्पष्टार्थं ऊश्चा॥ इको यणीत्यनेन न लग्रहणं सि
ड सिचाविति सूत्रे चानुवर्ततेतदाह अवर्णादित्यादि त्रकारादौ अंगग्रहणं अंगसंज्ञानिमित्तस्य लोपार्थं तत्रपूर्वापरमाह च्युर्यात् सिज्वत्तदाह सिच इति तेनासंहितामामिन्यादौ
न लुप् हस्वात् सिच इत्येव सिद्धं अलावि ष्टामित्यादौ तु न दोषः आगमे कृते तत्सहितस्यैव प्रत्ययत्व वत्सिद्धमिति स्यादयं वक्तव्यं पौर्वापर्याभावात्तथापि पदलाघवाभावादे
वार्तिकं॥ आर्वेदे॥ उपदेश इति षष्ठ्यर्थे सप्तमी तेनेजंतस्यापदिश्यमानस्येत्यर्थः कर्मण्युत्पन्नोपदेशपदेनाद्योच्चारणाविषय उच्यते तेन ढौकितेत्यादौ न दोषः समुदा
यस्योपदिश्यमानत्वं न तु तदवयवस्य तदुपदेशे तात्पर्याभावात् उपदेशात् किं गोभ्यां उद्देशः प्रातिपदिकानां नोपदेशः उणादीनामव्युत्पन्नत्वाच्च डोइत्यादीनामुपदिश्यमा

नेर्जंतत्वमितिनवाच्यंतथाहि उपदेशेस्वप्रायेणधातुरेवेत्यतोधातोरित्युक्तं।मेङआदौङकारसत्वेपरस्यङस्यसत्वेनतस्याजंतत्वाभावेनउदीचांमाङइतिनिर्देशस्यानुबंधकृत
मनैजंतत्वमित्यर्थज्ञापकतासुस्थाङकारलोपेत्वेजंतत्वसत्वेनधातुसंज्ञादिकार्यार्थतावत्तोप्युपदेशेतात्पर्याचोपदिनुषमनिजंतत्वसत्वेनभवत्येवालंधातोरित्यनुवृ
त्तोस्यानुबंधलोपोत्तरंतद्धिनिर्मुक्तस्यैवधातुतायानधातुलोपसूत्रेभाष्येउक्तत्वेनोदीचांमाङइत्यादावात्वानापत्तिःधातोरितितत्संबंधंविनापितदंतविधिरत्रेत्यलिङ्गे
रितिसूत्रशेषेपिभाष्येध्वनितंतत्रहि अवश्यमात्वार्थधातुग्रहणंकर्त्तव्यमिहमाभूत्गोभ्यामितिउपदेशेपदेजंतत्वविदात्वमिष्यतेउद्देशोहृढिशब्दानांनचागो
नेभविष्यतीत्युक्तंनचदरेप्रभृतीनामुपदेशेएजंतत्वादात्वव्यावृत्तयेधातोरित्यावश्यकं श्वितिनेत्युक्तया शि[illegible]रत्वयोर्म्यायेवेजोस्यग्रहणेनादोषातएवंचोपदेशेइत्य
स्ववर्णग्रहणेलक्षणप्रतिपदोक्तपरिभाषाऽप्रवृत्तिज्ञापकतापिचिंत्येतिदिक् नतुशितीतिशितीतिकर्मधारयात्सप्तमीपूर्वेतरसूत्रेणप्रप्नयेस्त्वेवप्रहोतत्साहचर्या
ष्यतीति नित्यमित्यर्थः लिङ्निमित्त इति सूत्रमत्रानुवर्त्य वाक्यभेदेन संबध्यत इति भावः एतेन तद्विषयेपि परत्वादिदमेवोचितमित्यपास्तं अनवक्लृप्त्योर्विषये कालत्रये लिङ्

लृङपिवित्यर्थः इह यथासंख्यं नेष्यते प्राग्वदिति भूते वा भविष्यति निमित्तमित्यर्थः लिङोऽपवाद इति पूर्वसूत्रेणोभयोः प्राप्तयोर्लृङ्ग्रहणेन लिङो निवृत्तिरिति भावः अत्र लङ्मि
लिङो निवृत्त्या एतत्सुज्ञानवत्कृप्या हेर्लिङ्ङ्मितन्त्वाभावादिति भावः यच्चयत्रयोः अयमपि लङपवादः योगविभाग उत्तरत्रानर्थिवानुवृत्त्यर्थः लङ् प्राग्वत् शेषे लृ अत्र लृ
ङ् न यदि सो धीयीतेति जातु यदोरित्यत्र यदायद्योरित्युपसंख्यानात् लिङ् भूतेपीति वा ग्रहणस्य निवृत्तत्वाद्भविष्यत्येव भूतेपि नित्यमित्यर्थः काममवेदे सर्वलापवादः
अकच्चित्ती त्यस्य कश्चित्कुञ्च प्रयोगाभावे इत्यर्थः सदाह न त्विति कच्चिज्जीवतीति अयंप्रश्न एव काममवेदनद्योतक इति भावः कच्चिच्छब्दस्येच्छार्थकत्वाभावादि
च्छार्थ वित्यप्यत्र न प्रवर्तते प्रोढिः क्रियायाः कृत्यसाध्यनाविरह बोधनं संभावनं क्रियायोग्यताविषयो लोकेटकोटिकं ज्ञानं विपरीत्ययन्त इति आवर्तविपरीत
म्यत इत्यर्थः तच्चेदिति इमां क्रियामनुष्ठातुं समर्थ इत्येवं रूपं चेत्तत्संभावनमिति भावः अत्रापि लृङ् प्राग्वत् सिद्धाप्रयोग इति यत्र तत्प्रयोगं विनापि तदर्थो गम्यत इ
त्यर्थः अपि गिरिमिति संभावनस्य धात्वर्थविषयसामर्थ्यविषयताध्वनकोऽपि शब्दः क्वचित्प्रकरणादिकमपि नत्र्थेति बोध्यं संभावयामीति भोजयेद्भवान् एककरत्युभ
न्ने हेत्वर्थः ॥ प्रत्युदाहरणे पूर्वेण लिङ् वास्यादिति विभाषेति पूर्वसूत्रादनुवर्तते इष्यत इति लिङि वर्तमाने पुनर्लिङ्ग्रहणादेतद्विषये लसः हंतीति हननं हेतुः
पलायनं कार्यं गर्हायां लङपीत्यनो भविष्यतीति निवृत्त्या कालत्रयेप्युतेऽर्थस्य इति अत्र प्राप्तिः लृङ् प्राग्वत् उपसंख्यानात् कयोरपि लिङ्गस्य उपसंख्यानं कर्तव्ये प
णंबंधः यदि मे भवानिदं कुर्यादहमपि तेन इदं दद्यामित्युदाहरणं अत्र विध्यवधिमद्भाव एव प्रतीयते न हेतुहेतुमद्भाव इति न हेतुहेतुमतोर्लिङ्ङिति सिद्धिः आशंकोत्पत्त्या
तेन सर्पिषा पिस्या प्रासाद आसामिष्टकानां स्यादित्यादेः सिद्धिः स्पष्टं चेदमुपसंख्यानं कयोरिति सूत्रे भाष्ये इच्छार्थेषु सर्वलापवादः लृङ् प्राग्वत् इच्छार्थ उपपदे इति
सूत्रार्थः कामप्रवेदने स्वाभिप्रायाविष्करणं तच्च प्रयोक्तुरिति बोध्यं इदं न स्वतंत्रं विधायकं किं तु सूत्रशेषभूतमन्यव्यावर्तकमेवातो व्यावर्त्यमेव दर्शयति नेहेत्यादिना विधि
नि प्रवर्तनाविचारप्रार्थनाविषया अर्थे वा चकारादिनोरित्यर्थः प्रैषादि अनयोर्विध्यामन्त्रणाभ्यामभेदेपि निमन्त्रणादिषु कृत्यव्यावृत्तये ग्रहणं प्राप्तकाले च कृत्या स्युः
तो हितेष्वपि तेषु सामान्यविहितकृत्यानां प्रैषादिषु लोटा बाधा माभूदिति कृत्यविधिः प्राप्तकालार्थमिति प्रैषादिविसर्गयोः पूर्वेण लोट् चेति सूत्रेण सिद्धत्वादिति भा
वः लिङ् चोर्ध्वमौहूर्तिके प्राप्तकालस्य लिङ्विधानार्थमिदं अन्यथा विध्यादिसूत्रेण सिद्धेः बाधयथा प्राप्तं लोट् कृत्याश्च अन्यथा लिङ् तयोर्बाधः स्यात् मुहूर्तादूर्ध्वम्

धा॰ भो॰ ज्वनेशानकालमित्यर्थः स्मेलोट् प्रैषादय और्ध्वमौहूर्तिक इति चानुवर्तते यजतांस्मेति स्मशब्दो ऽधिकारसूचको भवानत्राधिकृत इत्यर्थः अधीष्टेति लिङो ऽपवादः योगवि
ति॰ भागादूर्ध्वमौहूर्तिक इति निवृत्तं लिङ्यदि कालसमयवेलासु इत्यनुवर्तते यद्भवान् भुंजीत तस्य काल इत्युदाहरणार्थः भावे परत्वात्तुमुनमयं बाधते सर्वलापवादोयं अर्हे
५८ चाप्येकर्तरि गम्यमाने कृत्यतृच इत्यर्थः शकि लिङ्भावे क्विप् शक्तौ गम्यमानायामित्यर्थः सर्वलोप्यपवादः त्वाच्छंकते कथमिति माशब्द इति सूत्रं सर्वलकारविषये ऽङ्
हितत्वं वाक्ययोगार्थं वस्तुतः सनात्स्येव आङ् माङ्शे इति सूत्रभाष्येन तथाध्वनितत्वात् धातुसंबंधे प्रत्ययाः इत्युक्तेर्विधिर्यं धातुसंबंध इत्युत्तरत्राप्यनुवर्तते स्वरितत्वात्
संबंधस्य द्विष्ठत्वात् द्विवचनांतेन समासः धातुशब्देन तदर्थो लक्ष्यते तेन गोमानासीद्भवितेति सिध्यतीति तदाह धात्वर्थानामिति द्विवचनांतत्वमुचितं यत्र काले इति
वर्तमानसामीप्य इत्यारभ्य कालान्यत्वप्रतिपादनस्यैव दर्शनादिति भावः नन्वेवं वसन् ददर्शेत्यादौ भूते लड्वर्तमाने लिडित्यपि स्यादत आह तिङ्नेति भूते च
डिति अयं भावः अनेन प्रयोगे श्रूयमाणानां कालांतरे विधानं क्रियते एवंभूतिशत्रुः साधुत्वे बोधितः प्रत्यन्तादर्थकालोऽपि कल्प्यते एतेनानेन लट्यपि पुनरेतस्मा
पारेमानाभावात्क्वतादुर्लभ इत्यपास्तं भाव्यकृत्स्तु भाविकृत्यमासीत् उत्निष्ठमालः पुत्र आसीदित्यत्र भाष्यादिशब्देन प्रत्यये आसीच्छब्दपर्यायतया योगपद्ययोगानुपप
त्तिः यदियं तं कालं भाविवादिना व्यवस्तं तत् तदासीदित्यत्र यस्तर्हि ज्योतिष्टोमेन याजी स्येत् कम्म वहरिष्यमाणो भविता तेषामप्यपि बोधसंभवाद्गोमानासीदित्यत्रापि गोमानित्यत्रं
वहरिष्यमाण आसीदिति बोधसंभवाद्भाम इत्यस्यातीतत्वाद्भूते प्रत्ययः स्यादूवामप्यतीतत्व प्रत्ययसंभवात्सूत्रे त्यर्थं वसन् ददर्शेत्यादौ च दर्शनकालिकवासस्य वर्तमानत्वं
द्विस्थीकृत्य प्रत्ययस्तात्पर्यं च तत्समानकालत्व प्रत्ययोर्दर्शने शानस्थले क्रिययोः समानकालत्वप्रतीतेः ननु चोत्पन्नतैव वचनलोपं चोदिताः स्मेति सहसू सूत्रस्य भाष्य
प्रयोगस्याप्येवमेवोपपत्तिरित्याहुः क्रियासमभिहारे धातुसंबंध इति वर्तते क्रियासमभिहार इत्येतत्प्रकृत्यर्थविशेषणं न हि शिष्टक्रियावाचकाद्धातोर्लोट् इति सर्वलाप
वादस्तदाह द्योत्ये इति तस्येति लोट इत्यर्थः यदि इति वादीनोऽस्थानेऽस्मातं तदास्थानि वद्धाविनपित्वात् नीहीत्यादावीत्वादि न स्यादिति भावः तो चेति लोडित्यनुवर्त्य म ७५
हिस्वौ लोडादेशौ हि स्वयंदित्यर्थ इति भाव उक्तातिदेशबलादेव सार्वधातुकत्वात् ईश्वशेष्वेत्येवायमीडे
इत्यत्र शपः स इत्यस्य प्रवृत्तिः ननु वाचं तध्वमोरिति वाक्यशेषासंगतिः तिङ्तं हिस्वाभ्यां बाधेन तध्वमोरभावादत आह तध्वमोर्विषय इति विषयसप्तमी सतिभावः तथा

ञ्शेमध्यमबहुवचनमेवव्याख्यानात् हिः कर्तरीति कर्त्रादयश्च कालसंख्यावदनुप्रयोगेलो वनिर्णेयाः एवंच कर्तरीत्यादेः कर्त्राद्यर्थकानुप्रयोगेइत्येवार्थः भावक
र्मार्थकानुप्रयोगेपरस्मैपदिभ्योपिस्वइतियुक्तं समुच्चयेन्य अत्रसमभिव्याहारपदरहितंपूर्वसूत्रंसंपूर्णमनुवर्तते समुच्चीयमानक्रियावृत्तेर्धातोरित्यर्थः अतएवका
रकसमुच्चयेनास्यप्रवृत्तिः विकल्पस्यलोटेवान्वयोनतुहिस्वाभ्यांव्याख्यानात् यथाविध्यनु अस्यव्यवहितादिप्रयोगोपिलुनीहिलुनीहीत्येवायंलुनातीतिभा
व्यप्रयोगात् समुच्चयेसा सामान्यवचनत्वं समुच्चितार्थबोधकधात्वपेक्षयैवोपस्थितत्वात् तत्वंचानुप्रविष्टसमुच्चितधात्वर्थकत्वं अस्मिंश्चाप्यबहुलतीत्यस्मिं [?]
नुप्रविष्टत्वादनपानादिरूपार्थबोधकत्वं तेनोभयार्थगतसंख्यापुरुषकालाद्यभिव्यक्तिः हृवाच्येइति इदमाद्यसूत्रविहितलोडंतविषयमेवेति अत्रैवप्रकरणे
भाष्येसूत्रं लवनादीत्यादिनामोपपादनह्ररणे अस्वास्थ्यक्रियेति आस्वास्थ्यमितिप्रथमांतंक्रियाविशेषणमितिभावः इत्यंशब्दउक्तक्रियाणांसामान्यभूत
चक्रेइत्यर्थः भेदान्वयतात्पर्यग्राहकइति तात्पर्यंपुनःपुनरिति लोडंतेवाच्यइतिहितेषांव्याख्यानं अननुवृत्तेरिति भाष्यादावनुक्तेरितिभावः लोडंतेति उभयवि
वक्षायामपिसमुच्चयस्यानेकविषयत्वेनसमभिहारस्यैकविषयत्वेनांतरंगत्वात् पूर्वसूत्रस्यैवप्रवृत्तिरितिहित्वापत्तिरितिभावः परेतु अवस्कंदेत्यादिपदोपस्थिता
नामित्यंपदेनाकांक्षामुत्थाप्यास्वास्थ्यपदेनमनोदुःखार्थकेनान्वयेजातेतस्यचक्रेइत्यनेनकर्मतयाऽन्वयः एवंचप्रथमेनासंगतिरित्यमित्यस्यास्थानस्थत्वंच
नुतत्रप्रकरणफलीपदेनराक्षसस्यैवोपादानात्कर्त्रर्थकत्वावगतिः तस्यातीततायालोकप्रसिद्धतयातत्कर्तृकक्रियाणामपितत्वावगतिः वस्तुतस्तस्यैवकर्तृत्वा
त्पुरुषभेदव्यक्तेरितितात्रानुप्रयोगापेक्षा किंचक्रियामात्रप्रतिपादनेतात्पर्यात्तदनुपयोगएव पौनःपुन्यमपिअहर्दिवमितिसमभिव्याहाराद्वारणस्यतथाकर्म
[?]लितत्वेनप्रसिद्धत्वाच्चव्यंजनयैवबुध्यते यद्वाऽवस्कंदेत्यादीनिविधिलोडंतान्येवस्वसेवकप्रेरणाविषयावस्कंदनादिजन्यमस्वास्थ्यंमनोदुःखंचक्रेइत्यर्थः अत
एवतानीमानिप्रत्युक्त्यसंकल्पवर्तीनिभूतानिमवंतित्रायस्वम्रियस्वेत्यततृतीयंस्थानमितिश्रुतावनुप्रयोगाभावेपिसमुच्चयेलोड्भवतिक्रियामात्रविवक्षणेनसं
ख्याकालाद्यभिव्यक्त्यानुपयोगेनात्रानुप्रयोगाभावोऽतएवानुप्रयोगविधायकंद्वयमपिभाष्येप्रत्याख्यातं श्रुतौपौनःपुन्यमसकृत्यदगम्यं एतच्छ्रुतिसमानार्थकेआचक्ष
त्यलोकांश्चावीचेजायस्वम्रियस्वेतिविपरिवर्तमानमात्मानंजीवलोकंचालोक्याऽस्मिन्संसारेनित्यमशुचिदुःखात्मकंप्रसंख्यानमुपावर्तत इतिवाचस्पति

प्र·शे· प्रयोगेप्येवमेवबोध्यं आचावीचेराचसत्यलोकादितिविपरिवर्त्तमानमितिचपरस्समभिव्याहारेणयौनःपुन्यावगतिर्यत्तुकल्पतरुणाक्रियासमभिहारे इतिसूत्रेण
ति· यौनःपुन्येलोडित्युक्तं तन्न हित्वापनेरितिवदंति इतिसर्वेष्टसिद्धिः विस्तरस्तुबृहच्छब्देंदुशेखरेबोध्यः॥ इतिश्रीशिवभट्टसुतसतीगर्भजनागोजीभट्टकृतेलघु
५८ शब्देंदुशेखरेतिङंतंसंपूर्णं॥ ॥

ॐ ॥ धातोः सोपसर्गाणामंगत्वव्यावृत्तये इदंस्यादिव्यवधाने आदेशप्रवृत्तिलुधातोर्विहितस्य लस्यादेश इत्यर्थादृष्टत लुनातीत्यादौ लादेशव्यावृत्तये आतृतीयसमाप्तेरधिकार इति
भावः तत्रोपपदं कृदतिङ् व्याख्याने वासरूपपरिभाषेयं अधिकारत्वे स्वरितत्वप्रतिज्ञागौरवमिति भावः असरूप इति लिंगं यत्रासरूपप्रत्ययविधानं तत्रैवेत्युपपत्तिरित्यर्थः नचप्र
त्ययत्वस्य वाक्यार्थबोधोत्तरं ज्ञानेन पूर्वं तद्विधिलज्ञानासंभव इति वाच्यम् यस्य प्रत्ययत्वं भावि तद्विधावित्यर्थात् यद्वा कप्रत्ययो भवति स एव वेति वाक्यभेदेनान्वयः असरूप इति
छेदः तत्रासरूपत्वं किमपेक्ष्य येनाकांक्षायां यस्य सर्वत्र प्रवृत्तिस्तदपेक्षयोपस्थितत्वात् स चोत्सर्ग एव नापवाद उत्सर्गविषये सर्वत्रापवादप्रवृत्तेरत एव विप्रतिषेधस्थले पुनः
प्रवृत्तिस्तदाह असरूपोऽपवाद इति उत्सर्गस्य बाधकोऽपवादो वा भवतीत्यर्थः बाधकत्वविकल्पेश्च पूर्तियोरिव पक्षे समावेशः स्यात् अत एव न वेति सूत्रे साधुत्वविकल्पे तस्ये
वपक्षे साधुत्वमाणादितं धर्मनिषेधे धर्म्यभावे मानाभावात् एवं चापवादो वा भवतीत्येव सिद्धे उत्सर्गस्य बाधक इत्यस्य फलं चिंत्यं अपवादस्य दार्थनिरूपणं तादृत्यन्ये स्त्रियामि
त्यस्य स्वरितत्वादाह स्त्र्यधिकारोक्तमिति अपवादमिति शेषः तेन व्यावक्रोशी व्यवकुष्टिरिति सिध्यति कर्मव्यतिहारे णच स्त्र्यधिकारोक्तत्वाभावात् असारूप्यं चोपदेश
कमेवेति क्विवादिषु न दोषः तदप्यननुबंधकृतमेव इदानीं इधात्वोरिति णवाधकशास्त्रविकल्पात् अतः कालानेसमावेश इति दिक् कर्तरि कृत् न च धातोः परः कृत्प्र
त्ययः कर्तरि वर्ततामित्येवमस्य सूत्रस्यार्थः तोर्थादन्यत्र वृत्त्यभावेन प्रत्ययनियमोऽयं भवतीति काष्ठभिरत्राह्मण इत्याकारस्यापि तत्र वृत्तिसिद्धिस्यापि कृत्संज्ञाप्रत्ययसंज्ञो
स्यातामिति वाच्यम् यः स्वभावतः कर्तरि वर्त्तते स एव कृत्संज्ञो नान्य इति संज्ञानियमेनादोषात् अत एव न शब्दार्थसंबंधनित्यताहानिः एवं सर्वत्रार्थबोधकेषु बोध्यम् स्पष्टं
चेदमत्रैव भाष्ये तयोरेव तत्कृत्ये नक्तः कर्मणीति सूत्रस्य भावकर्मणोः परामर्शः तत्रासत्वभूतस्यैव भावस्य निर्देशेनात्रापि तथाभूतस्यैव परामर्शेन भावे एकवचनस्वभ
भावाच्चास्य नपुंसकत्वं बोध्यं अत्र भावे कर्मकेभ्य इत्यनुवृत्त्याभावे कर्मकेभ्य एव एवकारः स्पष्टार्थः कर्तृव्यावृत्तये तु न निर्दिष्टार्थत्वेन कर्तरि कृदित्यस्य प्राप्तेरिति दि
क् स्वरार्थाविति तित्स्वरितम् उपोत्तमं रितीति स्वरार्थः तद्वाच्येति तत्र भिदेलिमा इत्यस्य भेत्तव्या इति विवरणादिति भावः कृत्यच कृतीति विषयस्थ आहारेण तस्य विशेष्यत्वं तदाह कृ
त्यसंज्ञा अत्र च व्याख्यानमेव शरणम् अचः परत्वाभावादिति इकारस्य नकारेण व्यवधानादिति भावः नकारेण व्यवधानाच्चेति पाठे चो हेतौ बोध्यः अजपि कृत्स्य एवेति तु न भ्रा
कांवकं ग्रहीण इत्याद्यसिद्ध्यापत्तेः हलश्चेजु कृतः प्रत्ययत्वेन प्रत्ययग्रहणे यस्मात्स विहित तदादेरिति पंचम्यंतो नास्ति त्यात् तस्य मे विशेषणेन तत्रे जुपधस्य हलंतत्वाद्भि

सि॰ प॰
टी॰ छ॰
१

वाराराहाहलादेरिति अच: किं प्रश्लिष्ट: इजादे: हलादेरित्यर्थकं हल इत्यनुवृत्तमपि सामर्थ्याद्धलंतपरं इजादेर्हलादित्वासंभवात् विहितविशेषणं च तेनास्य नियमत्वं अन्यथालिलोपे हलंतात्परत्वेन प्रत्ययलक्षणप्राप्तलोर्विभाषेति बाधित्वा नित्यार्थो विधिरेव स्यात् यद्यपि नियमे प्राप्त बाध: सिद्धस्य पुनरुपादानादनुवाददोषश्च तथापि लक्ष्यानुसारि भाष्यमेव नियमे प्रमाणमिति बोध्यम् अनुस्वारश्च सर्वोपि गृह्यते व्याख्यानात्तदाह श्रोम्भणमिति वानिंस क्षतीत्यनुवृत्तं निंदामिति षष्ठीनिर्देशसामर्थ्याल्लत्वनिमित्तमित्याह कृतिपर इति पूर्वसूत्रेति भाष्ये पूर्वेत्र ग्रहणं कर्तव्यमिति वार्त्तिकादितिभाव: एयंतभादीनामिति प्रभापनमित्यादौ णत्वनिषेधाय भादीनामिति विहितविशेषणं एवं च ल्यंते: प्राप्तिरितिभाव: एकरणोपरीति अत्र चणत्वपर्याख्यानमिति व्याख्यात्रादेशसूत्रस्थभाष्यमाने कृत्यल्युटोपादाभ्यां हि पतेपादहारक इत्यादिसिद्ध्यर्थं ततोप हुलमित्येवं भाष्य उक्तम् शक्यमकर्तुमिति अवर्णान्तादिव हलंतादपि ल्यपत्ताबाधादितिभाव: ईद्यति आतालोप इत्यत आत इति वर्तते स्वार्थ इति यतोनाव इत्याद्युदात्तार्थ इत्यर्थ: पोर तपरकरणादाव्यमित्यत्र न आज्ञपि इदित इत्यतो नुमिति लभेश्च त्यतो लभेरिति च वर्तते विवक्षित इति एतद्रत्रैव भाष्ये स्पष्टं गदमदे अनुपसर्ग इत्यर्थाभावेन तत्पुरुष: प्रत्यासत्त्या ग्रादिसंबंध्युपसर्गाभावे सतीत्यर्थ इत्येके नियमार्थमिति यार दुपधादित्यवासिद्धेरितिभाव: गर्ह्यायामेवेति वद: सुपीत्यत्र भाव इति नापकृष्यते इति सिद्धांत इतिभाव: अजर्यं संगतमिति प्राप्नोति पुरुषमिति संगतं मैत्रीकर्तरि क्त: अजर्यमिति च निपातनात्कर्तरीति बोध्यं वद: सुपि अत्र सुब्ग्रहण उपसर्गग्रहणं नसत्सु इति सूत्रे उपसर्गेपीत्युक्ते: नत्रहि सुपीत्येव संबध्यते इत्याकृष्यत इति भुवो: कर्मकत्वेनोत्तरत्र त्यर्थत्वात् यद्यपि प्राप्तावंनभाविति ल्यर्थत्वे वासकर्मकत्वात् तथापि अप्रसिद्धत्वान्नेत्युदाहरणमितिभाव: इदं चिन्त्यं भुवो भाव इति सूत्रे उत्तरार्थं भावग्रहणमिति भाष्योक्ते: सोपपदस्य कालादिकर्मयोग एव ज्ञास्ति अनभिधानादिति तदाशय: एक इति सकर्मकत्वादितिभाव: अधन्ये वयुक्त: पस: भाष्य इत्यादि संमतत्वात् भावे च स्तोघमित्यादि तु छांदसं वा हुलकाद्वेति बोध्यम् अतएवानुपसर्ग इत्यस्य प्रवाद्यमिति मत्युदाहृतम् एयन्तस्यात्कर्मण्येवान्यथा भावादरति भावघञं तम्पत्युदाहर्तव्यं स्यात् हनस्त च तकारस्यादेशत्वं व्याख्यानात् सुपीति किं घात: एयन्तु न सकर्मकत्वेन तदप्राप्ते: भावे किं श्वघात्यो वृषल: अनुपसर्गे किं प्रघात:

निरुपपदं हन्तेर्नित्यमप्राप्तु शिष्य इति प्राप्तस इत सर्तिपूर्वलीन्यादौ प्रसिद्धत्वात् क्वासितेरवग्रह। १

णं नत्वाप्रणतेरितिभाव: न वृड इति वृणोतेर्ग्रहणं कर्तव्यमिति वार्त्तिकमूल्याख्यानादितिभाव: वार्या इति अत्र निरोधस्याविवक्षणान्नावघ्रसंप्राप्तिरितिभाव: पुनरिति

तकारस्यादेशत्वे नचकारं विनापि पूर्वसूत्रे कार्यं वधसंभवेन तत्र तस्य चानुकृष्टत्वादिति भावः स्पष्टं चेदं भाष्ये आङ्पूर्वादिति ल्यपि तुकत्वनलोपाभावे तिस्वराणामप्रतिसिद्धिरिति
भावः ह्रस्वः सुपठ इति ये विभाषेत्यत्र य इत्यस्य विषयसप्तमीत्वे पिजनादि साहचर्येण ल्यादिप्रत्ययोत्पत्तिपूर्वकाले नो तस्यैवात्वविधाने नात्र न इत्यास्यानस्येत्वे आङ्गुणे न ह्रस्वसिद्धे
रिति भावः एतदुक्तेः शपरिहारायैव दीर्घोच्चारणमिति तत्त्वं कार्ये त्विति अयं स्थाधिकारस्थश्च युके साम्यात् नन्वेवं भार्या वधूरिति वत् भार्याः क्षत्रिया इत्यस्यापि सिद्धावसंज्ञायामि
त्यर्थमिति चेन्न भरतेर्भार्यायां वचारणे यतस्य सत्त्वात् मृजेर्विभाषोपधत्वात् अनविभाषेयम् चजोः कुघ्यण्यतोः संस्यनरागादित्यादिनिर्देशात् न्यंकादीनां च एवं डुकृञ्‌ इत्यादिप्रमाणा
व्युत्पत्तिवाद्यस्याकरणं तराभिप्रायेणात्या हः राजसूयायविशेषः निपातनादिति पूर्वोत्तरान्वयि कर्त्रोः हडिति निपातनादिति शेषः एवमग्रेपि कृत्यानि निष्पन्नतात्कर्तरि
ति एवमग्रेपि घनं धातुपान्त्यादिरूपं न तु वस्त्रादि नत्वेनाप्रसिद्धेः पूङिति न्यादि साहचर्येण शपविकरणस्यैव ग्रहणमिति भावः पाक्षमिति तेलादावेव घासिकाकाने
नरं यह्जीषत्वेनाहुः जित्य इति जि अभिभवे काष्ठमिति हलिशब्दवाच्यमित्यर्थः पदास्वैरि एषु चतुर्थग्रहेः कार्विन्यर्थः परविषये संनिकर्षो गृहेरर्थः यस्य पदस्यावेय
हृमगृह्यसंज्ञा चक्रिय तेन तस्याम्युच्यते गृह्यकारत्यनुकंपायां कन् ग्रामगृह्येति बहिर्भावोत्र ग्रहेरर्थः युग्य इति युज्यते शकटादिने सार्थः युग्यमिति सूत्रे सामान्येन पुंसकं पत्र
पात्रवचित्रत्वात् पुंसि चेति लिंगानुशासनात् पत्रशब्दः पुंस्यपि युग्यं पत्रं च वाहनमिति कोशः उपलक्षणं युग्या युग्या इति कुद्याः सारथ्यगोपयुग्यम्नोदयन्निति तिसुवोरापूर्व
ल्यपयोगः एतेन युग्य इत्यसंगतमित्यपास्तं अमाव अत्रान्यतरस्यामिति निपात्यमानह्रस्वसंबद्धं ल्यपि नित्य एव सूत्रे तकारोच्चारणं तु प्रकरणप्राप्तं कार्यसंप्रसारणाभावनि
पातनशंकावारणायेति बोध्यं यथोत्तरमिति वार्तिकस्य सूत्रदूषणाय प्रवृत्तत्वाद्भाष्यकृता च वार्तिकमतेस्लोक इत्यस्यासिद्धिमाशंक्य सूत्रमतेपि ल्यपि कुत्वाभावारणाय
नियमार्थमप्युपसर्गे [illegible] स्यचेर्घ्यजीति विवचनेन समाधानाद्वार्तिकमतस्यैवाभ्यनुज्ञानाचेति भावः भुजन्युब्जौ भुजेरगुणत्वं निपातनात् वा हो भुजअगं ओचजंतं न्युब्जनीति चेष्टरहिता
अवाङ्मुखाः शेरत इत्यर्थः यद्यपि न्युब्जयतीति अच्चिरोगे न्युब्जः सिद्धस्तथापि न्युब्ज इत्येतद्व्याख्याने न्युब्जग्रहणमिति बोध्यं अवश्यपाच्यमिति आवश्यकाधमर्ण्ययोरित्यनुवर्त
माने कृत्याश्चेति ल्यत्न प्रवाच्यमिति इदं वृत्त्यनुरोधेन भाष्ये तु प्रवाच्यः शब्दसंज्ञायामेवेति वचो शब्दे त्येव सिद्धिरित्यत्र प्रवचिग्रहणं प्रत्याख्यातम् चिंत्यमिति पूर्वैर्नित्यमप्य
नत्वेन तद्व्यहेफलाभाव इति भावः नदाह भाष्येति मोज्यंभ मस्य मत्र सर्वेन तु स्वरविशरमेव व्याख्यानात षज्ञिति मनोत्परि न्यादौ व्यवहृतत्वेन प्रसिद्धत्वादिति भावः निरनुवं

ल० भू० धकपराणि । अथातुगपद्दयोरुपस्थितावेवेति तात्पर्यं आचाम्यमिति पाठः चाम्यमिति पाठे वृद्धिर्दुर्लभा विशेष इति योगार्हे प्यादानीयतेन तत्रेत्यर्थः अलण्यो अर्समनाश्चिति वहुव्रीहिः ॥
शे० कृ० आनोनुमिति प्रीणानो [illegible] लेकृते इति भावः माङो वाह विर्विशेष इति ऐदूधयोरधिवेत्यर्थः संवानुमिति वहिसमानार्थो हेर्थनास्तिह्देत्सूत्रे समूत्येति स्पर्थमिति भाष्यं क्वचिन्नो
२ ति अतएव कत्वा प्रत्ययेन तुमुनो न नित्यबाध इति आसित्वा भुंक्ते आस्यते भोक्तुमिति च भवतीति भावः कर्तरि चेति कर्तरि कृदित्यतः कर्तरीत्यनुवर्तते इति भावः आवश्यका
धमर्ण्ययोर्णिनिः [illegible] कर्त्तमानेच्छा त्वा श्चेति सूत्रं तच्च भव्याद्यर्थं इति कृत्यप्रक्रिया ण्वुलतृचौ अनयोर्वर्तमानकालार्थत्वं प्रयोगानभिधानादिति भाष्यं तत्र हि तृजादि
षु वर्तमानकालोदाहरणं कर्तव्यं न कर्तव्यमन्येषां प्रत्ययानां कालमात्रे दर्शनात् चर्चा याह इत्युक्तं तृच अस्य कारग्रुक्तं दर्शयितुरिष्टमेयस्थित्यत्र तृन् तृचो सामान्यग्रहणविघात
र्थश्च कार इति भाष्ये स्पष्टं उणादीनां व्युत्पन्नत्वमते तृप्रत्ययान्तमात्रादिभ्य स्कुं दर्शितेनेष्ट यसो दर्शनमिति तद्भावः अव्युत्पत्तिपक्षाश्रयणेन मानयनीत्यादौ नेष वद्भाव इति र
क्त इति सूत्रे कैयटः बोद्धुमर्ह इति अर्हे कृत्यतृचश्च इत्युक्तेरिति भावः वधहिंसायामिति अतएव जनिवध्योरित्यत्र वधिग्रहणं चरितार्थं वध्यादेशोत्वल्लोपस्यस्थानिवद्भा
वात्सिद्धं एते आर्द्धधातुके प्रयोगानि त्यपालं इदं सर्वं हन्तेस्तु पृष्टम् परत्वे वं सति च सिडि-ति सूत्रे वहुलं तएवं न वधकगात्र विदस्य णजिरा घ्यामिति वार्तिके वधकग्रहणं वैय
र्थापत्ते: अनेन धातुना सिद्धत्वात् घातक इति विष्यत एव वाहुलकात् वधकमित्युपादाय ण्वुलि वधादेश इति कैयटः तथा स्थानिवत्सूत्रे वार्तिकं वध्यादेशे वृद्धितत्व
योः प्रतिषेधः वधकं पुष्करमिति अन्यो यं किरीणादिको वधक शब्दो रुचक इतियथेति भाष्यं चासंगतं — स्यात् तस्मादयं निर्मूलः आर्द्धधातुके वा स प्रयोगोनि
र्मूलः जनिवध्योश्चेति सूत्रे वधिग्रहणं त्वादेशो हलंत इत्यभिप्रायेण अतएव हनो वध इति सूत्रे किमयमदंत आहोस्विद्धलंतः किंचातः यदि हलंतः वृद्धितत्व
प्रतिषेध इद्विधिश्च अथादंतो न दोष इति भाष्यमुपादाय कैयट आह अवधीदित्यत्र हलंतलक्षणा वृद्धिः प्राप्नोतीति तत्प्रतिषेधो वक्तव्यः वधक इति ण्वुलि वहुलं तेनेविधा
देशेः तउपधाया इति प्राप्ता वृद्धिर्जनिवध्योश्चेति प्रतिषिध्यते स्थानिवद्भावादनल इति तत्वं प्राप्तं तत्प्रतिषेधो वक्तव्यः अवधीदित्यादावेकाच उपदेशे [illegible] इति निषेधे प्राप्ते इड्विधेयः अदं
तत्वे त्वल्लोपस्य स्थानिवद्भावाद्वृद्ध्याद्यभाव इड्भावश्चेति एवं चादंतत्वपक्षे वधिग्रहणं सूत्रे न कर्तव्यमिति स्पष्टमेवोक्तमिति वृत्तिग्रंथं [illegible] त्याहुः ने [illegible] लिटि [illegible] जभोरिति प्राप्त
नुमो निषेधो यं रभेरिति लभेश्चेति च नुम्विधायके क्रमेः कर्तरीति लुक्क्रमोरित्यत्र वार्तिकं अनन्यभाव इति अतएव भाष्ये सोपसर्गमेवोदाहृतम् केचित्तु [illegible] सत्वत्र

पक्षे दृश्यते तदुभयोरभावमिति फलोपहिततदुभयनिमित्तत्वाभावं लक्षयतीत्यर्थः पापाचक इति यङ्लुकोः अनैमित्तिकत्वान्न धात्विति निषेधो न इत्यलुगभावाच्च
मधुसूदने सात्मदाघोरिति षत्वनिषेधः स्यादपीति आदन्तलक्षणोऽस्यापायो पि के प्रस्यादिरपि षत्वमपीति निपातनादित्यनु कृष्यते बाधकेति तेन षसेवरेवादयः सिद्धाः आगमस्येति तेन
चरीधर्मागमोच्चारणं सवर्णदीर्घबाधार्थं स्यादिति वाच्यं अनन्तरस्येति न्यायेन हल्लादिः शेषस्यैव बाध इत्याशयात् वस्तुतो दीर्घप्रवृत्तिकाल एव वैयर्थ्यापत्तिरिति तद्ध [illegible] न्यायः इत्यादि
शेषबाधनं तु अभ्यासस्यानचीति भाष्योक्ते न वचनेन साध्यं अभ्यासस्य यदुच्यते तन्निमित्ताभ्यासभिन्नस्येत्यर्थः अत एव लोलुव इत्यादौ गुणः यद्यप्यत्र वचनेनेति भाष्ये नास्ति त
थापि रात्रिंचर इत्यादिप्रयोगदर्शनादाश्रितं तत्र ढ इत्यन्ये घत्वं चेति चात् हित्वमाकुच लिलुक्षेति चाहुतं लिलुक्षकरणमसहूये [illegible] आलोपः प्रियेरङ् किरेरिति [illegible] नेर्योत्वमेव
वचनं प्रज्ञ इति परत्वादिदमेव न्याय्यमित्यभिमानः पाघ्रा अत्रालुग्विकरणत्वात्पिबतेरेव ग्रहणं हरस्त इति अत्रारुचिबीजं तु भाष्यानुग्रहः टिड्ढेति सूत्रे प्रत्यासत्त्यादिदोषप्रप
वाकारस्यैव ग्रहणं चिन्त्यात् टित्वसामर्थ्यादिति चेत् धये इत्यत्राव्याप्तिः तस्मात्स्तनंधयीत्यस्य सामासिकत्वे गौरादित्वं बोध्यं ङीप्यप्युदात्तनिवृत्तिस्वरप्रसंगात्स्वरे विशेषाभावादिन्ना
ङ्ः लिंपविंदेति अमृषादीनामिति नुमः धार्यादयो हेतुमण्ण्यन्तेभ्यः शेशविगुणाया देशो अरविंदमिति भाष्येऽरविंद इति पुंल्लिंगं दृश्यते पक्षे [illegible] इदमुपलक्षणं इगुपधेभ्यः
क इत्यस्य इहेति अवनीन इति भाष्योदाहरणादिति भावः ध्याद्यधा प्या आदिति छेदो व्याख्यानात् तेन जलचरे इति इदं शाक्रोरित्यत्र भाष्ये [illegible] गेहे कः यत्तु गृहग्रहणं इति
रादेरिदं तालिनिविपचाद्यचिष्वादेर्वा गृहधातोरिगुपधलक्षणे के गृहं सिद्धं स्फटिस्त्रीकाराच्च नातिप्रसंगः तस्य पूर्वापवादत्वादिति इदं सूत्रं शाकमकर्तुमिति तत्र [illegible] धातू [illegible] रसावेति भ
सूत्रा श्रूयात् [illegible] पाठार्थो दावाभम [illegible] स्वसीरस्वामिनोक्तत्वेन सूत्रपाठे च तदंशाभावेनैवमेवौचित्यात् उद्धृत्य [illegible] तयोर्धात्वोर सामासिकः पाठः वेदेतन्तो ध्यप्रयोगो यदि
भवेत्तत्स वर्णनीय [illegible] वेनाप्रहूरेव साध्य इत्याहुः अत एव भाष्यवार्त्तिककाराभ्यां नेदं प्रत्याख्यातं नृविरवनीति वार्त्तिकं एवेति तेन वेञो वायकः सिद्धः इञस्त्विति इदमनिदितामिति
सूत्रभाष्यस्पष्टं न तु भाष्यमतेरजकीर्तिन स्यादत आह पुंयोगेत्विति तत्रैवेत्यर्थः रजनीत्यत्र तु गौरादित्वान्ङीषित्याहुः नंदक इति आप्यस्यमाननंदनक्रियाकर्त्रेत्यर्थः कर्मणः शे
षत्वेति [illegible] रनपचादयस्तु यदि नेष्टास्तर्ह्यनभिधानेन वारणीयाः ह्वा ह्वे [illegible] साहचर्यात्सानुबंधकस्यैव ह्व एव ग्रहणं [illegible] ननु उपसर्गाभावे सतीत्यर्थः तत्फलितमाह अनुप
सर्गादिति गासंदाय इति सनसू इति सूत्रे उपसर्गे पीत्यनेनात्र प्रकरणे सुप्यदेनोपसर्गाग्रहणबोधनान्नसुपीति कः [illegible] नुपेति सूत्रारंभसामर्थ्येनेनत्स्य कर्मण्युपपदे प्रष्ठो वा ऽ

त॰ श॰ ऽत्रोपसर्गेणाव्यवहितप्रयोगाद्विशिष्टक्रियायां कर्मकारकान्वयाच्च गतिसमासगर्भोपपदसमासः अत्र कर्मण्युपपदे कुम्भस्थ एव प्रत्ययः एतेन कुम्भं करोतीति द्वितीयान्तस्योपपदत्वे
सि॰ कु॰ कुम्भ अम् इति स्थितेऽनुपपदत्वेन तेन समास इति सिद्धान्तासंगतिः अणुत्पत्तेः प्राक् कृदन्ताभावेन षष्ठ्यन्तस्यानुपपदत्वात् किं चोपसर्गसंबंधात्पूर्वं कारकसंबन्धेन पदासंबन्धेन
३ साधनकार्यपूर्वमुपसर्गासंबंधेन च प्रदत्तिरित्यादेरसं गतिरित्यपास्तं आन्हृ इति न चात्र केष्वाल्लोपं बाधित्वा नित्यत्वात्संप्रसारणेन तद्वा लभ्यते इति
न्यायेन पूर्वत्वं बाधित्वा लोपे तस्याभीयासिद्धत्वेन वङ्प्राप्तो यण्याह्वु इति सिद्धमिति वाच्यं आभीयासिद्धत्वानित्यत्वे वार्णादिति न्यायानित्यत्वे वास्य ज्ञापकत्वात् तेन जुहुव
तुरिति सिद्धमित्याहुः योगो विभज्यते इति इदं केवलोपसर्गेन आत आ उपसर्गे इत्येव सिद्धे कर्मण्युपपदेऽपि न आतोनुवृत्त्यारंभात् प्रष्ठो गौरिति आत आ उपसर्गे इति कः अग्र
गामित्वेन मुख्यत्वं लक्ष्यते ह्वयमपीति चरेष्ट इति सूत्रे कर्मणीत्यपि वर्त्तत इति भाष्यदर्शनेन सुपीत्यधिकारं दृष्ट्वापि न तन्निवृत्तिः तेन तुंदशोकयोरित्यादीनां कर्मण्येव प्र
वृत्तिः सुपीत्यनन्वकर्मके च सुसात्का ग्रामितिभावः आलस्येति तयोर्गम्यमानयोरित्यर्थः तत्र सामर्थ्याद्दलसमुखाहर्त्तारिति बोध्यं मूलविभुजादिभ्य इति तादर्थ्ये चतुर्थी चे
दात्तः जनेर्न प्रतिनिर्देशः खनो घ चेत्यादौ धातुनिर्देशः डोपाकरणात्व्याख्यानाच्च इत्युक्तेरिति अनुदात्तोरित्यर्थः गोसंख्ये च सिङः ख्याजादेशः शृतेर उत्क्षेपणे इत्यत्रार्थे
वर्तमानादित्यर्थः शक्तिलांगलेति तु धमना पशक्तिः शस्त्रविशेषः सूत्रे चेति धार्यर्थे गम्यमाने सतिसूत्रशब्द उपपदे इत्यर्थः स्तंबकर्णयो रमिजपो बकर्मकौ टामाभूरिति
प्रत्यासत्तिभावः अंककरेति गृह्णाते अंगरेवानशकरेतिभाष्येण इंप्रयोजनं खण्डितं अधिकरणेशेते इत्यत्र इति सुपि कर्मणीति त्रयमनुवर्तते यथायोगं संबंध इति चरेष्ट इत्यत्र भि
क्षं अत्रानादिष्विति कर्त्तृमृति कृतानादिषूपपदेष्वित्यर्थः चोः सकर्मकत्वेपि चरेष्टः कर्मण्युपपदे नंभिक्षासेनेति सूत्रे भिक्षाग्रहणात् स्पष्टं चेदं भाष्ये ऽतआह अधिकरणेइति सेना
चरेसेनायां भ्रमतीत्यर्थः आदाय चर इति गृहीत्वा गच्छतीत्यर्थः अग्रेऽगेति पुरोग्रतः शब्दयोरव्ययत्वेन कर्मत्वासम्भवात् तद् संबंधेन त्वाहत्वयेणायशब्देपि न दसंबंधात्पिमा
क इत्यत इति अत्राह विरग्रेसर इत्यस्यालुकासिद्ध्यएदंतत्वनिपातनेन मानं पूर्वनिपातस्तु वहुशो व्यभिचरित इति कृञो हेहेतु कारणमात्रे आनुलोम्यमाराधुचिता नुवर्तनं
वानुपिति उपपदानि तु न व्याख्यानात् दिवाविभा दिवापदार्थस्यापि रात्रिविषये शक्तिमत्परत्वेन कर्मत्वात्त्र कर्मणीति संबध्यते अहेत्वा रावपीति हेत्वादिग्रहणानन्तरेति
निर्माव अतइति न परकरणे एतः कृ इत्यस्यापामेराह कस्कादित्वादिति नजिस हाते कृत्पन्नत्वेनोत्तरपदस्थत्वादनतकृ इत्यस्यापामेराह कस्केति पाणिभिसंदसंतिप

स्येतत्ः कुरुश्येव नित्यसमासे इति अमययावयवत्वात्तस्येदुदुपधस्येत्यस्य नप्राप्तिः परत्वादिति अजहेत्वादौ चरितार्थः सूत्रे चकिमादिग्रहणं न कार्यमित्यभिमानः कर्मशब्द इति
कर्मणीति चास्य विशेषणं तेन करणादौ नातिप्रसंगः पश्चाविति कर्तृविशेषणं पशुरत्रोपाधिः मत्ययांतवाच्यत्वात् एवं ग्रीत्यादिष्वपि द्रष्टव्यं स्यादवंध्यः फलेग्रहिः अर्हेर्हिबन
कालिंमन्यादावनवकाशत्वात्पूर्वे ह्रस्वे कृते ततो मुम् अन्यथा मुम्यनजंतत्वान्न स्यात् इ हानव्ययस्येति वर्तते तेन दिवामन्या रात्रावव्ययानां मुम्नेति शुनीतिपाति के गधर्वेष्विति
पाठांतरं माषा इति मृगारूतिभाष्ये पाठः असूर्य यथासंख्यमत्र असूर्यशब्दस्यानर्थकत्वेपि उपपदमितिमहासंज्ञया तस्य सुवंतत्वं सुप्रचाहितीयेवप्रकृतमेकदेशस्य कर्मत्वेन
न्यायेसयायुक्तत्वात् ललाटसाहचर्याच्चेति वोध्यं प्रियवशे खचश्चित्वं व्यर्थं खचि ह्रस्व इत्यादौ खेइत्येव खश्रो व्यावृत्तिः सिद्धा कुलीन इत्यादौ चरणं वित्यत्तु इत्यानर्दोषः इत्या
हुः मितंगम इति हलौ मतंगम इति पाठः खच्च डिद्वति योगविभागादत्र विहायस इत्यस्य संबंधस्तदाह भुजंग इति तापेरिति चुरादेर्हेतुमण्ण्यंतस्य भाष्ये श्यग्रहणमिति वृत्तिः अनित्ये
ति उपपदविधावेषानेति ज्ञापकात्वे भाष्योक्तेरितिभावः वाचिय वाकृशब्दे कर्मणीत्यर्थः संकल्पविशेषो व्रतं भयशब्देनेति येन विधिरिति सूत्रस्य भाष्ये प्रमाण्या च्छवद्रूपं
विशेष्यमादाय तदंतविधिरत्रेति वोध्यम् क्षेमंकार इति क्षेमंकरीत्यत्र गौरादित्वान्ङीष् आशिते भुव भुजो जन इत्यतो ल्ल्यंतान्ण्यो ज्यकर्मणि ताः उत्तरसूत्रात्संज्ञायामित्य
नुष्यते तेनासंज्ञायां न अतएव प्रीत्युगतीत्यादिना भावकर्माधिकरणेषु युक्तस्तदंगीनगृह्यते सोपसर्गस्य भास्यर्थस्य वा भुवः सकर्मकत्वेपि कर्मणीति न संवध्यते तस्याप्र
सिद्धत्वात् व्याख्यानादतएवाह आशितो भवतीति अन्यत्रापीति अनेनैव सर्वत्र सिद्धे सर्वत्रेत्यादि प्रपंचार्थं वस्तुतः समवाजनेरिति प्रकरणस्थेनान्येष्वपि द्रष्टव्य इत्यनेन
सिद्धे इदमपि प्रपंचार्थमेव तत्रापि ग्रहणस्य सर्वोपाधिव्यभिचारार्थत्वादितिवोध्यं दारावितिशब्देऽपेक्षयापुस्त्वं अनन्यग्रहणं स्पष्टार्थं कुमार शीर्षं अर्थविनिर्मिविष्य हर्तेमन
योरेव न भूते भूत इत्यधिकारे कर्मणि हन इत्यस्य पाठेनायमेव णिनिर्भूत इति एतदारंभसामर्थ्येन तत्र नियमात् यत्तु तत्र कौण्डिन्यन्यायात् कुमारशीर्षयोर्विशेषविहितेन णिनि
ना कर्मणि हन इत्येतद्विहितणिनि सह चरितभूतकालो वाध्यते अतएव कुमारघातीत्यादि पुनर्विधानं चरितार्थं न च तत्सामर्थ्यादिसरूपवाधः प्राप्तस्य वाधापेक्षया कालवाधस्ये
वौचित्यात् अतएव कुमारहंतेत्यपीति तुक्त तस्यव्यापस्य विधेयविषयत्वात् तत्काल इत्येवधातोरित्यर्थेन कालस्यानुवाद्यत्वात् भूत इत्यधिकारसत्वे चोक्तनियमोपपत्तिः
ति अस्य भूताधिकारप्रयोजनोक्तिः भूते इतिसूत्रे भाष्ये इति दिक् पतिघ्नीति गमहनेत्युपधालोपः घत्वात्ङीप् पाणिघं शिल्पिनि कर्तरीत्यर्थः आढ्यसु अर्थप्रयुक्ते आढ्यं

ल· धा·
ध्र· रु·
४

कुर्वन्त्यनेन कर्त्तरि तु नायं करणरूपार्थे न तत्कौंडिन्यन्यायेन कर्तृरूपार्थ बाधनात् अर्थस्यापि विधेयत्वात् अतएव कार्यशब्दवादे नियोगतः कर्त्तारं बुवन् समकत्संज्ञ इत्य
र्थो भाष्ये दर्शितः नियोगः शास्त्रं नित्यशब्दवादे तु स्वभावतः कर्त्तारं ब्रुवन्नकत्संज्ञः स्वभावतः करणं ब्रुवन् ल्युन् कृत्संज्ञ इत्यादिक्रमेणार्थः न तु कर्तर्यस्याप्रसक्तिरेवेति दिक्
कर्मारिमुषः अच्छं तेषु किं आढ्यीभविता इष्णुच् तु न गतिपूर्वेभ्यः प्रायेण त्वा च्छोलिका प्रश्नः स्पृशो अनुदके किं उदकस्पर्शः अनुदके इत्येतत्सीम र्थ्याक्किवपि न घुस
दिति संप्रसार्यं तेन स्पूर्वपदं समस्यं तत्वे दधुम्यामित्यलुगापत्तिः सन्तु अनुपसर्ग इत्यस्यानिदृश्यैव सिद्धे उपसर्गे पीति अन्यत्र सुब्ग्रहणे उपसर्गग्रहणं नेति ज्ञापनार्थं तेन
वदः सुपी त्युपसर्गे नेति भाष्यं गदमदेत्यत्रानुपसर्ग इत्यस्यास्वरितत्वमेव मध्येऽसंबंधात् अतएव प्रगृत्वमित्यादि सिद्धिः प्रष्ठे आतश्चोपसर्ग इति क इति दिक् भजो ण्विः
सुप्युपसर्गे पीति प्रवर्तते अण् बाधनार्थमिति स्पष्टं चेदं भाष्ये उपपदस्येति केऽसे चेति सूत्रं तु आममांसभस्के क्व्यादइत्येन ह्यात्त्यर्थमिति भाः अन्ये तु गंगाधरादिवत्
बाधविसर्गलदीर्घे समा धुरित्याहुः वस्तुतोऽयमसाधुरेवेति परे निरुक्तमिति आ तोमनिनिन्यत्र विजुपे इत्यतोऽनुवर्त्तमानमित्यर्थः इग्ग्रहणादुपपदस्यापि व्याभिचारु
रः वनिष शवंरीत्यत्रस्य हंररणं रोदरेडिति न्यरिषहिंसायां क्विप अत्रापि इग्ग्रहणमनुवर्त्तते क्विपचान्येभ्योपि दृश्यत इति भाष्योक्तोदाहरणस्तु इति अन्येभ्योपि दृश्यत्र क्विबपि
रव्यावितिसूत्रेभाष्यं इस्मनस्वचि हृस्वइति छादेर्घे इत्यतः छादेरिति चानुवर्त्तते लोपश्चेति अन्त्यस्येति शेषः शंस्या इति अत्रांतर्भावितण्यर्थत्वे शमित्यस्य कर्मत्वं अन्य
थातुनतत्वं प्रत्ययस्तु भयथापि सुपीत्यस्यैव संबंधात् अत्र विच् चात्क्विवित्यत्र क्विप्पदेन साहचर्यात् द्विजेवोच्यते अतएव नेतं अचं बाधितुमिति अन्यथा धातुग्रहण
सामर्थ्येन कर्मोहेत्वादिषु टबाधवत् शपूर्वकस्याधातोः क्विपात्यच बाधेनेत्यर्थः उपसर्गभिन्नएवेति सुपीति वर्त्तमाने पुनः सुपग्रहणेनोपसर्गे पीत्यस्यानिवृत्तेरिति भाव
भाष्येति अतएवोपसर्गादिति नि सूत्रे सुपीति भाष्यप्रयोगोऽनुमादिनोविमारिण इति सौत्रप्रयोगश्च संगच्छते साधुकारिणीति करोतिरत्र सर्वधात्वर्थानुवादकत्वादाह सा
धुदायीति कर्त्तर्यु कर्मभूतोपमानवाचके उपपदे इत्यर्थः व्रते सुप्युपपदे व्रते गम्यमाने णिनिरित्यर्थः स्थंडिलेति स्थंडिल एव शेत इत्येवं व्रतेऽत्र गम्यते स्थंडिलशब्दे एवेति तु न प्र
यत्नतत्वप्रसिद्धः बहुलमाभीक्ष्ण्ये बहुलग्रहणादाभीक्ष्ण्योपपदयोरभावेपि व्रत इति सूत्रभाष्यबोधिते व्रतार्थे स्यायीत्वादौ णिनिः आत्ममाने च आत्ममाने इत्यधिकदर्श
नीयमानी देवदत्तोयज्ञदत्तस्येति सूत्रेऽमिति तंत्रेणाम्प्रद्वयनिर्देशः एकं विधेयसमर्थकं अपरं प्रत्ययविशेषणमिति भाष्ये स्पष्टं तदाह स च स्वादीति अन्ये स्यामः प्र

त्ययस्यातिदेशायोग्यकार्याभावात्त्वा द्वमेगृत्त्वुतेरिति भावः श्रिमन्यमिति पररतुत्वमारितिलुगत्र नवाध्यसामान्यचिंतया सुपोधातिलिति लुग्भवत् अस्यांपि अ...र्थेन
वाधात् किंचास्यामेवहिरंगतया सिद्धत्वादपि न सुपोधातिलिति लुक् उत्तरपदाधिकारे एवापरिभाषा नेत्युक्तिसुभाष्ये उक्तिमत्युक्तिक्रमे पूर्वपक्षिणइति स्पष्टं तादृ परंतपद
त्यस्यात्रिपाद्यांवहिरंगपरिभाषायाअप्रवृत्त्यासुमाधत्वेनफलाभावेनमानाभावेनचोत्तरपदाधिकारेतन्प्रवृत्तेः सत्वात् तस्मात् श्रियंमन्य इत्येवरूपं भाष्यं मतं अतएवोपक्रमे
श्रियंमन्यइतिभवितव्यमितिभाष्येसिद्धांतिनोक्तं एवंचपूर्वपक्ष्युक्तात् श्रिमन्यमित्येवभवितव्यमितिभाष्यस्यात् श्रिमन्यइतिप्र
योगात् ह्रस्वस्यमुममोरभावस्यचकल्पनमनुचितमित्याहुः अयममप्रत्ययवत्वादेवपरः मुमासिद्धेः जाह्निप्रत्ययनिवंधनेयज्ञादिसिद्ध्यर्थमिदं सोमेनेति सोमिनलताविशेषेणया
गं कृतवानित्यर्थः अग्निष्टोमेति अग्निष्टोमसंस्थाकयागेनापूर्वंभावितवानित्यर्थः यजेस्त्यागकरणेकेव्यापारेशक्तिः तद्व्यापाररूपभावनाया व्याका र्थे करण
त्वेनोपस्थितेस्वतः पुरुषार्थत्वाभावाच्चसाक्षात्सुखसाधनमपूर्वंभाव्यत्वेनान्वेति त्यागस्यकरणत्वंचभावनाभाव्यभावकत्वमेवसर्वत्रकारणादीनामीदृशमेककरणत्वंस।
स्यावत्तमस्यापिसोतिष्टोमशब्दस्यतद्गुतिलक्षणयात्यागसामानाधिकरण्यात्करणत्वं स्वर्गादेः कर्मत्वमपिभाव्यत्वरूपमेवनतु रूप एवंदृश्यानां कामानांतपर्दे
नैवोत्केस्वः केचित्तुसांगानुकूलव्यापारएवयजेरर्थः ज्योतिष्टोमादिशब्दाश्चशब्दव्यापाराः शब्दस्यापिसंकल्पद्वाराकारणत्वमित्याहुः कर्मणिकर्मण्युपपदेभूतार्थाद्हंतेर्णि
निरित्यर्थः इदंशक्तिस्वभावात्कुत्सायामेवनेनचोरंहतवानित्यादौनेनिति वृत्तिः चतुर्विध इति ब्रह्मादिषूपपदेषुभूतेवर्तमानाद्हंतेः क्विविति सूत्रार्थः तत्राविशेषाच्चतुर्ध।
पिएवकारोविनिगमनाविरहात् तत्रब्रह्मादिष्वेवभूतार्थाद्हंतेरितिनियमेहंतेरुपपदांतरसंबंधनिवृत्तिफलोधातुनियमः ब्रह्मादिषुभूतार्थाद्एवहंतेरितिनियमेनान्या
र्थाद्हंतेरितिप्रत्ययनियमः ब्रह्मादिषुभूतार्थाद्हंतेरेवेति ब्रह्मादीनांधात्वंतरसंबंधनिवृत्तिफलोधातुनियमः ब्रह्मादिषुभूतार्थाद्हंतेः क्विवेवेतिनियमेनान्यार्थप्रतिक
लनियमकइतिभावः भाष्यंमिति तथाचभाष्यं उभयतोनियमोयंब्रह्मादिष्वेवेति क्विवेवेचयुक्तं चैतत् श्रुतोपस्थितोपपदप्रत्यययोरुपरोधापेक्षया करणल घ
त्यप्रमाणोपस्थितधातुकालयोरेवोपरोधोत्याय्यः एवंचतद्विरोधाद्धातोरुक्तेतिभाकः काशिकेति धातुनियम हनेष्यतइतिनद्भावः अत्रापिद्विविधएवनियमः।
सुकर्मादिष्वितिकृतएवेतिच एवंसोमसुत्वप्रत्यादावपि कुत्सितेतिवार्तिकमिदं यत्कर्मत्रियया संबध्यमानं कर्तुः कुत्सामावहतितत्रेत्यर्थः सोमादस्यश्चविक्रीय

ल॰भा॰ मात्राः श्रोत्रनिषिद्धत्वात्तदावहाः तेऽहन धात्र्यविकाराय निरूत्तमिति अंशुत्ववचनत्वेनेहानन्वयादुन्नरत्रानुपयोगाच्च सहयुध्वेति तेन सह युद्धान्वितप्यर्थः सर्वोपाधी
प्रौ॰कृ॰ ति भाष्ये त्वन्यथोऽपि दृश्यत इति वक्तव्यं परिखेत्युक्तं क्त क्तवत् यद्यपि [illegible] नुवंधानश्रूक्ष्मं तेनयापितदुपलक्षिते कालकारकादिदर्शनेन नत्रानुवंधस्मृतौ निष्ठात्व प्रयु
५ क्तकार्यसिद्धिः इत्संज्ञकक कारवानित्याकारात्रस्मृतिः अत एवलोत इत्यादौ नन्तस्य युक्तकार्यप्राभिन्नेत्यादो ऽएकत्वावगमात्तुङ् तमेतदिति निर्णयो न दोषः [illegible] दीर्घविधि
इत्यादेवदीर्घपहणमत्र अन्यथा गुणः स्यात्तथापि क्लियो निष्ठायामत्यर्थं इत्रेत्र वचिक्लियन्तुरित्यादौ यद्रूपं मदनुकरणत्वस्य सत्वादत्र दीर्घग्रहणं स्पष्टं चेदं भाष्ये अत
एव दीर्घविधायकसूत्रानावपि क्लियदरित्येवोक्तं रदाभ्यां चोवाक्यभेदार्थं तदाह निष्ठापेक्षयेति रदाभ्यां किं चरितं तद्धि निष्ठासंबंधितकारविशेषणं पूर्वग्रहणं भिन्नवाक्य
मित्यादौ परस्य मा भूदिति स्पष्टं भाष्ये कार्तिकेऽप्येतदुन्नरं नत्वाकारणायद्वहैः पूरस्य नत्वप्रतिषेध इति वक्तव्यं वहिरंगासिद्धत्वं तु त्रैपादिकं न रंगेष्वसतीति निरूपितं।
ओदितश्च अस्मात्परस्य निष्ठातस्य न इत्यर्थः स्वादयोदिवाद्यंतर्गणभूताः [illegible] तं जलमिति अनेन सूत्रेण [illegible] प्रसिद्धत्वाद्व्याख्यानाच्च मूर्त्वते न तु रोग इति
खनितमि [illegible] ते श्वेतिसार्थकं नहिवयेनत्वं च विभाषाभ्यपूर्वग्रहणमभिसंक्षीन इत्यर्थमिति वृत्तिः व्यवस्थितेति एतदपि वृत्तौ स्पष्टं भाष्ये तु एतन्न दृश्यते तथा
पिपदिनेव्यतेततो व्यवस्थितविभाषेतिवदतैषामनभिधानं सूचितं नत्वपादाने इति केनदीयमंपादानं न न प्रयुज्यत इत्यर्थः व्यक्तमिति [illegible] अस्य स्वरूपं तद
र्थाद्वेस्तु निष्ठानभिधानमितिवोध्यं यस्य विभाषा आर्द्धधातुकस्येत्यनुवर्तनेतेइड्विहित इत्यध्याहारः अत्रैकाच इति वर्तनेतेनदरिद्रित इत्यत्र न निष्ठादेश इति स्वरत्र
त्ययोह दोहरणं क्षीवः क्षीविकः अत्र च निष्ठा च द्व्यजनादिति निष्ठांतस्य द्व्यचोविधीयमानमाद्युदात्तत्वं नो द्व्यच [illegible] नप्राप्नोतीति इदं चेट्सहितस्य निष्ठातकारस्य लो
पो निपात्यत इति पक्षे यदा तु तकारमात्रस्य लोपो निपात्यते तदा नेदं प्रयोजनमिति व्यर्थं तयोर्ग्रहणं इड्विधिग्रहणं तु क्षीवेउल्लाघेरूद्धा [illegible] पुरिस्फुरः प्रा अत्रैव निपा ५
तनान्निष्ठायां तलोप इति मते अस्यात्रोपन्यासः अत्र प्रत्यर्थानि [illegible] भावनिपातनमित्यन्ये एतन्मते द्वयमपि [illegible] बात [illegible] दिति इदं वृत्तिरीत्या [illegible] मतेनिर्वा
तो वातेनेति प्रयोगेभ्वातस्यकरणत्वेवोध्य भावे निर्वातं वातेनेत्येव भाष्ये तु अवाताभिधान इति वक्तव्यं निर्वाणोग्निर्वातेनेत्युक्तं भावे निर्वाणं वातेनेत्येवेति [illegible] सामर
ति शैक्षय इत्यस्यादेच इत्यात्वं त्वः [illegible] पूर्वग्रहणं प्रसंक्षीन इत्यर्थमत्वं तु न प्रत्यय इत्युक्तेः अत्र त्वेछ्वेर इत्युभयोरपि ग्रहणमिति वृत्तिः एतत्सर्वं भाष्ये न दृष्टत्वमिति।

उत्वं च फलेरित्यनुवर्तमाने इति चेत्येवं सिद्धं तत्र फलनिष्पत्तौ फले त्युभयोरपि ग्रहणं व्याख्यानात् एकानुबंधकपरिभाषाया असार्वत्रिकत्वात् फले[illegible]क्ताविन्य
स्यनात्र निपातनं इड्भावस्यापि निपात्यतापत्तेः एतेन पुल्लविकसने इत्यस्य निष्ठातलोपो निपात्यत इत्यपास्तं फलेर्लत्वं नत्यादि भाष्यविरोधाच्च नन्वाङुपसर्गादि
त्युक्तेः परिक्लृप्तकृत्यस्यानुपपत्तिः परितः प्रास्तः कार्त्स्न्येन स्वर्थे न परेः कृशो प्रत्यनुपसर्गत्वात् कृत्तो कृशशब्दः कार्पण्यपर इति स्पष्टं भाष्ये [illegible]ष्यत इति वृत्ति[illegible]सि इति शेषः [illegible]
भावश्चेति निष्ठादेशः षत्वस्वरप्रत्ययेड्विधिषु सिद्ध इति सिद्धत्ववार्तिके इड्विधिग्रहणमेतन्निपातनासिद्धार्थानुवाद इति भावः [illegible]रौकितीर्ति क्लितीति निर्मूलं निष्क
लं च ताभ्यां परस्य नादेः किन्त एव संभव इत्याशयो वा नुदविदोन्दमंडूकक्षुत्पत्वरदाभ्यामित्यनेन इति वर्तते ह्रियोः प्राप्तेः अन्येषामप्राप्ते विभाषेयं परेणेति यदि तु पूर्वे सा ह
चर्यमंतरंगमित्युच्यते तदा व्याख्यानादेवास्य ग्रहणं बोध्यम् उत्त इति एतेनालज्जीत्यादेर्लुगन इत्यत्र एनिषेधेनास्यासिद्धत्वान्नेड्वृणीति निषेधसिद्धेः त्रेदिद्ग्रहणं व्यर्थ
मित्यपास्तं वरमनाशावितिपरिगणनेनात्र तदप्राप्तेः ख्यातरति ख्यादेशस्य खणादित्वात्स्वनं तत्रस्याई धातुकेन्ययोगाभावाच्चात्र ख्याग्रहणं व्यर्थमिति बोध्यम् क्रसो
वदत्वादिति एकाच इति निषेधाच्चेत्यपि बोध्यं भिन्नमिति शकलत्वजातिविशिष्टे रूढोयं तेन भिन्नशकलयोः पर्यायत्वान्न सहप्रयोगः निष्पन्नस्य शकलस्यान्य
स्मिन्विदारणे प्रतिपाद्ये भिन्नं भिन्नमिति भवत्येव किं च भिन्नं विदीर्णमिति सामान्योपक्रमे भिन्नमिति प्रयोग इति स्पष्टं भाष्ये इरितो निष्ठायां इडिति वर्तमाने पुनरिड्ग्रह
णं नित्यत्वाय निष्ठायामित्येतत्तु यस्य विभाषेति निषेधबाधनार्थं स्यात् वसति क्षु अत्रापीड्ग्रहणमावश्यकं पूजार्थादिति पूजाविषयार्थकादित्यर्थः नागां श्चाञ्चित
[illegible]मिनइत्यादौ [illegible]धाने न पूजा गम्यत इति तत्रापीट् सिद्धः ननु गार्ध्ये इति माध्यार्थे दैवादिकस्य सूत्रेण ग्रहणं किंतु विमोहनार्थतौदादिकस्यैवेत्यर्थः लुब्ध इति
घ[illegible]भावानित्यर्थः उदाहरणे प्राप्तमोह इत्यर्थः आदिकर्मणि निष्ठेति आद्येषु क्रियाक्षणेषु भूतत्वाभावात्प्राप्ता निष्ठेति वचनं आदिभूतावयवे समूहरूपमा
[illegible]स्य तस्य समस्याभूतत्वं यथा श्रीयते तदेदं प्रत्याख्यातं तदुक्तं यत्कृतं [illegible]रभिसमीक्ष्य प्रयोग प्रकृतः कटं प्राकार्षीत्कटमिति च यदा वेणि कां [illegible] कटम्[illegible]मिसमी
क्षितः तदा प्रकृतः कटमित्येवं भवतीति भाष्ये विभाषा भावादिकर्मणोरिति निषेधप्राप्तेरिदं सेडन्त इति अस्यानिड्भावादिरं स्वरूपकथनं अत्र मृषिः सर्वोपि गृ
ह्यते श्वीदित इतीति ननु नित्यत्वात्संप्रसारणपूर्वकत्वयोः श्युक इत्येवं निषेधसिद्धेः श्विग्रहणं व्यर्थमिति चेन्न श्र्युक इत्यत्रोपदेश इत्यनुवृत्तेरेतत्त्वं नित्या

ल॰ श॰ दिसिद्धिः शृतमिति अत्राल्लिधिलोपिकल्प इत्यादिसामर्थ्यात्पूर्वरूपस्यसंप्रसारणत्वं तत्सामर्थ्यादेवक्वदिति ङ् सूत्रस्थभाष्यरीत्येकादेशस्याचः परस्मिन्निति स्थानिव
धी॰ स॰ त्वे प्राप्ते इति अनुदात्तोपदेशेत्यनुनासिकलोपः अनित्यत्वज्ञापकैरिति इदं भाष्ये न दृश्यते क्तान्तेनोरिद्त्वमसमर्थमितिपरे दरिद्रितेति न निवर्ततेति सूत्रे तद्वा
६ त्यातिः यदि सिध्यादिसाधने धात्वर्थस्तुच्यादयो निपात्यन्ते तर्हि स्तुभितमर्थे नेति नस्यादत आह समुदायेनेति अन्यत्रप्रयोगस्तु सादृश्यान् स्वांतशब्देन वाच्यो विषयेषु
अविक्षिप्तमनाकुलं मनइत्युच्यत इति कैयटः ननु घुषेरादित्वाद्विकल्पेप्राप्ते तदंशे नित्यार्थो विधिः स्यात्तत्रश्चभावादिकमभ्यामन्यत्र वैयात्याभावेपि आदितश्चेति नि
षेधएवस्यादत आह भावादीति वैयात्यमविनीतता हृष्टदन्त इति अत्रारुचिबीजं तु अवैयात्ये भावादिकर्मणोरनभिधानेमानाभावइति तत्रादित्वं सफलमिति तदा
ह माघवत्तिति इडितो न लोपश्चेति अनिदितस्तु नलोपवर्जमिति भावः इदं च जितिरीत्या भाष्ये तु इदित एव निपातनं अनिदितस्तु दृहितमित्येवेत्युक्तं दृहदृहीति प्र
मौत इत्यर्थस्यैवानुगमादिति भावः घुषिर् शब्देनाभिप्रायप्रकाशनं विशब्दनं तेदाह शब्देनेति लिलुके चेति तेनोपधागुल्लोन अधीयमाने इति तदर्थेचेत क्तोतं वर्त्तते
इत्यर्थः रोमांच इति कर्मणि क्तः इत्तं ह्वदसइति प्रयोगस्तु केवलात्ह्वदेरकर्मकाद्भावे बोध्यः तत्र हि यस्यविभाषेतीट्प्रतिषेधः एवं तासु भावे क्तो दुर्लभः नपुंसके भावे
इत्यस्याप्यकर्मके भ्यएवविधानादिति स्पष्टं भाष्यादौ केवलः श्रातिः कर्मव्यापारे वर्तते ततोऽकर्मकत्वात्कर्तरिक्तस्तदाह स्वयमेवेति मतो णिचि पृच्छिना समानार्थात्क
र्मणि तदाह पक्वमिति क्षीरमित्यादि तथा च भाष्यं किं निपात्यते श्राश्रप्योः शृभाव इति श्रातिः पच्यमानकर्तृकव्यापाररूपे कर्मकर्तृविषयएवस्वार्थे वर्तते ततोकर्मक
त्वात्कर्तरि क्तः णिजंतस्तु सुरव्यपच्यर्थे ततः कर्मणि क्तः शृतं क्षीरं देवदत्तेनेति कैयटः क्षीरहविषोरिति वक्तव्यं क्वमाभूत् श्राणा श्रपिता वा यवागूरिति अपेः पुनर्व्या
पारे णिचि पाचनात्मकालार्थे श्रपितं क्षीरं देवदत्तेन यज्ञदत्तेनेत्येव ननु शृतमिति श्रपेः शृतमन्यत्र हेतोरिति वक्तव्यमिति वार्तिकात्त अंतर्भावितण्यर्थपचेर्पेरपि पा
कपदेनतस्याप्यभिधानसंभव इति तदाशयः एतेन तस्य पाकत्वाभावादेव निपातनाप्राप्त्या इदं वार्तिकं व्यर्थमिति कैयटोक्तं परास्तं क्षीराज्यहविषां शृतमित्यमरस्तु तेन ६
मादः वासांत दांत शांत योर्णिलोपइडभावौ निपात्येते अनुनासिकस्येति दीर्घः दसस्पष्टछन्नेषु णिलुगिडभावौ तप्ते अमिम त्वाणिलुगिडभा
वौ पक्षे ज्ञापित इति केचित् ज्ञप मिच्चेति चुरादेर्णिलोपइडभावौ इति कैयटः छन्न इति त्वमित एव निपातनमिति स्पष्टं भाष्ये रुष्यमसंघुषास्वनां विभाषेति प्राप्तविभा

षति न वेति सूत्रे भाष्यं लोमस्विति कर्तृषित्यर्थः इदमजर्यमित्यत्र भाष्ये स्पष्टं केशानामपि लोमत्वात्तत्रापि विकल्पः अन्यत्र त्विति अर्थभेदेन रूपद्वयमर्थवे[illegible] विस्मितप्रभ
तिघातयोरिह स्यायसूत्रं अपचितेचायश्चिभावइडभावश्चनिपात्यते क्तिनि नित्यं चिर्वाच्यः अपचितिः प्यायः पी अत्र भाष्यं आङ्पूर्वादंधूधसोरेव नेह आप्यायना
श्वं इः तथा आङ्पूर्वादंधूधसोः नेह प्रप्यानोंधुः प्रप्यानमूधइति आङ्पूर्वादेवेति नियमे नोपसर्गान्तरमेव निवर्त्यते तेन केवलस्याप्याप्योपत्तिः [illegible]आश्रयणेनाति
यमद्वयविधानात् केवलस्य सर्वत्र पीभावः पीनोंधुः पीनमूधः पीनं मुखं पीनमुखी कन्येति तेन विभाषाग्रहणमुदस्तिरेवात्र लभ्यते व्यवस्थितेत्यादि मूलं तु स्पष्टमनुरो
धेनेति बोध्यं घ्नतिस्यति दोसोमास्थ इति सिद्धे ष्तिपानि ई घ्रा उपसर्गात्सुनोतीतिवत् इत्वित्यादि नत्वं तु स्वविषये परत्वादस्य बाधकमिति भावः मामाड्श्ति गोमा दाग्रह
णे घविशेषादिति भावः नकारादाविति यस्मिन्विधिरिति न्यायादयमेवार्थो ननु तां तेदधानाविनीति भावः स्वृघ्णास्नक्तस्पठि नचलोसिद्धत्वात् धापस्यायस्मिन्विधिरि
त्यस्याप्रवृत्तौ कर्त्तव्यं तत्र पठितायां वा धेनतां तदा धातुपदटिनोत्तरपद इत्येवार्थ उचित इति तां तेरोषोदीर्घत्वं स्यादिमे दोषो निष्ठान त्वं धांते दोषो धातुपाठस्यां तेदोषस्तस्मा
त्स्यां त इस्ते तद्व्याख्याशयः दइति च षष्ठी सप्तम्यर्थे सन्निपातेति न च नत्वधत्वयोरसिद्धत्वादस्या अप्रवृत्तिरिति वाच्यं असिद्धस्यापि तद्विघातकविधेरनया वारणस्य कृत्वे
जंतसूत्रे भाष्ये ध्वंवितत्वात् जग्धमित्यादौ धत्वानापत्त्याई इष्टविषये सन्निपातपरिभाषाऽनित्यत्वाश्रयणमावश्यकमिति तु भाष्याशयः चशब्दादिति अत एव प्रकृत
सूत्रस्थ प्रवृत्तमवतामित्यवकाश इति भाष्ये इलीति सूत्रस्थं नीतावीतं तु दाहरणपरं भाष्यं च संगच्छते नीतमित्युत्तरं वीतमित्येव पाठः सूत्तमिति त्वपपाठः गतिश्चेति सू
त्रे भाष्ये सोमत्वे उपसर्गत्वप्रतिषेधात् वा कोश अत्राप्यप्ययदर्थ इति वर्तते निनदीभ्यां निपूर्वस्नातेः कौशलेऽर्थे निष्णातस्यैव प्रचुरप्रयोगदर्शनादिदमत्रोपन्यस्तं
कपिष्ठलो गोत्र इह पारिभाषिकमिति भाष्यस्वरसः गोत्रप्रत्ययस्य प्रकृतित्वेन दृष्टोयः कपिष्ठलशब्द इति व्याख्येयं अस्यात्रोपन्यासः प्रासंगिकः एवं विकुशमिपरीत्य
स्यापि गत्यर्थाक आदिकर्मणि चेति सूत्रात्क्तः कर्तरि चेति वर्तते क्तोऽधिकरणे ध्रौव्यर्था प्रायेणाकर्मकाः अत्र वदन्ति गत्यर्थेत्यनेन सकर्मकेभ्योपि भावेऽनेन [illegible]विधा
नात् अत एव भ्रांतदेशमित्यादिसिद्धं अत एवाजर्यसंगतमिति सूत्रे [illegible]र्थोनाक्त इति संपन्ने कर्तरि क्तस्य दृष्टत्वात्कर्तरीदं निपातनं तर्हि कर्मण्यपि तत्र तस्य दृष्टत्वात्क
र्मण्यपि स्यान्न जीर्यतेरकर्मकत्वात् [illegible] न एवं तर्हि भावे ततः क्तस्य दृष्टत्वात्तत्र प्राप्नोति तस्मात्कर्तरि निपातनमिति वक्तव्यमिति भाष्ये उक्तं अत्र हि भावे क्तो न कर्तरि

बा॰ प्र॰ कर्मलिङ्गं तथाहि सति कर्तृकर्मवाचकेनाप्रथमायाः त्युप्रत्वाजिके नन्त्रसमासो दुर्वारः स्यात् क्तोधिकरणे चेत्यनेन भक्षणार्थेभ्यस्तु न भावे व्यवहितपाठे तत्र कर्तरि भाव
शे॰ कृ॰ कर्मणोरिष्टत्वमुक्तेः अत एव पीतात्राः स्नाणः इत्यादिसिद्धये कर्मक्तान्ताद जनतनाश्रिता भाष्यकैयटयोः अत एवास्मिन् सूत्रे चायथा प्राप्तमित्येव व्याख्यातं गत्यर्थेति सूत्रे
७ अविवक्षितकर्मकाणामपि ग्रहणं नचाश्रितः कर्तेत्यत्र त्वभाष्यविरोधः तत्र आङ्पूर्वाद् श्रोः सकर्मकत्वात् कर्तर्यप्राप्तः क्तो निपात्यत इत्युक्तमन्यथा मातुः संयोगे इति व
दविवक्षितकर्मत्वे माकर्मकतायां सूत्रेणैव सिद्धे निपातनं व्यर्थं स्यादिति वाच्यं तस्य भाष्यस्याश्रित ओदनं देवदत्त इत्युदात्तप्रयोगस्येष्टत्वे न तदर्थं निपातनमित्या
शयस्यापि वक्तुं शक्यत्वात् अत एवाश्रितः कर्तेति निर्देशस्यायुक्तत्वं न विचारितं भगवतास्तत्वा नित्यर्थे स्त इति तु नायाद्यं विवक्षायाः प्रयोगार्थेनत्वादित्यस्तं भुक्त
मस्तीति भुक्तमन्नमित्यर्थः इत्यादीति अत एव समवतेः सृत इत्यत्र वर्तमाने क्तेर इत्यजेर्वीत्यत्र कैयटः जीतः क्त इत्यादौ मन्दूकप्लुत्या वर्तमान इति संबध्यते चात्र श्नज्ञि
ञः सर्वकालतायां भूत इति सूत्रे भाष्ये उक्तेः जीर्ण इति जीनो जीर्णो जरन्नपीत्यमरः तस्येति अनंतरस्येति न्यायेन लिटः कानज्वेत्यत्र पूर्वेण लिट एव ग्रहणात् योगवि
भागउत्तरत्र क्वसोरेव संबंधार्थः कानज्वेति वाग्रहणं तु यस्येति ङः श्रवणार्थं वासरूपन्यायस्त्वादेशेषु न अत्र च इं वा ग्रहणमवलिंगमिति ध्वनितं भाष्यकैयटयोरिति
स्पष्टमेव तेन सदादिभ्यो भूतसामान्ये लिटः पक्षे तिङ श्रवणं शातृविषयेयथातिङ स्तथाव्यपत्ते इमौ कानच्क्वसू छंदसौ इत्यत्रैव भाष्ये स्पष्टं विभाषा पूर्वाह्णापराह्णाभ्या
मिति सूत्रे पपुषः इदं पपिवद्भ्यामिति प्रयुक्तं तेन लोकेपि क्वचित् क्वसोः साधुतेति सूचितं प्रकृतसूत्रस्थ भाष्यं त्वेजूप्रकृतिकक्वसुपरमिति बोध्यं एकाज्ग्रहणसामर्थ्या
त्सम्पमाह कृतद्वित्वेति द्वित्वोत्तरमभ्यासादिकार्यप्रवृत्ते पक्षे काचामित्यर्थः तद्धिनानेकाज्भ्यादत्तयेन त्रसिट्याम सत्वान्मैत्रैतथा प्रयोगाभावाच्च नचाममभावे जागर्ति
र्वावर्ज नमेकुमरीदूरणमिति न्यायात् दरिद्रातेस्तुकृतद्वित्वानामित्यर्थाभावे आद्ग्रहणस्यभूतपूर्वाकारांतग्रहणे न दरिद्रोपर्यन्तपानं तद्भावत्र्यत्वमित्येकाज्ग्र
हणसामर्थ्यात्रशेदिनां नभवत्येवेडिति बोध्यं घसिग्रहणभावेतु द्वित्वात्परत्वान्नित्यत्वाच्च घसिमसोरितिलोपे द्वित्वनिमित्ताज्निमित्तत्वाभावेन द्विर्वचने चीत्यस्याप्र
वृत्तेन कृते न द्वित्वं न स्यात् ततस्त्वेड्लोपयोर्नित्यत्वे न परत्वादिटि ततो हल्ग्रहणं नर्थक्यमन्यत्रापि भावादित्युक्ते लोपे द्विर्वचने चीति सिद्धमिष्टं गोत्येषामिति॥
कारिनियमात्यात्तस्यनियमोयमितिभावः नचघपिवानित्यादौ सन्निपातपरिभाषया आतो लोपो न स्यादिति वाच्यं तस्या अनित्यत्वात् [illegible] ग्रहणमेत

हुवेयलिटैव संबध्यते तेनपदेसलु अरिद्धेरसीत्यस्यानित्यत्वं सिद्धे भाषाग्रहणं सर्वत्र प्रवृत्त्यर्थं तेनाद्यतने लङ् परोक्षे लिडित्येतत्तद्धि[?] लिटो वै
कल्पिकत्वात्य सूत्रयोः प्रवृत्तौ तिअंश्श्रवणमिति दिक् अश्नोतेरिति अत एव न नुट् साहचर्यादिति लुग्विकरणपरिभाषासहकृतादित्यर्थः एतेन हूं[?] साहचर्यो दि
जेरपि ग्रहणं स्यादित्यपास्तं दक्षो[?]श्चेति वार्तिकं लटः शः अनंतरस्येति न्यायेनैतौ वर्तमाने लडिति विहितस्यैवेति वर्तमानसामीप्य इत्यादौ भाष्ये स्पष्टं पचमानमिति
अश्नातेर्ङितः इति नमुक् इत्यपवादत्वात् अत इति तपरत्वान्नेति तु चिंत्यं यदागमाः इत्येन तद्व्यस्यतपरत्वेनाव्यावृत्तेः अत एवादुपदेशान्मरत्वं प्रयुक्तस्वरसिद्धि
रिति दिक् क्वचिदिति कदाचिदित्यपि बोध्यं तेन पचति चासन इत्यादिसिद्धिः वासरूपन्यायस्तु आदेशे न तु नेति स्पष्टं सेव भाष्ये तु लटः शतृशानचावविभाषा वर्त
तु प्रथमासमानाधिकरणेन नित्यार्थमिदमित्युक्तं तेन यत्प्रथमासमानाधिकरणे विकल्पबोधकं सदादिभ्यो बहुलं इङ्धार्योर्वेति वार्तिककारेणोक्तं तन्न कार्यं योग
विभागेन सिद्धेरिति बोध्यं संबोधने च इदमुत्तरं च सूत्रं प्रथमासमानाधिकरणेन नित्यार्थं शयाना इति शयनं भुज्यर्थपरिचायकं न तु सूक्षितभुक्त्यर्थेन च्यव
नाः परिवाप्नुते इत्यस्य अर्जनं वासस्य फलं हरिदर्शनं मोक्षसाधनं इहलक्षणत्वादिद्योत्यं शत्राद्यर्थेस्तु कर्त्रादिरेव क्रियाया इति किंयः कंपते सोऽश्वत्थ इ
त्यादौ माभूदिति क्वेरिति सत्ताविचारार्थयोरात्मनेपदित्वात्तयोः शतुरसंभवः लाभार्थस्य विकरणेन व्यवधानमिति भावः तौसत् अनुवृत्त्यैव सिद्धे तौ ग्र
हणं पुनः श्रानञ्चा नग्रहणार्थं तेन हेष्यन् हेष्यमाण इत्यादावपि पूरणगुणेति निषेधः क्वचिदिति कदाचिदित्यपि बोध्यं तेन नतिङ्सिद्धिः लृटः सद्वेत्य
स्यापि भविष्यदधिकारविहितलट् शेषे चेति लृटैयव प्रवृत्तिरित्यनेवक्रुस्यमर्थेन्यत्र भाष्ये स्पष्टं अकेनोरिति अनायासेन क्रियानिर्वर्तक इत्यर्थः द्विषो
ऽमित्रे अमित्रं किं द्वेष्टि पतिं भार्या नामित्रेव तीत्यर्थः सर्वे इति सत्रिणः सर्वे यजमाना एवमुच्यंत इति शेषः आकेः भा जन्मासेति क्षिपमाई[?] इत्यर्थः ताच्छीलिका
प्रायेण सोपसर्गाः केवलाः क्वचिदिति सूत्रे भाष्ये स्पष्टं तच्छीलः फलनिरपेक्षप्रवृत्तिः तद्धर्मा स्वधर्मोयमिति यः प्रवर्तते साधुकारी यो विनापि धात्वर्थस्य साधुकर्ता तृन
कर्तेति लोके त्रिषष्ठीनिषेधः तद्धर्मा मुंडयितारः श्राविष्ठायना[?] वधूमूढां साधुकारितोकर्ता खेटमिति भुवश्च योगविभाग उत्तरार्थः इंद्लोकमस्ता
धारणमिति आकृषमभोगोति मस्कृत्य भाष्ये स्वरसः तत्र हि अचामित्यनुवर्त्य आदर्शो भवितेत्यत्र कर्तरि भुव इति खिष्णु च खुकञौ नेन्बुन्त्वो ताच्छीलिक इ

ल॰ श॰ षुत्र्॰ ..स्मान्नभवतीत्याशंक्याह [illegible]काशालाच्छीलिकान्तर्थं [illegible] गतिभिर्विशेष्यंत इत्युक्तं नैतदिति छांदसत्वमनुक्तसंग्राहकत्वं चेत्यर्थः शामिनीतरेति सं
शे॰ कृ॰ त्वापूर्वस्य [illegible]तिनिषेधात्पसंप्रवत्वंनेति बोध्यम् ग्रहणमिति युवोरित्यत्र [illegible]विन्यत्र भाष्ये स्फुटमेतत् घित्वलकर्मकोऽयं एवेति भाष्ये घित्वसंपर्कादीकुर्वाद्ये [illegible]णिति अत्र
८ [illegible]जेतिनिपातनान्नलोपस्य त्यनिर्दिष्टामित्यत्र भाष्ये स्पष्टं पूर्वत्वेति सकर्मकपक्षे ल्युयुचोरनभिधानमिति भावः ननु वासरूपन्यायेन युजपीत्यत आह तेनेति ज्ञाप्यत इति शेषः
कृषितेति [illegible] अन्ययेप्रयोजनाभावात्स्यत्वाभावे श्यनो दी[illegible]स्पृहयालु प्रमृतौ सिद्धे निपातनाच्छुच्छुवस्यधातोर्देन समासेअजहात्यपि तं द्राव
न विशिष्टात्यत्यय धातोर्विधानाभावात्सार्वधातुकत्वाभावाच्छप आलोपस्याभावे श्रद्धालौ च सिद्धे आलुज्विधानमन्यतोपि विधानार्थं तेनेदं सिद्धमिति स्पष्टं भाष्ये।
घसरे घसिः प्रकृत्यन्तरं भंगुरः कर्मकर्तर्येवेष्यत्वात् कुलं अजस्रमिति निपातनाद्धातुना समासेरः आदृग अत्र क्याच्छन्दसीत्यतः छन्दसीत्यनुवर्त्तते अत एव भाषायां
धातुः कृत्स्विति वार्त्तिके भाषाग्रहणं चारितार्थं आदितिदकारः तेनऋग्रहणे न दीर्घान्तस्यापि तृगृत्यादेः स्वरूपेणाधेनातिदेशाप्रसक्तोऽस्तिवारयोन असंयोगादि
त्यविकित्वे सिद्धे पुनः कित्वं जागुरिसृजुरिरित्यादौ ऋच्छत्यृतामिति गुणनिषेधार्थं काशिकेति भाष्ये तु नेत्यर्थः ईश्वरेति ईश्वरीति तु पुंयोगे विभाषेति [illegible]वेति
पत्वं धूरिति राल्लोप इति वलोपः तन्नेति वासरूपविधिर्न ताच्छीलिकेषु निषिद्ध इति भावः दीर्घोसंप्रसारणं चेति अत्रासंप्रसारणं चात्र दीर्घं च न सामर्थ्यानु
वादः तथा हि प्रत्ययसन्नियोगेन विधानादंतरंगतया दीर्घत्वे कृते संप्रसारणे पूर्वत्वे च कृते तलक्ष्ये लक्षणस्येति पुनर्दीर्घाप्रवृत्ते वचिप्रच्छ्योर्लाडविधानमनर्थ
कं स्यात् अन्यथा क्विप् सूत्रेण सिद्धे तयोस्तत्र ग्रहणं व्यर्थमेव स्यादितिस्पष्टं भाष्ये एतज्ज्ञाप्यप्रामाण्यादेव लक्ष्ये लक्षणस्येति न्याये विकारकृतलक्ष्यभेदानाश्रयणमित्य
हुः वार्त्तिके इति अन्येभ्योपि दृश्यत इति सूत्रमप्येवमेवेति बोध्यम् वस्तुत उणादिसूत्राण्यपाणिनीयानीत्यनुपदं निरूपयिष्यामः दिद्युदिति द्युतिस्वाप्योरिति संप्रसारणं जग
दिति गमः क्वाविति मलोपे तुक् दीर्यतीति दीर्यते वा ददरिति भाष्यादिवा दावप्ययमिति भावः भुवः संज्ञायां इत्यंसंज्ञान्तरयोः किं वेवेति नियमार्थे विपरीतनियमस्तु न विधे
यसंकोचापत्तेः मितद्रुरिति किं पितु कृ स्यात् मितद्रुव इत्यत्र चोवङ् स्यात् धेटो धातश्चेति प्रयोगेषु द्वयोरर्थ निर्देशादिति भावः अत्र कर्मणीति नोपपदं व्याख्यानात् दीर्घ
इत्यातिशपाविदि [illegible] संजेतिनलोपः दंष्ट्रायामजादित्वाद्दाप् न धीति नहोधः षित्वान्ङीष् करण इति नोपपदं व्याख्यानात् वृत्तिरित्याय [illegible] न्याह [illegible]

कारणे इति एवमन्वयेऽहं इत्यस्यासाधुत्वाय तस्येऽभयान्वय इति कर्तरि कृदिति सूत्रस्थभाष्यस्वरसः पवित्रमिति पावमान्यादिसूक्तमित्यर्थः अयोऽणं स्वःप्रायऽणादिप्रत्य
यान्ता हि दिशब्दा अवयवार्थशून्या असंतमध्यवयवार्थमाश्रित्य व्युत्पाद्यंते तेन न अपि प्रायः कर्तरि बाहुलकादन्यत्रापीति बोध्यम् तत्रापि प्रायो वर्तमानकाल एवेति भूते इति
सूत्रे भाष्ये तत्र हि निन्साहनेरहश्चेत्युणादिसूत्रविहितासिप्रत्ययान्तो नेहसशब्दो वर्तमानकाल एवान्यत्र नाहंते त्युक्तं तृचण्वुलौ वर्तमानकाल एव साधुतायां बहुलं तृच
विति सूत्रे भाष्ये उक्तत्वेनेदं भाष्यमेकदेश्युक्तिः अत्र वदंति कृवापेत्यादिसूत्राणि सर्वनामधातुजमिति नैरुक्तमतानुसारि शाकटायनादिप्रणीतव्याकरणतारामियुक्तैः
संगृहीतानि अतएवोणादयइति सूत्रे बहुलवचनं किमर्थमिति प्रतीकमुपादाय उणादयः इत्युणादीनां शाकटायनप्रणीतानां साधुत्वाभ्युपगमनार्थमस्तीति भाष्यकृदिति
कैयटेनोक्तं न स्वीयां पाणिनीयत्वेन शाकटायनशब्दप्रयोगो युज्यते अतएवाष्टमे गुरिश्चलोवेत्युणादिसूत्रे बोधितसाधुत्वानां [illegible] मशुक्लादीनां साधुत्वाय स्मर
त्वार्थं कृयोरोल इति सूत्रे वचनमारब्धं वार्तिककृता बाहुलकं प्रकृतेस्तनुदृष्टेः प्रायसमुच्चयनादपि तेषां कार्यसशेषविधेश्च तदुक्तं नैगमरूढिभवंहि सुसाध्विति बहुल
ग्रहणप्रयोजनमुक्तं शास्त्रान्तरे असृतेभ्यः प्रकृतिभ्य उणादयो दृश्यन्ते प्रत्यया अपि प्रायेण समुच्चितानसर्वे तथा कार्याण्यपि सशेषाणि कृतानि अतो बाहुलकमुक्तं ननु याव
दुक्तमेव प्रकृतिप्रत्ययकार्यमस्तु किं बहुलकग्रहणेनेत्यत्रोक्तं नैगमेत्यादि वैदिकानां रूढानां संज्ञाशब्दानां च सर्वेषां पाणिनिः स्वकेऽपेण साधुत्वबोधनमशक्यत्वात्
तत्प्रायसमुच्चयमात्रं कृतं तेनेषां सर्वेषां साधुत्वाभ्युपगमनाय चानेनाचार्येण बहुलग्रहणं कृतं तेनात्र व्याकरणे सर्वेषां संग्रहात् संदिग्धं साधुत्वं बोधितं पाणिनिशास्त्रा
बोधितानामेवेदानीं साधुत्वात् ननु के ते वैयाकरणा ये नैगमरूढिभवानां प्रकृतिप्रत्ययविभागेन व्युत्पादनं कृतवन्तो वार्तिककृतानामचधातुजमाह निरुक्तो व्याकर
णे शकटस्य च तोकमिति निरुक्तेन रुक्तव्याकरणे शाकटायनश्च सर्वनाम धातुजमाह इति निरुक्ततलवादिनः एवं पाणिनिनिर्णतहुत्पन्नत्वनवादीति स्पष्टमेवोक्तं ननु यत्रा
वयवार्थानुगमो नास्ति तत्र कथं व्युत्पादनं शाकटायनमतउक्तं यन्न विशेषपदार्थसमुत्थं प्रत्ययतः प्रकृतेश्च तदूह्यमिति अवयवार्थज्ञानपूर्वकं न यत्र समुदायार्थप्रतीतिः सा
स्वज्ञानामित्यर्थः उक्तप्रत्ययसादृश्यं दृष्ट्वा तदितरो भागः प्रकृतित्वेन कल्प्यः उक्तप्रकृतिसादृश्यं दृष्ट्वा तदितरः प्रत्ययत्वेन कल्प्यः नैवं सर्वत्रोहः कार्यः किंतु साधुत्वेनाभिम
तासु संज्ञास्वेवेत्युक्तं संज्ञासु धातुरूपाणि प्रत्ययाश्च ततः परे कार्याद्विद्यादनुबन्धमेतच्छास्त्रमुणादिषु इति [illegible] दुक्तं कार्यसशेषविधेश्चेति अनेन

ल॰ श॰ भाष्यस्थवार्तिकसमूहेनोल्लसद्योबहुलमितिव्याकरणांतरवत्स्याप्रकाशमितिस्पष्टमेवोक्तं उक्तार्थं तायेष्वार्थस्वांतरेष्वित्यादिना॥
शेष्यात्मत्वचैव बहुलमितिवक्तव्यं वर्तमानाधिकारे चनेवक्तव्याः भूतेपीति च वक्तव्यमिति सूत्रार्थश्च सूचितः स्व

शे॰ कृ॰ ९ शास्त्रे तेषां साधुत्वबोधनं चैतावता कृतं पाणिनेस्तु तेषु व्युत्पत्तिपक्ष एवाभिमतः तदुक्तमायनेयीतिसूत्रे भाष्ये प्रातिपदिकविज्ञानाच्च भगवतः पाणिनेः सिद्धमिति
तत्र पाणिनेरित्युक्त्या तस्य व्युत्पन्नान्युणादीन्याः व्युत्पन्नानीत्युक्तं ततः शंकितं अत्र येषां सर्पिरादीनां सर्पिरित्यादौ रुत्वानुरोधेन सांतानां सर्पिषत्यादौ षत्वानापत्तेरिति
शंकिते सिद्धांतितो नोक्तं एवं तर्हि बहुलवचनात्सिद्धं बहुलं प्रत्ययसंज्ञाभवतीत्युक्तं बहुलमित्युक्तेरव्युत्पन्नत्वेपि प्रत्ययसंज्ञानिमित्तं कार्यं भवति अव्युत्पन्नत्वे च कार्यविशे
षप्रत्ययत्वं कार्यविशेषेण तद्भावश्चेति वर्त्सप्सित्यादावंगत्वप्रयुक्तगुणस्य षत्वाभावस्य च सिद्धिरिति तदर्थः एवं चास्मिन्मतेनि सूत्रे तादीनां ग्रहणं न्यंकादीनां चेति सूत्रे उणा
दिष्वुत्पन्नं न्यंक्वादिग्रहणं व्याकरणांतरस्थप्रत्ययानुवादेन तदनुमतिपरं अनेहावर्तमानकाल एवेति भूत इति सूत्रस्थं भाष्यं व्युत्पत्तिवादि व्याकरणांतररीत्या
अव्युत्पन्नत्ववादिपाणिनिमते तु न तदिति बोध्यम एवं तु चश्चकाराभावे मात्रादिशब्दे दीर्घापादस्याद्विपरं एवुलं चापीति सूत्रस्थभाष्यमप्रिनदृष्टैव अत एवाय
मंतेति सूत्रे भाष्यं किमयं न्कुः आहोस्वित् इत्नुः कश्चात्र विशेषः न्कौ विटि णेर्गुणवचनं तत्र णेर्गुणो वक्तव्यः स्तनयित्नुः गदयित्नुः अस्तु तर्हि इत्नुः प्रत्ययांतरं कर्तव्य
मयादेशश्चोपसंख्यानमुभयं क्रियते न्यास एवेति अस्यार्थः अयामंतेति सूत्रेनापूर्वायादेशविधायकं किं त्वेचोयवायाव इत्युतद्विहितानुवादकं लाघवान्न तत्फलं तु
णिलोपाभावबोधनं तत्र किमंतादिवद्व्याकरणांतरविहितं न्कुरेव क्ते डागमोत्र सूत्रे निर्दिष्टः अथ ततोन्य इत्नु प्रत्ययांतरमिति प्रश्नः न्कौ विटीति तस्येडादित्वाण्णिलोपा
भावे किं त्वाद्गुणाभावे नास्यानुवादत्वासंभवेनापूर्वस्य विधाने गुण एव विधेयो व्याकरणांतरवत् अन्यथास्य सूत्रस्याद्यंतांशेनुवादत्वमंतरं शविधित्वमिति वैरूप्या
पत्तिरिति भावः इत्नुप्रत्ययांतरमिति व्याकरणांतरे स्यात्सत्वादपूर्वप्रत्ययस्वरूपं कल्प्यं अयादेशे चेति अयादेशविषये ढिकिलोप इति सूत्रे निमित्तत्वाश्रयणेनापि तद्वसु ९
द्गुपसंख्यानवत् एयंतेभ्यो यथाप्रयोगं निमित्तत्वाश्रयणमूलकमुपसंख्यानं कर्तव्यमित्यर्थः आनुमानिकं वचनमेवात्रोपसंख्यानपदेनोच्यते सूत्रपाठ एवोपसंख्यानमत्रो
च्यत इति केयटोक्तमत्र न्कुग्रहणेप्यत्र सूत्रे गुणविधायके वा तत्पाठस्यावश्यकत्वेनात्र पक्ष एव विशिष्यमत दुक्तो बीजालाभात् ममतु तत्पक्षे व्याकरणांतरविहितस्यां

स्वानुमतत्वावुमात्रं न तु धर्मिणः कल्पनेति नेत दुक्तिः उभयं क्रियते इति स्नुः प्रत्ययांतरं तस्य च निमित्तत्व बोधन द्वारा एयं तेभ्यो विधानानुमानरूपमुपसंख्यानं चेत्यर्थः एवं
चास्य सूत्रस्यैकदेशतया याद्दृशानुवादकत्वसिद्धिरिति लाघवमिति भावः एतेन यदात्र स्नुग्रहणमयादृशार्थं क्रियते स्त्र्यादिभ्यश्च स्नुरेव स्यादेव लाघवमिति कैयटोक्त
मपास्तम् तत्तादृशस्वरविशिष्टानामेवा नादीनामनुवादात्स्वरविशेषावापिनास्ति एवं च लुनिरंत्यीतिसूत्रं व्याकरणं तत्स्वाणादिसूत्रेषु न स्थितमिति वोध्यम् अन्यथा व हल
ग्रहणात्क्वचिदन्यदेवेत्यर्थकात्कार्यांतरवदेषामपि कार्याणां सिद्धौ तत्वाप्यन्तरेयर्थ्यं स्पष्टमेव एतेन क्विब् चीत्युणादिसूत्रेण सिद्धे क्विब् वचीत्यादिवार्तिकं तत् क्वी ला दौ तृन्का
धामा भूदित्येतदर्थमित्यपास्तम् तेषां पाणिनीयत्वाभावात् अत एव अजेर्वीति सूत्रे वालिटीत्यतो वाग्रहणमनुवर्त्य व्यवस्थितविभाषामुक्त्वा न तर्हि दानीं वा यावितिवक्त
व्यं वक्तव्यं च किं प्रयोजनं नेयं विभाषा किं तर्हि आदेशो विधीयते वा रत्यादेशो भवति अजेर्यौ परतः वा युरिति भाष्योक्तं संगच्छते अन्यथा उत्वा या जीन्युणादिसूत्रेण वा यो सि
द्धानस्याकर्तव्यत्वमेव वदेन्न पुष्यानेनैवानुमेयोपसंख्याने अनुनासिकयण्त्वाभावादनेन न च कैयटोक्तरीत्या यन्निमित्ते तिवा ऊलकाद्युच्चारणार्थं तन्न्यायसाद्भावे
नत्तद्रूपापत्त्यभावात् मम तु तेषामपाणिनीयत्वा न्याणिनिशास्त्रे तदारंभो युक्तः यतु विप्रतिषेधसूत्रेयं न विधिरिति सूत्रे च वहिरंगपरिभाषायांस्योनः स्याने तु दास्तं तथा
करणांतरीनैव तत्र हि वा ऊलकादेर्णादिको तपरत्वपः प्याविप्रतिषेधसूत्रेन्तरंगपरिभाषाया अंतरंगत्वाद्गुणादेशे वैयाकरणइत्यादौ स्कारोकारयो वृद्धिप्रसंगे इयुवावित्ति
व्याकरणांतरलक्षणविहितयोरियुवोः प्राप्तिरूपो दोषः शंकितः प्रथमे घरत्यत्र तयोर्वारणाया चीत्यस्यावश्यकत्वेन समाधानमुक्तं यदपि कर्मवत्सूत्रे क्रिमिदं तपरतितप
रयमौणादिकोस्कंतेभावसाधन इत्युक्तं तदपि परीत्यायोगप्रदर्शनेन स्वमनोतिक्रुद्धस्य रुढियोतनायेति न तहिरोधः एवमन्यदप्येवंजातीयकं व्याख्येयमिति सुधियो विभा
वयंतिवि अमुवंधेद्वयमित्वरार्थं नित्यमेवा[illegible]ति भावः वल्गुरति कएवादिपरिभाषातिपदिकेनैव सिद्धे इदं व्यर्थं तवेति सौत्र इति तु इति सौत्रात्प्रत्ययो लिङ्गत्ति युक्तं वक्तुं टि
लोपस्तिनत्र[illegible]लोपः इत्यनेन अन्यस्य[illegible]पातनादिति वोध्यं कामिमनि अतिनेव कंतोः सिद्धौ अजिदृशीति सूत्रे कमिग्रहणं व्यर्थं केचित्तु अस्यारुचिः कैयटमाधवा
दिग्रंथविरोधः ग्रामुद चगमुच्छ[illegible]प्रत्ययरूपाणां तोरातेः अंतर्गमुतमित्यत्र कचिद्हर्वे आयुदात्तपाठमुक्तं दसः सर्वनिघृष्व अतंत्र इति व्याचष्टे अकर्नरीति इणसी
भ्यामित्यत्र सिद्धे शोवतीत्यर्थं मत आह अंतो रातेति इति प्रथमः पादः [illegible] उमागमेनैव सिद्धे कृ आदेशविधानं प्रक्रियालाघवार्थं रंजेः क्युन् रजनी गोणादित्वान्ङीषिति वा

ल· श· नृनतृचे शालिहलदादिभ्य इति पाठान्तरं ... सुस्य पाठे नु ...दित्वादिभ्यसाधुः इति द्वितीयः पादः सिवेष्टः उकारादेशेनैव सिद्धे पूकरणं स्पष्टार्थं स्थानइति अनित्यत्वाद्धात्वेरिस
शे· कु· ...ञान्नोपधागुणः दाकेन्यादौ ... त्वाम नक... हचर्य एतद्धि तस्यैव कस्येत्र ग्रहणात् लोष्टमिति तृन्वत्सूत्रे लुङ्लोष्टमिति भाष्यं समलोष्टाश्मकाञ्चन
१० इत्यत्रोभयोः पदानां गावली वदन्यायेन ... प्राश्मकाञ्चनस्येत्यर्थः अश्मपदेनमणयः लोष्टतुल्यत्वेनात्यादरणीयेपि आदराभावध्वननार्थं तदिति वा वर्त्तिकेति
शकुनीपाचां मते ... क्रन्त्यर्थमुदीचां मतेव ... गवरूपार्थवन्त्वा शकुनीपाचामितीत्वप्रकरणस्थं वचनं बोध्यम् अस्थीनि क्थिनोनित्वं चिन्त्य प्रयोजनं नचविषयत्वेनासु
दान्तत्वसिद्धेः इति तृतीयः पादः जृर्त्तिरिति ... नादाङ्पूर्वादृतेरपि आर्त्तिः धनुःकोटिः अपि आर्त्ती इत्यपि आर्त्तिः पीडा धनुःकोट्योरित्यार्त्तिशब्दस्तु आङ्पूर्वादृतेः क्तिन्
निबोध्यः अयं ह्रस्वादिरपि उणादिषु साधुः ... चेः कौ वेति अत्र चिदित्यनुवृत्त्याऽतो सञ्ज्ञो यं मध्योदात्तो वाहुलकात मरीचिरिति मिद चोन्यात् सूत्रभाष्यमञ्चेर्ण्यन्तात् दसूत्री
मागमश्चेत्युक्तं कुवश्च डिनि दीर्घविधानसामर्थ्यान्न गुणः वाहुलकाद्दीर्घगुणयोरभावे कुचोपि समीणः चट्टदीर्घश्चेति वार्त्ति जंवालेति कर्दमेत्यर्थः षंढइति शंढः प्रागु
क्तः ठस्येक इति सूत्रे शंठइति प्रतीकमुपादाय जनिदाख्य इति ठप्रत्यय इति कैयटः प्रेत्वरीति यदागमा इति न्यायेन तुड्विशिष्टस्य ग्रहणाड्डीपरो नचह संज्ञाविहितत्वेन
निषेधापत्तिः कथं चात्र तुक् छान्दसत्वादिति वनो र चेति सूत्रस्थभाष्येणास्यछान्दसत्वबोधनेन तत एव तदप्रवृत्तेः वर्णिः सौत्रइति एवं तस्यवर्णादेशइत्युचितं किंच वलपाण
नइत्यस्यवलो सिद्धेव र्णीरादेशविधानं व्यर्थमिति बोध्यं वसिवपीति सूत्रेवादिर्ण्यन्तोनिर्दिष्टो वाहुलकारण्यं तादपि एतच्च भूवादिसूत्रे आकेरे पातेडुमिति सूत्रे सस्यस्फर्हु
स्वोस्मुन प्रत्यय इति सिङ्यामिति सूत्रे भाष्ये उक्तं अपस्तिरिति अत्रत्तिचन्तो वेति ...जित्यन्ये एतत्समानार्थो गस्यशब्दोपि अगस्त्यायतीति विग्रहे आतोनुपसर्गेक इति कः तः ठमोरप्य
पत्ये अण्पलियकाररहितमागमत इत्याद्यस्य आगस्त्य इति द्वितीयस्य आद्यस्यवहुत्वे आगमसा इति द्वितीयस्य अगमस्त्य इति आगस्त्यकौडीन्य गस्त्यावेशः अगस्तिशब्दोग्नौदि
षित्यन्ये मूर्जिमपामिति मूर्जिभ्यामिति पाठ इति अनिदितामिति सूत्रे हरदत्तः पुरंजिभ्यामिति कैयटः मि थुनेऽसिः ... उरुव्यचा ...
मिति ग्रहिज्येति सूत्रे कैयट स्वरसः दीर्घ इति वाहुलकात्तदभावे पुरुरवा अपि प्रायेणेति नेनापसराः ... पकवचनान्तमपि धुनितं चेदं वर्णहितेष प्रकरणे भाष्ये इति चतुर्थः
पादः समानेस्वं इति इणितिडिदिति यलोप इति चानुवर्तते सचोदात्त इत्यस्य समानस्य सादेश उदात्त इत्यर्थः सच समासोत्तर मिति नित्स्वरेण व्यवस्था समानस्येति योग

विभागेन सह घञ्पर्यायस्य सह शब्देन वा समासे सादेशसिद्धेरस्यानुवादत्वात् श्रीओ अत्र ङित्स्वने रित्यन उदात्तग्रहणमनुवर्त्तते तत्र च श्रीअविग्रहणं तेनाद्युदात्तोयं ह्रस्वविधिसाम
र्थ्यात् तुलोन लोप इति अलोन्त्यस्य इति पंचमः पादः उणादयो अत्रोणादिशब्देन व्याकरणांतरप्रसिद्धपंचपाद्युक्ता एव नाष्टाध्यायीस्थाः तथासति कृत्यल्युट इत्यत्र रोगा
ख्यायामित्यत्र च बहुलग्रहणवैयर्थ्यापत्तेः एवं चात्र निर्णीतत्वात् ताभ्यामन्यत्रेत्यत्रापि पंचपाद्युक्तानामेव ग्रहणं बहुलग्रहणप्रपंचभूतानि सूत्राणि [illegible] इष्टभूतं पीत्यादि
तुमुन्ण्वुलौ भविष्यतीत्यनुवर्तते उपपदमिति महासंज्ञया क्रियापदं तद्वाचकपरं क्रियायां वा तत्र तिङंतोपस्थाप्यैवं तेन भोक्तुं पाक इति न उपपदमतिङ् इति भाष्यस्वरसा
दितिनिष्कर्षः पुनर्ण्वुलिति अकेनोरित्यत्र भविष्यदधिकारविहितस्याकस्य योग इति व्याख्यानेन फलं न च वर्षशतस्य पूरकः इत्यादौ ण्वुल् तृचाविति ण्वुलि पदांतरसंबं
धाद्भविष्यत्त्वप्रतीतावपि षष्ठीसिद्धिः फलं तथा एतत्कर्मकयाजनकर्तार इत्यर्थके ऽङ्ग-यजतां लप्स्यंते स्य याजकादित्वात् षष्ठीसिद्धिरपि फलमिति वाच्यं शब्दशक्ति
स्वाभाव्येन क्रियानुपपदकात् तस्य कर्तृप्रतिपादकतया पदांतरसंबंधादिना भविष्यत्त्वप्रतीतावपि अकस्य भविष्य दर्थकत्वाभावेन
तत्र निषेधाप्राप्तेरिति भावः लृट्तु सामर्थ्याद्भवत्येवेति बोध्यं अनंतरत्वादिति अत्र व्याख्यानमेवं शरणं कालः पचतीति अत्र धात्वर्थमात्रं विवक्षितं तेन न वर्तमान
त्वादि भूतभविष्यत्त्वाकं स्यापि विवक्षितत्वात् इति प्राप्तिरिति भावः भाववचना इति बाहुलकात्कर्मणि ल्युट् भावाधिकारविहिता भाववचनाः न च भाव इत्येतावतै
व भावे ये विहितास्ते ततोन्यत्रापीत्यर्थेन इष्टसिद्धिरिति वाच्यं प्रभ्यः प्रकृतिभ्यो येन विशेषणभावे प्रत्यया विहितास्तेभ्यस्तेनैव विशेषणेन भवंतीत्यर्थे वचनग्रहणस्वा
न तदाह भाव इत्यधिकृत्येति अण् कर्मणि च चात् क्रियार्थायामित्याद्या कथ्यते उपपदसन्नियोगश्च क्रियते उपपदे त्वं तु प्रत्येकमेव प्रत्येकं सप्तमीनिर्देशात् इदं सूत्रं ण्वु
लाले वा धात्मा भूदित्यर्थं न च वासरूपन्यायेन निर्वाहः पुनर्ण्वुल्विधानेनैतद्विषये न्यायाप्रवृत्तेः अत एवैतद्विषये तृजचो न कृते चास्मिन्वासरूपन्यायेन ण्वुल् पितदा हृष्णु
लोपवाद इति एवं च प्रतिप्रसवविधिरयं पुनरनुवादे [illegible] क सिद्धवासरूपविधिप्रवृत्तिमात्रं अत एवापूर्वविध्यपेक्षया लाघवं नन्वेवं कंबलदाय इत्यादावण् तस्या
रम्भेन सूत्रेण ण्वुला प्राप्तबाधस्य प्रतिप्रसवो [illegible] न बाधस्य [illegible] त्वात् अत आह परत्वादिति आरम्भस्य पुनरण्विधायकत्वेनाण उत्कृष्टत्वात्कस्यापि बाध इत्यर्थः वच
नसामर्थ्याच्चाण् तीर्थि इति भाष्ये स्पष्टं [illegible] एजित्यते [illegible] कं [illegible] धि क्रियते अयं कर्तरि सारावलमिति भाष्ये तु बलेरवदि सार इत्युदाहृतं सिद्धवस्थेति अत एवाम्ः

सि॰ शा॰ स्त्रियामिति विशेषणं संगच्छते इत्यन्तस्यैवेति तत्र घञो बाधकस्याप्युपसर्गस्य घञीत्येव सिद्धे नियमोऽयमिति भावः प्राप्तिकमिति स्पष्टं चेदं भाष्ये इङश्च अयमपि मतान्तरप्र
शे॰ कृ॰ विषयबाधकत्वे न तिनेव्याख्यानादाह अस्मादिति उपसर्गस्यैवे इत्युपसर्गे इति निरभ्योः अत्रोपसर्गाभ्यां धात्वोर्यथासंख्यं धान्येति धान्यविषयकप्रत्ययार्थप्रतिपादकादि
९१ त्यर्थः यत्रेसमि यत्र विषयकेर्थे वर्तमानात् इत्यर्थः समि मुष्टौ मुष्टिविषयकार्थवृत्तेर्ग्रह इत्यर्थः परिन्योः द्यूताभ्रेषविषयकार्थवृत्तेर्नीणोरित्यर्थः पदार्थानामनपचारो यथाप्रा
प्तस्य च करणमभ्रेषः जोपश्राय इति राजसमीपशयनस्य पर्याय इत्यर्थः हस्तादाने चेति निश्चेरयमेव वक्ष्यमाणापवादः पूर्वविप्रतिषेधेनेति भाष्ये काशीनिकाय इति काशीनिवास
देश इत्यर्थः गोमयनिकाये भावे घञ् कर्मव्यतिहारे णच् स्त्रियामित्यादौ विशेषणार्थः आक्रोशे वन्योः अनंतरोपि तेन न संबध्यते अस्वरितत्वात् वृत्तौ तेराम
सुदायेनाच्छादने गम्ये इत्यर्थः आक्षे इति प्रवरागौः कल्याणादिभ्यश्च इति वार्तिकं कल्याणार्थो मंत्रः तानामितित्वनार्थे अवश्यंकारस्याथेति विशेषणार्थः निश्चय इति सुवि
धानसामर्थ्येन अवादिस्वरो न प्रवर्तते एवं चोत्तरपदप्रकृतिस्वरेण मध्योदात्तमेतत् एतेनाचैव सिद्धं यायघञि त्यस्य प्रकृत्यास्वरे विशेषाभावात् न च हस्तादाने वेरिति घञो
बाधनार्थमस्तेयेऽस्मादयोऽनिष्टरिति पराणां घञर्थक इति स्यात्सायाह नित्यविधियुद्ध्यर्थमित्युदाहरणमात्रं बोध्यं प्रस्य विघ्नोऽरधिकरणे प्रतिषिद्धेऽस्मिन् धान्या
नीति पस्य विघ्नंति स्मिन्मनांसीति विघ्न इति भाष्योक्तेः व्यधजपो अनुपसर्गस्योपसर्गेनित्यर्थ स्तदाह व्यध इति उपजापो मंत्रभेदः अनुपसर्गे चेति उपसर्गाभावे चेत्यर्थस्त
दाह क्वण इति मदोनु उपसर्गभिन्ने उपपदे इत्यर्थः ग्लह इत्यत्राप्प्रत्ययो लत्वं च निपात्यते हनश्च वधश्चेत्यस्यानंतरं प्रत्ययसमुच्चायको यात्यो व्याख्यानात् अन्त्रवधादे
शो न तोदात्तो निपात्यत इति उदात्तनिवृत्तिस्वरेण प्रत्यय उदात्तः स्वतंत्रवधेघञर्थेकेन सिद्धे नुपसर्गादिति विशेषं वक्तुमिदं वस्तुतो विधिः स्वतंत्रो नास्त्येवेत्युक्तं प्रत्तुमाधवेन व
धे घं आसि हेतोदात्तार्थमिति जन्न एरजित्युत्तरं वध इत्येव सिद्धे हन इत्यस्य वैयर्थ्यनादवस्थान घनांतर्घनप्रघणप्रघाणोद्घनापघनेति निपातनं हने रूपं बालेते आदेशा
अप्प्रत्ययश्चेति निपातनिपसहद्घष्ठपिलनवर्क चेति सूत्रे भाष्ये स्पष्टं अंत्ये अन्तोदात्तो पेतकृते अप उदात्तनिवृत्तिस्वरेणोदात्तः आद्युपपदिषु नेत इत्यंतोदात्तत्वं बोध्यं अंत्ये हन इत्यस्य संबंधः अ
भ्यघने अप्रसंबंधि घन इति विग्रहः कर्मण्यधि व्याख्यानात्कर्मोपपदमधिकरणमर्थः अधिकरणग्रहणमर्थांतरनिरासार्थं भावाद्यावृत्ति नत्रयथाभिधानं व्यवस्था अयमने ९१
कान्यो नेत्याद्यं तत्र सूत्रस्यकैयटस्वरसः स्त्रियामित्यधिकारः कृत्यल्युट इति यावत् अजपौत्विति अजबभ्यां स्त्रीखलना इति वार्तिकोक्तेरिति भावः संज्ञायामिति भा

ष्येनैतद्दृष्टं रुष्यन इति बाहुलकादिति भावः ज्ञापकादिति तेन बाहुलकाद्ङ्यीति भावः वर्त्तत इति मंत्रे वृषेति सूत्रादिति भावः भावादाविति कथं विधाव[illegible]करणे ऽनिष्या
र्तिकान् तत्र चेन करणे संग्रहः भृंजो यंकाप्यभावे एवेति भृंजोसंज्ञायामिति सूत्रस्य भाष्यस्वरसः परिचर्येत्यादिभावेऽपि निपात्यते यक् तु सिद्ध एव अकर्तरि कारके ऽभिधानसत्वेनत्र
यगपि निपात्यः मृगयेति णिनिमित्ता जंतलक्षण इष्ठभावोऽकृत्सार्वेति दीर्घाभावश्च निपातनादिति बोध्यं अवरं न रोरिति तत्रोऽन्यतो ङ्षा घावेव अंतः शब्दस्याङ्कि विधिणत्वे
षिति भाष्ये स्पष्टं तेनांतर्द्धा अंतर्द्धिरंतर्णयतीत्यादि सिद्धिः एवं चानंतरदेशोऽयनं चेति सूत्रद्वयं न कर्त्तव्यं देशो प्रतिषेधः सुप्यादित्वात्सिद्ध इति अंतरपरिग्रह इति सूत्रे चैव य
ठः श्रा यंपत्ता श्रद्धेति निर्देशात्सिद्ध रास्निः रादिति निर्देशात्प्रत्ययसामान्याभावोऽपि मत्वर्थीय इति मतुप्शब्देन तरथ्या लक्ष्यते ततो बहुव्रीहिः स्वार्थेष्ठो बोध्यः शरीरसु
खमिति अर्थात्स्पृश्यमानस्य कर्त्तुः शरीरस्वास्थ्यजनकं सुखमित्यर्थः कर्मणीति किं तूलिकाया उत्थानं सुखस्पर्शादिति किं अग्निकुंडस्योपासनं सुखं शरीरस्येति किं पुत्रस्य परि
ष्वजनं सुखं मानसी प्रीतिरत्र वायौ इदं सूत्रं अजेर्यौ परतो वाऽस्यादेशो वायुरित्येवं भाष्ये व्याख्यातं छांदसं अत्रोपधाया इति वर्त्तते णाविति चष्ठा देशिनिर्णि प्राग्भागानु
करणं आगंतुनेकारेण घपरेणांतरस्थाद् इउपधाया ह्रस्व इत्यर्थः एतेन णेरेव ह्रस्वः स्यात् तत्सामर्थ्याच्च णिलोपो न स्यादित्यपास्तं अवेत्तॄस्त्रोः करणाधिकरणयोरित्य
नुवृत्तेऽपि यथासंख्यं नास्वरितत्वात् हलश्च अत्रापि प्रायेणेति वर्त्तते अवहारादयस्तु योऽप्यधिकरणसाधनाः उदंकोनु अनुदकविषयपक्षार्थ निपातः कांचेरुदंक इति यनि
पात्यत इत्यर्थः घृतोदंक इति वा सरूपन्यायेन घृतोदंचनोपीति कश्चित् गोदोहन प्रसादनयो बाहुलकाद्घपसो नेति बोध्यं आनाय इति निपात्यते जालं चेद्वाच्यमित्य
र्थः जालशब्दस्तु जलघातन इति धातोर्ज्वलितीति णः ततः भगः पदमिति क्वचिन्नयोगः ईषद्दुःस्विति सुखार्थे लकारः स्वार्थः खल चोरिति पचाद्यच् एर त्वग्पृत्वते नसुदुर्भ्यां
तृतीयापंचमीवेयं श्रवेप्रत्युदाहरति सुप्रलंभं इति द्वितीये आह अतिदुर्लभमिति अत्र केवलशब्देन सूत्रोपस्थितानां निर्क्तं सजातीयमुपसर्गांतरं व्यावर्त्यते न कर्मप्रवचनीय इत्य
र्थः शब्देषु तद्धुत्यन्माह यदा स्वतीति सूत्रोपात्त[illegible]केन्निविशेषणानां दुर्लभमित्यस्यासिद्धिरिति कैयटः सुदुरोरुपसर्गत्वप्रतिषेधस्तु केवलसुदुर्विषय एव अतिसुलभमि
त्यत्रैव भाष्यप्रयोगात् आतो युच ईषदाक्[illegible]नुवर्तिने[illegible]कर्मणोरिति दुष्पानेद दुष्प घस्येति षः शास्यवां क्तपच इति भावकर्मणोरिति च प्राप्ते निषिध्यते परेण
इति अत्र चांतग्रहणमेव मानं क्तिच क्तौ च [illegible]वा धात्वादेरिति पुनः क्तविधिः न क्तिचि अनुदात्तोपदेशवनतीत्यादावनुवर्तते दीर्घेति अनुनासिकस्येति प्राप्तः वं तितंत्यो

ल॰ श॰ स्तुतिस्तुत्रेतिनेट् सनः क्षिचि अस्यविकल्पत्वं ... गृहणं ... भाष्यकार आह सनोतेरिति सन इत्येव वक्तुं युक्तं अलंखल्वोः छ इसिभावलक्षण इतिनिरुक्तं अव्ययकृत्वादस
श्री॰ स॰ विभूतोभावः क्त्वार्थे पर्सित्युडादेतु समन्भूत ... न्यत ... भावे घञ् ... प्रत्यादानेऽस्तु तया व्यतीहारार्थस्य नस्यैव क्तान्तत्वस्य सूत्रेनिर्देशः समानकर्तृकयो
१२ रित्यनेन सिद्धिमाशंक्याह अपूर्वेति पूर्वत्वं ... चित्तोप ... मयते व स्त्रीदि परिमयतीत्यर्थो विवक्षित इति भावः परावरशब्देत्र पूर्वेति वाची समानकर्तृकयोः
४४ ...नाह बहुव्रीहिः पूर्वकाल इति तद्धि ... समानाद्धातोरित्यर्थः अत एव समानकर्तृकयोः पूर्वकाल इति क्रियाप्रधानो निर्देश इति भाष्ये उक्तं द्वित्वमिति पूर्वत्वस्य स
मानकर्तृकत्वस्य च भेद घटितत्वेनानेकक्रियालाभेपि सौत्रो द्विवचननिर्देश इति भावः पूर्वकालत्वं च व्यवहितमपि व्यवधानस्य च तात्पर्यबलेन व्यवस्था अत एव भुक्त्वाव्रज
ति अद्य भुक्त्वा श्वो व्रजिष्यतीत्याद्युपपत्तिः पूर्वविप्रतिषेधेनेति परत्वात्प्रतिषेधकाण्डारंभसामर्थ्यादित्यर्थः नक्त्वासेट् अनेन कित्वं कार्यं निषिध्यते कित्वनिषेधे हि कश्रवणं
स्यात् क्त्वेति किं निगृहीतः स्नुलादाविति अनुनासिकस्य क्वौ त्यतोस्नलीति वर्जते स्नलादाविति अनिदितामित्यतः क्ङितीत्यनुवर्त्य किति क्ङितीति व्याख्येयमित्यर्थः सेट्
क्त्वा च न कित् इति भावः समासेनञ् अनञिति पर्युदासः तेन नञ्सदृशाव्ययपूर्वपदके प्रत्यासत्त्या क्त्वो णेतरपदक इत्यर्थः तेन स्नात्वाकालक इत्यादौ न दोषः अनञ इ
ति वसिद्धे पूर्वग्रहणं स्पष्टार्थं अधीत्येति यद्यपि परान्तपदाद्योरेकादेशः सिद्धोऽत्र च उत्तरखण्डे सुवुत्पत्तेः पूर्वमेव समासस्तथापि तत्र परशब्देनार्थवत उपलक्षणान्नदो
षः गतिकारकेसस्यानित्यत्वात्सुवेतेन वा समासः वाल्पपीत्यस्यस्यानेल्पपि च वा म इति वार्तिकन्यासः नान्तानिदामिति प्रयोगाभिप्रायेण बहुवचनं आभीक्ष्ण्ये
ण्मुलत्वयद्यपि वासरूपन्यायेन क्त्वा सिद्धस्तथापि विभाषाग्रे इति सूत्रे णमुलयोर्विधानार्थं चकारः तत्र सूत्रे साधनान्तरजन्यस्वसजातीयक्रियापेक्षपौर्वकालरूप
साधनपौर्वकालस्य विवक्षायां ग्राह्यो नामेव ग्रहणेन तद्विषये समानादिसूत्रेण क्त्वा स तेन न्यायेन दुर्लभत्वात् नाप्यनेन आभीक्ष्ण्ये पूर्वविप्रतिषेधेनास्यैव प्रष्टत्वेनाभी
क्ष्ण्य एव तत्प्रवृत्तेः द्वित्वमिति नित्यवीप्सयोरित्यनेन यद्यप्याभीक्ष्ण्ये णमुलादिनाद्योतितं तथाप्यर्थान्तरेपि तद्विधानाद्द्वित्वरहितयोर्न तत्तद्योतने सामर्थ्यमिति भावः
नाकांक्षतेइति यद्यपि क्त्वाप्रकृत्यर्थक्रियायाः सर्वत्राकांक्षास्ति तथाप्याख्यातोपात्तक्रियाया आकांक्षानिषेधविषयः नाकांक्षितश्चेदिति युक्तः पाठः ... लडा इ
यइति कर्त्रादिविवक्षापसर इत्यर्थः भावस्त्वेतो तदाह अग्रेभुंक्ते इति अत्रैवार्थेविभाषाग्रहणं तात्पर्यग्राहकं एतद्विषये कर्त्रादिविवक्षापि पूर्वसू... विषयं ...

श॰ प्रा॰ मानाधिकरण्याभावादिति दिक् चोरंकारमाक्रोशतीति चोरशब्दमुच्चार्येत्यर्थः न चात्रानुकरणं वानिमीतीति निपातनत्वाव्ययत्वयोः सत्वान्मुमनापत्तिः अहं हि वा-
पू॰ कृ॰ दित्यत्र स्थित्यनव्ययस्येत्यनुवृत्तेरिति वाच्यं खिदकरणसामर्थ्यात्तत्सिद्धेः यद्वा कृत्साधुत्वार्थः चोरमाक्रोशतीत्येव बोधः यथा तथयोरसूयया प्रतिवचने इति वि-
॰२ ग्रहः वर्षप्रमाणवर्षा वृष्टिः गोष्पदपूरमिति गोष्पदपूरं तरामितीष्टं गोष्पदप्रं तरामिति तु न अनभिधानात् प्रातेः के गोष्पदप्रतरमिति चेष्यत इति भाष्ये स्पष्टं
समूलकृतं यथासंख्यमत्रेष्यते करणे हः हिंसार्थानां च समानेत्येव सिद्धेः हिंसार्थवचनं हिंसार्थवचनं हिंसायां नित्यसमासार्थं च तेन प्रथमे तु तृतीयाप्रभृती-
निति विकल्पेन समस्यान्तराह यथाविधीति हस्तार्थ इति व्याख्यानादर्थग्रहणं अधिकरणे बंधः अत्र संज्ञायामित्याकृष्यते तेन ग्रामे बद्ध इत्यर्थे ग्रामबंधं बद्ध-
इति नकषादिषु स एवेति सत्वाविशेषात्करोतेरत्र लिङ् न स्थेति वोध्यं श्यतीति एवं हि नामत्वरा यदावश्यकं मुखक्षालनाद्यकृत्वैव धावतीत्यर्थः येन विनेति एवं
च यन विना जीवनं न तद्ध्रुवमिति फलितं यद्यपीति स्त्रानिवृत्तिस्तु नेष्टेति भावः उपपदेति द्वितीयां तस्य स्यादिः तेन पाक्षिकोपपदसमाससिद्धिरिति भावः गेह-
स्येति व्याप्यमानतया द्रव्यस्य द्वित्वमासेव्यमानत्वेन गुणमुख्यतस्येति भावः केवलेन णमुल्न समासाभावे द्वित्वं विना तयोर्वक्रमशक्यत्वमिति तात्पर्यं अस्यतिन-
बोः अनयोः किं द्व्यहमुपोष्य भुंक्ते क्रियांतरे किं अहरत्यस्य सूनातः न गतिर्व्यवधीयते कालेषु किं योजनमत्यस्य गाः पाययति नाम्न्यादि नामशब्दे उपपदे आङ्पूर्वाद्दिशेर्ग्रहे स्व-
णमुलित्यर्थः तिर्यचीति सौत्रो निर्देश इति भाष्यं तिर्यक्कृत्येत्यनयोः समुदायोः पवर्गेन दाह समाप्य गत इति स्वांगेन स्वांगे उपपदे इत्यर्थः नसमन्यय इति कर्मधारयः नाध्यायं यथा-
संख्यमत्र नेष्यते आनुलोम्यमानुकूल्यं तच्च परच्छंदानुसरणमिति सर्वेष्टसिद्धिः॥ इत्युपाध्यायोपनामकशिवभट्टसुतसतीगर्भजनागोजीभट्टकृते लघुशब्देंदुशेखरे सिद्धां-
॥ ॥ न्तकौमुदीव्याख्याने कृदंतं समाप्तम्॥ विस्तरस्तु बृहच्छब्देंदुशेखरे द्रष्टव्यः॥

॥ श्रीगणेशाय नमः ॥ अवसरसंगत्या तद्धितप्रकरणमारभते। समर्थानां। पदत्रयमिति। तेन प्रत्येकं पदानां स्वरितत्वा द्वित्यस्य प्राग्दिश इत्युत्तर[illegible]
वधिप्रदर्शनं तु विशिष्टस्येति बोध्यं। तद्धितानामेकार्थीभाव एव प्रवृत्तिः समर्थः पदविधिरित्युक्तेरित्युक्तं। समर्थानामिति। समर्थशब्दः शक्तपर्यायः। शक्तत्वं चार्थप्र-
तिपादकत्वं तच्च परिनिष्ठितस्यैव तदाह। कृतसंधीनीति। नहि सु उत्थित इत्यस्य कल्पनयाप्यर्थवत्त्वं। समर्थानामिति निर्धारणषष्ठी। समर्थानां मध्ये प्रथमादित्य-
र्थः। तत्तत्सूत्रेषु प्रथमोच्चारितशब्दप्रतिपाद्यत्वं च प्रथमत्वम्। एवं चानेकसमर्थसंभव एवास्य संबंधः। शेष इत्यत्रापि तत्तत्समर्थविभक्त्यंतविशिष्टोऽर्थ एव शे-
ष इत्यनेकसमर्थसंभवः। स्वार्थिकेषु त्वनेकसमर्थासंभवात्प्राग्दिश इत्युत्तरं नास्य संबंध इति बोध्यं। प्राग्दीव्यतो। तेन दीव्यतीति सूत्रपठितदीव्यतिशब्दै-
कदेशदीव्यच्छब्दोऽत्र गृह्यते तेन नैवैकदेशविकृतमनन्यवदिति न्यायेन दीव्यत्यर्थ उपस्थाप्यत इत्यर्थस्यावधित्वं। अयमेव निर्देशस्तस्य ज्ञापक इति बोध्यं
। एवं चावधिमंतोऽप्यर्था एवेत्यत इञित्यादीनास्य संबंध इति बोध्यं। आदेरच इति। तेन निर्दिष्टस्थानिकत्वादिकपरिभाषाया अप्रवृत्तिरिति बोध्यं। प्रामादिकमेवे-
ति। गणपतिक्षेत्रपत्यादीनामश्वपत्यादिषु पाठादिति भावः। क्षेत्रपत्यं चरुं निर्वपेदिति तु छांदसं। दित्यदि। पत्यंतादिति तु नोक्तं परमप्रजापतिशब्दादप्यापत्ते-
उत्तरपदग्रहणे तु यत्समासरूपं प्रातिपदिकं प्रतिपतिशब्द उत्तरपदं तस्यैव ग्रहणान्न दोषः। प्रत्ययविधौ तदंताग्रहणेन प्रमादित्यशब्दान्न। ण्यादीनां पु-
वैविप्रतिषेधेन परान्नणपवादबाधकत्वान्ङीषं ताभ्यामपि लिंगविशिष्टपरिभाषयाण्यस्य प्राप्तेर्दैतेयादितेयावसाधू। न च लिंगविशिष्टपरिभाषाऽनित्या
। अत्राप्रवृत्तौ मानाभावात्। दितिवनस्पतिभ्यामपत्यसमूहयोर्ण्यस्यैव ष्टतायाभाष्याञ्जाभाच्च। तयोः क्वचित्तदंतान्ङीषि च दृढप्रमाणाभावाच्च ङ्याप्सूत्रे भा-
ष्ये लिंगविशिष्टपरिभाषादोषेषु स्यात्तु[illegible]। दोषांस्त्वपि साकल्येन गणिता इति भाष्योक्तत्वान्यत्रानित्यत्वे मानाभावाच्च। अकार इति। अश्वपत्यादी-
त्यर्थः। यं लुग्वक्ष्यतीति। अंतः पूर्वपदादित्यत्र भाष्ये इञिति भावः। लुग्वाच्य इति क्वचित्पाठः। लोम्न इति केवललोम्नोऽपत्येन योगाभावात्तदंतविधिः। अभिव्यक्ता-
पदार्था ये इति न्यायेन संज्ञाभूतस्य ग्रहणेन। अपत्यार्थस्यापि स्यान्नोकार इत्यकारानुवृत्त्यनुरोधेन साधारणप्रत्ययेषु कथनं। इति साधारणाः प्रत्ययाः स्त्री-
पुंसाभ्यां। ननु प्रकृतात्र संनियोगेनाकारसहितनगागमोऽस्तु अकारसाहित्याच्च नस्तद्धित इति टिलोपेन एवं चाजंतत्वादेव ङीपि सिद्धे नञ्स्नञीकगिति।

त॰ बो॰ वार्त्तिकेन न स्त्रस्य ग्रहणं न कार्यं। नच गोत्रस्त्रीविवक्षायां जातेरिति ङीषि सिद्धे ऽन्यक्षे तु ततः परत्वाच्छार्ङ्गरवाद्यञ इति ङीन् प्रसंग इति वाच्यं यञञोश्चेत्संघां
सु॰ न॰ कलक्षणे ष्वित्यत्रैव जातिलक्षणेपि अपत्यस्यैव गोत्रस्य ग्रहणेन ङीपएव तत्रापीष्टत्वात्। यत्र त्वन्यत्रापि जातिकार्यमिष्यते तत्र तदारोपेण साध्यं अत
१ एव स्त्रैणादित्यत्र यञञोश्चेति लुङ् न। स्त्रैणानां संघ इत्यर्थे संघांकेत्यण् चगतादृश स्त्रीविवक्षायामेत त्प्रकृतिकप्रयोगानभिधानाच्चेति चेन्न। विवक्षितान्याका
रविशिष्टागमस्याप्रसिद्धेः नजैव तु न कृतः पौंस्नेति संयोगांतलोपापत्तेः। न च स्त्रियाचञ्भवनात्पुंस्तो भं चेति कार्यं लाघवाभावात्। आक डारस्यत्वाभावेनान
यापदत्वबाधस्यन्यायेनाप्राप्तेश्चेत्यलं। द्विगोरिति हेतुहेतुमद्भावे षष्ठीत्याह। द्विगोर्निमित्तमिति। नचैवं पंचकपालीति समाहारद्विगोः संस्कृतमित्यर्थे पांच
कपालमिति स्यादिति वाच्यं। अनभिधानान्न ततः प्रत्ययानुत्पत्तेः गोत्रे लु। अन्यस्यासंभवात्तद्राजस्य बहुष्विति प्रकरणविहितलुकोयमलुक्। असंभवश्च तत्रत
त्रवक्ष्यते अत एव जनपदशब्दादिति सूत्रे तद्राजलुकोप्ययमलुगुक्तो भाष्ये। विवक्षित इति। तेन गर्गाणां छात्रा इत्यर्थे विवक्षायां बहुत्वनिमित्तप्रत्ययसिद्धिः।
अत एव भाष्ये ऽलुकः पूर्वमंतरंगत्वात् लुकमाशंक्य यदयं भूम्नि प्राप्तस्य लुकोऽजादौ न द्विते ऽलुकं शास्ति तज्ज्ञापयति समानकालावलुग्लुकाविति विषयस
प्तमीति तद्भावः। गोत्रं चात्र पारिभाषिकमेव। यूनि लगिति सूत्रस्य यवसाह चर्यात् एयञ्त्रियेति विहितस्य तु नायमलुक्। यूनो गोत्रत्वाभावात् पथ्यान्न गोत्रस्त्रि
यावान्यस्मिन्नित्यादि सूत्रभाष्यविरोधोऽभवतितथान्यत्र प्रपंचितं प्राग्दीव्यतीय इति। विषयलाभार्थं द्वितीयेनेदमकारि। आपत्यस्य। सूर्यति ष्येत्यतो यस्य एस
नुवर्त्तते हलस्तद्धितस्येत्यतो हल इति चतदाहहल इत्यादि। आभीयत्वाद्यस्येति लोपासिद्धत्वं नारंभसामर्थ्यात्। आपत्यस्येति किं। सांकाश्यकः संकाशादिभ्यो भ १
वाद्यर्थे एयस्ततो यो पथत्वा इत्यांतद्धिते इति किं गार्ग्यः। अनातीति किं गार्ग्यायणः। गगाय मिति प्राक्क्रीताच्छं यूनि लु। विवक्षित इति तेन ग्लौचुकायने छो न। वा।
क्ष्यमाण इति प्राचामवृद्धादित्ययमित्यर्थः। अजादौ किं। ग्लौचुकायनरूप्यं। प्राग्दीव्यतः यइति किं ग्लौचुकायनीयं हिते छ पैलादि। एयञ्त्रियेत्यतो यूनि लुगित्य
नुवर्त्तते। इञः प्रा। इञंताद्युवप्रत्ययस्य गोत्रार्थकादेव संभवेनाह। गोत्रेयइति तच्चेदिति। प्राचां ग्रहणं नविकल्पार्थं व्याख्यानादिति भावः नतौल। एतदिञंता
ऽअनंतरस्येति न्यायात्पैलादिलुको नापंवाधक इत्याशयेनाह। यूनि लुगिति —— वेत्यधिकारेप्यन्यतरस्यां ग्रहणं द्विगोर्लुगित्यादौ तदसंबंधज्ञापनार्थं क

त्यायनेगर्गादिभ्यो यञन्तकशब्दाद्यञिञोश्चेति फक्। कातीये आपत्यस्येति यलोपः तस्यापत्यमिति तत्संबन्ध्यपत्यमित्यर्थे सूत्रे समर्थानां मध्ये प्रथमोच्चारितात्प्रातिप
दिकाद्गणादय इत्यर्थः घकालतनेष्विति ज्ञापकात्स्वार्थे परिसमाप्तस्यैकार्थीभावान्वयेन सुबन्तात्तद्धितोत्पत्त्याव्यवहितं ततः परत्वं। यत्तु प्रातिपदिकादित्यपदं त
त्प्रकृतिके लाक्षणिकमिति तन्न जघन्यवृत्तिकल्पनाया अन्याय्यत्वात् सुप्तिङन्तस्येति पदेन उपस्थितषष्ठ्येव तत्फलितमाह षष्ठ्यन्तादिति तस्येति सामान्यशब्दे
पि वृद्धिस्थत्वेन सर्वविशेषबोधक इति उपग्वादिभ्य उत्पत्तिर्निर्विरुद्धा आदिवृद्धिरिति स्वविषय इति शेषः तेन व्यसोर्भावो वैयसनं व्यापदि भवं वैयापदमित्या
दौ न दोषः तत्रापि वृद्धिप्रसक्त्या विषयत्वात् ऐज्विधायकेन निषेध इत्यन्यत् बाधत इति। अनुशतिकादिषु पुष्करसच्छब्दयागात् सहि पौष्करसादयुभयप
दवृद्ध्यर्थः। ठगादिषु ततो नानभिधानादिति भावः परत्वाद्बाधत इति नियुक्तं युगपत्कार्यद्वयासंभवे एव विप्रतिषेधप्रवृत्तेः नापितकाण्डिन्यन्यायेनापवा
दत्वात्। उभयोरपि गोः पाचकः सौम्युत इत्यादौ चारितार्थ्यात् स्पष्टं चेदं भाष्ये। तस्येदमिति। सामान्ये ——— सर्वविशेषान्तर्भावादपत्येपि तस्येदमि
त्येव सिद्धत्वात्तस्यापत्यमतइञित्येव कार्यं व्यर्थो योगविभाग इति प्रश्नः परिहरति बाधनार्थमिति। भानवादौ छस्येति शेषः नन्वशैषिकेणानेन स्वविष
ये प्राप्तस्य छस्य कथं बाधः किंच तस्येदमित्यपत्येपीति पूर्वपक्षोप्यसंगतः अशैषिकविषये शैषिकेणासिद्धेरिति तृतीयस्याशंकां समाधातुमाह उत्स
र्ग इति। योगविभागाभावे प्रकृतिविशेषसंबद्धान्यपत्यार्थस्य शेषत्वं योगविभागे तत्त्वणादिविधावपत्यत्वेनापत्यस्योपयोगान्नशेषत्वमिति छस्याप्राप्तिरेवा
त्र बाधः इदंशब्दो हि इदंत्वेन सर्वविशेषबोधकस्तदुक्तं शेषे इति सूत्रे भाष्ये इदं विशेषा ह्येते अपत्यं निवासः समूह इति इदंपदार्थप्रवृत्तिनिमित्ताश्रया
व्यक्तिविशेषा इति तदर्थः तत्र शेष इति विशेषणादपत्यादीनामिदंत्वाश्रयतया न ग्रहणमिति बोध्यं शेषपदसंबद्धेनेदंपदेन प्रागनुक्तानामेवेदंत्वेन ग्र
हणमित्येतद्द्योतयितुमेव उत्सर्गः शेष एवासावित्युक्तं। यत्विदंत्वेन बोधे शैषिकमिद्धति वार्तिकं तु शाब्दबोधकृतविशेषानादरेण प्रवृत्तमिति वदंतिते
षामेतद्विरोधः स्पष्ट एव किंच भानोरपीदंत्वेनापत्यबोधे छस्य तवेष्टत्वे नास्य तद्बाधकत्वोक्तेः स्वारस्यासंगतिः आपत्यं वा गोत्रमिति वार्तिकप्रयोगे शिवा
दित्वादणो बोध्यः दाशरथायेत्यादित्वसाध्वेवेति वार्तिकस्वरस इति विभावनीयं सद्भिः

ल॰ शे॰ सु॰ त॰ २ —— कृतसन्धेः किमिति। अन्तरङ्गत्वात्सन्धिकार्योत्तरमेव प्रत्ययो भविष्यतीति समर्थानामिति व्यर्थमिति प्रश्नः उत्तरयति अकृतेति। यद्यप्यत्रैकादेशप्र
वृत्तिसमयेन दृष्टः अपि तु कृते एकादेशे जायमानया वृद्ध्या न तन्निमित्तविनाशः स्यादिति भावः वस्तुतोऽन्तरङ्गन्यायलब्धार्थानुवाद एव समर्थानामिति वि
षुणा इत्यादावकृतसन्धेरपि प्रत्ययदर्शनेनान्यत्रापि तथाशङ्कावारणायात एव विप्रतिषेधसूत्रे भाष्यं तरङ्गवलीय इत्यस्यासोऽस्थितिवै, हमाणिरित्युदाह
रणं दत्तं। पदस्य विभज्यान्वाख्याने सुउत्थितङ्स् इति स्थिते परत्वादादिवृद्धिः प्राप्नेति च कैयटः अकृतेति परिभाषा तु भाष्याव्यवहृतत्वाज्ञास्येवेत्यन्यत्र
विस्तरः वक्ष्यमुपगोरिति। यद्यपीदं तत्सम्बन्ध्यपत्यमित्यर्थे न प्रत्यासत्त्या वारयितुं शक्यं तथाप्युद्धस्यौपगव इत्यादिवारणाय सावश्यकीति तत्वं षष्ठ्या।
र्थे इति उपगुरपत्यमस्य देवदत्तस्येत्यर्थे औपगवो देवदत्त इति मा भूदित्यर्थः तस्यापत्यमित्यादौ लिङ्गवचने ऽविवक्षिते इति बोध्यं। अपत्यं पौ। यद्यपि प्रव
राध्यायप्रसिद्धं लोके गोत्रं तथापि प्रवराध्यायाप्रसिद्धस्यापि संज्ञार्थमिदं पौत्रादेरपत्यत्वाव्यभिचाराद् अपत्यपदसामर्थ्यादाहापत्यत्वेनाविवक्षितमिति तेन
पौत्रप्रभृतेस्तत्वेनाविवक्षायां न गोत्रत्वं पौत्रापत्यशब्दयोः सम्बन्धिकतया यदीयं पौत्रप्रभृति अपत्यं तं प्रत्येव तस्य गोत्रत्वमित्यङ्गिरसः पौत्रे गर्गस्यान
तरेवाच्येन गर्गशब्दाद्यञ् अत्र समर्थानां प्रथमादित्यनुवर्त्य विभक्तिविपरिणामेन समर्थानां प्रथमस्य प्रकरणादपत्यप्रत्ययप्रकृतेर्यत्पौत्रप्रभृति अ
र्थात्तत्प्रत्ययवाच्यं तयापत्यत्वेन विवक्षिते तत् गोत्रमित्यर्थात् पौत्रपरगार्ग्यापत्यादिशब्दान्न यूनि प्रत्यय इति भाष्ये स्पष्टमेवं च गोत्रप्रत्ययान्तेभ्योऽपत्य
त्वेनैव बोध इति सूचितं। अत एव गर्गस्यापत्यं गोत्रमित्यर्थं प्रदर्शयति गार्ग्य इत्यादेर्वृद्धाः। अत एवापत्यं वा गोत्रपरमप्रकृतेः आपत्यः आपत्याजीव इ
श्यात्स्वार्थे द्वितीयो युवसंज्ञः सर्वा चास्त्रियामित्येतद्वार्तिकसमुदायेन प्रत्यययोरेव गोत्रयुवसंज्ञाविधानं अपत्यस्यापत्यमापत्यं शिवादेराकृतिगणत्वाद
ण् तेन च तद्बोधकप्रत्ययस्वरूपं लक्ष्यते। आपत्य आपत्यादित्य नयोस्तदर्थकत्वावश्यकत्वात्। गोत्रसंज्ञासूत्रे कचित्पुस्तके आपत्यो वा गोत्रमिति।
पाठो दृश्यते स त्वयुक्ततरः स्त्रीपुंसाधिकारे पत्या ता इत्यमरोक्तेः अत एवापत्य इति द्वितीयवार्त्तिके पुंलिङ्गप्रयोगः न चापत्ये भव इत्यर्थे णान्तः स च प्रत्य
यापत्तेः तदुक्तं युवसंज्ञासाहचर्येणास्या अपि प्रत्ययनिष्ठताया एवौचित्याच्च। वार्त्तिकमतेऽप्यर्थस्य गोत्रसंज्ञायां सूत्रोक्तार्थादविशेषेण वाशब्दासङ्गतिश्च

न्यासलाघवमात्रेणाबाशब्दे आपत्यो गोत्रमिति वेति वदेत्। । आपत्यो वेति न्यासेन संज्ञाविकल्पस्यैव लाभात्। आपत्यादित्यादेरापत्यबोधकप्रत्ययांतोऽजीवद्वं।
स्यबोधकात्स्वार्थे द्वितीयो युवसंज्ञः प्रत्ययो भवतीत्यर्थ इति स्पष्टमेवेति दिक्। पौत्रेति। पौत्र्यादेरप्युपलक्षणं जीवति तु। युवसंज्ञमेवेति। समावेशे
त्वौपगवस्य गोत्रस्यापत्यं पौपगविरित्यादावेको गोत्रे इति नियमाद्विः स्यात्। गोत्राद्यूनीत्यस्याप्राप्तविधायकत्वे तु गर्गस्य च तुर्थे जीवद्वंश्ये विवक्षिते गार्ग्य इत्यस्या
पत्तेः गोत्रादेव यूनीति नियमाभावात् किंच समावेशे द्वितीयाध्यायस्थलुग्मात्रस्य मध्येऽपवादन्यायेन गोत्रे लुग्वेत्यलुक् स्यात् तथा च पीलाया अपत्यं पैलः
तस्यापत्यं युवा णो ह्यच इति फिञः पैलादिभ्यश्चेति लुकि पैलस्य छात्राः पैलीया इत्यत्र गोत्रे लुगित्यलुक्प्रसंगः असमावेशे युवप्रत्ययविषये स्याप्राप्तेस्तेन
न्यायेन भूम्नि प्राप्तस्येत्यर्थादस्याप्राप्तौ अंतरंगत्वात् पैलादिलुगेवेति सिद्धमिति दिक्। भ्रातरि च भ्रातुर्वंश्यत्वादारब्धं। बहुषु पुत्रेष्वेतदुपपन्नं भवत्ययं मे
ज्येष्ठोऽयं मे मध्यमोऽयं मे कनीयानित्यादं तवत्सूत्रभाष्यप्रयोगे बहूनां निर्धारणेऽपीयसुन्दर्शनाद्विभागमात्रमीयसुनादिनिमित्तं द्वित्वादि तु सूत्रेऽविवक्षि
तं तद्ध नयन्नाह ज्येष्ठ इति अत एव बहुष्वपि पुत्रेषु मृतेऽपि पित्रादावग्रजे जीवति द्वौ गार्ग्यायणाविति गार्ग्यस्य द्वौ पुत्रौ तयोः कनीयान् गार्ग्यायण इति चो
पपद्यते। वान्यस्मिन् सप्तपुरुषावधिपितृकुले सपिंडाः मातृकुले पंचपुरुषावधि प्रकृते भ्रातुरन्यस्मिन्निति पर्युदासादाद्यमेव गृह्यते इति वृत्तिरत्यम
पि गृह्यत इत्यन्ये अन्यस्मिन्नित्यस्य ज्येष्ठभ्रातुरन्यस्मिन्नित्यर्थः तच्च भ्रातृरूपसपिंडे जीवति जीवतः परत्वाद्विकल्पव्यावृत्त्यर्थं जीवतीत्यनु
वर्तमाने जीवतीति व्यर्थमत आह एकमिति तिङंतं नदिति भावः द्वितीयमिति शत्रंतात्सप्तम्यंतमिति भावः ननु ज्यायसीत्यनुवृत्त्यैव सिद्धे तरवंतं।
व्यर्थमत आह तरप् निर्देश इति तरवंतनिर्देश इत्यर्थः; उभयोरिति। स्थानवयसोरित्यर्थः स्थानं पदं पितृव्यत्वादिकं तत्तद्रूपेणैव तेषां पूज्यत्वात् यद्य
पि भ्रातृत्वेन न पूज्यता कनिष्ठभ्रातर्यपि तत्सत्वादेवं च भ्रातान स्थानुत उत्कृष्ट इत्यनेनैव व्यावृत्तिसिद्धावन्यस्मिन्निति व्यर्थं तथापि अन्यस्मिन्नेव सपिं
डे जीवति विकल्पः भ्रातृसहितेऽन्यसपिंडेऽपि जीवति जीवतो नित्यमेवेत्यर्थं तत्। न च ज्यायसीत्यनुवृत्त्या ज्यायसि स्थविर इत्याभ्यामुभयप्रकर्षलाभे त
रप् व्यर्थ इति वाच्यं स्पष्टार्थत्वात्। मातामहभ्रातरीति मातृसापिण्डमपि गृह्यत इति मते इदं। क्वचित्तु पितामहभ्रातरीति पाठः स्थानवयोन्यून इति स्था

॰पगवइत्यणप्रत्ययविशिष्टमिष्टं सिध्यति। एवंगर्गस्य॰नु॰

ल॰शे॰ नन्वनंतरस्य ज्येष्ठो भ्रातृपुत्रादिः जीवतीति किमिति। सूत्रोपात्तमनुवर्त्तमानं च किमर्थमिति प्रश्नः। मृते सपिंडे। मृतस्त्वतुर्थादिः वृद्धस्य चेति पुनश्चेति च वार्त्तिके। तत्र

सु॰त॰ भवानिति पूजागमकं। युवसंज्ञकानामल्पवयस्त्वेनेच्छाधीनत्वे न सुरक्षितया च पूजातां च गोत्रभूतस्तृतीयोपि मन्यते। अन्यत्र युवसंज्ञाविधानसामर्थ्यात्स्वा

३ र्थे युवप्रत्ययो बोध्यः जाल्मइति जीवदंशस्ये न हि इच्छाधीने वृभाव्यं यस्तु इच्छाननादत्यस्वातंत्र्यं कुरुते स एव मुच्यते। एको गोत्रे। गोत्रइति। अभिधित्सितइत्य

र्थः एक एवेति संख्यावाची एकशब्दोधिकारलब्धायत्यप्रत्ययश्च विशेष्यइति भावः अतएवानंतरापत्यप्रत्ययांतान्नापत्यप्रत्ययः अपत्यग्रहणानुवृत्ति

स्तु अनंतरापत्यप्रत्यायांतान्नोत्रप्रत्ययवारणाय। अन्यथा नियमस्य तुल्यजातीयतया गोत्रप्रत्ययांतादेव गोत्रप्रत्ययो वार्यत। उपगोरणगर्गादिभ्यो यञ्नडा

दिभ्यः फक्। तत्रेत्यत्र संबंधे वापत्यं आत्मजस्तनयः सूनुः सुतः पुत्रः स्त्रियां त्वमी आहुर्दुहितरं सर्वेपत्यं तोकं तयोः समे इत्यमरात् तयोः पुत्रदुहित्रोः अतएव पितामहो नप्तुरासी

नंदारकं कास्मित्त्वच्छति कस्यायमिति सतत्पितरमेव व्यपदिशति नात्मानं तदाह। गोत्रेइति उपगोस्तृतीये वाच्ये औपगवादिजि अनिष्टप्रत्ययपरंपरैव प्राप्नोति न तु कदाचिदयौ

तृतीये वाच्ये गर्गादिभ्यइत्याद्यारंभसामर्थ्यात्परंपरापत्यापत्यवत्संबंधे प्रवृत्त्येष्टसिद्धावपि गर्गादिभ्यितततः प्रत्ययांतरे प्रत्ययपरंपरानिष्टापि प्राप्नोती।

तिभावः यद्यप्यनंतरेऽणादीष्टमेव तथाप्यनिष्टघटकत्वात्साप्यनिष्टः परंपरेत्यस्य प्रसज्यतइत्यनेनान्वयः परंपरैवेत्यर्थः नन्वत्र पक्षे उपगोस्तृतीये

ऽण् विध्यर्थत्वमस्य वाच्यं प्रत्ययमालाव्यावृत्तयेनियमार्थत्वेति गौरवं। न च गोत्रपदेन गोत्रागोत्रसमुदायो लक्षणीयः एकपदं च सामर्थ्यात्सावधारणं वि

धिमात्रार्थत्वे हितदर्थमेव। गोत्रे इत्युक्तौ वोपग्वादिभ्योणादिविधाने नेष्टसिद्धेः एवं च पुत्रे एकः पौत्रेऽपरस्तदपत्ये चापरइति गोत्रागोत्रसमुदाये बहूनां

प्राप्तौ एक एवापत्यप्रत्ययइति नियमेनैकाप्यनुज्ञाऽद्वारा परमप्रकृतेर्विधिरपि परंपरापत्यापत्यवत्संबंधे प्रवर्त्ततइत्यनुमीयतइति वाच्यं। एकग्रहणसामर्थ्ये

नैकाप्यनुज्ञानादिरूपे पूर्वाक्तार्थकल्पनापेक्षया पितामहादीनामप्यपत्यमित्येतत्कल्पनस्यैव युक्तत्वादतएवापत्यं पौत्रप्रभृतीति सूत्रं स्वरसतः सेगच्छ

ते दृश्यते सुपुरुषेषु पस्यकुले विवाहिताश्चद्रानास्ति ससोमं पिवेदित्युक्तायथा एकपाते सर्वेषां पातस्तथा तद्दुहितस्यैकस्य सर्वान्प्रत्यपातहेतुत्वेनापत्यत्वं

मपत्यं स्मृतिषु अत्रावोद्युपाख्याने स्पष्टमेवैकस्य सर्वान्प्रत्यपातहेतुत्वम अपतनादपत्यामिति च पठ्ठीतिसूत्रे भाष्ये स्पष्टम् अपत्यन्तो कनयोः सममेइत्यमरस्य तु तनयोस्तनेघटितसंतानप॰

मितिप्रश्नो जनकविषय एवेति नत्र पितृव्यपदेशे नोत्तरस्यनासंगतिरित्यस्वेराह यद्वेति स्वयूनेति स्वं गोत्रं तदपेक्षयान्यूनसंख्येभ्यः प्रकृतिभूतेभ्यो
निष्ठा प्रत्ययोत्पत्तिरित्यर्थः उपगोस्तृतीये एकस्मादौपगवाद्द्विजनिष्टः प्राप्नोति चतुर्थे द्वाभ्यामित्यादीति भावः अनिष्टोत्पत्तिस्तन्मात्रेणत्विष्टसिद्धिरिति भावः अ
त्र पक्षे उपगोरणेष्टसिद्धिरवश्यौपगवाद्द्विजो निवृत्तये नियमार्थमेवेदं नन्वेवमप्यनंतरापत्यप्रत्ययांतान्नोत्रे प्रत्ययो दुर्वारः गोत्रे एकस्यैव कृतत्वेन निय
मबाधात् न च गोत्रपदेनापत्यसमुदायलक्षणया परमप्रकृतेरेवेति वाच्यं। अपत्यमित्यनुवृत्त्यैव सिद्धौ गोत्रग्रहणवैयर्थ्या
पत्तिरिति चेन्न भाष्यप्रत्याख्यातत्वेनेष्टापत्तेः यद्वा गोत्रबोधनीय एक एव शब्दः प्रत्ययप्रकृतिर्नानेक इत्यर्थः यद्विप्रत्ययांतात्प्रत्ययः स्यात् नैकः प्रत्ययप्रकृतिः
स्यादिति। यद्वा एकशब्दः प्रथमवाची प्रथमः शब्दो गोत्रे प्रत्ययमुत्पादयतीत्यर्थः प्रथमत्वं च सर्वमूलत्वं स्पष्टं चेदं सर्वं भाष्ये तद्वान्येष्वाद्ये इष्टसिद्धिः प्रत्या
यमालायाश्च निवृत्तयेऽन्ये निष्टमात्रनिवृत्तये। तत्राद्योऽयुक्त इत्युक्तं तृतीये इति तृतीयत्वं मूलपुरुषापेक्षया यजमान पंचमा इत्यादौ विजातीयेनापि संख्या
पूरणदर्शनात् औपगवादिति तस्मादेवेत्यर्थः ननूपगोरणा तृतीयस्यतत्प्रत्ययत्वलाभावादिति भावः एवमिति पितामहादीनामपीति सिद्धांतपक्षे पंचमादौ यूनि
तृतीयादुत्पत्तौ गार्ग्यायण इतीष्टसिद्धेऽपि मूलप्रकृत्यनंतरापत्ययुवापत्यप्रत्ययांतादनिष्टमपि प्राप्नोति यूनि गोत्रादेव नतु तेभ्य इति नियमार्थं गोत्राद्यूनीति
आद्ये तु पक्षे पंचमे यूनि चतुर्थात्प्रत्ययः स्यात् न तु तृतीयवाचिगोत्रप्रत्ययांतादिति विध्यर्थमेवेदं स्यान्न तु नियमार्थमिति पितामहादीनामपीति पक्ष एव।
ज्यायानिति बोध्यं। स्त्रियां तु नेति। अस्त्रियामिति योगं विभज्य तत्र यूनीत्यनुवर्त्यते अपि प्रथमया विपरिणाम्य स्त्री युवा नेत्यर्थ इति भावः अत इत्यनेनाधिकृत
प्रातिपदिकस्य विशेषणात्तदंतविधिरित्याह अदंतमिति। अस्यापत्यमित्यादौ व्यपदेशिवद्भावादिञ् बोध्यः व्यास वरुड व्यासोऽत्र वेदव्यास एव प्रसिद्धत्वा
त्। नन्वाभ्यां न तु वृद्धेरपवादावेतावितिनेतद्विषये वृद्धेः प्रसक्तिः न च विषयभेदे कथमपवादत्वं विषयभेदेऽप्यविरोधे शेन तु ठो बाधस्य भाष्ये शंकितत्वात्
नेति स्त्रीति निषेधेन तु टो नादेशेन बाध इति समाहितमित्यन्यत् एवं च नेत्रिव्यर्थमिति चेन्न यत्र द्वाभ्यां परस्य प्रसक्तायां वृद्धेर्निषेधस्तत्रैवैचावित्यैचोर्वि
षयनिर्देशार्थत्वात्। तेन दाध्यश्विरित्यादौ न। अपंच निषेधो येन नाप्राप्तिन्यायेन तद्धितेष्वचामादेरिति वृद्धेरेव तेन द्व्याशीतिके संख्यायाः संवत्सरेति

वृद्धिर्भवत्येव। पदांताभ्यां किं। एतीतियन् तस्य छात्रा याना इत्यादौ माभूत्। पूर्वौ पूर्वाव पवौ। अभक्तत्वे हि इष्ट्याज्जुष्वयजं तस्मात्तत्रभव इत्यणं ताच्छो नस्यात्। प्राति
पदिकस्य वृद्धत्वादिति हरदत्तः। गोत्रे कुं। गोत्रवोधनीये तत्संवंध्यपत्यमित्यर्थकं कुंजादिभ्यः परः प्रत्यय इत्यर्थः। च्फञि ञकारः कौंजायनीत्यादौ वृद्ध्यर्थः। चकारो व्रात
च्फञो रित्यत्र विशेषणार्थः। व्रातच्फञोः। पूगाञ्ञ्योऽग्रामणीपूर्वादित्यतो ञ्योऽनुवर्त्तते। तद्राजत्वादिति। ञ्यादयस्तद्राजा इत्यनेन लुगीति तद्राजस्य बहुष्वित्यने
न ञ्यस्येति भावः। स्त्रियामिति ञ्यप्रत्यये हि यो पधत्वान् ङीप्रसक्तस्यात् टाप् च स्यादित्यस्त्रियामित्युक्तमिति भावः। यञिञोः। अधिकृतं गोत्र इति यञिञो विशेषणं फ
क् तु यूनि। गोत्रे किं। सुतङ्गमादिभ्यश्चातुरर्थिके इञि सौतंगमेरपत्ये माभूत्। शरद्वच्छु। भृगुवत्सपदे तदपत्येषु भृगुत्वाद्यारोपेण प्रयुक्ते। अन्यथा भृगुवत्सयोः श
रद्वच्छुनकपूर्वभावित्वादसंगतिः स्पष्टैवेति केचित्। अन्यः कृत्रिमपुत्रादिः। आग्रायणो नडादिफ्गतः। दर्भिरिति। अस्यऋषित्वे तु वाह्वादित्वादिञ्। शरद्वच्छुनको
विदाशीताभ्यां फकाऽभावेऽञ्। अनादिरिति भारतप्रसिद्धो स्मदाद्यते यादिकाल इत्यर्थः। अभिव्यक्तपदार्था ये स्वतंत्रा लोकविश्रुताः शास्त्रार्थस्तेषु कर्तव्यः श
व्देषु न तदुक्तिष्विति हर्युक्तेः। अभिव्यक्तेत्यनेनानाद्यर्थाभिधायित्वं तेन विशिष्टरूपोपादाने फट्कार्य एव चायं स्वतंत्रा इत्यनेन गौणनिरासः। लोकविश्रुता इत्यने
नाप्रयुक्तं निरस्तं। तदुक्तिषु तत्सदृशेषु। वाह्वादिभ्यश्चेति सूत्रे भाष्येपि। वाह्वादिप्रभृतिषु येषां दर्शनं लोकविदितादिपुरुषत्वरूपे लौकिके गोत्रभावे तेनान्य
त्र प्रतिषेधः वाहुनाम्न आधुनिकस्यापत्यं वाहव एव संवंधिशव्दानां कार्यं तत्सदृशात्प्रतिषेध इति चोक्तं तत्र गोत्रभाव इति प्रकृताभिप्रायेण तदेव ध्वनय
ता विपुत्यानुवादेन संवंधिशव्दानामित्याद्युक्तं एवं चायं न्यायः सर्वविषय इति वोध्यं वाह्वादिसूत्रे पाठात्तद्धितविषय एवेति कश्चित्। अनृष्या अनृषीति
लुप्तपंचम्यतं। आनंतर्ये। अनंतरापत्ये। इदं वृत्त्यनुसारेण भाष्ये तु ऋषिभ्योऽनंतरेणेत्यर्थोऽसमर्थसमासेन दर्शितः ये त्वत्रानृषयः परंते तेभ्योऽनंतरेपीति
चोक्तं निषेधसामर्थ्यादेवात्र गोत्रे इत्यस्यासंवंध इति तद्भावः। यूनि तु गोत्राद्यूनीति नियमान्न दोषः। गर्गादि। रामो जामदग्न्यः पाराशर्यो व्यास इत्यनंतरे गोत्र
त्वारोपाद्वोध्यं। यञञोः। एण्यक्षत्रिये त्यतो लुगिति तद्राजस्येति सूत्राद्बहुषु तेनैवास्त्रियामिति यस्कादिभ्य इत्यतो गोत्र इति चानुवर्त्तते। प्रवराध्यायप्रसिद्ध
गोत्रवाचित्वं यञञो नास्तीत्यत आह यञन्तमिति निर्दिश्यमानपरिभाषालुक्संज्ञाभ्यां लब्धमर्थमाह तदवयवयोरिति। प्रवरेति

एतदेव च लौकिकं गोत्रं एतत्सर्वं यूनि लुक् गोत्रावयवात् स्त्रीपुंसाभ्यामित्यादौ भाष्ये स्पष्टं। लोहितादिकार्यार्थमिति स्त्रियां ष्फ इत्यर्थः आंगिरस इत्येवेति
तत्र यञेवेत्यर्थस्तस्य हानांगिरसे त्विति। आंगिरस एवेति नियमस्तु न गर्गादिपाठस्यैव वैयर्थ्यापत्तेः स्त्रियां लुक्तत्त्वेन यञन्तोऽकार इति व्याख्यानेन चास्य लोहित
दिकार्यार्थं पाठ इति न वाच्यं शिवादिगणे पाठमात्रं तु लुक् स्त्रियामित्यनेन वतंडाच्चेत्यस्य विभाग एवेति बोध्यं ।विहितस्येति अनंतरस्येति न्यायलब्धमि
दं वक्ष्यमाण इति अणिञोरिति सूत्रेणेत्यर्थः तत्र प्रतिपदोक्तपरिभाषया कृष्यण एव ग्रहणमिति न युक्तं इञं शेतदसंभवेन तत्साहचर्यादणोऽपि तदप्र
वृत्तेः परे तु वतंडाच्चेति सूत्रमास्त्वित्याशयेन किमर्थमिदमुच्यते न गर्गादिभ्य इत्येव सिद्धं लुक् स्त्रियामित्यपि तत्रैवोच्यते त्याशंक्य आंगिरस इति विवि
च्येतेत्युक्तं भाष्ये तदाशयस्तु पूर्वपक्षे सम्यगेव तत्र पूर्वसूत्रे आंगिरस इत्युक्त्या नांगिरसे यञभाववदत्रापि तदभाव एवोचितः विधित्वस्यैवोचित्यात्
योगविभागसामर्थ्येन कापि बाधयोरिवास्यापि गणे पाठाभाव एवानुमीयते गणपाठे तु आंगिरस इत्येतद्विच्छेदेनानांगिरसेऽपि यञ् स्यादिति शिवादि
गणपाठे पियदिग्रहणस्य कृतदानांगिरसे चरितार्थस्य तस्यांगिरसे यञभावाबाधः एवं चानांगिरसेऽपि वा तत्र्यायनीति चिंत्यमेवेत्याहुः। निरूढत्वमि ति। वृद्धं त्वपत्य
गोत्रेण। यूनि लुक् सूत्रभाष्ये गोत्रसंज्ञासूत्रपर्यंतगोत्राधिकारस्येति ध्वनितत्वात् ॥ तत्र भाष्ये ऽपत्याधिकारात्परं शास्त्रीयगोत्रग्रहणे गार्ग्यायणादिभ्यो युवप्र
त्ययांतेभ्यः गर्गमूहादौ गोत्रत्वप्रयुक्तो वुञ् स्यादित्याशंक्यापत्याधिकारात्परं प्रवराध्यायप्रसिद्धरूपलौकिकगोत्रग्रहणं गोत्रोक्षोष्ट्रेति सूत्रे राजन्यमनुष्य
ग्रहणं ज्ञापकमित्युक्तं अनंतरापत्ये गार्ग्यादि तु जामदग्न्यादिवदारोपेणासाधु न चैवं गार्ग्यप्रभृतिभ्यो यूनि ठक् न स्यात् यूनो गोत्रत्वाभावात् सूत्रं तु दात्तेयौ
त्यादौ चरितार्थमिति वाच्यं। उदीचां वृद्धादिति सूत्रे गोत्रादित्युक्तिसामर्थ्येनेतख्यातिसूत्रे निज इत्युक्तिसामर्थ्येन च गोत्रप्रत्ययांतप्रकृतिभ्योऽप्येषां विशिष्य
विधानेन न तत्सामर्थ्याद् यञिञोश्चेति वचनलुगित्यतिसिद्धेः शास्त्रीयगोत्रं तु युवत्वानाक्रांतपौत्रप्रभृत्यपत्यरूपं तदर्थकत्वं च वास्तवं शास्त्रप्रक्रियानिर्वाहाय
शास्त्रकल्पितं वा परत्र लौकिकग्रहणमपि यत्र शास्त्रीयग्रहणे गमकाभावस्तत्रैव अत एव कण्वादिभ्यो गोत्र इत्यत्र अणिञोरित्यादौ च शास्त्रीयस्यैव ग्रहणं
राजन्यमनुष्यशब्दयोर्लोके जातिप्रकारकबोधजनकत्वेऽपि प्रक्रियादशायां राजश्वशुरादित्यादेर्गोत्राधिकारे पाठात् कल्पितं शास्त्रीयगोत्रार्थकत्वं अत एव

ल॰ शे॰ वराजन्यादिभ्य उदीचां वृद्धादिति फिञ् अत एव ग्लुचुकस्य युवापत्यं ग्लौचुकायनिरित्यत्र फिञन्तां यूनि फिञिति मते तु सदुर्वारः लौकिकं च प्रवराध्याय॰
सु॰ त॰ प्रसिद्धं लोके तत्रैव गोत्रव्यवहारात् अणिञोः स्त्रीपुंसाभ्यामिति सूत्रस्य भाष्यस्वरसाच्च न च शिवादिभ्य इत्यत्राण्ग्रहणं व्यर्थं न च बाधकबाधनार्थमिञ
५ एव विधिरयं स्यादतोऽण्ग्रहणं तद्बाधकस्यैवाभावात् तत्रेञ्बाधनार्थं शिवादिभ्योऽण् यथाविहितमित्येवाण्सिद्धेरिति प्रकृतसूत्रभाष्योक्तमसंगतं स्या
त् शिवादिभ्यो गोत्र एवेञ् नान्यत्रेति नियमेन चारितार्थेना॰

ण्ग्रहणं विना तदसिद्धेरिति वाच्यं । विधिनियमसंभवे विधेरेव ज्यायस्त्वेन विधित्वानुरोधेनाण एव विधिरिति भाष्याशयात्
अण्ग्रहणं तत्र पठितादृष्टिषेणशब्दादिञ्बाधकस्य सेनान्तलक्षणण्यस्य सत्त्वे नेञ एव विधानं स्यान्न त्वण् इतीति भाष्ये एव स्पष्टं यत्तु खण्डिकादिसूत्रे ज
नपदशब्दात् क्षत्रियादित्यधिकारस्थप्रत्ययान्तद्वंद्वरूपात् क्षुद्रकमालवाद्गोत्रे घेति वुञि क्षौद्रकमालवकमित्युक्तं तन्न तत्र लौकिकगोत्रत्वारोपेण निर्वाह्यं
अतिप्रसंगस्तु आरोपे सति निमित्तानुसरणमिति न्यायेन परिहार्यः अपत्याधिकारान्यत्रेति भाष्ये परशब्दोऽन्यपर्यायः ततः पूर्वस्मिन्नत्र गोत्रेति लुग्विधा
यके स्त्रीपुंसाभ्यामिति सूत्रभाष्येण लौकिकगोत्रग्रहणस्योक्तत्वादित्यन्यत्र विस्तरः अवृद्धाभ्य इत्यादेर्विशेष्यं प्रकृतिभ्य इति नदीमानुषीभ्य इत्यस्यार्थद्वारकं तद्वि
शेषणं तदाहावृद्धेभ्य इत्यादि । ऋष्यंधक॰ । अंधकादयस्त्रयो वंशाः ऋषयो मन्त्रद्रष्टारः ऋषिर्वेदस्तद्दृष्टत्वाच्चैतेषां तत्त्वं । मातुरुत् । अर्थगते स्त्रीत्वं शब्दे आरो
प्यपूर्वाया इति निर्देशः मातृशब्दस्य जननीवाचिन एव ग्रहणमभिव्यक्तपदार्थकत्वात् । द्वैमातुरः द्वयोर्मात्रोरपत्यमिति तद्धितार्थेति समासः तेन न चान्वेति
इदं चिन्त्यं तादृशस्त्रीवारणायाभिव्यक्तत्वस्यावश्यकत्वात् लिंगविशिष्टपरिभाषया प्रवृत्तिः वैमात्रेय इति एवं च विमातृशब्दो न प्रत्युदाहार्य इति भावः ।
अनूढाया एवेति न तस्यास्तयोर्नित्यं कन्यात्वमिति भावः वत्सादीनां मूलपुरुषत्वाद्धिकर्णादीनामत्यपत्यत्वासंभवात्तत्सादृश्यस्तदपत्ये आरोपितप्रवृत्तिनिमि ५
त्तत्वमित्याशयेनाह वात्सप्रे इति पक्षे इञिति पूर्वसूत्राद्वाग्रहणानुवृत्तेरिति भावः स्त्रीभ्यो॰ स्त्रीशब्दः स्वर्यते तेनाधिकार्थावगतिरित्याशयेनाह स्त्रीप्रत्यय
ति । तदन्तप्रातिपदिकादित्यर्थः तदन्तस्य प्रातिपदिकत्वं च लिंगविशिष्टपरिभाषया प्रातिपदिकत्वादीनां तद्विशिष्टबोधनादक्षतं तेन चटावादयः व्याख्याना

तृणतेन दासीपत्यं दारद इत्यत्र न ढक् तत्र दरदोऽपत्यं स्त्रीत्यर्थे णिस्त्रीप्रत्ययोत्पत्तेः प्रागेवाणो नश्चेति लुक् परेत्वत्र स्त्रीभ्य इत्यर्थग्रहणमेव अत एव पितृ
ष्वसृमातृष्वसृभ्यां ढकि लोपविधानं संगच्छते। दरत् इड् विदृ एथ् गुशिस्त्रो। नभिधानात् ढग्भावः शिवादिपाठगच्छो ध्वनितं चेदं अपत्यं धकेति सूत्रे भाष्ये इ
त्याहुः निरूपितं चेदं भाष्यप्रदीपोद्योते वा ग्रहणानि वृत्तये पुनर्ढग्रहणं शिवादित्वा दिति· तत्र सपत्नेति पाठेपि लिङ्गविशिष्टपरिभाषया सपत्नीशब्दादपि
वाच्यसामान्यचिन्तयो ढकं वाधित्वा णिति वोध्यम्· तस्येदमितीति। शिवादिपाठादित्युचितं तस्याकृतिगणत्वात् इतश्च। अनिञः किं। दाक्षीयणः। इनिः किं। दाक्षिः
।प्रवाहणस्य। उत्तरपदस्येत्यधिकारः। अर्द्धात्परिमाणस्येत्यतः पूर्वस्यतु वेति चानुवर्त्तते तदाह शब्दस्योत्तरपदेति· शब्दस्येत्यवयवषष्ठी· प्रवाहणः शुभ्रा
दिः उत्तरपदस्य वृद्धिमत्वेपि तद्विधानं पूर्वपदस्य वृद्ध्यभावेपि वृद्धिनिमित्तस्येति पुंवत्वप्रतिषेधार्थं जातेश्चेति निषेधस्तु अस्मादेव ज्ञापकादनित्य इति वोध्यम्।
तत्प्रत्यतव्लक्ष्देनढः परामृश्यते प्रवाहणस्येति च वर्त्तते· वाह्येति· सचेन्न इत उत्तरं विकर्णेत्यादिभ्यो वे प इत्यं ततो ग्रंथो विपरीतलेखस्तु लेखकप्रमादात्। कल्याण्यादि
ढकि सिद्धेपीनङर्थमिदं ढक्तु नित्य इति वृत्यादिव्याख्यानादिति भाव।। पूर्वेण· स्त्रीभ्य इत्यनेनाऽत्र इनङ् घो· पक्षे इति· तदभावे ढगित्यर्थः। हृद्भगः चादुत्तरपदस्ये
महते सौभगायेत्यादौ तु हृद्भगाचादित्वादजि छांदसत्वान्नोत्तरपदवृद्धिः स्त्रीलिंगनिर्देशात्तु सिन स्यादत आह वटकस्येति। एवं च सूत्रे वटकाया इति व्यर्थमित्याह।
लिंगविशिष्टपरिभाषाऽजादित्वादिति तत्र सामान्येन द्वयोरनुकरणमिति भावः क्षुद्राभ्यो अर्थनिर्देशोयं तदभिधायिप्रकृतिभ्यश्चायं प्रत्ययः शीलहीनाश्चानियतपुंस्का
दास्यादयः अंगहीनाः काणादयः अत एवेति शुभ्रादिपाठकृत्यनदृष्टे इति भावः प्रकारान्तरमपि प्रागुक्तं मातृष्वावा पितृष्वसु रत्यनुकृष्यते षष्ठ्या च विपरिणम्य
ते इत्यच्छायेनात् पितृष्वसुरिति ढको रिति। इदंतेभ्य इतश्चेति ढक् प्राप्तः छणिति गृष्ट्यादित्वात्। इति युलोप इति ढे लोप इत्यस्य तु न प्राप्तिः परेणेयादेशेन वाधात्। अ
पत्यप्रत्ययस्येति प्रवराध्यायप्रसिद्धघटकस्येत्यर्थः अपत्याधिकारादन्यत्र लौकिकं गोत्रमिति भावः यस्कस्यापत्यं यास्कः शिवाद्यण् तदंतात् यूनि अणो द्व्यच इ
ति फिञि यास्कायनय इत्यत्र युवप्रत्ययस्य तु न लुक्। विहितविशेषणाश्रयं समानवस्तुतोत्र शास्त्रीयं गोत्रं। भाष्यरीत्या यस्कादिभ्यः शास्त्रीयगोत्र एव प्रत्ययविधा
नात् अत एव वान्यस्मिन्निति सूत्रे गोत्रे पूनोः समावेशे यास्कायनय इत्यत्र दोषः शंकितो भाष्ये अन्यथा सिद्धांतेऽप्यस्य समाधेयत्वेन तत्रैवाशंका परमास्या सं

ल.शे. गतेरित्यलंतानद्राजस्येति सूत्राद्द्वन्द्वस्येत्यादि वर्त्तेते तन्न तेनेति किं प्रिययास्काः वहुत्वे किं यास्काः अत्रि। अत्रिशब्दादितश्चेति ढक् अन्येभ्यश्च प्यणीति वोध्यं। वहुत्वे इति।
सु.न. तन्नतेनेनतु स्त्रियामित्यपि वोध्यं। युधिष्ठिरा इति वाह्वादित्वादिञ् भरतानां प्राच्यत्वादेव सिद्धे पुनरुपादानमन्यत्र प्राच्यग्रहणे भरतानामग्रहणार्थं तेनेञः प्राच्चामिति।
६ लुक् भरतस्य नोनेर्थो युधिष्ठिराः पिता यो युधिष्ठिरायणः पुत्र इति अतं गर्गा इति गोपवनादयश्च विदादौ प्राक्हरितात् वोध्याः इदमत्रैव भाष्ये स्पष्टं गर्गभार्गविकेति।
समुदायोत्र पठ्यते इति तं द्राजस्येति सूत्रभाष्ये गोत्रे लुगचीति सूत्रभाष्ये च ध्वनितं तत्फलं तद्राजस्येति सूत्रे निरूपयिष्यामः तिककितव। अत्र पूर्वोत्तरपद
योरुभयत्राप्यपि लुग् विशेषात्। उपकादिभ्यो। अद्वन्द्वे इत्यस्य द्वन्द्व इति नानुवर्त्तत इत्यर्थस्तदाह। द्वन्द्वे वाद्वन्द्वे चेति। भ्राष्ट्रकिकापिष्ठलय इति। इदं भाष्ये स्पष्टं
एतेन भ्राष्टकिकपिष्ठलीपितिककितवादिषु यञ्पत इति केय्युक्तमपास्तं आगस्त्य। अगस्त्यशब्दादृष्यणा इति सूर्येतिष्येति सूत्रे कैयटे स्पष्टं। अगस्तिप्रक
तिकं गर्गादिपठ्यते तु यञञोश्चेति लुका सिद्धं। कुंडिनपर्यायेनांतकुंडिन्शब्दात्तस्य भार्येत्यर्थे ङीपि निष्पन्नकुंडिनीशब्दाद्गर्गादियञि भस्याढे इति पुंव
त्वे प्राप्ते न एव निपातनात्पुंवत्वाभाव इति भस्याढे इत्यत्र भाष्ये स्पष्टं। एतेन कुंडिन्[illegible] गर्गादियञ्तस्याप्यत्र ग्रहणमित्यपास्तं। कुंडिनीत्येव गर्गादिषु
पाठात्ततो यञभावाच्च। लुगिति। तेनागस्तीनां छात्रा इत्यर्थविवक्षायां गोत्रे लुगचीति लुकि प्रतिषिद्धे तत्संनियोगशिष्टादेशनिवृत्तौ वृद्धत्वाच्छे आगस्तीया इ
तिसाद्दिष्टद्धि रितिवोध्यं। येचा। प्रकृत्यैकाजित्यतः प्रकृत्येत्यनुवर्त्तते। तत्र नेति वाच्ये प्रकृत्येत्युक्त्यानंतरस्येति न्यायं वाधित्वा अल्लोपोन इति लोपोपि निवार्य
ते इति षपूर्वेति सूत्रे भाष्ये स्पष्टं तदाह राजन्य इति क्षत्रियादावितितज्जातीयस्त्रियामित्यर्थः टिलोपो न स्तद्धित इति प्राप्तः अल्लोपस्याप्युपलक्षणमिदं। राज्ये पुरो
हितादित्वाद्यक् संयोगादिश्च इत्नगायनपत्य इत्यत इनणीति वर्त्तेते नपत्य इति च निवृत्तं। आत्मो। एकयोगत्वे अजातौ आत्मा इति निपात्यते इत्यर्थेपि आत्मनो ६
नसिध्येत् अनिति तु नमपूर्व इति निषिद्धमत आह योगविभाग इति निपातनस्यासाधारणं प्रयोजनं किमित्यत आह अनपत्ये इति। आत्मो नारद इत्यादावपत्ये
नमपूर्व इति प्रकृतिभावनिषेधाट्टिलोपः सिद्धः एवं चात्र निपातनसामर्थ्याद पत्य इति न संवध्यते। अजाताविति असमर्थसमासः अत्र मंडूकप्लुत्यापत्य
इति संवध्यते तदाहापत्ये जाताविति जातौ किं आत्मो नारदः औक्षा इति ननु प्रकृतिभावादल्लोपोपि न स्यादत आह मपूर्वेति। न क्ष्णोत क्ष्णो[illegible]पसंख्या।

न[illegible]ताण्येकारिलक्षणो ण्यः क्षत्रात् घ इति स्वरूपग्रहणं व्याख्यानात्। लिंगादिति अन्यथा प्रत्ययविधौ तदंतविधिनिषेधात् [illegible]र्थे स्यादिति भावः।
आत्मकुलीन इति एवं च ईकार उदात्तः कुले वाक्यत्व प्रतीतिः कुलीनशब्देन समासे तु तदप्रतीतिरिति भावः बहुकुल्य इति बहुच् प्रत्ययः पक्ष इति ते नादिवृद्धिरहितम
पिपूर्व्यादिति अन्यतरस्यामित्यनुवृत्त्येति शेषः शत्रुरिति अपत्ये इति कल्पितार्थेनान्वाख्यानमात्रमिति भावः सपत्नशब्दे सह युद्ध्यय पततीति विग्रहे पत्नेर प्र
त्ययः सहस्य सादेश इत्याहुः अंगस्येत्यनुवृत्तं पंचम्या विपरिणम्यते तदाह। ण्यादिति तेनाठ च षष्ठस्य न अत्र ठस्येत्यागं तु नाकारेणोच्चारणार्थेन निर्देशः वर्णमात्रे
स्थानि। ठगादिप्रत्ययेष्वपि वर्णमात्रे प्रत्ययः उच्चारणार्थोकारः आदेशस्त्वकारांतः अत एव वर्णग्रहणपक्षे कर्मठ इत्यत्र दोषवारणायागस्य निमित्तयष्ठकार इ
ति भाष्ये व्याख्यातं यद्यपि संघातग्रहणपक्षोपि भाष्ये उक्तः अव्युत्पत्तिपक्षाश्रयणे न कंठादिषू णादिषु न दोषः मास्थिति केपि पंचमीसमासेनालोपस्य स्था
निवद्भावान्न दोषः संनिपातपरिभाषया वा कर्मठ इत्यत्रार्थवत्परिभाषया न दोषः तथापि लघुत्वाद्वर्णग्रहणपक्ष एव युक्त इति बोध्यं। पुंवद्भावादिति वृद्धि
निमित्तस्येत्यादिनिषेधः सौत्रस्यैव। न भस्याढे इत्यस्येति भावः। स च प्रत्ययोत्पत्तेः [illegible]नेवेत्याह। गार्ग्यशब्दादिति। पुंवत्त्वेनार्थस्य निवृत्तावपि भूतपूर्वगोत्रस्त्री
बोधकत्वं गृही[illegible]त्रणढकोत द्विवक्षामुपजीव्येव पुंवत्प्रवृत्तेः स्त्रियाः किं औपगवस्यापत्यं युवा औपगविः प्रकरणादिगम्यात्र कुत्सा गोत्रेति किं कारिकेय
णस्यणि[illegible]लचुकापत्यात्सपत्यं ग्लौचुकायन इत्यादौ [illegible]र्थ। वतंडादपत्यं वातंडी जाल्म इत्यत्र तु पुंवद्भावेन ङीवलुको निवृत्तौ सा सिद्धेति वोध्यं। वृद्धा
द्वक् गोत्रेत्येकदेशोत्रानुवर्तते। सौवीरेष्विति प्रकृतिविशेषणं भागवित्तितार्णविंदवाकशायेयभ्य एकायमिति वृत्तिः फिन्नं तस्यासौवीरत्वाद्वृद्धादि
ति चिंत्यप्रयोजनमेतदेव ध्वनयितुं वृद्धसंज्ञासूत्रे नेहोपन्यस्तं [illegible] फिवंतस्य सौवीरगोत्रस्याभावादाह। फिञंतादिति। तैकायनिः सौवीरो सौवीरस्थस्तेनात्र
प्रत्युदाहरणत्वं तैकायनीय इति भाष्योदाहृतं च संगच्छते। [illegible]दाहृ। अत्रापि सौवीरगोत्र इति संबध्यते मिम तेन तु तस्य न संबंधो व्याख्यानात् गोत्रत्वा
वायान्समं। बहुवचनादर्थनिर्देशोयं तदाह। सामूहिक इति। तस्य धर्म्यं। धर्मानुवृत्त आचारस्तस्मादनपेतमित्यर्थः। पण्य। हट्टे विक्रयाय प्रसारितं। किस
रादि। तालव्यमध्यपाठो वृत्तौ। शलालुके इसुसुक्तांतात्कः। शिल्पं। अभ्यासपूर्वं क्रियासु कौशलं शिल्पं। प्रहरणं। आयुधं। धातुष्के इसुसितिकादेशे ठ
णः षइतिषः। शक्ति। य। ईककि दीर्घोच्चारणं स्पष्टार्थं। अस्तिनास्ति। वृत्तिविषयेस्य विषयमतिलाक्षणिके भ्यो [illegible] दिभ्यः प्रथमासमर्थेभ्यः प्रत्यय इत्यर्थः।
परलोक इत्यभिधानस्वाभाव्यं दिष्टशब्दोत्र दैवपर्यायो व्याख्यानात्। नतु कालवाची पुंलिंगः। शीलं स्वभावः। तदस्येत्येव। अपूपादिशब्दाः स्वभक्षणे ला
क्षणिकाः क्रियानंतर्भावे तु न वृत्तिरभिधानात्। ऐकान्यिक इति। एकमन्यदिति विग्रहे तेन दिनार्थेति समासः। नियुक्तं। तियतं। संघातेति। अत एव दिढन करण
चरितार्थं। अन्यथा ठञमेव विदध्यात् तद्धि ओदने वृद्धिवारणाय संघातग्रहणे तु व्याख्यानमेव शरणं नियुक्तोधिकृतः। आकरः खनिः। अध्यायिन्या। अदेशे
त्यादिकं। काश्यामधीते। पूर्वाण्हे [illegible] ति। प्रस्तारसंस्थानेति संनिवेशपर्यायो। नैकटिक इति भिक्षुणां [illegible] शेव [illegible] मिति [illegible] त्यनिकटेवस।
ति। तत्रैवायं साधुः। तद्वहति। [illegible] शब्दसाहचर्याद्युगशब्दोर [illegible] वाच्यैव प्रासंगे प्राङ्गवुपसर्ग [illegible] प्रासंगो [illegible] युगा युगे इत्यमरस्यायमर्थः। युगात् रथांगादन्या
स्मिन्युगे स्कंधवाहे काष्ठ इति। रूढत्वादस्यैवात्रग्रहणमितिभावः। भस्येति। वो [illegible] धाथाइत्यतउ [illegible] इतिवर्त्तते। धुर्वी धातौ भोजभावे ति क्विपि राल्लो।
पधूः सिद्धः। धौरेय इति ढकञ् प्रत्यय इत्यन्ये मूलपाठे तु धौरेयक इति स्वार्थे कन्नंतं। सर्वधुरैकधुरीनपुंसकौ सूत्रनिर्देशाल्लौकाश्चेत्याहुः। स्वोधुर इति अ

तरंमानपीतिन्यायेनसवर्णदीर्घात्प्रागेवटापोलुक्।संज्ञायांजन्याः।जनीशब्दादित्यर्थः।जन्याजामातुर्वयस्यानववधूयानवाहाश्चजन्याःजन्योवरवधू।
ज्ञातिप्रियभृत्यहितेषुचेतितुविश्वः।जन्याःस्निग्धावरस्यायेइतित्वमरः।जन्यामातृवयस्यासाजन्याअनिवरप्रिया।जननीजनपित्रोश्चजन्यंनिन्दायुद्धयोरितितु
धरणिः।भाष्यंतुजन्याइतिकिंनिपात्यतेजननजनीभावोयत्र।जन्याइतिपंचमीनिर्देशान्निपातनानर्थकमिति।तद्वहतीत्यनेनैवजनीशब्दात्प्रत्ययसि
द्धेः।रूढिरपिपंकजमित्यादिवत्सिद्धेतितदाशयः।ननुःइदंतर्हिप्रयोजनंसर्वकालप्रत्ययविध्यर्थंकर्तव्यंसूत्रमित्युक्तं।एवंचेत्सिद्धौमार्योनालिंगितेर्थे
ससाधुत्वंचिंत्यमितिभाति।जनवादेतुजन्यशब्देमतजनहलादित्यनेनसाधुः।युद्देरुदंतः।नचैतत्रधनुरितिकरणमात्रोपलक्षणंधनुरिति।तेनचोरं
विध्यतिखड्गेनेत्यादावपिन।नचतत्रासामर्थ्यंप्रधानस्यसापेक्षत्वेनादोषात्।प्रत्ययार्थैकदेशव्यधनव्ययतदंशेनित्यसापेक्षत्वात्चा।चोरंविध्यतीत्यादौत्व
नभिधानादृरणीयःसत्यनिष्ठत्वे।तदित्यनुवर्तमानद्वितीयांतावाधायाहतृनंतमितितद्योगेहिनलोकेतिषष्ठीनिषेधाद्द्वितीया।तृजंतत्वेहिषष्ठीस्यादिनि
भावः।सर्वस्यापिस्वेच्छानुसारित्वेनसामर्थ्येलभ्यमर्थमाह।परेच्छानुसारीति।पदमस्मिन्निर्देशादेवात्रप्रथमासमर्थविभक्तिःआवर्हिउत्पाटनयोःस्य गृह
पतिनासं ।निर्देशादेव तृतीयासमर्थविभक्तिःसंज्ञायामित्यनुवृत्तेर्दक्षिणाग्न्यादौननैववयो।मूलशब्दयोनैकशेषोयत्तदेतेभ्यइतिवत्।मूलांतुमूलादिद्वंद्वयोः
पुनर्द्वंद्वइत्यन्ये।नावातार्थमितिशक्यार्थेऽर्हलोण्यत्।करणेतृतीयातस्यस्वातंत्र्यविवक्षायांकर्तरिवा।वयसातुल्येमित्रएववयस्यः।धर्म्यंधर्मफलंचध्मोवधा
हेःदंडादिभ्यइत्यर्हार्थेयत्।मूलेनेतिकर्तरितृतीया।सीता।कृष्टक्षेत्रसमीकरणार्थः।काष्ठविशेषोमईइतिमध्यदेशप्रसिद्धः।समितमिति।संपूर्वाद्दिणः क्तः।धर्मा
दनपेतं।यदनुष्ठानंधर्ममनुवर्ततएवतदित्यर्थः।निर्देशादेवपंचमी। समर्थविभक्तिः।छंदसो।निर्माणेइच्छायाःकरणत्वेनतृतीयांतात्प्रत्ययः।पुत्रइति।सं
साधिकारवसलव्धंप्रीणातीतिप्रियः।भावःसाधनंचेन्निसुट उभयोर्विधानादितिभावः।प्रतिजनमिति।जनंजनंप्रतीतिविग्रहः।भाक्तइतिभक्तोन्नंतत्रसाधुरन्व।
स्त्रिष्कलीकृताइत्यर्थः।योगविभागादिति।सर्ववेदपारिषदंहीदंशास्त्रमितिभाष्यप्रयोगादितिभावः।णस्यानुवृत्तेरुभयोर्विधानमित्यन्ये।समानतीर्थाधिकरणक
वासकर्तृत्यर्थेप्रत्ययइत्यर्थेप्रथमोच्चारितसमानतीर्थशब्दस्यप्रकृतित्वंवासीत्यस्यप्रत्ययार्थत्वं।यादिप्रत्ययविवक्षायांपूर्वमेवतीर्थेयेइतिसादेशेप्येकादेशाविकः।

त्न्यायेन समानतीर्थशब्दत्वात्प्रत्ययः। पूर्वापरप्रथमेति तत्पुरुषः। समानोदरे ष्वेवं॥ समासाश्चातुरर्थिकाः॥ ॥प्राक्क्रीता॥ अर्थसेव व्याख्यानं तीषधिं वमिति
अर्थबोधकेष्वेवास्योपस्थितिरतः प्राग्वतेष्ठञित्यतः प्राक्वत्यतोः पूर्णावधिरित्ययुक्तमित्यपास्तं। तद्ग्रामाणां शास्त्राणामर्थबोधकत्वाभावेन तेष्वनुपस्थितेः
निभ्यो ह्यइत्यादि। अत्र हितार्थे यत्। नभ्यं चक्रमिति तु नाभिरिवेत्यर्थे शाखादित्वात् यत्। साधु सक्थिद्रव्यकावयवो नाभिः स यथा शाखास्थकार्यविशेषं धारयति पीवि
र्ततिवांजनाद्यपेक्षते च। तथा चक्रमपीति सादृश्यं। एवं न भार्यो वृक्षोऽपि नभ्य एव। तदर्थ्यात् ताच्छब्द्यन्यायेनेति स्पष्टं भाष्ये। पादर्दीर्घत्वमिति। येन प्रकृतिभावः स्मु
धीयते तेन दीर्घतदभावयोः ष्टिलोपेन हविष्यमिति। हविःशब्दोऽगवादिः विभाषाहविरित्यत्र तु हविर्विशेषवाचकानामेव ग्रहणं। तस्य पद्भेति नस प्रभृतिषु
णस्य प्रकारार्थत्वात् भाष्ये तु नासिकायाः यत्तसक्षुद्रेषु नसिति पठितं। ये च तान् शीर्षन्छन्दसीत्यतः शीर्षन् इति निकल्लेनो शीर्षण्ये ये चेति प्रकृतिभावः। विषयवाचे
वंशश्रोत्राकारांतो व्याख्यानान्न तु नांतः। वृषन् शब्देन वृष्णे हितमिति वाक्यमेव। एवं ब्रह्मन्पर्यायब्राह्मण शब्देन ब्राह्मणेभ्यो हितमिति वाक्यमेव। मनुश्चा
त्ययइति स्पष्टं भाष्ये। आत्मन्विश्व। उत्तरपदग्रहणं भोगेनैव संबन्धनान्यन व्याख्यानात्। भोगशब्दः शरीरवाच्यत्र। अहिरिवभोगैः पर्येतीति दर्शनादिति स्पष्टं
भाष्ये कर्मधारयादेवेति। पंचजनसर्वजनेष्वप्येव। रथकारपंचमेषु चतुर्षु वर्णेषु प्रसिद्धं कं पंचजनशब्दस्य रूढिः। मातृभोगीणेय षाणत्वं तथा राषाभ्यामित्य
त्र निरूपितं। सर्वपु। यथासंख्यमत्र। पुरुषाद्वधेति। वधादिषु त्रिषु सामर्थ्यात्षष्ठी समर्थविभक्तिः। कृतेति ते नेति निर्दिष्टेषं। असिप्राप्त इति। पाक्षिकमपटी
प्युपलक्षणं हितेतु पुरुषाद्वएवेति बोध्यं। तदर्थं वि। विकृतिवाचकादिति न चास्य न प्रथमत्वं प्रकृतावित्यर्थे समर्पकापेक्षया तत्वसंभवान्न तस्मादित्यनुवृत्तेरा
ह। चतुर्थ्यंतादिति। तदर्थमिति सप्तम्याः स्थाने प्रथमा सामान्ये नपुंसकं तदाह तदर्थायामिति। प्रकृतिविकृतिशब्दावुपादानकारणतत्कार्यपरौ परस्परसा
मभिव्याहारात्। तदर्थग्रहणं स्पष्टार्थं। शंकव्येउगवादीति यत्। वालेभ्या इति वल्वजस्यायां योलौहित्यादिगुणस्तद्वत्त्वाद्वालेया इत्युच्यते प्रकृतिविकृति
भावेऽन्यथा कथंचित् आर्षभ्य इत्यत्राप्येवं योवत्सः स्वभावस्याप्राप्तः अर्थे योऽव्यते स एव मुच्यते पूर्वविप्रतिषेधेनेत्रिमजपेक्षयेति शेषः तदस्य तदस्मिन्स्यादिति तदर्थं विकृ
तेरित्यादिनिवृत्तमिति कैयटः। लौकिकीमिति लोकोऽत्र न प्रयोक्तृसमुदाय इति तेन मृदुश्लक्ष्णरूपापभ्रंशप्रयोगस्यैव प्रायेण करणात्तत्त्वमात्र्विष्टो लोको न लोकशब्दे

ाइतिद्वयतोःपूर्णोःदघ्निः॥२

त·
ल·श· ना। लौकिकीविवक्षा यत्र प्रायस्य संप्रत्ययः प्राय इति लोको व्यपदिश्यते इति भाष्यात् लोकः शिष्टो लोक इति तदर्थः प्रायस्य समर्थकस्येति कैयटस्यापि सम
शे·मु यशब्दार्थविषये समर्थस्येत्यर्थः। तादृशस्य शिष्टलोक एवेति बोध्यं। प्रासादो देवदत्तस्येति ईदृशेर्थे प्रासादीयो देवदत्त इति प्रयोगो लोके न दृश्यत इति भावः। प्राप्त
९९ तेः। अत्र वतिशब्देन तदर्थत्वस्य तेते नार्थबोधकेष्वेवास्योपस्थानं तेनाश्वादिविषयेन आर्हादा आ त्राऽर्हतीति ति ठं ते कदेशा सर्वतानुकरणं व्याख्यानात् आङ
भिव्याप्तौ तदाह। तदर्हतीत्येतदभिव्याप्येति। यद्यपि ऊर्ध्वमानं किलोन्मानं परिमाणं तु सर्वतः॥ आयामस्तु प्रमाणं स्यात् संख्या बाह्या तु सर्वतः। ऊर्ध्वं यन्मीयते तदु
न्मानं सर्वतो मानमिति वातः परिमाणं। आयामविवक्षायां प्रमाणमित्येतन्न भवति। संख्या सर्वतो बाह्या भेदमात्रप्रवर्तित्वे पा। नैषामानं कुतश्चनेति भेदोत्र वैलक्ष
ण्यमिति कैयटस्तथाप्यत्र परिमाणशब्देनोन्मानमपीत्यसमासे इति सूत्रस्थभाष्यस्वरसः। प्रमाणं तु न स्यात् तेमानाभावात्। सप्तदशस्त्रस्यामनुवर्तत इति सं
बध्यत इत्यर्थः। एतेन षोडशसूत्राणामेवानुवृत्तिविषयत्वमित्यपास्तं। परिमाणान्त इह परिमाणशब्देन परिच्छेदकमात्रं शाणपर्युदासात्। यद्यप्युत्तरपदस्येति
सूत्रे भाष्ये तदधिकारस्यात्र सूत्रे प्रयोजनाभावप्रतिपादनाय परिमाणान्तस्येत्यत्र संख्याया इत्यनुवृत्तिरुक्ता तथापि तदनुवर्त्य वाक्यभेदेन व्याख्येयं। तेन परिम
णान्तस्येत्यस्यासंख्यापूर्वपदे काचित्कत्वं। अत एवात्र परमनैष्किकमिति भाष्योदाहृतं संगच्छते। संख्याया इत्येतत् घटितवाक्यस्तु हृवर्यान्परिमाण
न्तस्येत्यस्याप्युत्तरपद एव प्रवृत्तिरिति न तत्र तदधिकारप्रयोजनमिति तदाशयः। यद्यपि कालोपि परिच्छेदकस्तथापि तस्येह न ग्रहणं। परिमाणान्तस्य
वसिद्धे संख्यायाः संवत्सरसंख्यस्य चेति संवत्सरग्रहणेन परिमाणग्रहणे कालाग्रहणज्ञापनात्। नन्वसंज्ञायां वृद्ध्यर्थं संवत्सरग्रहणं ज्ञापकप्र
माण्येन तादृशसंज्ञाया अभावकल्पनात्। एतेन संवत्सरस्य चेत् संख्याया एवेति नियमार्थं नदित्यपास्तं। भाष्यप्रामाण्येन नियमस्यावर्त्यप्रयोगानभिधा
तेन ज्ञापकत्वस्यैवौ गीकारादिति दिक्। ज्ञापकमिति। न च परमनैष्किकमित्यत्रापरिमाणत्वान्पूर्वसूत्रप्राप्तवृद्धेर्निषेधार्थं तदिति वाच्यं। एतज्ज्ञाप्यप्र एम
माण्येन तत्र परिमाणशब्देनोन्मानस्यापि ग्रहणात् ध्वनितं चेदं निष्कस्य परिमाणवाचित्वात्पूर्वेणाप्राप्तोनेन ठक् विधीयत इति कैयटेन। पर्णा ९९
पादाद्यप्युन्मानरूपमेवात्र गृह्यते ज्ञापिते तु तत्संभावनामात्रेण तद्वारिताऽर्थ्यं तत्फलितमाह इतःप्रागिति। प्रत्यासत्त्या पांचमिकेष्वेवेदं तदाह। सुगव्य

मित्यादि। अन्यथा प्रत्ययविधित्वान्निषेधः स्यात्। इदमुपलक्षणं व्यपदेशिवदित्यस्यापि तेन गव्यसिद्धिः। व्यपदेशिवद्भावनिषेधस्य सूत्रगृहीतान्तादिश
ब्दविषयकत्वाच्च। प्रतिषेध्यसमर्पकगोपुच्छादिषु तदन्तविधिर्व्यपदेशिवद्भावो वा स एव तन्निषेधस्य प्रत्ययविधिविषयत्वात्। अंत्यनिषेधे सोत्तायुक्त्याप्यप्र
वृत्तिर्बोध्या। इतऊर्ध्वं त्विति। वाचनिकमेवेदं। असमासे इति सूत्रादूर्ध्वमार्हीयते नाहीये चेत्यर्थस्तदाह। प्राग्वतेरिति। तद्धालुकीति लुगंतायां प्रकृतौ नेत्यर्थः। अधि
त्रैद्विपूर्वमिति। नतावदेषा लुगंता प्रकृतिरिति संख्यापूर्वपदाच्छूर्पादन्यतरस्यामित्यत्र षष्ठ्यर्थो वा अध्यर्द्धेति लुक्। अर्धात्य। जगलधेन्विति सूत्रे विभाषितं ग्रहण
स्योत्तरपदसंबद्धत्वात्पुनर्वाग्रहणं। तपरः किमिति दीर्घस्य वृद्धिनिषेधे फलाभावात्प्रश्नः॥ निषेधो न स्यादिति। पूर्वपदस्य वृद्ध्यभावपक्षे वृद्धिप्रतिफलोप
हितनिमित्तत्वाभावादिति भावः। तस्य वृद्धिप्रसंगे तु नामाद्यायैव निषेधः सिध्यतीति बोध्यं। शताच्च। उत्तरसूत्रप्राप्तकनोऽपवादोऽयं। अशत इति न प्रकृतेर्विशे
षणमसंभवात्। किंतु प्रत्ययार्थस्य तत्रापि यत्र प्रकृत्यर्थशतस्यैव प्रत्ययार्थत्वं तत्रैव निषेध इष्यते तदाह। इहेति। तेन शतेन क्रीतं शत्यं शाकटशतमित्या
दौ न निषेधः। वस्तुत इति। अभेद एव पारमार्थिको भेदस्तु काल्पनिक एवेति भावः। द्विशते वेति। द्विगुणशतेनेत्यर्थः। तेन द्विगुत्वाभावात्कनो न लुक्। द्वा
भ्यां शताभ्यां क्रीतमित्यर्थे कलुगंतद्विशतशब्दात्त्वलुकीति तदंतविधिनिषेधात्प्राप्तिरेव नेति बोध्यं। संख्याया अति। सूत्रे द्वंद्वगर्भबहुव्रीहिगर्भो नञ्त
त्पुरुषः। अंतग्रहणमेकसप्तत्या क्रीतमित्यत्र निषेधार्थं। अन्यथा प्रत्ययग्रहणपरिभाषया न स्यादिति हरदत्तः। वतोरि। अत्रेटन प्रत्ययो व्याख्यानात्
। योगविभाग इति। अन्यथा त्रिंशतः शदंतत्वात् द्विशब्दस्य विंशादेशस्तिप्रत्यय इति पक्षे विंशतेस्त्यंतत्वाभावात् स्यादिति भावः। विंशकेति विंशतेर्डितीति लो
पपररूपं। त्रिंशके टेरिति टिलोपः। अधिक इति। अस्य भागवदपेक्षत्वेऽपि नित्यसापेक्षत्वान्नासामर्थ्यं। अध्यर्द्धपू। द्विगुसाहचर्यादध्यर्द्धपूर्वोऽप्यत्र स
मानाधिकरणसमास एव गृह्यते संख्यासंज्ञासूत्रे भाष्ये अध्यर्द्धपूर्वाद्द्विगोरिति पाठो दृश्यते। द्विगोश्च परस्येति। तन्निमित्तस्येति शेषः। समाहारद्विगोर्द्वि
शूर्पाक्रीतमित्यर्थे त्वनभिधानात्प्रत्यय एव नेति बोध्यं। असंज्ञायामिति द्विगुविशेषणं पंचकलापाः परिमाणमस्य पंचकलापं कच्व द्धितलुगियं कस्य
चित्संज्ञातत्वात्त्यंतस्य न लुक्। तस्य द्विगुनिमित्तत्वाभावात्तु को प्राप्तो। भाष्यप्रत्याख्यातमिदं विभाषा कार्षापणाता द्विगोरध्यर्द्धपूर्वाच्चेत्यर्थः। अध्य।

त॰
क॰ श॰ ईप्रतिकमिति। आदेशस्य प्रत्ययसन्नियोग शिष्टत्वान्न तत्पक्षे प्रत्ययलुगिति भावः। द्वित्रिपू॰ पूर्वग्रहणं स्पष्टार्थं। अत एव द्वित्रिभ्यामिति यदुच्यते तद्द्वैयोग्यमि
शे॰ सु॰ तिभाष्ये उक्तं। द्विनिष्कमिति ठञो लुक् न द्वपूर्वादिति। इदं बिस्ताच्चेति सूत्रेपि बोध्यमिति भाष्यस्पष्टं विंशतिकान्खः। अत्र द्वित्रिपूर्वादिति न संबध्यते। खार्या
२० ई। दीर्घोच्चारणं स्पष्टार्थं। कन्प्रत्यये केण इति ह्रस्वेन च सिद्धेर्दीर्घोच्चारण सामर्थ्येन लोपबाधपूर्वकं सवर्णदीर्घकल्पने गौरवात्। खारीशब्दस्य स्वपर्या
यपुंल्लिंगखारशब्दप्रकृतिकत्वे पुंवत्त्वेनेष्टासिद्धेश्च। पणपादमा। पणादिसाहचर्यात्पादशब्दः परिच्छेदकवाच्यत्र। त्रयोदशेति। ठञ्ठकोः ष्ठन्यतो ४ कन् द्व
न्द्विठन्‌: ७ अन्नूशतमानादण्‌ ९० ईक ईकनौ ११ पणादियत् १२ द्विंत्री तिवार्तिकोक्ताण चेत्येवं त्रयोदशेत्यर्थः। अनुवर्तनेन तु नान्यत्वमिति भावः। तेना।
क्रीतं क्रयो नाम द्रव्यदानपूर्वकं वस्त्वन्तरग्रहणं तेनेत्यनेन च प्रत्यासत्त्या क्रयघटकं द्रव्यमेव गृह्यते। सांस्यांशवस्नेत्यनेन न तु न सिद्धिः। यस्य शतं मूल्यं न
भवति। अथ च कार्यवशात्तेनं क्रीतं न त्वत्र तस्या प्राप्तेः। धनपतिसंयोग इति। संयुज्यते येन पुरुषाः फलेन स संयोग इति भावः। अत एव संयोगो नामेदं क्रा
त्वेदमवाप्यते इति भाष्यं करणव्युत्पत्त्या यागादिरेव संयोग इति कैयटश्च संगच्छते॥ गोद्व्यचो। ठकोपवादः तस्येश्वरः। तस्येत्य- नुवर्त्तमानेन तस्य ग्रहणं निमित्ता
मित्यस्य निवृत्त्यर्थं। पात्रिकीति। षित्त्वान्ङीष्। तदस्मिन्वृद्ध्या प्रत्येकमिति एकैककर्मकदानाधिकरणेपि प्रयोगस्येष्टत्वाद्दूद्दस्तु सौत्रत्वात्साधुरिति भावः। आ
यादिसाहचर्यात्संज्ञाद्दद्देरग्रहणं। उपदेतिट्टाबंतं। रक्षानिर्वेश इति रक्षानिमित्तकभृतिरूप इत्यर्थः। उत्कोच इति। उपह्वार इत्यन्ये। रूपकसैति रूप्यकार्ष्य
पणस्येत्यर्थः। अत्र मानेवित्यं असामर्थ्यं तु नित्यसापेक्षत्वाद्गमकत्वाद्वारयितुं शक्यं अर्द्धमित्युक्ते कस्येति जिज्ञासायां रूपकस्येत्युत्तरमत एव संगच्छा
तेभारभूतेभ्य इति। वंशादिशब्दानां भारभूतत्वं तथाभूतार्थाभिधायित्वाद्बोध्यं। सौत्रमेकवचनं। अत्राद्यव्याख्यानमेव युक्तं। द्वाठकिकीति। निष्कान्म्यामित्य। एम
स्थानं तरस्येति न्यायेन परिमाणान्तस्येति वृद्धिनिषेधकत्वाभावादत्रेजन्ता लुगभावे इति। अन्यतरस्यां ग्रहणमनुवर्त्तत इति वृत्त्यनुरोधेनेदं। वस्तुतस्तु दत्र २०
नानुवर्तते पुनः खग्रहणात्तत्तु कृठञ एव। खष्ठनोस्तु न लुक्। सहविधाने उद्देश्यविधेयभावासंभवात्। द्वेहेनच सहविधानस्य स्फुटत्वात्। अत एव भाष्ये द्व
न्द्वेनाप्यनुकृष्टस्य स्वोन्यतरस्यामित्यस्य चानुवृत्तिं खौ कत्यलुक् स्वो चेति मत्वा ख्यातं। तेन द्वैकुलिजिकीति चिन्त्यमेव तदस्य परिमाणमुत्तरेण योगविभागो गोत्र

भाष्ये ध्वनितः। अत्र। परिमाणशब्देन परिच्छेदकमात्रं तेनोत्तरत्र संख्यायामनेन विशेषणं संगच्छते। तेन षष्टिर्जीवितपरिमाणमस्य षाष्टिक इति सिद्धं।
द्विषष्ट्यादिभ्यस्त्वनेनानभिधानान्न प्रत्ययः। किंतु द्वे षष्टी भृत इत्यर्थे तमधीष्टो भृत इत्यनेन तस्य च न लुक्। अनार्हीयत्वात्। कालादित्यधिकारेपि यथाकं
थंचित्कालवाचकानां तत्र ग्रहणान्न दोषः। रमणीयादिभ्यो नभिधानान्न प्रत्ययः। स्पष्टं चेदं सर्वमत्र भाष्ये। अस्येति वर्त्तमाने पुनस्तदस्येति तु स्पष्टार्थं।
तत्सामर्थ्यादार्हीयत्वनिवृत्त्या द्विषाष्टिक इत्यादौ लुक्केति वक्तभाष्यविरोधादनादेयं। काकवाशितेनेव नदस्येत्यनेनार्हीयत्वनिवृत्तेरशक्यत्वाच्चेति दि
क्। संख्यायाः। संज्ञा अत्र तदंतविधिः। ठञ्विधौ संख्यायाः प्रयोजनमिति नियेन विधिरिति सूत्रे वार्तिकात्। ठञ्विधायके संख्याया इति पदघटिते सूत्रेत
दंतविधिरिति तदर्थः। तेन द्वे षष्टी परिमाणमस्य सूत्रस्य संघस्य वा द्विषष्टितत्परिमाणमस्याध्ययनस्य तद्द्विषष्टिकमिति सिद्धं। अत्र द्वितीयस्य न
लुक् द्विगुनिमित्तत्वाभावात्। पूर्वसूत्रमिति। तेन पंच गावोस्य संघस्य धनमित्यादौ न। ननु पंचादीनां संख्येयवृत्तित्वात् परिच्छेदकत्वाभावः। पंचसंख्या
कप्रस्थादिपरिमाणके तु नेष्यत इत्यत आह। तत्र संज्ञायामिति। यद्वेति। वृत्तिविषये तन्मात्रवृत्तित्वमिति भावः। संघे पंचक इति पंच परिमाणमस्य
संघस्येत्यर्थः। प्राणिसमूह इति। परंतु संघः समूहः समुदाय इत्यनर्थांतरमिति पंक्त्यादिसूत्रभाष्यात् समूहमात्रं संघः परंतु तस्य बहुसमुदाये शक्तेः
पदद्व्यात्मकेन इत्यादौ द्विकं सूत्रमित्यस्य सिद्ध्ये तदित्याहुः। पंचकमध्ययनमिति पंचावृत्तयः परिमाणमस्येत्यर्थः। स्तोमे ड मंत्रसमूहे स्तोमशब्दश्
क इति कैयटः। समूहमात्रे प्रयोगस्तु लक्षणयेति तदाशयः। मंत्रसमूहः प्रत्ययार्थः। स्तुतिः स्तोम इत्यत्र स्तुतिपदं स्तुतिकरणमंत्रसमूहपरं। पंक्ति।
विंशति। अत्र विंशत्याद्याः संख्यायां संख्येये च। उभयत्राप्येकवचनांताः तेन विंशतिर्गवामित्यादि सिद्धं। तत्र नवत्यंताः स्त्रियां सहस्रादिवदेकत्वादि
वचनमन्यत्र्यं व्युत्पन्नानि इति वार्तिककृतः। एषां प्रदर्शनं तूदाहरणमात्रं। पंचद्दशतौ। डत्यं तौ निपात्येते। तदस्य परिमाणमित्यर्थे त्रिंशच्च। आभ्यां तद
स्य परिमाणमित्यर्थे अण् प्रत्ययो भवति ब्राह्मणेभिधेये समुदायेन चेत्प्रत्यासत्त्या ब्राह्मणसंज्ञा गम्यत इत्यर्थः। लन्धुमिति। उपलक्षणमिदं क्रियामात्रस्य
।तेनोपवासं कर्तुं योग्यो भवतीत्याद्यर्थे औपवासिकादि सिध्यति। नित्यमाभीक्ष्ण्यमिति। एतद्वृत्त्यनुरोधेन। वाक्यस्यदर्शनान्नित्यग्रहणमनर्थकमि।

११ अतं तरस्यस्य पूर्वसूत्रे इति शेषः अनंतरस्येत्युक्तात् तस्यानंतरत्वं सूचितं तच्च पूर्वसूत्रे नन्व ५ च्रू:

त·
त·श· तिभाष्योक्तेस्तदर्थत्वान्नौचित्यं। दंडादिभ्यः इति। दंडादिभ्यो य इति त्वपाठः। पाञात्। अत्र नित्यसमासः। कडंकर — कडंकमितिमादमित्यर्थकं। कडंकरं बुसं त
शे·सु· त्कर्माहतीति। यद्यपि प्रज्ञातिकृशब्दयोस्तत्कर्मणि लक्षणया सिध्यति तथाप्यत्र प्रकरणे मुख्यार्थे प्येव प्रत्यय इति ज्ञापनार्थमिद। पारायणमिति। यद्यपित
२१ तगुरुशिष्याभ्यां निर्वर्त्यते तथापि शिष्य एवेष्यते अभिधानस्वभावात्तदाह। छात्रेति। एवं तौरायणिकोपजमानएव नतु अत्विजोतिवोध्यं। चांद्रा
यणं तयोर्विशेषः। संशयं। संशयशब्दस्तद्विषयत्वेलाक्षणिकः। आपन्न इति कर्तरिक्तः। ततो निगमनमिति पंचम्यंतात्तसिल्। पथो ण। पथः पंथादे
शो णश्च प्रत्ययः। अणिति पाठस्तु छेदादिभ्य इति सूत्रस्थ भाष्यासंमतः। नित्यं गच्छतीति वृत्त्यनुसारेण भाष्ये नित्यग्रहणं प्रत्याख्यानात्। कालात्। काल
ग्रहणे यथा कथंचिदपि कालबोधकस्य ग्रहणमिति तदस्य परिमाणमिति सूत्रे भाष्ये स्थितं अतिप्रसंगस्त्वनभिधानान्न। आह्निकमिति। अह्नः ष्ट्खोरे
वेति नियमान्न टिलोपः अत एव अह्न एवेति। तस्तत्तया व्याप्यमानकाल इत्यर्थः। तमधीष्ट इत्यत्र तत्संयोगे द्वितीया। मुहूर्तमध्येषणोपि तत्फलीभूता अध्य
यनक्रिया व्याप्नोतीत्युपचारात् यावत्कालमध्येषणा भाणीक्रीयते तावतः प्रत्ययो नेष्यते। भूतभाविनोरुभयोरुपादानसामर्थ्यात्कालांतर्भावो बो
ध्यः मासाद्व। निर्वृत्तादीनां पंचानां अधिकारेपि भूत इत्येव संबध्यते। नह्यर्थांतरे प्रत्यये तदंतेन वयो गम्यते तदाह मासं भूत इति। यत्स्यौ ति। अवयसीति सू
त्र भाष्यात्तु अवयापि यपो नतु वृत्तिरिव लभ्यते। एवं हि तत्र भाष्यं अवयसि ठं श्चेत्यनंतरस्य णयतोनुकर्षः द्वष्यं विज्ञानीयात् यनप्यनुवर्त्तत इति यवप्यनु
वृत्ता वेव भवतीति वोध्यं व्यवहितस्यापि कचिदनुवृत्तिर्दृष्टा यथा द्वितीयाठौ स्वेनइत्यत्रैतदइवेदमेव मिहापि कश्चिद्भ्योदित्यर्थ इति वदताकैयटेन।
दृष्टांतेन व्यवहितस्यापीत्युक्त्वा चपूर्वसूत्रे तदसंबंध एवोक्तो मूलं तु वृत्त्यनुसारीति दिक्। चा ण्यद्वितिं। अवयसि ठंनिति सूत्रद्वयं तु नकृतं शब्दगौरवाद् राम
पियोगविभागस्य गरीयस्त्वात्। पंचत्वर्थेष्विति। यथायोगमिति शेषः। द्व्यहीन इति। तद्धितार्थद्विगो रूपं। समाहारद्विगौ तु न खः। समासांते कृते हनशब्दांत २१
द्विगोरभावात्। संख्यायाः। संख्यायाः परस्य संवत्सरसंख्याशब्दस्येत्यर्थः। द्वेषष्टीति। षष्टीति षष्टिशब्दोत्र तत्संख्या। केहणादिरूपेकाले कर्त्तते तः कालादित्य
धिकारस्य भूतार्थ प्रत्ययः। संवत्सरग्रहणमिति। संख्यायास्तु न परिमाणग्रहणेन। असति गमके ग्रहणं। संख्या वाह्यात् तु सर्वत इत्युक्ते रिति भावः। वावृलुगि।

ति।वाक्यभेदेनतयोरेवेत्यर्थः।द्वैवर्षिकइति।अस्यव्याधिरितिविशेष्यं।तेनननित्योलुक्।प्रतिषेधोनेति।भविष्यदर्थकोप्रत्ययभिन्नेजिद्दा।दाविस्य
स्तदाह।गम्यतेहीति।कर्मकरिष्यतीत्यादिपदांतरसमभिव्याहारेणेत्यर्थ स्तदाहाधीष्टोभृतोवेतिभूतोवेत्यपाठः।तत्रभविष्यत्त्वस्यंकथमप्यनवगतेः
द्वैवार्षिकोमनुष्यइति।चित्तवतीत्यस्यारंभसामर्थ्यादेवनित्यत्वेसिद्धेपुनर्नित्यग्रहणाद्भूतरूपेर्थेएवनित्यंलुक्तत्रैवाभिधानाच्चेतिनात्रलुगितिहरद
त्तः।परेतुनित्यग्रहणेनवाच्यवृत्त्योःकार्थालाभस्तस्मात्अध्येषणभरणयोश्चेतनविषयकत्वेनतत्रलुकोनित्यतयात्रिदादिप्रत्ययपश्चाभावेनतत्रवृत्ति
प्राप्तिरेवननित्यग्रहणेतुवेत्यस्यनिवृत्तयेस्यस्वार्थमेवमूलंतुवृत्त्यनुरोधेनेत्याहुः।परिमाणांतस्या।व्याख्यातमिदं अत्रापिवृत्त्यादिलिखनंतुप्रमादात्।केचि
त्पठंतीति अत्राहचिवीजंकुलिजात्कुरवोवेत्यत्रदर्शितं।षष्टिकाः।शालिविशेषएवायंसाधुर्नेमुद्गेषु।एकवचनांतप्रयोगाद्दाहबहुवचनमिति।परिजप्यइ
त्यस्यविवरणं।जेतुंशक्यइति।अस्येत्यर्थइति।ब्रह्मचर्यचेत्तत्कालपरिच्छेदमित्यपिवोध्यं।यद्वेति।अत्रपक्षेब्रह्मचर्यचेद्विशेष्यमित्यर्थः।मासोस्येति
अत्रमासस्यप्राधान्यात्प्रथमा।अत्यंतसंयोगेद्वितीयातुविशेषणादेवेतिभावः।भाष्येतुयद्वेतिपक्षपात्येवामासिकोब्रह्मचारीतित्वर्थेत्र्याद्यजंतंबोध्यं।म
हानाम्न्यो नामेति।अनेनरूढतयाभाषितपुंस्कत्वाभावात्पुंवत्वंनेतिसूचयति।अतएवभाष्येमाहानाम्निकमित्युदाहृतं।भाष्येतुतदस्यब्रह्मचर्यमिति
महानाम्न्यादिभ्यउपसंख्यानं।महानाम्नीनांब्रह्मचर्यमाहानाम्निकमित्युक्तंमाहानाम्निकइतितुमहानाम्नीसहचरितव्रतपरा।महानाम्नीशब्दस्तच्चरती
त्युपसंख्यानमितिवचनेनसाधितंतस्यदक्षिणा।यज्ञवाचकेभ्यःषष्ठ्यंतेभ्योदक्षिणेत्यर्थेठञित्यर्थः।अकालादपीति।परेतुयज्ञग्रहणादेवात्रकालवा
चकादित्यस्यासंबंधः।नहिद्वादशाहसाध्ययज्ञवाचीसशब्दःकालशब्दः।अतएवभाष्येआख्याग्रहणात्प्रसिद्धमग्निष्टोमादिअप्रसिद्धंपंचोदनादिकंप्र
कयज्ञादिचयेआचक्षतेतेभ्यःसर्वेभ्यःप्रत्ययइत्यर्थकमुक्तम्।तत्रचेति।कालवाचिभ्योदीयतेकार्यमित्येतयोरर्थयोर्भववत्प्रत्ययाइत्यर्थः।प्रावृषएण्यः।श
रदेसंधिवेलादृत्वित्यण्इदंवृत्त्यनुरोधेन।भाष्येतुचोभिन्नक्रमःदीयतेइत्यनंतरंबोध्यः।चकारेणयज्ञाख्येभ्यइत्याकृष्यते।तत्रदीयतेइत्यर्थेयज्ञाख्येभ्यःष्ठ
ञ्भवतीत्यर्थः।अग्निष्टोमेदीयतेभक्तमाग्निष्टोमिकं।कार्यरूपार्थेएवभंववदतिदेशइत्युक्तं।सुषमहर्षुरंकाम्रुषेदीयतेइत्यादिभाष्यरीत्याप्युत्तरत्रोभयोरपि

त·

ल·प्र कारः।संपादिनि।गुणोत्कर्षः संपादः संपत्तिस्तद्वदित्यर्थः।प्रभवतीति समर्थ इत्यर्थः।काल्यमिति।प्रातः कालवाची काल्यशब्दस्तद्धा चिकल्पशब्दवदव्युत्पन्नं प्रा

शे·मु तिपदिकं वोध्यं।ततः स्वार्थिकाण्णं तं वा।इंद्रमहः इंद्रोत्सवः।मंथो विलोडनदंडाधारः काष्ठविशेषः।संघ्नदंडयो रूढावेतौ।चूडादिभ्य इति इदं व्युष्टादिभ्योण्।

२२ तोरणमित्यनयोरपि वोध्यं।तेनयथादर्शनं व्यवस्था।अग्निपदे दीयते कार्यं वा आग्निपदं पैलुमूलं उपवस्ता प्राप्तो स्य श्रोपवस्त्रं प्राशितं।भाष्ये ऽग्निपदादिभ्य।

इति पाठः।ऐकागारिकट्।चौर इति।तेन भिक्षो न।द्वित्वं ङीवर्थं।आद्युदात्तत्वमप्यत्र निपात्यते।अतएव ठञा सिद्धे निपातनानर्थक्यमिति भाष्य उक्तं।समान।

कालस्येति।एतदर्थमेव निपातनमयमप्याद्युदात्तः।आद्यंतावुत्पत्तिनाशौ।आकालात्ठश्चेति वार्तिकान्निर्देशं।आकालिका।समानकालिकाद्यंताचंचलेति।

यावत्।चादाकालिकी।तेन तु।सूत्रे तुल्यमिति सामान्येन पुंसकं प्रथमांतं च।उदाहरणे प्येवं।व्यापारविशेषणत्वात्।क्रियेति च संनिहितत्वात्समानविभक्ति

कत्वात्प्राधान्याच्च प्रत्ययार्थविशेषणं।यत्तुल्यं सा चेत्क्रियेत्यर्थः।प्रकृत्यर्थविशेषणं तु न।ब्राह्मणादिशब्दानां लक्षणया ध्ययनपरत्वेन क्रियोपमानत्वयोग्या

र्थकत्वेपि तत्र तृतीयार्थान्वयेन सत्वरूपतया क्रियात्वासंभवात्।स्यात्त्वेन तुल्यं गच्छतीत्यादिप्रयोगसत्त्वे तत्रापि तृतीयार्थान्वयेन सत्वरूपत्वमेव।पाका

दीनां तु सत्वरूपतास्पष्टैव।असत्वभूतार्थकतिङंतार्थानामुपमानत्वमेव न।नवैतिङंतेनोपमानमस्तीति सत्सूत्रस्य भाष्यात्।उपमेयत्वं त्वस्त्येव।कार्य

तानां क्रियान्वयनियमेन तुल्यशब्दार्थेऽनन्वय एव।अतएव प्रकृत्यर्थविशेषणत्वे कथं च तृतीयासमर्थनाम क्रियास्यादित्युक्तं भाष्ये।यस्यार्थस्य तिङंता

दिवाच्यत्वे क्रियारूपताभूत्तस्य संप्रति सत्त्वभूतोपि क्रियेत्याश्रयिष्यते इति कल्पने गौरवं।नृत्यवद्गमनमित्यादावस्तीत्यध्याहृत्य सत्तयोरेवोपमानोपमेय

भावेनादोष इत्यन्यत्र विस्तरः।तत्र तस्येव।यद्यपि मथुरायामिव पाटलिपुत्रेऽधीते इत्यर्थेपि पूर्वेणैव सिद्धं तस्य मथुरायां तुल्यमधीते पाटलिपुत्रे इत्यस्य च तु एम

ल्यत्वात्।तथापि द्रव्यगुणादितुल्यार्थ आरंभः।क्रियाचेदिति तु नानुवर्तते।किंचेवार्थस्योपमानविशेषणतया तुल्यपदार्थस्य विशेष्यतयात तो वोधे भेदः।एवं। २२

च उपमानमथुराभिन्ने पाटलिपुत्रे मे गृहमित्यर्थे मथुरावत्पाटलिपुत्रे मे गृहमिति साध्वेव।उपमेयेनाभेदान्वयात्तत्समानेषष्ठीसप्तम्यावुपमानाद्वोध्ये।ता

दाहा मथुरायामिवेति।अत्र वाक्ये प्राकारादिपदाध्याहारेणैव वोधः।प्राकारयोरेव चोपमानोपमेयभावः।वृत्तौ तु मथुरादिपदानां तत्संबंधिप्राकारे वृत्तिरिति

केचित्।परेतुषष्ठ्यर्थेसप्तम्यंतात्षष्ठ्यंताच्चायंसाधुः।अधिकरणसप्तम्यंतात्तुनायमसामर्थ्यादतएवैतत्सूत्रेतत्रग्रहणस्यवैशब्दयोगेषष्ठ्यर्थेसप्तमीज्ञाप
कतोक्ताभाष्ये।देवेष्विवमनुष्येषुनामेत्युदाहृतं।तत्रेवदेववन्मनुष्येषुनामेतिसाधु।उपमानदेवसंबंधिनामाभिन्नंमनुष्यसंबंधिनामितिबोधः।मथुरावत्पा
टलिपुत्रेप्राकारइत्यस्यउपमानमथुरासंबंधिप्राकाराभिन्नः।पाटलिपुत्रसंबंधीप्राकारइत्येवंबोधेएवसाधुत्वं।अस्मादेवज्ञापकादिवयोगेउपमानवि
शेषणादुपमेयविशेषणाच्चषष्ठ्यर्थेसप्तमीत्याहुः।तदर्हं।तदितिद्वितीयांतादर्हमित्यर्थेवतिरित्यर्थः।सूत्रेसोत्रन्वानद्वितीया।विधिवदिति।विधिविषययोग्यकर्तृहरिका
मंकंदेवदत्तकर्तृकंपूजनमितिबोधः।विधिशब्देनतदुक्तप्रकारः सादृश्याप्रतीतेः।पूर्वेणासिद्धेवचनंविनीतवदागमनंविच्छेदकृतहस्तवदित्यादौविनीतानामिदंयो
ग्यमागमनंकृतहस्तानामिदंयोग्यंच्छेदनमितिप्रतीतेरितिदिक्।तस्यभावः।भावेचाकर्मकेभ्योभावेइत्यादौभावपदार्थस्यान्यादृश स्यप्रसिद्धेस्सह।प्रकृतीति।भवंतिअ
र्थबोधायप्रवर्ततेअनेनेतिभावइत्यधिकरणेघञितिभावः।प्रकारइति।मुख्यविशेष्यतानिरूपितविषयताश्रयइत्यर्थः।तेनराजपुरुषादौराजादेःप्रकारत्वेपिन
क्षतिः।सचतच्छब्दप्रवृत्तिनिमित्तरूपएव।प्रवृत्तिनिमित्तत्वंचयद्धर्मविशिष्ट सतिविशेष्यभूतार्थबोधनार्थंशब्दस्यप्रवृत्तिःप्रयोगस्तत्वं।क्वचित्प्रकारस्य
तत्वंयथाघटादिपदे।क्वचित्संसर्गस्ययथोपगवराजपुरुषकारकादौप्रकारइतिचमूलेउपलक्षणं।यद्वासंबंधस्यापिसंबंधतयाप्रकारतयाचेतिद्वे
धाभानं।संज्ञाशब्देचप्रायःशब्दएवप्रवृत्तिनिमित्तमितिकेचित्।परेतुसंज्ञाशब्देप्रवृत्तिनिमित्तंनास्त्येव।डित्थत्वमित्यादौविशेष्यभूतोर्थएवत्वार्थः।प्रकृ
तिश्चेद्दृशेष्वशब्दपराडित्थशब्दवानर्थ इत्यादिक्रमेणैवबोधः।डित्थइत्यादितःसंख्यादिप्रकारकबोधान्निर्विकल्पकं।कुत्वमित्यादेःकुशब्दार्थःकवर्गःइ
त्यादिरीत्याबोधः।अन्यथाकुत्वंकस्मान्नभवतीत्यादौकुत्वशब्दार्थकुशब्दस्यप्राप्त्यभावात्तस्यतार्थीश्रयेलक्षणाश्रयणीयास्यादित्यादिभाष्यप्रदीपोद्यो
तादौविस्तरइत्याहुः।भावत्वेनचप्रवृत्तिनिमित्तंशक्यं।प्रकृतिजन्येत्यादितदुपलक्षकं।घटत्वमित्यादेर्घटसंबंधीभावइत्यादिक्रमेणबोधः।भावप्रधाना
निर्देशस्थलेचतादात्म्येनव्यक्तिप्रकारकःस्वरूपेणजातिविशेष्यकोबोधइतिनतत्रासाधुत्वमतएवजात्याख्यायामेकस्मिन्नितिचरितार्थं।अपवादैरिति
अन्यथापवादविषयेस्यानुपस्थितिःस्यान्निराकांक्षत्वादितिभावः।चकारइति।अन्यथापत्याद्यर्थप्रत्ययानामिवैतयोरपितैर्बाधकौस्यातामितिभावः।पुं

त·
ल·श· स्वमिति। ह्रस्वान्ता दाविति र्णत्वं तु न सर्वनाम्रादिषु पाठात्। ननञ्पूर्वात्। अधिकारसूत्रमेतत्। तत्र गृह्यमाणप्रातिपदिकाद्विधीयमानानां तदन्तेप्राप्त्यभावादाह। पति॥
शे·मु· त्वमिति। पर्य्यन्तेतीगंताद्वृतिचक्रमेण यगणौ प्राप्तौ ऽश्रापटवमिति। उत्तरो भावप्रत्ययो नञ्पूर्वाद्दृढह्रीह्रेर्नेष्यत इत्यादिभाष्यपर्य्यन्तेति। प्राक्तन पृथ्वादिभ्य इत्या
२३ दिविषयमेवेतिभाष्यप्रदीपोद्योतेनिरूपितं आचतुर्यमिति। नञ्पूर्वाणामेषामत एव पर्युदासाद्गुणेपाठानुमानेन ष्यञ्बोध्यः रक्ततो। हलादेः किं। ऋजिष्ठः। ल
घ्वा किं। कृष्णिष्ठः। मेवरस्त्वमिति। तेन कृतयतीत्यादावि ष्ठवद्भावाद्भावोन। यथातथय। नञः शुचीत्यतो नञ् इति वर्तते यथातथा शब्दो निपातसमुदायः। यथापुरमि।
ति। पुराशब्देन पदार्थानतिवृत्त्वाव्ययीभावः। केचिदिति। भाष्यानुक्तत्वमत्रारुचिः। वाणिज्यमपीति। अपिनादौत्यं यौवनमिति। मनोज्ञादित्वाद्यौवतकमपि। प्रकृत्या
के राजन्येत्यादिना प्रकृतिभावः। तद्यथा हेति। पक्षे ब्राह्मणादित्वाञ्ष्यञ्। इदं भाष्ये क्वचिन्मृग्यं। शैष्योपाध्यायिकेति। अस्यापि प्राप्तिरस्तीतिभावः। गोपालपशुपालिके
त्यादित्वस्योदाहरणं मुख्यं। गोत्रच। श्लाघादयश्च पदान्तरोपात्ता एव प्रत्ययार्थान्वयिनो न प्रत्ययवाच्या इति बोध्यं। गार्गिकयेति। स्वभावात्स्त्रीत्वं तल्लोवाधनार्थमिति
अधिकारवशाद्यत्राम्य इति भाव कर्मणोः प्राप्तस्येतिभावः एतेन कर्मणि त्वस्याप्राप्तेस्तदर्थत्वग्रहणं। किंच पूर्वसूत्रविहितस्य त्वादेरपि निषेधः स्यादित्यपास्तं। श
शेषात्तस्यैव निषेधात्॥ ॥ इति नञ्स्नञोरधिकारः समाप्तः॥ ॥ धान्यानां। निर्देशात्षष्ठ्यत्र समर्थविभक्तिः। अलौकिके तु प्रत्ययार्थस्याक्षिप्तत्वेपि त।
द्धितवाक्यानुवादसामर्थ्ये नैवसाबोध्या। अलौकिके प्रथमा प्रवेशेपि न क्षतिरिति कश्चित्। क्षेत्रशब्दस्तु णधान्यादीनामुत्पत्त्याधारभूतवचनः। भवतिश्चोत्पत्तिवा
चीपरस्परमन्वययोग्यत्वात्॥ तेनेदं मुद्गानां भवनं गृहभूतोयं कुसूलइति। विभाषाति। अत्र पूर्वत्रच पञ्चमी षष्ठ्यर्थे इति धान्यानामित्यस्य संबंधात्षष्ठ्येव सम
र्थविभक्तिरिति केचित् असामर्थ्येपीति। सर्व इत्यस्य क्रतेनान्वयेनोत्तरपदार्थेनन्वयादसामर्थ्यमित्यर्थः। सर्वेण चर्मणा कृत इत्यर्थे तु तद्धितो नेष्यत इति।
भावः। निपातनादिति। प्रत्ययसन्नियोगेनैवेदं निपातनं तदाह। सर्वश्चर्मणेति। समंसर्वमिति। आभिमुख्यार्थकसमित्युपसर्गपूर्वात्तु प्रत्ययो नेष्यत इति भावः। राम
यथामुखीन इति। प्रतिबिंबदर्शनाधिकरणइत्यर्थः। तत्सर्वादेः। पत्रपात्रमिति पंचम्यर्थे प्रथमा सर्वादेरिति बहुव्रीहिस्तत्सामानाधिकरण्याय पथ्यादिभिस २३
दंतग्रहणं तदाह। पथ्याद्यंतादिति। व्याप्तिक्रियाकर्मत्वलभ्यमाह। द्वितीयांतादिति। अनुसयामेइति। आद्यपादसंबंधि देर्घ्योपलक्षितेत्यर्थः। अंत्यपादेनम

दर्शीत्यर्थः। साद्दश्यं तुल्यपरिमाणतया समर्थविभक्तिर्द्वितीयानिर्देशात्। योग्यचाद्व। स्थलविशेष इति। अयः प्रदक्षिणगमनमनयो वामगमनमयः सहितो नयो
ऽयानय इति। यद्यप्यसौ गतिविशेषे शक्तस्तथापि प्रदक्षिणप्रसव्यगामिनां शाराणां यस्मिन्युग्मादिपदे स्थितानां परकीयैः शारैस्तत्स्थानां नाम संबंधस्तद्बाध
भावरूपः ससहायस्य शारस्य परैर्नाक्रम्यते पदं। असहायस्तु शारेण परकीयेण बाध्यत इति द्यूतशास्त्रात्तस्यानं लक्षणयोच्यत इति भावः। स्पष्टं चेदं सर्वं भाष्य
इत्यन्यत्र विस्तरः। तं नेय इति। प्रधानकर्मणि यत्। अप्रधाने द्वितीया। संन्नियोगेनैवेति। अत एव भाष्ये परांश्चावरांश्चेत्यनेनादेशेनैव विग्रहो दर्शितः। राष्ट्रा
वारेत्यत्रा वारपारा द्विगृहीतादपीत्यादि पठितं तदिहापीत्याशयेनाह। अवारीण इत्यादि। पूर्वपद इति। उत्तरपदे तु विभक्तिलुकैव सिद्धिरिति भावः। पूर्वप
देयल्लोपनिपातनसामर्थ्याद्लुगिति तु भाष्यकृतः। विजायते गर्भं मुंचतीत्यर्थः। तेनात्यंतसंयोगाभावान्न द्वितीया। ख प्रत्ययानुत्पत्ताविति। पक्षे द्वयेपीति
शेषः। सूत्रे उभयत्रापि तथोच्चारणात्। विकल्पस्तु वाचनिक एव। समाशब्दो बहुवचनांत एवेत्युक्तं सूत्रभाष्यादिबलादुपेक्ष्यमिति भावः। अघश्वीनेत्सवि
भक्तिकं व्याख्यानात्। तेनास्त्रियामपि। अद्यश्वीनं वाडवमिति। अवष्टब्धमासन्नं। आगवीने आङ् मर्यादायां गोशब्दो गोः प्रत्यर्पणे। तदाह। प्रत्यर्पणेति। अस्थयोगा
वाभृत इत्यादिः। अलंगामीति। सुप्यजाताविति णिनिस्तत्त्वं नयन्नाह। गच्छतीति। अनुगविति। पश्चादर्थेऽव्ययीभावः। अध्वानमलं गच्छतीति। अलंगामिपदेन वि
यहेतुरध्वनोऽलंगामीत्येव भंग्यमिनाच्छच। अलंगामीत्यनुवर्तते। लक्षणेनाभीत्यव्ययीभावः। गोष्ठा। अत्र केचित्। अयपि भूतपूर्वे चरडिष्ठ्यारूप्यचेत्येते अत्रै
वपठित्वा गोष्ठात्खञित्येव सूत्रं युक्तं। तथापि तयोरन्यत्र करणसामर्थ्येन विशेषविहितेनापि स्वञाचरणे बाधानेति ज्ञाप्यत इत्याहुस्तज्ज्ञाप्येन दृष्टं। शालीनकौ
पीने। शालाकूपाभ्यां तत्प्रवेशतन्यतनलाक्षणिकाभ्यामेव प्रत्ययोऽनयो रूढिशब्दत्वात्। नानाजातीयानामनियतवृत्तीनां शरीरायासजीविनां संघो व्रातस्त
त्कर्मात्र शरीरायासरूपं व्रातः। अत एव निपातनादिदमर्थेण तेषामन्यतम एव व्रातीनं इष्यते। नवनीतमिति। भाष्ये घृतमिति पाठः। संज्ञायामित्युक्तेरुदश्वि
तिना। तस्य पाकः। अर्थयोः प्रत्ययोः प्रकृत्योश्च यथासंख्यं विनञ्भ्यां। न सहेति प्रकृत्यर्थविशेषणमित्याह। असहार्थ इति। तद्वास्यापृथग्भाव इति। असहार्थकिं।।
विगत इत्यादौ क्रियाविशेषकान्माभूत्। गोष्ठजिति। एतत्प्रत्यास्थानपरभाष्यबलादेते चितः पठिताः अश्वत्थादिशब्दार्थबोधकानि वार्तिकानि आह। संघात इ

त·
ल·श·
शे·सु·
२५

तिहस्तिषडवमितिभारितप्रयोगः। अवाचीनः प्रसिद्धः। नतइति। नासिकासंबंधिनतेत्वेवर्त्तमानादवात्स्वार्थेप्रत्ययइत्यर्थः। नेर्बिड। निविडाः केशाइतिप्रयोगा
न्नतेनासिकायाश्वासंबंधः। अग्रेतुमंडूकानुवृत्तिर्बोध्या। अभिधेयइति। तत्रवर्त्तमानान्नेरित्यर्थः। चिकादेशेऽकारउच्चारणार्थः। क्लिन्नस्येति। चिल्पिलावा
देशौलश्चप्रत्ययइत्यर्थः। आसन्नंसमीपं। आरूढंउच्चं संज्ञाधिकारलभ्यमाह। पर्वतस्येतिसमुद्रोपत्यकाहैमीपर्वताधित्यकापुरीत्यादौतुलक्षणयाप्रयोगो
बोध्यः। कर्मठइतिठस्यागसंज्ञानिमित्तत्वाभावादिकादेशोन। प्रमाणेद्वः। प्रमाणइत्यर्थद्वाराप्रकृतिविशेषणंतत्रवर्त्तमानात्प्रथमांतादित्यर्थः। प्रमाणमत्रपरि
च्छेदकमात्रंतत्रमात्रच्। अतएवप्रस्थमात्रमूरुमात्रमित्यादिसिद्धिः। आद्योतूर्ध्वमानेएवप्रथमश्चद्वितीयश्चऊर्ध्वमानेमतोममेत्युक्तेरितिकेचित्। अन्ये
तुआयामपरिच्छेदकमेवात्रप्रमाणं। अतएवयत्तदेतेभ्यइतिसूत्रेप्रमाणपरिमाणशब्दयोरेकार्थत्वंमन्यमानस्यपरिमाणग्रहणंकिमर्थमितिशंकायामु
क्तोत्रविशेषइतिभाष्येसमाहितंतेनोक्तविशेषणबोधकावत्रप्रकरणेप्रमाण परिमाणशब्दावितिसूचितं। एवंचप्रस्थमात्रमित्याद्यसाध्वेव। मात्रच्त्वि
शेषेणपरिच्छेदकमात्रवाचिनःस्यादितिकैयटोपिचित्यएवेत्याहुः। प्रमाणेलः। प्रमाणेवर्त्तमानाद्विहितस्यलुगित्यर्थः। इहायाम - लुप्रमाणंस्यादित्ये
वगृह्यते। तेनोरुद्वयसमित्यादिसिद्धं। शमादीनामपिपदायामपरिच्छेदकत्वंतदामात्रचोलुक्। यदातूर्ध्वाधरदिगवस्थितवस्तुपरिच्छेदकत्वंद्वयसजादि
तदाऽप्रमाणत्वान्नलुक्। द्विगोर्नित्यमिति। प्रमाणांतद्विगोरित्यर्थः। एतत्सामर्थ्यादेवतदंतद्विगोरप्रमाणत्वेपिमात्रच्। प्रमाणपरेतितेनोन्मानात्संशये
मात्रजन। शममात्रमिति। शमःस्यान्नवेत्यर्थः। वत्वंतात्स्वार्थेइति। बहुलग्रहणसहितोत्रपाठोभाष्ये। हस्तिनेइनणितिप्रकृतिभाव। यत्तदे। इहपरिमा
णग्रहणंसर्वतोमानार्थकं। ननुप्रमाणेइत्यनुवर्त्यतत्रैवास्यविधानमस्तुयावानश्वेत्यादिप्रयोगाएवमुख्याःसंतुपरिमाणप्रयोगाःएवंसादृश्याद्भवंतुतन
दुक्तंभाष्ये। किमर्थंपरिमाणइत्युच्यतेनप्रमाणइतिवर्त्तनेइतिचेन्नयदादिभ्योविशेषविहितेनवतुपामात्रादीनांबाधप्रसंगात्। परिमाणग्रहणेतुभिन्नो
पाधिकत्वान्नबाधइतिप्रमाणोपाधौतन्मात्रमूर्ध्वमानोपाधौतद्द्वयसमित्यादिसिद्धं। यावानश्वायावतीरज्जुरधिकरणेतावत्त्वेचेत्यादिप्रयोगास्तुसादृश्या राम
दोध्यानतूदुक्तं। मात्राद्यप्रतीघातायेति किमिदं। वतुपविधानसामर्थ्याद्वतुपोप्यत्रविधिः। प्रत्ययांतरवन्नमध्याहृतयेवइति। एतेनादेःपरस्येत्येवसि २५

द्विवद्इति व्यर्थमित्यपास्तं। यद्वा किंमिदंभ्यामितिवाक्यभेदेन वतुपं विधत्ते। किमः मं। इदमो निवृत्त्यर्थं किमइति। संख्यापरिमाणमिति कर्मधारयः। परिमाणशब्दः परि
च्छेदकपरः। पूर्वत्र परिमाणग्रहणस्य सर्वतोमानार्थत्वात्पुनस्तद्ग्रहणं। संख्यारूपपरिच्छेदविषयके प्रश्ने वर्त्तमानात्किमो संख्येति षष्ठ्यर्थे डतिरित्यर्थः। संख्येति किं। किया
न्वृक्षाः। कतीति। नित्यबहुवचनांतः। द्व्येकयोः संदेहाभावेन प्रश्नाभावात्। बहुत्वव्याप्यसंख्यानां बहुत्वात्प्रश्नो युक्त एव। संख्याया। अवयवे वर्तमानसंख्यावाचकाद् वयवि
रूपे स्येत्यर्थे तयप् इत्यर्थः। अवयवी चात्रानुद्भूतावयवभेदो पि समुदायः। तेन मुनित्रयं बहुतयं यूथं उभये देवमनुष्या इत्यादिसिद्धं। द्वित्रिभ्यां। नन्वयचश्चित्त्वं व्यर्थं
चित्त्वे पि द्व्यादीनामंतोदात्ततया यस्येति लोपेनानुदात्तस्य च यत्रेत्यनेनाद्युदात्तस्यैव प्रयोगे श्रवणादिति चेन्न। प्रत्ययसंबंध्याद्याकारस्यैव प्रकृतेरपि शेषनिघातेनानु
दात्तत्वात्। उभादु। अदात्तग्रहणसामर्थ्यादाद्युदात्तः। अंतोदात्तत्वस्य चित्त्वेनैव सिद्धेः। सर्वोदात्तत्वं तु बाधितं अनुदात्तं पदमेकवर्जमित्युक्तेः। न चोभये त्यत्र संबुद्धावाम
त्रितायुदात्तं बाधितुमुदात्तग्रहणमिति वाच्यं। येन नाप्राप्तिन्यायेन चित्स्वरस्यैव बाध्यत्वात् तस्य सतिशिष्टत्वेन बलवत्त्वाच्च। उभयं शृणवच्च न इत्यादौ मध्योदात्तप्रयोगा
च्च। तयप इति। इदं तयादेशे प्रतिषेध उभये इति स्थानिवत्त्वेन स्थवार्त्तिकानुरोधेन। वस्तुतो नात्रादेशता। किंतु प्रत्ययांतरत्वमेव उभयीत्यत्र ङीप् तु टिड्ढेति सू
त्रे मात्रच इति मात्रशब्दात्प्रभृतिश्च यचश्चकारेण प्रत्याहाराश्रयणादिति तत्प्रत्याख्यानभाष्यादत एवोदात्तग्रहणं सार्थकं अन्यथा निरनुबंधकादेशांत
रमेव कुर्यात्। आदेशत्वे प्याद्युदात्तश्चेत्यधिकारेण तस्याद्युदात्ततायालाभात्॥ तदसंबंधे पि स्थानिसादृश्येनानुदात्तत्वे उभयस्यांतोदात्ततया ऽनुदात्तस्य च यत्रेत्य
नेनाद्युदात्तत्वसिद्धेः। अयचः श्चः समुदायानुबंधः सानुबंधश्चेत्यन्यत्र विस्तरः। तदस्मिन्। उपश्लिष्टपदाधारेणौपश्लेषिके धिकरणे सप्तमीति स्पष्टं भाष्ये
। ग्रहणवतेति षेधादंतग्रहणं दशशब्दात्तु न व्यपदेशिवद्भावस्य प्रातिपदिकग्रहणे ऽभावात्। समानजातीयत्वे इति करणलब्धो यमर्थः। शदंत। तदस्मिन्नधि
कमिति डइति च वर्त्तते। संख्याया अवयवे इत्यतः संख्याग्रहणं च वर्त्तते। तेन गोत्रिंशदधिका अस्मिन् शते इत्यादिषु न। अंतग्रहणादेकत्रिंशतमित्यादिसि
द्धं विंशतावप्यंतग्रहणं कर्तव्यं एकविंशतमित्यादिसिद्धये। गुणस्य निमाने। गुणो त्र समानभागः। निमीयते क्रीयते ऽनेनेति निमानं मूल्यं। तदस्येति मं इक प्रत्यानु
वर्तते तदाह। प्रथमांतात् षष्ठ्यर्थे इति। गुणस्येति मध्यमणिन्यायेनोभयान्वयि। गुणकर्मक निमाने वर्तमानाद्गुणगतसंख्यावाचकान्मयडित्यर्थः। निमाननिमेयपर्यये

न॰ त॰ प्र॰ शे॰ मु॰ २५

र्भागस्तृत्त्विनिमेयसंख्यायेषांयानिमानसंख्यायाआधिक्येचनिमेयस्यैकत्वएवचायंप्रत्ययइतिभाष्येस्पष्टं।तेनैकोयवोभागोनिमानमस्योदश्विद्भागस्येत्यत्रत्रयोयवा

नांभागानिमानमनयोरुदश्विद्भागयोरित्यत्रचन।द्विमयमिति।द्विशब्दस्यभागवृत्तेर्नित्यसापेक्षत्वाद्यवानामित्येतत्सापेक्षत्वेपिप्रत्ययः।उदश्विद्भागस्याप्युदश्वित्त्वा

द्विमयमुदश्विदित्युक्तंसंख्याया इतिकिं।यवभागोनिमानमस्योदश्विद्भागस्यतस्यपू।संख्याया इतिवर्तते।संख्येयार्थकसंख्यावाचिनोग्रहणं।प्रवृत्तिनिमित्तसंख्या

पूरणेवापं।वाष्टीशास्वेतिवदवयवःप्रत्ययार्थः।नांतादसंख्यादेर्मट्।नुक्तुनकृतःपंचमइत्यादौनलोपानापत्तेः।डटित्यनुवर्तत्स्यनांतादितिपंचम्याषष्ठीकल्प्यतइत्याशयेना।

हाडटइति।चयतावितिविशेषविहिताभ्यामप्याभ्यांचतुरोडेण्नबाधते।थुड्विधानसामर्थ्यात्।ङ्टोपवादइति।सहायवान्।द्वितीयशब्दस्त्वयुक्तंप्रातिपदिकं।

अनेनतुनास्यसाधुत्वं।नच्पूरणस्तीयशब्दोस्तीतिपूरणाद्भागेतीइतिसूत्रस्यभाष्यासंगतेः।तत्रत्यपूरणग्रहणंतुप्रागेकादशभ्यइत्युत्तरार्थमितिभाष्येस्पष्टं।विंशं

त्यादिभ्यस्तम्।अत्रविंशत्यादयः।पंक्तिविंशतीतिसूत्रस्थाःउत्तरसूत्रेसंख्यादेरितितिविहप्रकरणेतदंतविधिज्ञापकं।तेनैकान्नविंशतितमएकविंशतितमइत्यादि

सिद्धं।ज्ञापकेनचप्रत्ययविधिविषयनबाध्यतेग्रहणवतेत्यादेः।अयंचागमविधिरितिषष्ठ्यादेरितिसूत्रेभाष्येस्पष्टं।मतौछः।अस्यवामीयमित्यादौप्रकृतिवदि

त्यस्यानित्यत्वान्नुमादेर्नलुक्।अस्यवामस्येतिवेदपठितातत्रद्वितीयविभक्तिप्राग्भागानुकरणाहनुकार्येणार्थवतःप्रत्ययइतिबोध्यं।विधानसामर्थ्यादिति।ज्ञाप

कसिद्धविधानसामर्थ्यादित्यर्थः।भाष्येवालुगितिवचनमेवारब्धं।विमुक्तादयःशब्दप्रागणेनिर्दिष्टाः।गोषदादयोप्येवंमतोछइत्यारभ्येतदंता।अनुकरणशब्दादे

वप्रत्ययाःसाधवः।कामइत्केति।नतुकामयितानभिधानात्।तत्रेत्यनुवर्तते।तदाहधनेकामइति।नत्वचनायामिति।अन्नैवार्थस्यसाधुत्वंस्वभावात्।उदरात्तत्र।

प्रसितइतिचवर्ततेयःप्रसितःसचेदविजिगीषुरित्यर्थः।उदरकोमह्युः।शीतोष्णाभ्यां।संज्ञायामित्यनुवर्ततइत्याशयेनाह।अलसइत्यादि।अथाल्ढशब्दा

दिति।भृत्यादनमात्रपुद्रल्ढस्त्वयमितिबोध्यं।अनृजुरिति।संज्ञाधिकारादीदृशेर्थेएवसाधुत्वंबोध्यं।दंभइति।दंभसाधनत्वात्।दांभिकाहिप्रायेणदंडाजिनंधा।

रयंति।तावतिथं।ग्रहणमितिमाबेत्युद्दातत्रप्रत्ययार्थः।तावतिथमिति पूरणप्रत्ययांतोपलक्षणं।तृतीयार्थेप्रथमा।तृतीयांताद्ग्रहणमित्यर्थेप्रत्ययः।तावतिथेन

गृण्हातीत्युपसंख्यानमितिवार्तिकेतृतीयायाएवसमर्थविभक्तित्वस्फुटत्वात्तस्थनयनवक्ष्यतिद्वितीयेनरूपेणेतिपूरणप्रत्ययस्येति।षष्ठेनगृण्हातिषष्ठका।

राम २५

इतिभाष्योदाहरणेतत्तुकएवदर्शनादितिभावः।द्विकंवाग्रहणमिति।अगृहीतयोपिप्रत्ययविधानेनासंदेहायग्रहणमित्युक्तंद्वितीयेनरूपेणेति।द्वितीययागुरुकृतयाशुश्रू
कृत्वेत्यर्थः।इतिलौकिकविवक्षार्थः।तेनग्रंथविषयेग्रहणएवतेनद्वितीयंग्रहणंदेवदत्तेनदंडस्येत्यादौन।एवंचग्रंथरूपकर्मणःप्रत्ययेनोक्तत्वादुभयप्राप्ताविस्या।
आप्तेग्रहणपदघटितेउदाहरणेदेवदत्तस्येतिषष्ठीकर्तरिनिर्बाधा।नित्यंलुमिति।तावतिथेनगृण्हातीतिउपसंख्यानंकर्तव्यंलुक्चवक्तव्यइतिवार्तिकपाठादितिभा।
ष्यः।षष्ठेनेति।पंचमीरूपैरसौनगृण्हातिकिंतुषष्ठेनेत्यर्थः।शृंखलमितिशृंगलमितिभाष्येक्वचित्पाठः।काष्ठमयंपाशकंपत्त्यादेर्व्यतिषज्यतेतत्शृंखलमितिकैयटः।का
लप्रयो।कालबोधकःपूरणप्रत्ययांतएवततःसप्तम्यंताद्भावेप्रत्ययः।करणवाचकात्तृतीयांताज्जनितइत्यर्थेफलबोधकात्प्रथमांतादस्यकार्यमित्यर्थेअभिधान।
स्वाभाव्यात्।तवसिनवे।अन्नमत्राभ्यवहार्यं।वटकेभ्यइति।संज्ञायामित्येवावेत्यनुवृत्तेरिति।तावतिथमितिसूत्रान्मंडूकप्लुत्येतिभावः।अन्यथाविनाधारणंनस्या
त्।इदंवृत्त्यनुरोधेन।सूत्रेऽधीतइत्यस्याध्यायनपूर्वंतदनुष्ठानमर्थः।तेनाध्येतृमात्रेऽणूसिद्धइत्यन्येप्याहुरिति।श्राद्धशब्दात्तत्साधनद्रव्यवृत्तेःप्रत्ययःपूर्वादिनिः।अनेने
तिकर्तृबोधकमनुवर्ततेतस्यक्रियाकांक्षायामंतरंगत्वात्करोतिक्रियाएवगृह्यते।सपूर्वादित्यस्यनियमानपूर्वात्पूर्वशब्दादित्यर्थः।कृतपूर्वयोःसुप्सुपेतिसमासः।का
दस्तमपीदमनुवृत्तिस्तोकर्तायेहव्याख्यातं।साक्षाद्द्रष्टरीति।साक्षाद्दृष्टेत्यर्थेप्रथमोच्चारितादिनिरित्यर्थः।संज्ञाग्रहणाच्चनदातृप्रहीत्रोरयंप्रयोगः।किंतुपार्श्वस्थितःस
नुदासीनतयायःपश्यतितत्रैवइंद्रआत्मेति।सएतमेवपुरुषंब्रह्मततमपश्यदिदमदर्शमितितस्मादिदंद्रोनामतमिदंद्रंसंतमिंद्रइत्याचक्षतेइतिश्रुतेः।कर्तृधि
ष्ठातानामेवाकरणत्वात्तस्यलिंगमनुमापकंतदस्त्यास्य।गोमान्देवदत्तइत्यादावाधाराधेयभावात्षष्ठ्युपादानं।नचतत्राप्यधिप्रस्मृवृत्तेपंचालाइतिवत्तस्यभ
वः।अधिश्रयणयोगेतथाबुद्धिसत्त्वात्तत्रतादृशबोधाधिकरणत्वसत्वेप्यत्रतत्त्वेमानाभावात्।गोमान्देशइत्यादावधिकरणत्वेपिसंबंधाभावेनषष्ठ्याप्राप्त्यास
प्तम्युपादानंसर्वत्रक्रियाकारकभावमूलकःसंबंधोद्रव्यान्वयेषष्ठीनियामकः।नचैवमप्यत्रसंयोगएवाधाराधारत्वमूलं।नतुतन्मूलकःसः।किंचसंयोगोनष
ष्ठीनिमित्तं।कथंचित्संयुक्तयोर्घटयोरन्यतरबोधकात्षष्ठ्यापत्तेः।अतएवभूमादिषुसंसर्गपदेनसंयोगग्रहणं।तत्स्मात्संयोगस्यभूमादिवत्संबंधांतरेसत्येवप्र
तीतिर्नतुषष्ठ्यर्थतानापिमत्वर्थता।यदुक्तंभाष्येपर्वतेवृक्षाःसंतिनतुतेतस्यकिंचिदिति।लोहितोष्णीषाइत्यादौसप्तम्यर्थेएवबहुव्रीहिर्बोध्यः।अत्रषष्ठ्यर्थमत्व

र्थयां तात्पर्यमुप्यर्थमत्वर्थयोः स सप्तम्यर्थस्तदर्थात् सप्तम्यर्थो न भिन्नस्तावपि सरूपः सन। सप्तम्यर्थवचनेनेनिठनाविति भाष्ये स्पष्टं। अत्र शब्दशक्तिस्वभावादेव बहुव्रीहावविवर्तमानकोलास्त्यर्थातं भोवो वोध्यः। गोमानासीदित्यादेस्तुतथाव्यवहारविषय आसीदित्यादिरर्थः। अस्तिग्रहणं त्वस्तिशब्दादस्तिसामानाधिकरण्याभावेनाप्राप्तमतुपो विधानार्थं। तेनास्तिमानिति सिद्धं। सत्ताकर्तृधनवानिति तदर्थ इति भाष्ये स्पष्टं। इतिशब्दलभ्यमर्थमाह भूमेत्यादि। अत्र संसर्गः संयोगः। स च संवंधांतरसत्त्येव तन्नियामको तएव दंडीत्यतः संयुक्तदंडस्यैव तत्स्वामिनः प्रतीतिः। येस्ति विवक्षायां मतुवादयो विधीयंते तेभूमादिषु विषयेषु भावंतीति वाक्यार्थः। एवं बहुव्रीहिरपि यथायथं भूमादिषु वोध्यो मत्वर्थे बहुव्रीहिरिति वार्तिकात्। रसादीनां विशेषणमिति। तेन गुणवाचकानामेवैषां ग्रहणमिति जलादिवाचिरसादीनां द्रव्यवचनगंधादीनां वनेति भावः। एभ्य इति ठनावपीष्येते इतीदं व्यर्थमिति भाष्ये स्पष्टं। गुणवचनेभ्य इति। गुणगुणिवोधकेभ्यः शुक्लादिभ्यः इत्यर्थः। पटः शुक्लः इति गुणगुणिनोरभेदव्यवहारेपि पटस्य शुक्ल इति भेदव्यवहारस्यापि सत्त्वेन प्राप्तमतुपो श्रवणार्थमिदं। अत एव। गुणिनिविशेष्यलिंगता सिद्धा। तत्रापि एतस्तु सर्वलिंगतानियतलिंगतावा प्रसज्येतेति भाष्यकैयटयोः स्पष्टं। अयं च लुक् द्रव्यवाचकसमभिव्याहार एव एतदेव ध्वनयता भाष्यानुक्तमपि इष्ट इति वदता तादृशस्थल एवेष्ट इति तदर्थः। ध्वनितं चेदं पूरणगुणेति सूत्रे भाष्ये गुणगुणिनोरभेदस्यापि सत्त्वादिदं वचनं भाष्ये प्रत्याख्यातं। गुणिलिंगास्तु तद्वतीति कोशस्य मतुप्लुकाऽभेदेन वा तद्वतिवर्तमानाद् इत्यर्थः। भेदेपि मतुपो नभिधानं। गुणवाचिनामेषां पुंस्त्वमेव गुणिनि विशेष्यलिंगतेति त्वभिधानस्वाभाव्यात्। मादुपधायाः। विधीयमानत्वेन सवर्णाग्राहकत्त्वान्मस्य नानुनासिको वकारः। आसंदीवदष्ठीवा। अत्र सूत्रे कक्षीवच्छब्दपाठो नार्षे इति न संप्रसारण इति सूत्रस्य भाष्यस्वरसः। तत्र हि कक्ष्यायाः संज्ञायां मतौ संप्रसारणं वक्तव्यमिति वचनमारब्धं वत्वं तु संज्ञायामिति सूत्रेण सिद्धमिति दिक्। राजन्वतीति। राजन्वान्देश इत्यपि वोध्यं। शिखावानिति। शिखाशब्दस्य व्रीह्यादित्वेतु चूडावती प्रतिमतिप्रत्युदाहार्यमिमे-
धावानिति। न चात्रास्नायामेधेति विनिनावाधान्न लचः प्राप्तिः चिकीर्षावानित्यस्यानेनोपलक्षणात्। चूडावलो सीति। असीति तिङ् तिङ इति निहतं चूडालात्सो मत्वे तस्य सुप्त्वं नानुदात्ततया तस्यानिकस्याद्गुणस्यैकादेश उदात्तेनेत्युदात्तत्वे तस्य परेण पूर्वरूपेकादेशे तस्य पदाद्यनुदात्तेन सहैकादेशत्वात्त्व

रितो वेत्यस्य प्राप्तिरिति बोध्यं। एतच्च वृत्तौ स्पष्टं। समुच्चयार्थमिति। भाष्योक्तव्याख्यानादिति भावः। वत्सांसाभ्यां। लच्यादित्येव पाठः। मतुवंतेन सेहबलयोः प्रतीते।
रित्यनुवृत्त्युक्तेः प्रज्ञाश्रद्धा। यद्यपि कर्तृव्युत्पन्नप्रज्ञशब्दात्प्रज्ञाद्यणि प्राज्ञः सिध्यति। तथापि स्त्रियां ङीबभावार्थमिदं। तदाह। प्राज्ञेति। श्रद्धा साहचर्याज्ज्ञानार्थं कांड·
त्वस्यैवात्र ग्रहणं। तपः सह। अर्चाभ्यां यथासंख्यं न। अस्वरितत्वात्। उत्तरार्थ इति। तपःसहस्राभ्यामण्विनीनी इति न्यासे न भिन्नविभक्त्युच्चारणाद् णउभयसंबंधो।
विनीनी यथासंख्यं च सिद्धमिति भावः। मतुब्वेति। समुच्चयार्थोन्यतरस्यांग्रहणानुवृत्ते रिति भावः। सिकता इति। लुपि युक्तवद्भावः हयवरट् सूत्रे एकशिकत्वेति भा
ष्यादेकवचनांतोप्ययं। दंतुर इति। निम्नोन्नते प्रयोगस्तु लक्षणया। उन्नते किं। दंतवान्। ऊषः क्षारमृत्। मधु माधुर्यमिति। रसवाचिन एवात्र ग्रहणादिति भावः।
स एवेदं भाष्ये नगरमिति। चातुरर्थिकप्रत्ययांतनगरशब्दस्तु देशवि शेषनाम अयं तु जातिवाची अतएव नगरीति जातिलक्षणो ङीष्। पुनर्ग्रहणमिति। पुन
र्ग्रहणस्य द्युद्रुभ्यां म इत्यस्यानित्यत्वार्थतया भाष्ये उक्तत्वेन व्याख्यानादेवास्य सर्वविभाषार्थत्वमिति वक्तुमुचितं। मणिव इत्यादि विंबावं कुस्त्वमिष्टकावमित्युपसं
दाहरणं अन्येषामपीति दीर्घः। अर्णसो लोपश्चेति भाष्ये न दृश्यते। नेहेति भ्रातृबलः पुत्रबल इत्यादौ। भ्रातृबले ऽण् इति अनुवृत्तेरपि तदभावः। अत इनि। ए
काक्षरात्कृतो जातेः सप्तम्यां च न तौ स्मृताविति भाष्यं। यवव्रीहीति॥ व्रीह्यादिगणेपि पाठादिहार्थग्रहणं। तेन शालिलः शालिक इति सिद्धमिति वृत्तिः। एकगो
पु। सूत्रे ऋकुव्रीहिः। अधिकारप्राप्तप्रातिपदिकादित्यन्यपदार्थः। ऐकशतिक इति। पूर्वकालैकेति समासः। तद्धितार्थोत्तरपदेति समासस्य मत्वर्थेन भिधा
नेनाप्रवृत्तेः। संख्यायाः संवत्सरेत्युत्तरपदवृद्धिसूत्रे। तत्र संख्यापदमुच्चार्य विहितस्य तद्धितार्थेति समासस्यैव प्रतिपदोक्ततया ग्रहणात्। अत्रात इति निवृत्तं
अतएव गोशकटिरस्यास्तीति विग्रहेपि गौशकटिक इत्येव। न तु गौशकद्रिमानिति गौविंशतिरस्यास्तीत्यादौ त्वनभिधानान्नेति स्पष्टं भाष्ये॥ द्वंद्वोपतापे।
त्यादौ मंडूकप्लुत्या तद् इत्यस्य संबंधः। समासांता इति सूत्रस्थभाष्यादित्यलं। निष्कात्परावित। सूत्रे सामर्थ्येपि सोत्रत्वात्समासः। अंतग्रहणं शतादिपूर्वा
न्निष्कादित्यर्थं निरासार्थं॥ मिनत्रितिपाठः। हृदयी हृदयिक इत्यादि। अनेनान्यतरस्यांग्रहणेनात इनी तयोः प्रवृत्तौ तत्र मतुप्समुच्चायकवोधकान्यतरस्यां
ग्रहणानुवृत्तेः प्रत्ययत्रयं सोलभ्यमिति भावः। तत्पूर्वपदियमित्येकं। निदयं मरुद्वि दृतौ मरुत्त इत्येवं मरुत्तं साधयित्वास्य भाष्ये प्रत्याख्यानात्॥ तत्रहि

शु:
ल·श· मरुतउपसर्गत्वेउपसंख्यानेपसर्गत्वसामर्थ्यादजंतत्वाभावेप्यचउपसर्गादितितत्वंतत्रतत्वविधावुपसंख्यानेनसिद्धंप्रथमेउपसर्गसंज्ञायामुपसंख्या।
शे·त· नमनेकसंज्ञालाभार्थमितिनिपातत्वान्मरुतआद्युदात्तत्वेनतृतीयाकर्मणीतिपूर्वपदप्रकृतिस्वरेणमरुत्तस्याद्युदात्तत्वं।एताश्चसंज्ञास्तत्वविषयाएवे।
२९ तिनसद्भिर्दत्तइतिभाष्यप्रयोगेनानुपपन्नःएवंचफलाभेदायनित्वमेवोचितं।पित्वेतुतथ्योदात्तत्वंस्यादित्यपरे।एतद्विषयेमतुब्न।अस्यरूढिशब्दत्वाद
वयवार्थाभावेनतदप्राप्तेरित्यन्यत्रविस्तरः।पदत्वमिति।तेनयस्येतिलोपोन।अनुवर्तयंतीति।वहुलंछंदसीत्यतः।वाचोग्मिनिः।गकारोच्चारणंप्र
त्ययेभाषायामित्यनुनासिकाभावाय।उत्तरसूत्रस्यवहुभाषिणीत्यस्यात्रापिसंवंधात्सम्यक्वहुभाषिणिवाग्मीतिवोध्यं।ऐश्वर्येति।तेनधनवा
नित्यर्थेस्वामीतिन।कटकवलयिनीति।कंटकवलययोःकचिद्भेदंपरिकल्प्यद्वंद्वउपपाद्यः।अतइत्येवेति।समासांताइतिसूत्रस्थभाष्यात्मंडूकप्ल
त्यातदनुवर्ततइतिभावः।ठनादीति।आदिनामतुपोग्रहणं।मतुप्समुच्चयार्थोन्यतरस्यांग्रहणस्येकगोइतिसूत्रेनित्यग्रहणात्वलादिभ्योमतुवि
तिसूत्रेन्यतरस्यांग्रहणाच्चासंवंधइतिभावः।अस्मायेत्यत्रतुसंवध्यतएवतसाविति।सूत्रेयशस्वानितिभाष्येउदाहरणात्प्रकृत्यैकाजितिसूत्रेस्रग्वत
इतिभाष्येउदाहरणाच्चेतिवोध्यं।वातातीति।कुगर्थमेवेदं।अदंतत्वादेवेनसिद्धत्वादितिवृत्तिः।ठन्वाधनार्थमिति।सामान्यसूत्रेणंसिद्धेः।सूत्रस्यफलांत
राभावाच्च।वर्णाद्ब्र।वर्णोत्रवेदाध्ययनार्थंब्रह्मचर्यं।अर्थाच्चेति।अर्थशब्दोत्रधनवाचीकालतोत्रासंनिधिर्नदेशतः।तत्रविरोधादर्स्तीत्यस्यासंवंधइ
त्यप्राप्तएवेनिर्विधीयतेमत्तोपाधिकादिनिठनोरभावोनभिधानात्।अतएवासंनिहितइतिकिमर्थमर्थवानितिभाष्येउक्तं।अर्थोसमर्थोविद्वान्यः।शा
स्त्रानुपहतश्चयइतित्वार्थ।अर्थेनमर्थसमर्थइतिक्रियाशब्दास्तत्तोपाधिकादिनिठनौभवतएव।मतुस्तुनानभिधानात्।तेनार्थिकप्रत्यर्थिकौधान्यार्थीत्या
दिचसिद्धं।धान्यकरणकप्रार्थनावानित्यर्थः।वलादिभ्यो।अन्यतरस्यांग्रहणंद्वंद्वोपतापेतिप्रकृतस्यैनःसमुच्चयार्थं।तेनैतस्मादुप्च।प्रथिमिनीतिइम एम
निजंताप्रकृतिः।अनिनस्मन्नित्यनर्थकेनापितदंतविधिः।मेतिमांतस्योदाहरणमित्यर्थः।चकारयकारपरस्येतिवहुव्रीहिरनुस्वारोन्यपदार्थः॥ ॥५ २९
॥इतिमत्वर्थीयाः॥ ॥प्राग्दिशोव्याख्यानादिदंसंज्ञासूत्रंतदाह।विभक्तिसंज्ञाइति।स्वार्थिकाइति।प्रायेणेतिशेषः।स्वीयप्रकृतेरर्थेभवाइत्यर्थः

तसिलादावर्थनिर्देशाभावादनिशायने इत्यादीनां प्रकृत्यर्थविशेषणत्वादिति भावः। जात्यन्ताच्छ बंधुनि प्रकारवचने इत्यादि विहितस्य तु थालः स्वार्थिकत्वमेवा
त एव तदर्थस्य विशेष्यतया सामानमतः प्रायेणेति पूरितं। किं सर्वनाम। प्राग्दिश इत्येव द्व्यादिपर्युदासात्किमः पृथग्ग्रहणं। द्व्यादिभ्यः प्रागेव किम्शब्दस्तु
न पठितः। कश्च भवांश्च काविति अत्र भवतः शेषापत्तेः। त्यदादीनां यत्परं तच्छिष्यते इत्युक्तेः। विधेयानिर्देशादाह। थिक्रियत इति। बहुशब्दस्यात्र संख्या
वाचित्वव्याख्यानात्प्रकरणलभ्यमाह। प्राग्दिशीये परे इति दिशः प्राक् प्राग्दिशं तत्र भवे इत्यर्थः। एते तौ। द्वितीयो व्यंजनांतः। यथासंख्यं कार्यनिमित्त
योः। नलोप इति। सर्वादेशत्वं त्वानुपूर्व्यात्सिद्धं। इत्संज्ञा तु न फलाभावात्। परत्वादनः पूर्वमेव त्यदाद्यत्वे कृते लक्ष्ये लक्षणस्येति न्यायेन पुनरत्वाप्रवृ
त्तिरिति भावः। कु तिहोः अष्टन आ इत्यतो विभक्ताविति अनुवर्तते॥ तीत्यत्र इकार उच्चारणार्थः। तिहोरित्यस्य फलमाह। कस्मादिति यत इति। तसिलादीनां
विभक्तित्वात्त्यदाद्यत्वं। परस्य तसेरिति। प्रतियोगे पंचम्यास्तसिरित्यादिने चाहीयरुहोरिति वक्ष्यमाणस्येत्यर्थः। प्रत्ययग्रहणपरिभाषया तमूधातोर्नो
ग्रहणं। व्याख्यानाच्च। स्वरार्थं। लित्स्वरार्थं। विभक्त्यर्थं विभक्तिनिमित्तात्वाद्यर्थं। स्वरार्थमिति भाष्यं तूपलक्षणं पूर्वोक्तविभक्तिकार्यस्यापीति बोध्यं। स
र्वोभये ति। अभिधानमूलमेतत्। भाष्ये तु उक्तं ओदनं परिषिंच तीत्यादौ सर्वार्थेत्तेपि वाग्रहणानुवृत्तेर्न तसिल्। वाग्रहणमिति। साहचर्याच्च कुत्रचित्तान्य
त्र कुत्रापि च सामिलाषमिति बहुतरप्रयोगदर्शनादिदमुक्तं। भागवृत्तिकारादयस्तु किमो भाषायां त्रल् नेच्छंति। भाष्यस्वरसोप्येवमेव। एतदस्त्रा इद।
मो न्यादेश इत्यतोश् अनुवर्तते। एतदो नित्येव सिद्धे अनुदात्तार्थं वचनं। ननु लित्स्वरेण शेषनिघातेनैव त्रतसोरनुदात्तत्वे सिद्धे तयोस्तद्विधानं व्यर्थमिति चेन्न॥
लित्स्वरापवादेशोनुदात्त इति लित्स्वरप्राप्त्या प्रत्ययस्वरेण त्रतसो रुदात्तत्वप्राप्ते तत्सार्थिक्यात् अतो नेति। अत एतस्माद्ग्रामादित्यर्थः। सप्तम्यंतेभ्य इति।
सप्तम्या इत्येवानुवर्तते किन्न स्वरितत्वात् नेतराभ्य इतीति भावः। सर्वत्र देश इति। सर्वत्र काले इत्यपि बोध्यं। काले इत्यनुपादानेन सर्वशब्दस्य तत्र कालार्थ
कत्वात्। अत एव वर्तमाने लडिति सूत्रभाष्ये अनागतमतिक्रान्तं वर्तमानमिति त्रयं। सर्वत्र च गतिर्नास्तीति प्रयोगे कालवृत्तित्वाविवक्षायां दानकृत इति कैयटः
॥विहितत्वादिति। सर्वैकान्येत्यनेन। एतज्ज्ञाप्ये स्पष्टं। तर्हीति। एतस्मिन्निति द्विभूते यदीत्येतदखंडमव्ययं। एतर्हीति। एतद इति योगविभागेन एतादेशः। अस्मि

ल॰ श॰ न्न्रहनीति।पुष्येण्सुक्ताःकालोयंकिंस्वर्थके अद्यपुष्य इत्यादौशक्तिमत्प्रधानता।इदमह इत्यर्थेप्यस्तीत्यन्ये।व्यपदेशिवद्भावेनसप्रयोगइत्यपरे।एव्युसि
शे॰ सु॰ तिनिपातनादंतोदात्तोयं भाष्येतुचिंत्यमिते।प्रकारवचने।पंचम्यर्थेसप्तमीत्याह।प्रकारवृत्तिभ्यइतिवचनेनग्रहणात्प्रकारवृत्तिभ्यइत्यर्थः।तेनप्रकारेणो
२८ त्यस्यविशिष्टइतिशेषः।सामान्यस्यभेदकोविशेषोत्रप्रकारः।बहुभिःप्रकारैर्भुक्तेइत्यत्रतुबहुभिर्विशेषैरित्यवगमात्ताहृश्यंतुनगृह्यते।अन्यथासर्वथे
त्यादौतदप्रतीत्यानभिधानात्।यथाहरिस्तथाहरइत्यादौयत्प्रकारवान्हरिस्तत्प्रकारवान्हरइतिबोधेहरिसदृशोहरइतिफलतीतिबोध्यं।अत्यंतस्वार्थि
कोयंप्रत्ययंविनापियश्चैत्रः समैत्रइत्यादौप्रकारवचनत्वदर्शनात्द्योतकत्वेतदर्थस्यविशेषणतापत्तिश्च।एवंजातीयर्विधावपिबोध्यं।स्थूलादिभ्यः
कन्विधौचैवमेवस्थूलादीनामपिगौर्वाहीकइत्यादौगवादिपदानामिवास्यैवप्रत्ययंविनापिप्रकारवाचित्वमतएवेषांनित्यत्वंनोक्तं।दिक्शब्देभ्यःनेह।
यथासंख्यंअस्वरितत्वात्।शब्दग्रहणलभ्यमर्थमाहदिशिरूढेभ्यइति।संख्यायाइत्येतत्पूर्वंतमस्तातिपदरहितमिदंसूत्रमनुवर्तते।अस्तातौपुरायादे
शविधानार्थमस्तातिचेतीहलेस्यतत्रानुवृत्तिप्रदर्शनायपूर्वेत्यादिसूत्रमपीहव्याचष्टे।पूर्वाध॰ असीत्यविभक्तिकंसंनियोगशिष्टत्वायचकारः।अवराणा
मित्यनंतरयोगेषष्ठी।अस्तातिच।लुप्तसप्तम्यंतमिदं।तदाह।स्तातावितिशब्दभेदादर्थभेदेपिसमानुपूर्वीकत्वाद्दिक्शब्दोदेशादिवृत्तिरितिव्यवहारोबो
ध्यः।पूर्वादयस्तत्तद्दिक्स्थत्वंप्रवृत्तिनिमित्तीकृत्यक्वचित्तुवक्तृसंमुखदेशत्वंतथाकृत्वाक्वचिद्देशप्रवर्तते।अतएवपुरइत्यस्याग्रइत्यर्थोक्तंविश्वकोशा
दावुक्तं।क्वचित्स्वसंयुक्तसंयोगित्वंयथापरादिशब्देप्रकृतसूत्रेचसर्वेषांग्रहणंविनिगमनाविरहात्पूर्वेस्मिन्गुराविति।पूर्वकालाध्ययनकर्तरीत्यर्थः।द
क्षिणोत्त॰ ननुतसुरेवप्रत्ययोस्तुदक्षिणस्यांदिशिदक्षिणतइतितुसर्वनाम्नोवृत्तिमात्रइतिपुंवत्त्वेनसिद्धं।षष्ठ्यतसर्थेतिसूत्रेषष्ठीतस्वर्थेतिपाठांतेननतो
ग्रामादन्यइत्यादौपंचमींबाधित्वापरत्वात्षष्ठीनेतिचेन्नस्यषष्ठ्यर्थत्वात्।प्राच्यामितिलिंगविशिष्टपरिभाषयास्तातेर्लुक्।विभक्तित्रयार्थंप्रकटयितुमाहव एम
सत्यागतइत्यादि।एनबन्यता।अपंचम्याइति।प्रागसेरनुवर्तते।अदूरेइति॥अवधिमानवधेश्चदूरेत्यर्थः।केचिदिति।अंचेल्लुक्।तान्न।व्यवस्थितविभाषा २८
विज्ञानादितितदाशयः इयमेवात्रारुचिः।दक्षिणादाच्।चकारआजाहीत्यत्रविशेषणार्थः।तेनवाक्यस्मरणयोरङिदाकारस्यव्याप्तिरितिसिद्धं।उत्तरा

च्चेनव्यवहित आज्ञपि समुच्चीयते व्याख्यानात्। तदाहोत्तरेति। संख्याया वि·विधस्यार्थ इत्यर्थः विधानं विध इति घञर्थे कः विधशब्दस्यार्थः सामा-
न्यस्य भेदकविशेषरूपः प्रकारः सत्त्वाभिधानस्वाभाव्यात्क्रियाविषयक एव गृह्यते तदाह क्रियाप्रकारे इति तदुक्तं भाष्ये विषयुक्तगताः प्रकारो भवंती
तित्रेधा गुणो नवधा द्रव्यमित्यादावप्युपदिश्यते भवतीति वा क्रियाबोध्या। चतुर्द्धेति। चतुर्भिः प्रकारैरित्यर्थः। अधिकरणस्य द्रव्यस्य विचलनमन्यथाक
रणं तच्चेह संख्यासंनिधानात्तद्विषयमेवेत्याह। द्रव्यस्य संख्यांतरेति। तदवगमश्च पदांतरसमभिव्याहारादिति बोध्यं। एकं राशिं पंचधेति पंचत्वसंख्यावि
शिष्टमित्यर्थः। एकाद्धो। ध्यमुग्रहणं ध्यामात्रस्य यथा स्यात्। अन्यथानंतरत्वादधिकरणविचाले विहितस्यैव स्यात्। अत एव प्रत्ययो नाकारि अधिकरणवि
चाले एव संनिहितत्वादापत्तेः। यदप्यनेकमेकं क्रियते सोप्यधिकरणविचाल इति बोध्यं। ऐकध्यमिति। भुंक्त इति। राशिं कुर्विति शि धानीति। स्व
भावात्स्वत्ववाचितं। एधाच्च। द्वित्र्योर्धमुञ् इत्यस्य एधाजित्यर्थः। याप्ये पा·। याप्यमत्र कुत्सितं। कुत्साविशिष्टेऽर्थे वर्तमानात्पाशवित्यर्थः। अयं प्रवृत्तिनिमित्त
कुत्सायामेव कुत्सित इत्यस्य त्व प्रवृत्तिनिमित्तं कुत्सायामपि प्रवृत्तिरिति बोध्यं। पूरणाद्भागे पूरणार्थकतीयप्रत्ययांताद्भागे वर्तमानादित्यर्थः। तीयादी
ककृ इति वचनद्वयं दृष्टं सामेत्यत्र भाष्ये स्पष्टं। पूर्वत्रज्ञानौ नित्याविति। न च षष्ठाष्टमाभ्यां भागार्थप्रतिपादनार्थं लुग्विधानं प्रत्ययानां स्वार्थिकत्वेन
प्रकृते   स्तदर्थत्वलाभात्। प्रकरणादिकं तु न वाप्यावश्यकं। स्वरसुलुकिनास्त्वेवेति न लुमतेत्यत्र भाष्ये स्पष्टं। एकाद। असहायवाचकादेकशब्दा
दित्यर्थः। असहाये किं। प्रसिद्धतरत्वात्संख्यावाचकस्यैवान्यत्रेवात्रापि ग्रहणापत्तौ द्विवचनाद्यसिद्धिः स्यात्। वाक्यभेदेन कनाकिनिचोरेव लुक् विधा
न सामर्थ्यात्पक्षे श्रवणमपि। भूतपू। तत्रार्थे वर्तमानात्प्रातिपदिकादित्यर्थः। षष्ठ्या। भूतपूर्व इत्यनुवृत्तेर्भूतत्वात्षष्ठ्या विशेषणभूतपूर्वसंबंधे
याषष्ठी तदंतात्स्वार्थे प्रत्ययो ऽत एव स्वार्थिकप्रकरणविरोधो न। अतिशायने। अतिशीते प्रकर्षापरपर्याय इतरस्मिन् नीकरणरूपोऽभिभवोर्थः एवं च स
कर्मकादस्मादाह लक्षणकर्तरि ल्युट् इत एव निपातनाद्दीर्घः। तत्र वर्तमानात्प्रातिपदिकात्स्वार्थे प्रत्यय इत्यर्थः। यावद्रूपात् प्रकर्षे अतिशये इति तावदति।
शायने इत्युक्तमुपक्रमे भाष्ये। तत्र भावार्थकस्य कर्तृ पचाद्यज तस्य च तंत्रेणोच्चारणं बोध्यं। अग्रे गुणोऽभिधीयते इत्युक्त्वा कालोतिशेते इति विग्रहप्रदर्शने

सु. ल. श. प्रो. त. २९

र्थलाभः तदाहातिशयविशिष्टेर्थइति अतिशयकर्तृरूपेर्थेइत्यर्थः। भावेल्युडि, तेतु नयुक्तं तत्रार्थे प्रत्ययइत्यर्थेत
नबाहुलकाल्युडित्युक्त्या चतथाभाष्या दित्यर्थेतिशयप्रकर्षादिस्यएवप्रत्ययःस्यात्तानपद्य
स्यप्राप्त्यापत्तेः। अतएवभावेल्युट्पक्षेलिंगवचनासिद्धिर्भाष्येशंकिता। अतिशयेवर्तमानात्प्रातिपदिका अभिभूयमानादेवप्रत्ययापत्तेः। तान्क
दिभ्यः। नहिविशेषणीभूतमर्थमादायतत्रायंशब्दोवर्ततइतिव्यवहारः। सचेतसान चातिशयशब्दस्यतदिशिष्टलक्षणा। नहि शान चावित्यादौभाष्येप्रातिपदिका
र्थेरिलक्षणायांतुभाष्योक्तमेवसाधुः। अतएवैतेषांसमानाधिकरणवृत्तितद्धितत्वेनव्यवहारो युष्मद्युपपदेलट् इत्यादौ प्रवृत्तिनिमित्तगुणादिनिष्ठेनते
र्थतद्धितयोस्त्वार्थस्यसामानाधिकरण्यमितितदर्थः। तत्रप्रकृत्यर्थद्रव्यस्यस्वरूपतद्धितराभिभवकर्तृत्वाभावेपितत्प्रवृत्तिनिमित्तगुणादिनिष्ठेनते
नतस्यापितत्त्वबोध्यं। गोतरइत्यादौप्रवृत्तिनिमित्तभूतजातेः स्वतस्तदभावेपितत्सहचरितवाहदोहनादिगतेनतस्यतत्त्वं। एवंचतरवादिसमभिव्याहारेमा
त्यादिपदानामितराभिभवकर्तृत्वविशिष्टआद्योर्थः। प्रत्ययस्तुद्योतकः। कुमारितरेत्यादौङीपूतुन। तरप्प्रकृतिभूतेनतदंतघटकेनकुमारीशब्दादिनावयो
विशिष्टार्थगतस्त्रीत्वस्योक्तत्वात् तरबंतस्यतुप्रकर्षः प्रवृत्तिनिमित्तमतस्तद्विशिष्टार्थगतेस्त्रीत्वेदवेवानवयसीतिङीष्। वयोमात्रविशिष्टार्थगतेस्त्री
त्वेहितत्प्रवृत्तिः। अतएवगोतरेत्यादौनङीष्। जातिप्रवृत्तिनिमित्तकत्वाभावात्। तदुक्तंभाष्येयदिप्रथमंतात्स्वार्थिकः कुमारितरेत्यादौकेवलवयसःप्र
कृष्टवयोनतिरिक्तमितिङीपुप्राप्नोतितरपोक्तत्वात्स्त्रीत्वस्यप्रत्ययोनभविष्यतीतितरपातंप्रकृतिभूतेनवयोविशिष्टार्थगतस्त्रीत्वस्योक्तत्वादित्यर्थः।
एतदुक्तंटावपिनप्राप्नोतीत्यादिभाष्यमेकदेशिनोक्तिरितिबोध्यं। आतिशायनिकप्रत्ययांतादातिशायनिकोनानभिधानात्। श्रेष्ठतमेत्येककर्मणइत्या
दिकंतुछांदसत्वात्स्वार्थेसाध्वितिसर्वभाष्येस्पष्टं। अतिशयेनेति। प्रकृत्यादित्वात्तृतीया। तिङश्च। अप्रातिपदिकत्वादप्राप्तेवचनं। किमेत्तिङः। किमादिप्रकृति राम २९
कघादित्यर्थेस्त्रस्खलितमाहाव्ययाच्चयोघइति। किंतमामिति। आमंतस्याव्ययत्वात्ततःपरस्यसोर्लुक्। पूर्वाण्हेतरामित्यादौतत्तत्क्रियाविशिष्टस्यैवृत
तत्कालव्यवहारनियामकत्वान्नशुद्धद्रव्यप्रकर्षः। उच्चैस्तमइति। उच्चैःशब्दोत्रोच्चत्वगुणवत्परः। द्रव्यस्यस्वतःप्रकर्षाभावेपिद्रव्यनिष्ठगुणादिप्रकर्षए
वद्रव्यप्रकर्षइतिबोध्यं। तदुक्तंतमप्सूत्रेकैयटेनअद्रव्यप्रकर्ष — निषेधउपचरितगुणक्रियागतप्रकर्षद्रव्यविषयोद्रव्यइतिउच्चैस्तमोद्रव्य

धिकरणशक्तिप्रधान इति उच्चैः शब्दस्तत्रोच्चत्वप्रकर्षेण तदाश्रयस्य प्रकर्षेपि तस्य न द्रव्यत्वं क्रियाकारकभावरूपसंबंधविशेषणत्वेनैव तत्प्रधानेना
प्रधानतया सर्वनामपरामर्शीयोग्यत्वात्तु शक्त्याविष्टस्य सर्वनाम्ना परामर्शाभावाच्चात एव तदादिशब्देभ्यस्तत्तद्विभक्तयः यत्त्वि विदितदिति सर्वनामपरा
मर्शीयोग्यं वस्तु तत्तद्द्रव्यत्वेन विवक्षितमिति तमप्सूत्रे कैयटोक्तः इदं पूर्वाण्हेतमामित्यत्रापि बोध्यं। द्विवचनविभज्यो। द्व्यर्थप्रतिपादके विभजनीये चोपपदे
द्वयोर्मध्ये न्यतरापेक्षातिशयविशिष्टस्वार्थवृत्तेर्विभागप्रयोजकीभूतधर्मवाचकाच्च स्वार्थे प्रत्ययः। विभज्यांशे उपपदशब्दबोधितसुबंतत्वं प्रतिपदोक्तत्वाभा
वात्पंचमी विभक्ते इति विहितपंचम्यैवेति बोध्यं तेन सांकाश्यकानां पाटलिपुत्रकाणां च पाटलिपुत्रका आढ्यतमा इत्यत्र न तरप्। पंचमी त्वत्र न विभाग[illegible]भावात्वे
न समूहरूपतया विभागस्यापि सत्त्वात्। एते खल्वपि नैर्देशिकानां वार्त्ततरका इति तस्मिन्निति सूत्रे भाष्यप्रयोगाद्बहुषु पुत्रेष्वेतेषु [illegible] अयं मे ज्येष्ठो
यं मध्यमोयं कनीयानित्याद्यं तत्वतः सूत्रस्य भाष्यप्रयोगाच्चाद्व्यर्थोपपदेपीमौ साधू। सूत्रे द्विवचनेति तूदाहरणमात्रमिति केचित्। परे तु नैर्देशिकानां मध्ये न्ये
भ्यः शब्देभ्यः इत्यध्याहृत्य विभज्योपपदे तरप्सूत्राभ्यामित्यध्याहृत्यासिद्धेयसुनत एव न खल्वपि बहूनां प्रकर्षे तरपा भवितव्यं केन तर्हि तमपेति तम[illegible]ति
भाष्ये उक्तमित्याहुः। न तरामित्यादौ प्रतियोग्यसमानाधिकरणत्वरूपात्यंतिकत्वेऽभावगते प्रकर्षे तरप्। प्रवृत्तिनिमित्तगते प्रकर्षे तरबादिरिति तु प्रक
त्यर्थप्रकर्षासंभवविषये। एवं द्योत्य[illegible]र्थप्रकर्षेपि द्योतकात्तरप् प्रथयानितरां गच्छतीत्यादौ। तुश्छंदसि पूर्वविप्रतिषेधमव्यावर्तिन प्रतिप्रसवत्वं स्फुटं बो
धयितुं छांदसमप्यत्रोपन्यस्तं। तुरिष्ठेमेयस्सु। इमनिचग्रहणमुत्तरार्थं न चैतत एव ज्ञापकादिष्ठनीयसुनोः सिद्धौ तुश्छंदसीति व्यर्थमिति वाच्यं। इमनि चोपि कल्पना
पतेः। लोकेपि ष्ठनादेरप्रवृत्तेश्च। यद्यपि निमित्तस्य छंदसत्वादिदं छांदसं। तथापि तस्यैवेहोपन्यासादिदमप्यत्रोक्तमिति। स च वचनसामर्थ्यात्तद्विदेशः
अंत्यस्य टेरित्यनेन न सिद्धेः। प्रशस्य। अजादी इत्यनुवृत्तं सप्तम्या विपरिणम्यते इत्याह अजाद्योरिति। प्रशस्यत्वं गुण इत्य[illegible]नस्य क्रियात्वेपि अत एव ज्ञापकात्तौ
प्रकृत्यैकाच्। इष्ठादिष्विति। तेन ज्योदेवतास्य ज्ञः स्थालीपाक इत्यत्र नेदं। अयं च प्रकृतिभावाच्छ्रो योन लब्धितेयस्येति विटेरित्यादेरेतत्प्रकरणस्य लोपमात्र
स्येति भाष्ये स्पष्टं [illegible]निकर्वा। अत्र न रम्या चौहलतावेवा अन्यथा प्रकृत्यैकाजिति सूत्रस्य भाष्योक्तरीत्या श्रेष्ठ इत्यादेरुच्चारणसामर्थ्यादकारस्य लोपाभा

सु॰ ल॰ शं॰ शे॰ त॰ ३०

ववदत्रापितद्भावापत्तौभेदिष्ठइत्याद्यसिद्धेः उत्तरसूत्रस्यकन्साहचर्याच्च। कनिष्ठइत्यादौटेरितिलोपस्तुनप्रकृतिभावात्। कनस्तदपवादत्वाच्च। नस्त
द्धितइत्यपिन। अनउच्चारणसामर्थ्यात् सर्वादेशस्तुकेत्यादेशेनापिसिद्धइतिबोध्यं। स्थूलदूर। यणादीतिलुप्तषष्ठीकं। परमितिषष्ठ्यर्थेप्रथमा। पूर्वत्वेवधिस्तु
यणादिरेव। यणादीतिबहुव्रीहिः। इकपरिभाषया क्षिप्रक्षुद्रयोःपकारदकारयोर्नगुणः। युवशब्दस्यागुणवचनत्वादेवज्ञापकादजादौ। अन्येतुगुणव
चनाएव। नचक्षिप्रक्षुद्रावगुणवचनौ इमनिचितग्रहणस्यचारितार्थ्यात्तयोरिष्ठनाद्यनापत्तौक्षेपिष्ठइत्याद्यसिद्धेः वसुश्रेयुवशब्दोगुणवचनोपीत्याकडारसूत्र
जातेरस्त्रीतिसूत्रभाष्याभ्यांलभ्यते। प्रियस्थिर। वंहीत्यादाविकारउच्चारणार्थः। अन्यथाभूयासिद्धत्वादिकारोच्चारणसामर्थ्यादप्रादविवटिलोपानापत्त्यावं
हिष्ठइत्याद्यसिद्धेः। वरादिसाहचर्याद्दृढोहलन्तः। तेनद्रढिष्ठइतिप्रस्थस्फास्तुप्रेष्ठइत्यादेर्भाष्यउदाहृतत्वेनादन्ताएव। प्रेष्ठइत्यादावादेशस्यासिद्धत्वात्प्रकृति
भावाच्चतन्निमित्तकटिलोपोन॥ स्थानिनिमित्तकोपिन। प्राद्यादेशानांटिलोपापवादत्वात्। बहोर्लो। इष्ठनउत्तरसूत्रेणकार्यं। तरस्यविधानात्तस्येहनग्र
हणमित्याशयेनाहेमेयसोरिति। लोपश्चादेः परस्येत्यादेः भूभावस्यासिद्धत्वाद्भूयानित्यत्रोगुणोनदीर्घोच्चारणंतुभूमेत्यादौसावकाशं। विन्मतोर्लुक्। अग्रा
दीइत्यनुवृत्तेराहेष्ठेयसोरिति। अतएवज्ञापकादाभ्यामजादौ। नचविन्विषयेमतुप्सत्त्वेनतल्लुकैवसिद्धौविन्ग्रहणंव्यर्थमितिवाच्यंनकरोतीत्यादि
नाणिचीष्ठवद्भावेनविनोलुगर्थेतत्सत्त्वात्। विल्वकादिभ्यश्छस्येत्युत्तरमेवविन्मतोरिष्ठेमेयःसुरितिनोक्तं। तत्रत्यलुकश्छस्यास्वरितत्वादन्यवतुरित्यत्र।
लोपइत्येवव्याख्यातं। प्रशंसायांरूपप्। प्रशंसाविशिष्टेर्थेवर्तमानात्स्वार्थेरूपविरत्यर्थः। प्रशंसाचात्रपरिपूर्णत्वरूपवैस्पष्टरूपाप्रकृत्यर्थतावच्छेदकधर्मनि
ष्ठा। तत्समानाधिकरणधर्मनिष्ठावाप्रकृत्यर्थेआरोप्यतेतेनचोररूपोयंयदक्ष्णोरञ्जनंहरेदितिसिद्धं। प्राशस्त्यंप्रतियोगिनिरपेक्षमतिशायनंतुतत्सा
पेक्षमितिनतदनुवृत्त्यानिर्वाहः। ईषदसमाप्तौ। ईषदसमाप्तिविशिष्टेर्थेवर्तमानात्प्रातिपदिकादित्यर्थः। स्वार्थिकानांप्रकृतितोलिंगवचनानुवर्तिकारात्। बहु
गुडोद्राक्षा। तृणभकल्पइयंगौरित्यादिसिद्धं। गुडकल्पाद्राक्षेतितुक्वचित्प्रकृतितोलिंगवचनातिक्रमात्सिद्धं। णचःस्त्रियामितिसूत्रेस्त्रीग्रहणात्[illegible]तिक्र
मः। अन्यथाणचःस्त्रियांविधानात् अञ्श्चस्वार्थिकत्वात्सिद्धौकिंतेन। गुडशब्दस्यसादृश्याद्द्राक्षायांवृत्तिस्तत्रसादृश्यप्रयोजकधर्मस्यमा[illegible]

राम ३०

समाप्तिः। यन्निरूपितसादृश्य प्रयोजकधर्मस्तेषदसमाप्तिस्तद्वाचकाः कल्पादयः स्वभावात्। एवंच पूर्णपटुः कश्चित्तत्सादृश्यादन्यः पटुः पटुकल्पः पटु
रसादृश्यंच पटुकल्पशब्दगम्यमिति सर्वत्रोपमागम्याद्रष्टव्या विभाषा सुविभाषाग्रहणं कल्पवादिसमावेशार्थं कल्पादयस्तिङ नेत्युसावकाशाः के कार्यं
तु न तत्। तल्लोपे त्वेमहाविभाषयैव सिद्धेः। अनिष्टत्वे तु न तदर्थता तस्येति बोध्यं। सुपूग्रहणं तिङश्चेत्यस्यात्रासंबंधाय। उत्तरत्र त्वनुवर्तत एव। पुरस्तादि
ति प्रत्यये परत्वनिवृत्तये तु ग्रहणं पुरस्तादित्यस्यावृत्त्या पुरस्ताद्यादृशे लिंगवचने तादृशे एवेत्यर्थबोधनद्वारा स्वार्थिकानां प्रकृतितो लिंगाद्यतिक्रमे प्रा
पकं। हृत्तीप्रागेवेत्येवकारस्तु सर्ववाक्यं सावधारणमिति न्यायसिद्ध इति सर्वभाष्ये स्पष्टं। प्रकारव। अत्र प्रकारो भेद एवेति जयादित्यः [illegible] भेदश्च तु
भयमपीति प्रकारे गुणवचनस्येत्यत्र वामनः। थाल् तु प्रकारमात्र इति। तत्रापि प्रकारवचने इत्येवोक्तः सोपि प्रकारवतीन्याय्यं [illegible] किंचतथास
ति तथेत्यादेः सप्रकार इत्यादिरर्थः स्यात्। नच यथा लाजातीयरीवाधापत्तौ तज्जातीय इत्याद्यसिद्धिरिति वाच्यं जात्यंताच्छबंधुनीत्यनेन बहिरंग [illegible] धापत्ते
नोक्तरीत्याद्विर्वेनेव थाला पिवाधा नेष्यत इति वक्तुं शक्यत्वाच्च। अतएव यथाजातीयक इत्यादिभाष्यप्रयोगाः संगच्छंते। अव्ययस। अयमप्य [illegible] विकारः। अ
ज्ञाते इत्यादौ तु वाक्यभेदेनाकचोपि विधानं बोध्यं। कस्यायमिति। अज्ञातत्वाभिनयोयं अज्ञातोश्व इत्यपि विग्रहो बोध्यः। अव्ययेति सूत्रे प्रातिपदिकादिति सु
प इति च संबध्यते तेन क्वचित्सु वं तावयेव प्रातिपदिक टे ग्रहणं क्वचित्सु वं न टे ग्रहणं तत्र व्यवस्थामाह। ओकारेति। इदं वाक्यं युष्मदस्मद् [illegible] मात्रविषयं
। भाष्ये तथैवोदाहरणात् अन्येषां तु सर्वनाम्नां प्रातिपदिकटेरेव प्रागकच् अतएव त्वादेशः साकाक्कार्थं कः कौ के इत्येवमर्थमिति भाष्यं संगच्छते। त्व
यकेति। यत्वादिषु कृतेष्वकच्। पचतकीति। अकचो द्वितीयोकार उच्चारणार्थ इति भावः। कुत्सिते येन धर्मेण [illegible] तेव सु तद्धर्मयुक्तार्थाभिधायिनः प्र
त्ययः। अश्वक इत्यादौ धावनादेः सम्यगननुष्ठानात्कुत्सेति बोध्यं। कुत्सितगत कुत्सायां कुत्सितक इत्याद्यपि प्र[illegible] इतिवत्। संज्ञायांकन्। कुत्सादि
हेतुक संज्ञाविषये कनित्यर्थः। तद्युक्तादित्यस्य विवरणमनुकंपायुक्तादिति। धानका इति। धानाशब्दात्केकेण इति ह्रस्वे कांताद्यपि अभाषितपुंस्काच्चे
ति विकल्पात्त्यक्षे इत्वाभावः। पूर्वेणेति। अनुकंपायास्तद्विषयत्वादिति भावः। परंपरासंबंधेपीति। आरंभसामर्थ्यादिति भावः। अनुकंप्यमानो दानेन नारा

यतीतिधानादेरनुकं ध्यमानसंबंधादनुकं पायुक्तत्वमितिबोध्यं।ठन्वेति।पक्षेकः।पूर्वसूत्रद्वयेति।अनुकं पापांनीतोचेत्येतत्।व्याख्यानादितिभावः।घ
निलापूर्वसूत्रेणैवठचकयोः सिद्धौयोगविभागादुक्तविषयातिरिक्तेप्यैतौतत्रकठचसिध्यर्थंचचकारइत्येके।ठाजादौ।अस्मिन्निति।कृद्विसंनिधानादिति
भावःननुठग्रहणंव्यर्थंइकादेशेअजादित्वात्तिद्धेरतआह।ठग्रहणमिति।तस्मिन्निवायुक्तशब्दात्ठेनित्यत्वात्पूर्वमस्यायांलोपेकादेशेचवायुकसिद्धिः।
अन्यथामातिथिकवत्तेनिपातपरिभाषयाकादेशाभावेनसिध्येदितिभावः नचघचःश्वित्वेनज्ञापकेनेकादेःस्वर्वतःपूर्वप्रवृत्तिरितिवाच्यं।ज्ञापकसिद्ध
स्यासार्वत्रिकत्वात्।ठग्रहणसामर्थ्याच्चतस्याप्रवृत्तेः।अत्राजिनीतस्येत्यत्रत्योत्तरपदेतिपृथक्कादंलुप्तविभक्तिकंतेनलोपपदमेवानुवर्ततेतएव
षषष्ठाजादिवचनात्सिद्धमितिसंगच्छते।अतिप्रसंगस्त्वनभिधानान्निराकरणीयः तेनसवित्रियइत्यत्रमजावृत्ताविति।लोपोन।उपेद्रदत्तेचतुर्थादचइतिलो
पोन।विनापिप्रत्ययमिति।समुदायशक्तिग्रहकालेवयवानामपिशक्तिग्रहादवयवतोपितद्बोधः।एवमेवप्रविशपिंडीमित्यादौवाक्यैकदेशात्कार्थ
बोधः अस्यैवानुवादकमिदं।वर्णमात्रप्रयोगस्तुनततोवबोधात्।उवर्णात्त्र।लइतिलोपस्यपूर्वाचार्यसंज्ञा।उवर्णात्परस्यलप्रत्ययस्यलोपःसत्रादेः
परस्य।येनद्वितीयादचउर्ध्वेलोपः सूत्रसिद्धस्यैवानूद्यते।ऋवर्णादपीतिभाष्येनदृष्टं।पूजार्थमिति।ठज्वेत्यतोवेत्यनुवृत्तैवसिद्धेरितिभावः।उपेंद्रइति
नेंद्रस्येतिज्ञापकेनपूर्वोत्तरपदनिमित्तकार्योपेक्षयांतरंगस्याप्येकादेशस्यपूर्वमप्रवृत्तेरितिभावः।द्वितीयंसंध्यक्षरंचेदिति।एकश्रुत्यैवसंध्यक्षरा
ण्येचः।एकाक्षरइति।अचसहितंव्यंजनमक्षरंएकात्पूर्वंपदानामित्यर्थः।द्वितीयादचऊर्ध्वमित्यनेनद्वितीयाज्विशिष्टस्यलोपाशासेरिदंवाशीर्दत
इति।वाच्याशीर्पेस्यतेनदत्तोवाकुकरणकशुभाशंसनेनदत्तइतिवार्थः।अनेकादेशपर्यंतनतत्तत्पादसप्ताध्यायीस्थकार्यप्रवृत्तिर्बोध्यतयानपूर्वंकु
त्वादिप्रवृत्तिः।यद्यपिद्वितीयादचऊर्ध्वभागस्याशीर्दत्तशब्दस्यलोपेयस्येतिलोपेचांतेइकनिमित्तभसंज्ञासत्वात्कुत्वाद्यप्रसक्ताविदंसिध्यतितथापिभत्वेपिलोप
स्यस्थानिवत्वात्दाकारांतनिष्ठभत्वेनचांतनिष्ठपदत्वाव्याघातात्कुत्वजस्त्वयोर्वोगिकइतिस्यादितिभावः।नचसाक्षात्तदंगस्यापाद्यपदांतेविधेयादिमा
पकस्यप्रतिबंधकस्यचास्यानिवत्त्वस्यनिषेधइतिसिद्धांतादत्वेपिस्यानिवत्त्वनिषेधइतिवाच्यं।षडिकेपिदोषापत्तेः।पदितन्नद्वितीयादचऊर्ध्वेस्यलो

पविधायकत्वं न प्रामाण्यात्स्त्वेस्यानिकत्वं तर्हि मकलेपि तुल्यं। एतेन पूर्ववत्सिद्धे इति निषेधो जसि चेति निषेधश्च स्यादित्यपास्तं। न पदांतसूत्रोक्तरीत्या तयोः पूर्वत्रा-
त्वेः प्राप्तेश्च। उत्तरपदलोपे तु अन्त्यसादेशत्वेन स्थानिवत्त्वाभावात्तुल्यावधिकया भसंज्ञया पदसंज्ञा बाध्यते तत्र तद्धिताश्रयायां विभक्त्याश्रयायाश्च वा प्रसंगो न वि-
तयापवादत्वाद्विरोधः। षषष्ठेति। स्पष्टं चेदं सादिष्विति सूत्रे भाष्ये। शेवलसु। एषामिति। शेवलादय आदिभूता येषां तेषामित्यर्थः। एषामन्तसंधीनां तृतीयादच इ-
ति वक्तव्यं तेन सुपर्याशीर्दत्तशब्दात्तु चिसुपरिकइति सिध्यति। अजिनांत। उत्तरपदग्रहणात्सर्वलोपोत्र। अल्पत्वमहत्वप्रतिद्वंद्वि। ह्रस्वत्वदीर्घत्वप्रतिद्वंद्वीति मे-
दः क्वचित्प्रकृतिलिंगातिक्रमस्यापि सत्वेनाह। कुटीरइति। कासूः शक्ताख्यशस्त्रविकलवाकच। किंयत्तदो। द्वयोरेकस्य निर्धारणे गम्ये निर्धार्यमाणवाचिभ्यः।
किमादिभ्योडतरजित्यर्थः। द्वयोस्तूपलक्षणं। अतएव बहुष्वासीनेषु कश्चित्कंचित्पृच्छति। कतरो देवदत्त इति प्रत्यय इति सूत्रस्थभाष्यप्रयोगः संगच्छते। एता-
द्रूपमपि तु मेव सूत्रे एकग्रहणं। द्वयोरितिनिर्धारणषष्ठी व्याख्यानादेव भविष्यतीत्यलं। अत्र निर्धारणं न प्रत्ययार्थः। तं विनापि प्रतीयमानत्वान्यलभ्यत्वाद्वि-
तु विषयनिर्देश इति वृत्तौ। वा बहूनां प्रत्यास्यातमिति। प्रत्ययार्थसत्वनभिधानमत्र। अतएव ततोऽडतरचूना आकरे इति। पूर्वसूत्रस्य द्वयोरित्यस्य प्रत्याख्यानभाष्य-
व्याख्यावसरे के यदग्रंथे इत्यर्थः। अतएव कतमा कतमे षामाकतेति पदद्वित्वप्रकरणे भाष्यप्रयोगः संगच्छते। तेन कतमो भवतामध्यापकः। भूरादिवद्द्रतौ
वेति सिद्धं वाग्रहणमिति। न चाव्ययसर्वनाम्नामित्यस्याधिकारत्वात्तदनुवृत्त्यैव सिद्धे वाग्रहणं व्यर्थमिति वाच्यं तन्निवृत्तिज्ञापनार्थत्वात्। तेनडतरजवि-
षयेनाकच्। महाविभाषयेति। अतएवावक्षेपण इति सूत्रे भाष्ये कएतयोरर्थयोर्विशेष इति प्रयोगः संगच्छते। तमादयः प्रागवक्षेपणे कानोनित्या प्रत्ययाः
इति प्रायिकमिति भावः। किम इति। बहुष्वासीनेषु इत्यादि भाष्यप्रयोगादिति भावः। एकाच्च। प्राचामिति पूजार्थं। वाकास्येष्ट्वे महाविभाषयैव सिद्धेः। अ-
कजर्थमपि न तस्यानिष्टत्वादिति स्पष्टं भाष्ये। येनेतर इति। अवक्षेपणे इति करणे ल्युडिति भावः। इवे प्र। इवार्थोपमानात्प्रवर्तिवर्तमानात्प्रातिपदिकात्कन्
यद्वयमेयं सा प्रतिकृतिश्चेदित्यर्थः। प्रतिकृतिर्मृदादिनिर्मिता प्रतिमा प्रकारांतरे स्वार्थिकप्रकरणविरोधः। अश्वक इति। उपमानाच्चाभिन्न इति बोधः। लु-
म्म। अस्य लुदवं प्रकृतिवत्लिंगाय। वचनं तु विशेष्यवदेव हरीतक्यादिष्विति रित्यत्र पाठात्। तेन चंचे मनुष्यावित्येव देवलकानामिति। प्रतिमां गृहीत्वा भिक्षमा

सु. ल. श. शे. न. ३२

र्थप्रतिगृहमटताम्रित्यर्थः। तत्तदायतनेषु प्रतिष्ठापितपूजार्थप्रतिमासु चित्रेषु नटेषु च भ्रमात्मिका शिवाभेदबुद्धिरिति प्रत्ययोत्पत्तेरेवाभावः। स्पष्टं चेदं।
अनुत्त्वविषयेतादृशेष्वपि रसप्रकरणे शंकुकमतनिरूपणावसरे प्रकाशकारैरुक्तं। यत्तु तत्र बुद्धेर्भ्रमत्वाभावोप्युक्तः स त्वनंतरावतीर्णभाष्यपाठवशादे
स्तत्र भ्रमत्वेन प्रक्रमान्न विरुद्धइतिदिक्। अर्चासु पूजनार्थासु चित्रकर्मध्वजेषु चेति देवपथादिषु पाठस्तत्र न दोषः। इतिमद्राजस्येति सूत्रे कैयटः। प्रकृ
तसूत्रे स्तावप्येतत्निरुक्तमिति। अस्वरितत्वादननुवृत्तिरेवात्र निवृत्तिः शाखादिभ्यो यदिति पाठः। यइतित्वपपाठः। मुख्यादीनामाद्युदात्तदर्शनात्। उगवा
दिसूत्रस्थभाष्यविरुद्धत्वाच्चाभव्यः। आत्मवान् अभिप्रेतानामर्थानां पात्रभूत इति यावत्। तद्विषयादिति। इवार्थविषयसर्वावयवकादित्यर्थः। भाष्येत
थैवोदाहरणात्। इवार्थविषयसर्वावयवकादिवार्थोपमानत्ववतिवर्तमानाच्छइत्यर्थः। अतएवशास्त्रीश्यामेत्यादेरिवार्थे छोन। काकतालमितिद्वं
द्वेवार्थेन। काकतालीयइति। काकइवतालमिवेति इवार्थइत एवज्ञापकात्सुप्सुपेतिसमासः। तत्रपूर्वपदमुपमानकाकागमनपरं उत्तरपदं चोक्तपूर्वपदा
र्थसमानाधिकरणोपमानतालपतनपरं। समुदायश्चोपमेयदेवदत्तागमनसमानाधिकरणचौरपतनपरः एवं चोपमानकाका गमनसमानाधि
करणोपमानतालपतनोपमेयं देवदत्तागमनसमानाधिकरणं चौरपतनमितिसमासार्थः। विशिष्टे विशिष्टनिरूपितोपमेयत्वबोधात् विशेषणे विशे
षणनिरूपितं विशेष्ये च विशेष्यनिरूपितं तत्पर्यवस्यति। तत्तदुपमेयबोधे तत्तदुपमेयवाचकसमभिव्याहारस्तन्त्रं। तत्तत्समभिव्याहारे समा
र्थोसमानप्रत्ययोज्योपमानभूततालकृतकाकवधोपमेयः समासार्थोपमेयप्रयोज्यश्चौरकृतदेवदत्तवधइतिबोधः शक्तिस्वभावात्। एतेन परस्परं।
सामर्थ्याभावाद्वृत्तिद्वयमपि दुर्लभमित्यपास्तं। तत्फलितमाह। इहकाकेत्यादि। अत्र सर्वत्रातर्कितोपनतत्वं साधारणो धर्म इत्याह। अतर्कितो
मिठगिति। अन्यतरस्यांग्रहणमनंतरठकः समुच्चयार्थमिति भावः। एकशालाशब्दस्यांगुल्यादिषु पाठादिति भावमन्ये। पूगात्। पूगेति नत्वस्वरू — राम
पग्रहणं व्याख्यानात्। ग्रामणीवाचकपूर्वावयवकभिन्नात्पूर्ववाचकादित्यर्थः। लौहितध्वज्यइति। लोहिताध्वजायस्यपूगस्य स एव लौहितध्व — ३२
ज्यः। व्रातच्फञ्। शरीरायासजीविनां नानाजातीयानामनियतवृत्तीनां संघो व्रातः। च्फञ् इति गोत्रे कुंजादिभ्य इत्यनेन। अस्त्रियांकिं। कौंजायनी। टित्व

ञ्जैविति। टित्वसामर्थ्याद्स्त्रियामितित त्रन संवध्यत इति भावः। तद्विशेषेति। व्याख्यानादिति भावः। जानकि स्त्रिगर्तेः। पर्श्वादिभ्यो। अत्रास्त्रियामित्यनुवर्तते। य
ञश्चेतिसूत्रस्य भाष्यप्रामाण्यात्। तेन पर्श्वोः स्त्रीश्च्यटू टेण्यण् विधायकयोष्टित्वसामर्थ्यादसंबंधेप्यन्यत्रासंबंधे मानाभावात्। आभिजित्य इति। अपत्यौष्णताय
त्र्। तस्य स्वार्थिकत्वेन गोत्रार्थकत्वादाभिजित्यस्यायमिति विग्रहे वुञ्। अत्र आपत्येति यलोपश्च। आभिजितकः। अयमपत्याण्णतेभ्य एव। तेनाभितोमुहू
र्त इत्यादौन। सर्वे भाष्ये। अनैमित्तिकत्वार्थमिति ननु तद्भावभावित्वरूपं निमित्तत्वं सह विधानेपि तद्भावोत्तरंभाव इत्यर्थे वत्तद्भाव[illegible]कालंभाव इत्य
पि न दर्थोत्। अत एव धिन्विकृण्व्योदित्यत्र वलोप एव कार्यो न धातुलोप इति गुणनिषेध सिद्ध्रकारा देशविधानं व्यर्थमित्याशंक्य तत्प्रत्याख्याने
गुणवारणार्थं तदिति भाष्य उक्तमिति चेन्न। लोपवचनसामर्थ्यादचः परस्मिन्नित्यत्र तथा निमित्तत्वानाश्रयणात्। दंडव्यवर्दिडो दंडनं। व्यवसर्ग
साहचर्यात्। तयोरर्थयोर्विषये स्वार्थे वन्नित्यर्थः। स्थूलादिभ्यश्च। प्रकारो भेदः सादृश्यं च व्याख्यानात्तद्धतिवर्तमानादित्यर्थः। जातीयरीपवाद इति
ज्ञोतीय्यविधौ भेद एव प्रकार इति जयादित्यमते पवाद इत्यस्य परत्वाद्बाधक इत्यर्थः। तत्राप्युभयं गृह्यते इति वामनमते यथाश्रुतमेव। अनंत्यं
अनंत्यतगतिरशेषतः संबंधाभावः। सामिकृतमिति। समासेपि सामीत्यस्य क्रियाविशेषणत्वेन कारकत्वात्समुदायस्य कांतत्वं। कद्ग्रहणे ग।
तिकारकपूर्वस्यापि ग्रहणात्। अनंत्यंतगतेरित्यस्य यद्यपीत्यादिः। अप्रकृत्यैवेति। समस्तत्वेतदेकदेशसामिशब्देनेत्यर्थः। असमस्तत्वेत त्संनि
हितेत्यर्थः। इदमेवेति। अस्य तथापीत्यादिः। वहुतरकमिति। यदि तु वहुतरकं सुकरतरकमित्यादि तेषामाद्यंतात्स्वार्थेकन्वक्तव्य इति वचनेनया
कादित्वात्स्वार्थेकनावासिद्धमित्युच्यते तदानास्य प्रयोजनमेतदेवाभिप्रेत्येदं भाष्ये प्रत्याख्यातं। एतदेव भाष्यं तस्मात्कृतिगणत्वे मानं विभाषा।
ग्रहणादिति। प्राक्प्राचीनमिति रूपद्वयं महाविभाषयैव सिद्धमिति तदस्य नित्यत्वे ज्ञापकमिति भावः। तेन साक्षित्वमित्याद्यसाध्विति बोध्यं। आशि
त्वमात्त इत्यादि तु [illegible]त्यय प्रकृतेरर्थकथनं इयमभ्युच्चययुक्तिः। वृहतीजात्यंता इति वहुवचनेनास्यापि ग्रहात्। जात्यंताच्छ स्येवास्यापि स्वभावतो
नित्यत्वलाभात्। अंबुतेः खस्य नित्यत्वाभावाय विभाषाग्रहणमिति भाष्यसंमतः। पथ्याः। प्राक्तन इति। तेनावक्षेपणे कन्वैकल्पिक एवेतत्त्वापि क

सु. ल. श. शे. त. ३२

मितिउक्तं। वृहतीत्यादि ताः। कन्सखाः। अदिक्स्त्रियामिति कर्मधारयगर्भो नञ्तत्पुरुषः। प्रागिति। अस्तात्यंतं प्रागिवदेशेइत्यर्थकं निर्लिंगम्। स्वां
तंत्र्योचेयप्रधानतया स्वभावाल्लिंगयोगि लिंगं च नपुंसकमेवैलिंगसर्वनामत्वात्। नस्त्रीत्वादिप्रकृत्यां सहात्यंतविरोधापत्तेरेकवचनमेव च। एवं च पा
मावधिकप्राग्देशवृत्तमस्याम्नाइतिवोधः तदाह। प्राचीनमिति। पदसंस्कारपक्षेइदं। यदा प्रागादिशब्दास्तद्देशकालस्थायादिवोधकास्तेभ्यश्च स्व
स्वदीपस्थितं विशेष्यलिंगत्यागेमानाभावात्प्राचीना आम्नाः प्राचीनावाटी प्राचीनं वनमित्यादीति कश्चित् तन्नमनं चिंत्यं। प्राची दिगिति। लिंगविशिष्ट
परिभाषया प्राप्तिः। प्राचीनं ग्रामादिति। अत्र प्राच्यां दिशीत्यर्थे स्तात्। त्यंतात्प्रागितिप्रकृतिः सचाव्ययत्वादस्त्रीस्याविवक्षतेभाष्येवायं प्रयोगः। जात्य
ताच्चबंधु। जात्यंताद्बंधुनिवर्तमानात्स्वार्थत्याश्रयद्रव्यलक्षकादित्यर्थः। जातेर्व्यंजकमिति। वध्यते स्मिन्नात्मेति वितिव्युत्पत्तेः। अत्र प्रकरणावोधेनवा
चकत्वं वक्तुशक्यं युक्तं चेति परे। स्थानांता। सस्थानशब्दस्तुल्यरूपार्थेन चेत् स्थानांतमर्थवद्भवति तदा प्रत्ययः इत्यर्थः। इतिशब्दादर्थवदितिलब्धं
अनुगादेतीति। अत्रार्थे अनुगादिशब्द इत्यर्थः। अस्य नित्यत्वादस्वपदविग्रहं दर्शयति। सएवेति। अनुपाप्यादिवत्सुप्यजाताविति णिनिः। विसारि
णोः। अणिनुण इत्यतोऽणनुवर्तते। इनण्यनपत्ये इति प्रकृतिभावः। क्रियाजन्मेति अत एव त्रिः प्रकृतौ द्विः पचतीतिन। क्त्वोपंचादिशब्दास्तत्संख्योत्पत्तिपरास्त
स्वेवानुजद्योतकस्तेषां च क्रियायामन्वयः। स्वत्रस्वरसात्। द्विदशा इत्यादौ समासएवद्ध्यादिशब्दानांतत्परत्वद्योतक इत्युक्तार्थे सच्नमसुच्। समुदा
यस्यापि स्वस्तृत्वाच्च। भुंक्ते इतिवर्तमानप्रयोगः त्रिशत्त्वादशेत्यादावावृत्तिक्रियाजन्मगणनेकत्वसुच्। संख्यायाः किमिति। गणनिवृत्तिः। संख्याश
ब्दानामेवेतिप्रश्नः। भूरिवानिति। नायं संख्यावाची लोके गणनायामप्रसिद्धेरितिभावः। वहुशब्दस्तु संख्यासंज्ञकत्वात्तत्कार्यभागित्युक्तं तदभावे
द्विक्रियाजन्मगणनेगम्य इत्यर्थः स्यादिति तात्पर्यं। वारशब्दः कालपरः। सच भोजनपर्याप्त इति कालाध्वनोरिति द्वितीया। यद्यपि द्रव्यगुणयोर्गण। एम
नयोग्यं जन्माप्रसिद्धमेकैवतेषामुक्तिः। क्रियापास्त्वनेकस्याः अपि निवृत्तभेदायाधातुवाच्यत्वेनतत्संभवः। तथापि क्रियाग्रहणं स्पष्टार्थं। साध्यस्वभा ३२
वैवयत्रक्रियातत्रैतत्प्रवृत्त्यर्थं तु नतत्। द्विर्वचनेचीतिद्विरावृत्तिर्द्विः प्रयोगः द्विर्वद्वेसुवद्धमित्यादिप्रयोगविरोधात्। पंचकृत्वः कर्त्ता कटान् द्विः कर्त्तीद

त्यावेगुणभूतक्रियायोगेकारकविभक्तेरिवअस्यापिसाधुत्वमिष्टमेवेतिस्पष्टं,हरिकैयटादिग्रंथेइत्यन्यत्रनिरूपितं।द्वौपाकावित्यादौनसुजादि।क्रिया
जन्मगणनस्याभावात्।तद्गणनार्थत्वेहिपाकावित्यादौद्विवचनाद्यापत्तिः।अतएवद्विःप्रयोगावितिन।तदुक्तंभाष्ये।द्वौपाकावित्यादौकस्मान्नभवतिनै
तत्क्रियागणनेऽभिमुखीप्रवृत्तिरभ्यावृत्तिरिति।साचजन्मरूपा।एवंचनैतत्क्रियागणनमितितदर्थइतिनिरूपितंभाष्यप्रदीपोद्योतेऽथघपिसंख्या
गणनात्मिकैवतथापिगणनायांप्रसिद्धास्तेषामवग्रहणार्थं।तेनयुग्मोभादिशब्दान्नेतिदिक्।विभाषाव।अविप्रकृष्टकालक्रियाजन्मगणनत्वे
रित्यर्थः।प्राचुर्येणेति।व्याख्यानादितिभावः।भावेइति।प्रचुरस्यवचनेवोधनेसतिप्रातिपदिकात्मयडित्यक्षरार्थः प्रचुरार्थबोधकत्वादितिप्रथमास
मर्थात्स्वार्थेमयडितियावत्।अधिकरणेइति।प्राचुर्येणप्रस्तुतान्नादिवचनात्प्रथमासमर्थादधिकरणेप्रत्ययइत्यर्थः।प्रकृतेर्लिङ्गसंख्येततत्रव
तेऽन्नानादित्यर्थः अत्रपक्षेवचनेइत्यत्रप्रकृत्यर्थोविवक्षितःतेनभवन्मयोध्यापतिनावनीपतिरित्यादौप्रकृत्यर्थाधिकरणमात्रेमयडुपपन्नः।तंत्रेण।
र्थद्वयेघटनात्पर्यं।व्याख्यानात्स्वार्थिकप्रकरणपाठस्याद्यपक्षेचरितार्थः।वस्तुतोथस्वार्थिकाइत्यस्यप्रायेणेत्यादिः।प्रकारवचनेजातीयं।तात्त्वंधुनि
देवतांतात्तादर्थ्येयदित्यादौवाचकतायाएवप्रतीतेरितिवोध्यं।तद्ग्रहणंवाक्यभेदेनप्राचुर्याभावेप्यत्यंतस्वार्थिकमयडर्थं।तेनचिन्मयंब्रह्मेत्यादिसिद्धं
।यवागूमयीति।दित्वान्ङीप्।समूहवाबहुत्वविशिष्टार्थेप्राचुर्यार्थेवर्तमानादित्यर्थः।मोदकिकादाववचित्तेतिठक्।स्वार्थिकत्वेपिलिंगातिक्रमः।कुटीरवत्
भेषजमिति।भियःषुक्ह्रस्वश्चेतिव्युत्पादिताद्भिषजशब्दादिदमर्थेऽण्।यतएवनिपातनादेकारः।देवतांतात्तादर्थ्ये तदर्थेवस्तुनीत्यर्थः।वैधकर्मणित्यज्य
मानहव्योद्देश्यत्वंमंत्रस्तुत्यत्वंचदेवतात्वं।तदुक्तंभाष्ये दिवेरैश्वर्यकर्मणोदेवस्तस्मात्स्वार्थेतलइति।तेनदैवत्यमितिसिद्धं।तस्यनयन्नाहपितृदेवत्य
मिति।एतेनपितृषुदेवत्वजात्यभावादिदमयुक्तमित्यपास्तं।नवस्येत्यादिवार्त्तिकेविधीयमानाअप्यत्यंतस्वार्थिकाः।साधारणादिति।अतएवनिपाता
[illegible]तिक्रमेरशस्यदीर्घः।[illegible]मानंधारणंअस्येत्यर्थः।अनेकंप्रत्यविशिष्टसंबंधमित्यर्थः।देवतेति।लिंगातिक्रमात्स्त्रीत्वं वर्णेचा।वर्णकिं।लोहितरूपेति।
[illegible]वदाश्रयमुक्तस्यानभिप्रायत्वाभावोऽनित्यत्वं।लोहितादिति।अस्माद्देवताप्रकादत्यंतस्वार्थिकानामुत्पत्तेःप्रागेवोत्पत्त्यंगीकारेणांतरंगत्वात्प्राप्तलिंग

सु० स॰श॰ बोधकप्रत्ययवद्वा ... स्वार्थिकेन वा भवतीत्यर्थः। अत — एकवद्भाष्यपदस्यात्र प्रकरणे संबंधः। तेनेतादिभ्योऽत्यंत स्वार्थिको एतिके त्येवं नत्वेनिकेति
शे॰त॰ केवलेष्वणोपि। लज्ज... र्थः। उपाधादिति। अवेतिवक्तव्ये ह्रस्वग्रहणाद्दीर्घस्य स्थानित्वं। एतेनान्त्यस्य स्यात्तस्यानर्थ्याच्चलोपाभावइत्यपास्तं व्याख्यानाद्
४४ वाचो। व्याहृतोन्येनोक्तोर्थो यस्याइत्यर्थस्तदाह। संदिष्टेति। तद्युक्तात्तच्छब्देन वाक्। वाचा युक्ताद्व्याहृतार्थे। प्रतिपादककर्मशक्तादित्यर्थः। तेन
स्वयं वाचा कथनपूर्वकं यत्कर्म क्रियते तत्कार्मणं। तदुक्तं भाष्ये। तदित्यनेन। किं प्रतिनिर्दिश्यते वागेव यद्वा वाचा व्याह्रियते तदेव कर्मणा क्रि
यतेइति। अत्र वागेवेत्युत्तरस्यैवकारेण व्याहृतार्थोया मित्यंशस्संबंधो लभ्यते। क्रिययोरुत्सर्गतएकत्वं च प्रतीयते। यद्वाचा वदति तत्कर्मणा
कुरुते इति श्रुत्यर्थानुवादरूपत्वाद्यद्वेत्यादिभाष्यस्य। तद्युक्तात्किं। वाचा कथनं विनैव यत्कर्म क्रियते तत्र मा भूदिति। एवं च मेत्र विशेषप्रयो
गपूर्वं क्रियमाणकर्मविशेषे रूढोयमित्याहुः इदं त्वया कर्तव्यमिति संदेशवाचं श्रुत्वा यत्कर्म क्रियते तत्कार्मणमिति वदतः कैयटस्याशयस्तु चिंत्यः
। वाचिकं श्रुत्वेति मूलं कैयटानुसारेण। क्षेत्रे रूढाइति। तत्रोत्पन्नाइत्यर्थः। प्रजानातीति प्रज्ञः। नित्योयमिति। हृत्तौ चेदं स्पष्टं। भाष्ये नित्येष्वस्यागणनान्ना
स्यनित्यत्वं। प्रत्ययांतरं त्वस्मादस्यापवादत्वान्न भविष्यतीति परे। मंगलामंगलवचनमिति। अपेतापोढेति सूत्रे ऽल्पश इति सोत्र प्रयोगः। एतेनास्मा
त्सूत्र प्रयोगान्मंगलेत्यादि प्रायिकमित्यपास्तं। भाष्यानुक्तेः। अत्राल्पार्थशब्देन स्तोकादीनामेव ग्रहणं। न तदर्थैकैकशब्दस्य तत्त्वे मानाभावात् स
त्वेपि वार्तिकस्य प्रसिद्धतरत्वेनाल्पार्थशब्देन न ग्रहणं। संख्यैक। संख्यावाचिन एकत्वविशिष्टाच्च प्रातिपदिकात्कारकाच्छसित्यर्थः। एकार्था एवे
ति। एकवचनशब्देनात एव गृह्यंते इति भावः। घटं घटमिति। ततः शसि घटं घटमितिवत् घटौ घटौ ददातीत्यपि बोधसंभव इत्यभिमानेः। पदशः स्व
रश इति प्रयोगात्तेभ्योपि वृत्तावेकत्वविशिष्टस्यैव बोध इति जातिश्च इति परे। एकवचनादिति घटौ ददातीत्यादिबोधे शसो ऽसाधुत्वमेवेति केचित्। एम
वस्तुत एकवचनादिति संख्यातिरिक्तार्थानां परिगृहीतैकत्वानामेव वीप्सेत्यर्थानुवादकं। अत एव माषौ माषौ ददातीति न। किंतु द्वौ द्वौ ददातीत्येव। ४४
तत्रैति बोध्यं। अत्राहुः। चकारो वीप्सायामित्यनंतरं द्रष्टव्यः। संख्यैकवचनाद्वीप्सायां च चात्स्वार्थेपि स चाभिधानस्वाभाव्यादेकस्माद्देव। तेनैकशब्दा।

तेन तद्धा चेके सर्वत्र प्रवृत्तिः एतच्च संख्यासंज्ञासूत्रे भाष्ये स्पष्टम् समाहारे चेति तत्रैवेत्यर्थः एवं च तदविवक्षायां पूर्वकाले कैकेति समासे एकनदीतरः सिद्धोऽन्यथा समाना
धिकरणतत्पुरुषं बाधित्वाव्ययीभावेन नपुंसकह्रस्वापत्तिः अच्चान्यन्नवेति योगविभागसिद्धोऽभियुक्तोक्तो गोदावर्याश्च नद्याश्च संख्याया उत्तरे पदे इत्यत्र तु न योगवि
भागस्येष्टसिद्ध्यर्थत्वात् भाष्यकृता तदनुक्तेश्चेति भावः अन्यपदार्थे संख्येति निवृत्तं नदीग्रहणमनुवर्तते संज्ञानवगमादिति संज्ञेति कर्मण्यङ् तेन संज्ञा नदी शब्दविशेष
स्यानवगमादित्यर्थः नित्यसमास इति तत्सदृश इत्यर्थः तत्सादृश्यं च समाससमानार्थकवाक्याभावेन समासघटकपदानां विग्रहस्तु स्वल्पमहाविभाषया अ
संबंधेमानाभावात् अत एव द्वितीयतृतीयेति सूत्रेऽन्यतरस्यांग्रहणेनोत्सर्गापवादयोर्महाविभाषाविषयत्वेऽपवादाभावेऽत्सर्गप्रवृत्तिरित्यर्थे ज्ञापिते ऽन्मत्तग
गमित्युदाहृते अव्ययीभावेन मुक्ते बहुव्रीहिर्नेति चोक्तं भाष्ये अस्य नित्यत्वेनेन मुक्त इत्यसंगतिः स्पष्टैव एवमन्यत्रापि बोध्यम् समासांताः अत्र समासप
देतत्संबंध्य लौकिकविग्रहवाक्यपरमेवमव्ययीभावादिपदान्यपि तत्पराणि अत एव बहुकुमारीक इत्यादौ ह्रस्वो न गोस्त्रियोरित्यत्र भाष्ये स्पष्टमेतत् अंत इति
सूत्रे भाष्ये च एवं चालौकिकविग्रहवाक्ये समाससंज्ञासमकालमेव समासांता इति सिद्धान्तः न च पूर्वं समासांते तत्संनियोगनिष्ठाद्युदात्तत्वेन तदेकवाक्यतापत्ते
पूर्वस्य निघाते कृते पूर्वपदस्योदात्तस्वरितयोगित्वाभावेन पूर्वपदप्रकृतिस्वराप्रवृत्तौऽचश्चित्वं व्यर्थमिति वाच्यम् तत्सामर्थ्येन समासान्तविधावाद्युदात्त
त्वस्यासंबंधज्ञापनात् तेन सम्राड्दा पूर्वस्य समृद्धपुरो राजेत्यादौ पूर्वपदप्रकृतिस्वरसिद्धिः द्वित्रिभ्यामिति सूत्रस्थसमासे कृते समासान्ता इत्येतत्परं भाष्य
मेकदेशयुक्तिरुक्तभाष्यद्वयविरोधादित्यन्यत्र प्रपंचितम् अनशब्दश्चरमावयववाची स च समुदायावयवः अत एवोपशरदमित्यत्र नाव्ययीभावादित्य
म् अव्ययानामिति टिलोपाभावश्च सिद्धः पूर्वभागस्याव्ययीभावत्वाभावेनानव्ययत्वात् यत्तु कैयटेन गोस्त्रियोरिति सूत्रे समासपदस्य समासार्थविग्रहवा
क्यस्योत्तरपदलक्षणयोत्तरपदावयवत्वमुक्तं तथा सरूपसूत्रे उक्तं उत्तरपदावयवत्वमित्यपि भाष्यकारस्य मतमिति तन्न फलाभावात् द्विपुरीत्यादौ स्त्री
त्वस्य लोकतः सिद्धेः लिंगमशिष्यं लोकाश्रयत्वाल्लिंगस्येति भाष्येण लिंगप्रकरणस्य नियमार्थत्वाभावबोधनात् अत एव परवल्लिंगमिति सूत्रे सत्वेऽपि द्वि
नावमर्द्धखारमित्यादौ नपुंसकत्वसिद्धिः पंचराजमित्यादावपि तत्प्रसक्त्यापत्ता वकारान्तोत्तरपदे इत्यत्रोत्तरपदग्रहणस्य व्यर्थत्वापत्तिश्च अंत इत्यादि सू

ल० शे० वस्थभाष्यविरोद्ध चोनस्यदावयवत्वम् एवंहितत्रभाष्यम् समासस्यांतोदात्तत्वमुत्तरपदस्यवेतिविकल्पेऽआद्येऽइदम्प्रथमकाइत्यादौकपोनोदात्तत्वापत्तिमुक्तौअंत्येस्य
स० अ० वेदस्यऽंतोदात्तत्वसिद्धिरित्युक्ताउभयोरपिप्रकरणेनलक्ष्यानुसारात्कचिदुत्तरपदांतस्य क्वचित्समासांतस्योदात्तत्वमिति सरूपसूत्रस्थभाष्यंतदनाश्रयणेपियोज
३५ यितुंशक्यम् तथाहि छात्रद्वंद्वानांविभक्तौपरतएकशेषइतिपक्षेऋकृचऋक्चाचऋचौअसारूप्यादेकशेषोनप्राप्नोतिइतिभाष्येसमासांतानांसमासावयवत्वेपितद
ग्रभागस्यविभक्तिःपरत्वांभावत्तद्विशिष्टस्यनसरूपत्व मितितद्भावः नचतस्यानर्थक्येनतदनुक्त्याभाष्यस्यन्यूनता द्वंद्वावयवानामर्थवत्तामेवैकशेषइत्यर्थे
मानाभावात् विशिष्टरूपोपादानाभावेनतत्परिभाषायाइहाप्रवृत्तेः भाष्यांतरंतुतादृशंनोपलभ्यतएवेतिदिक् सर्वसमासांतोवहुजस्गोमत् जसित्यवस्थायाम
लौकिकेवाक्येसुपःपरत्वादेव ततःपूर्वत्वेतुवाच्यार्थेविरोधः नहिसुप्रेहितंसमासार्थंकिंतुतद्विशिष्टमेव नचाविशिष्टस्यसुवंतत्वाभावेनसुवन्तात्तद्धितइतिसि
द्धान्तविरोधःतेषामर्थाभावेनपरिपूर्णपदमितितन्मूलभूतन्यायस्यात्रविषयाभावात् अतएवपुंयोगादितिसूत्रेऽत्यंतस्वार्थिकानांसुवुत्पत्तेःपूर्वमेवोत्पत्तिर्भाष्येउक्ता
किंचसमासांतप्रकरणेङ्याप्प्रातिपदिकादित्यस्याप्यसंबंधः तस्यावस्थायांवाक्यस्याप्रातिपदिकत्वात् तत्रकवुत्पत्तिकालेएवतत्पूर्वभागस्यसमाससंज्ञाविरोधाभा
वात् समासांतस्यचतद्वाक्यावयवत्वेनतद्ग्रहणेनग्रहणात् वहुकुमारीकइत्यादावुपसर्जनस्त्रीप्रत्ययांतप्रातिपदिकाभावान्नह्रस्वः कप् ह्रस्वादत्तरंगतरः तादर्थ्या
ताच्च व्यंम् येषांपदानांसमासेनतावत्तेषामन्यद्भवतिकपंतावत्प्रतीक्षतइतिभाष्येणस्पष्टम् तथाभिधानात् तत्राद्यस्यतावदित्यस्यकपःप्रथममित्यर्थः अन्य
त्समाससंज्ञारूपं कपासहस्वभवनायकपंप्रतीक्षतइत्यर्थः पूर्वस्यप्रवृत्तौहितदर्थकवाक्याभावेनकप्प्रशांस्त्रवेयर्थ्यमियाहितद्भवनकालप्रतीक्षा नैवान्यथातदन
पेक्षत्वेनकप्प्रतीक्षोक्तिरत्यंतासंगतास्यात् अतएवप्रत्ययस्थादितिसूत्रभाष्यादाहृतेवहुचर्मिकेत्यादावापःसुपःपरत्वाभावादित्वसिद्धिरितिदिक् अथाव्ययीभावे
साधारण समासान्तानाह अव्ययीभावे अव्ययीभावे उत्तरपदतयावर्त्तमानंयच्छरदादिप्रकृतिकंसुवंतंतदंतात्टच् सचसमासार्थविग्रहवाक्यस्यांगावयव
इत्यर्थः एवमाह इत्यनपटजनुवर्त्तते अनंतादव्ययीभावादित्यादितुफलितार्थपरतयाकथंचिन्नेयम् अत्रगणेये झयंतास्तेषां झयइतिविकल्पप्राप्तेर्नित्यार्थः राम
पाठइतिकेचित् प्रत्यक्षमिति लक्षणेनाभीतिसमासः परोक्षमिति इन्द्रियाजन्यं ज्ञानविषयेत्वशेआद्यजंतःप्रयोगः नन्वत्राव्ययीभावप्राप्तिरतआह रामा ७

व्योदिति पररूपौकारेति परशब्दस्य ओकारोऽन्तादेश इत्यर्थः एङि इति पूर्वरूपत्वं परस्योकारेति पाठे परस्याक्षिशब्दस्यादेरकार इत्यपर्थः आद्गुणः अशि आद्यचीति धर्म
परादिति भावः अत्र गणसूत्रे परग्रहणं प्रक्षिप्तमिति परोक्षे लिडिति सूत्रस्थभाष्यकैयटस्वरसः तत्र हि समासान्तोऽपि निपातनात्साधितः पूजार्थमिति
वेति वार्त्तिकेऽप्येतत्पूजार्थमपीत्यर्थः अन्यतरस्यांग्रहणस्य तु स्वरितत्वं नास्त्येव अत एव नदीपौर्णमासीति सूत्रे नदीशब्देन विशेषाणामग्रहणेऽपि शरदादिषु विपाट्
शब्द पाठस्य ज्ञापकत्वमुक्तं संख्यासंज्ञासूत्रे भाष्ये नदीत्यादेर्वैकल्पिकत्वे नित्यत्वाय पाठस्यावश्यकतया ज्ञापकत्वासंगतिः स्पष्टैव। तत्र हि यत्र पाठ
स्तु प्रपंचार्थस्तत्र नदीसंज्ञकस्य न ग्रहणं पौर्णमास्यादिग्रहणात् न चाशब्दसंज्ञेति निषेधात्स्वरूपस्यापि ग्रहणं न स्यादिति वाच्यम् लक्ष्यानुसारेण सामर्थ्येन च त।
स्यात्र त्यागात् अत एव तत्सूत्रे भाष्ये प्रत्याख्यातमिति प्रामाणिकाः ॥ ॥ इत्यव्ययीभावः ॥ ॥ चकारबलेनेति संख्यापूर्वो द्विगुरिति योगं विभज्य पूर्वेण सं
ख्यापूर्वस्य तद्धितार्थेत्यत्रोक्तस्य तत्पुरुषसंज्ञाविधानसामर्थ्यादेव पर्याये सिद्धे चकारः समावेशार्थ इति भावः श्रितेति श्रितादीनां सुबन्तत्वासंभवात् श्रितादि
प्रकृतिक इत्यर्थलाभः येन विधिरिति सूत्रस्थभाष्यप्रामाण्येन संबुद्धिस्त्रीलिंगप्रथमानभिन्नेऽपि प्रवृत्तेरावश्यकत्वादिति भावः समर्थविशेषणत्वाद्द्वितीयादी
नां प्राप्तोऽपि तदंतविधिः समासप्रत्ययविधाविति निषेधान्न भवतीति तदंतविधौ हि श्रिताद्यंतसमर्थप्रकृतिक इत्यर्थे कष्टं परमश्रित इत्यादावपि समासापत्तिः
कष्टंश्रित इति नलोकेति षष्ठीनिषेधः पतितशब्देन निपतितदरिद्राणिभ्यः सनो वेट्कत्वेन यस्य विभाषेति नो निषेधप्राप्तावपि अत एव निर्देशादिट् बोध्यः अ
योग्यत्वादिति स्वयमित्यात्मनेत्यर्थे कंकत्ते शक्तिप्रधानमित्यर्थः स्वायं कृतिरिति असमासे कान्तिरिति स्यादिति भावः ऐकस्वर्यमपि समासफलम् ख
ट्वा अस्य तत्प्रकृतिके लक्षणया द्वितीयेत्यनेन सामानाधिकरण्यम् जाल्म इति तेन केवलरूढत्वं तस्य सूचयति एतेन प्रकरणादिसहकृतवाक्येन निंदा।
प्रतीतिसंभवान्नो हि निंदा इत्ययुक्तमित्यपास्तम् योगरूढत्वसंभवेऽपि केवलरूढेन तदभावात् न हि निंदेत्यस्य च विवक्षितानीत्यर्थः सामीत्यर्धे कालाइति
रल्वाचिन इत्यर्थः कृत्प्रवचनात्तन्नुक्तेनेत्यस्य निवृत्त्या क्तान्तानां तत्सामान्येन सिद्धे योगविभागो व्यर्थोऽत आह अनत्यन्तेनेति परिच्छेत्तुमिति रमेर्योगे शकधृषेति तुमुन्
अत्यन्त अत्यन्तसंयोगानत्यन्तसंयोगसाधारणेन पूर्वेण सिद्धे इदं किमर्थमत आह क्तान्तार्थमिति क्तेनेति अत्रानुवर्त्तत इति भावः तृतीया इदं संकटगता

त॰बो॰ एकएवसामर्थ्येप्रवर्तितेनसमासात्य स्वरान्वये उत्तरसूत्रेणनिपुणश्लक्ष्णाभ्यांसमासविधानात् तद्योगेहिहेतौतृतीयातत्कृतेत्युक्तेश्चस्पष्टंचैतद्भाष्ये गुणेत्यस्य
स॰त॰ तत्कृतेनेत्येतत्सापेक्षत्वेपिसौत्रत्वात्समासः खण्डशब्दश्चात्रखण्डगुणवत्वेनशकलबोधकइतिशंकुलाखण्डइत्यत्रकृतेद्वारकमेवसामर्थ्यंशंकुलाकृतखण्डगुणवाचिनित्य
३६ र्थः वचनग्रहणंतुगुणोपसर्जनद्रव्यवचनेनैवसमासार्थम् तेनकुसुम्भेनकृतंरूपमित्यादौन घृतेनपाटवमित्यादौचनस्पष्टंचेदंभाष्ये यद्यपिजातिसंज्ञाकृदं
ततद्धितान्तसमस्तसर्वनामसंख्याशब्दभिन्नशब्दानामेवगुणवचनसंज्ञातथापिप्रकृतेव्याख्यानात्शुद्धयौगिकएवगुणवचनशब्दइतिबोध्यम् तृतीयां
तार्थेनकृतेनोयोगुणस्तद्वचनेनसमासइत्यर्थात्तत्कृतेत्यस्यगुणपदेनैवान्वयेनसंज्ञानुपादानाच्चगुणेनेतीयतांसिद्धेवचनग्रहणाद्गुणमुक्तवतेत्यर्थइतिभाष्य
चगुणपदेनधर्ममात्रमत्रतेनखण्ड शब्दस्यक्रियावचनत्वेपिनदोषः धान्येनेति अर्थशब्दोधनपरोहेतुतृतीयेतिबोध्यम् पूर्वसदृ॰ यद्यपिसदृशशब्देनषष्ठी
समासःसिद्धस्तुल्यार्थैरित्यनेनतद्योगेषष्ठ्या अपिविधानात्एतस्याश्चनप्रतिपदविधानत्वमितिवक्ष्यते अतःप्रतिपदविधानाषष्ठीनसमस्यतइतिनिषेधा
त्रन पूर्वपदप्रकृतिस्वरोपिसदृशप्रतिरूपयोरितिसि द्धः तत्रहिद्वास्याः सदृशइत्यादौषष्ठ्या अलुकिपूर्वपदप्रकृतिस्वरार्थंसदृशग्रहणमावश्यकंमनसा
सदृशइतिसंज्ञानास्त्येवेतिनतदर्थमिदमावश्यकंतथापिभोजनहेतुकसादृश्यवानित्यर्थेभोजनसदृशइत्यत्रसमासार्थमिदमावश्यकं हेतोःशेषत्ववि
वक्षयाषष्ठीसमासेतुपूर्वपदप्रकृतिस्वरासिद्धिः सादृश्यग्रहणेनसदृशप्रतिरूपयोरित्यस्योपमानबोधकपूर्वपदकेएवप्रवृत्तेरितिस्पष्टंसदृशप्रतिरूप
योरित्यत्रभाष्ये यदितु भोजनेनकृतःसदृशइत्यर्थेपूर्वसूत्रेणसमासेनतत्पुरुषेतुल्यार्थेत्यनेनस्वरोपिसिद्धइत्युच्यतेतदासदृशग्रहणंव्यर्थमेवेतिमिश्रकृतसूत्रे
कैयटेनध्वनितं सदृशेतिस्वरविधायकसूत्रशेषस्यभाष्यंतुएकदेश्युक्तिरितितदाशयः मिश्रंचेति प्रणवंधेनैकार्थ्येसंधिस्तत्रागम्यमानेमिश्रंत्तूत्तरपदा
मनुपसर्गेतृतीयान्तात्परमन्तोदात्तमित्यर्थः अवरस्येति यद्यप्ययमूनार्थोपितथापिव्यवस्थाविषयाकरार्थमिदं भाष्येऊनार्थेत्यर्थग्रहणास्यतृतीयेतिसूत्रे
प्रत्याख्यातत्वात्समर्थसूत्रेतृतीयातत्कृतेत्युपन्यस्योपादानविकलइत्युदाहरणाच्च अत्रोनार्थग्रहणंनतिवादिनांमतेसर्वथास्यावश्यकत्वाच्चेतिदिक् कर्तरि एम॰
करणेचेति सूत्रेसमाहारद्वन्द्वात्सप्तम्येकवचनमितिभावः तृतीयेति तृतीयान्तमित्यर्थः कृद्ग्रहणइति यत्रगतिकारकसमभिव्याहृतंकृदन्तंतत्रहिविशिष्ट ८

तेनैवपुं॰प्रातिपदिकत्वंसुविति।नचात्रद्वयोःसुपोर्लुकितदर्थस्यप्रातिपदिकार्थेंतर्भावेणद्वितीयाद्यनापत्तिः।व्याप्तिविशिष्टस्यकर्मत्वादिर्वोधार्थं।
तदुत्पत्तेःसुलभत्वात्।एकैकस्मिइति।द्वयोरपिसुपोर्लुकिपुनःसर्वादिपठितैकशब्दांतत्वेनसर्वनामत्वात्स्मैभावः।इद्दपुंवदिति।वहुव्रीह्यिवत्त्वाति
देशेनोत्तरपदत्वस्यैकार्थ्येनभिन्नार्थत्वाभावेनचसामानाधिकरण्यस्यचसत्वात्स्त्रियाःपुंवदित्यनेनेतिभावः।अंतोदात्तत्वानीति।अनुदात्तंचेत्य
स्याधिकारत्वेपिभाष्यप्रामाण्यान्नेहोपस्थितिः।अतएववहुव्रीहिवद्भावेप्रकृतेपिकर्मधारयवद्भावः।किंचप्रियादिषुप्रतिषिद्धपुंवत्त्वस्यापिविधाना
र्थेकर्मधारयवद्भावः।अतएवपूर्वसूत्रयोःकर्मधारयवदितिनोक्तम्।प्रियादिषुपुंवत्त्वापत्तेः।पूर्वसूत्रेतुनस्वरातिदेशोभाष्य — प्रामाण्या।
त्।अतएवतत्रकिंप्रयोजनंसुब्लोपपुंवद्भावावित्येवंभाष्यउक्तं।अत्रकानिप्रयोजनानिसुब्लोपपुंवद्भावांतोदात्तत्वानीत्युक्तं।प्रकारशब्दःसादृश्य।
वाचीव्याख्यानादित्याह।सादृश्येद्योत्यइति।पुंवद्भावइति।पुंवत्कर्मधारयेत्यनेन।गुणवचनस्येहाकडारसूत्रभाष्यपरिभाषितइतिवोध्यं।प्र
कारःसादृश्यप्रतियोगित्वरूपमुपमानत्वं।उपमानपदंभिन्नइतिवोधइतिपरे।आनुपूर्व्येइति।वार्त्तिकेषुकर्मधारयवदितिनसंवध्यते।तदु
दाहरणेषुभाष्येसुब्लोपादर्शनात्।संभ्रमआदरोभयंचक्रियासमभिहारेचेति।पौनःपुन्यंभृशार्थश्चक्रियासमभि हारः।लोट्येवेदं।अतएव
क्रियासमभिहारेलोट्मध्यमैकवचनस्यद्वेभवतइतिपठित्वातस्यलोट्ज्ञापकत्वमुक्तं।अष्टमेवास्यलोण्णेवोदाहरणमुपन्यस्तं।अतएवयङंतेनद्वित्वं।यत्तुलो
टःसमुच्चयादिष्वपिविधानेनकेवलेतद्द्योतनेनसामर्थ्याभावान्नेहलोटिद्वित्वं।यङस्तुनदतिरिक्तार्थाभावाद्यङेवद्योतनसंभवाद्यङंतेनद्वित्वमितितन्ना
अकजादेरनेकत्रद्योत्यार्थेविधानेपिकेवलस्यैवप्रकरणादिनातत्तदर्थद्योतकतयादृष्टत्वात्।भृशार्थेयङितत:पौनःपुन्यविवक्षयांतुनित्यवीप्सयोरि।
तिद्वित्वंभवत्येव।पापच्यतेपापच्यतेभृशंपाकंपुनःपुनःकरोतीत्यर्थः।नन्वस्यद्वित्वफलकंभृशार्थेद्वित्वेवसिद्धेक्रियासमभि हारपदंव्यर्थमतआह।
पौनःपुन्येपीति — इदमेवज्ञापकंपौनःपुन्यस्यकेनचिद्द्योतनेसौत्रद्वित्वाप्रवृत्तेरितिपौनःपुन्ययङंतेनसौत्रद्वित्वमितिभावः।भुक्त्वाभोजंभो
जमित्यादौताभीक्ष्ण्येद्वेवाच्येइतिभाष्यपठितवचनांतरेणद्वित्वंमूलेत्वेतत्कदंतेवक्ष्यते।पुनःपुनःक्रियाविच्छेदेनोत्पत्तिराभीक्ष्ण्यंतदेवचार्थमित्यत्र।

त·
ल·श· भुक्त्वाभुक्त्वेत्यादौ विशेषविधानाक्रियाचोपात्ता। अजनादिरूपैव गृह्यते। अनुपस्थितकल्पने मानाभावात्। एवं च त्वाद्यंतेनैवजनाद्याभीक्ष्ण्यस्य द्योतित
शे·सु· त्वात्त्वाद्यंतसमभिव्याहारे तिङंतस्य द्वित्वं। जीवतोवायमित्यर्थे जीवतिजीवतीत्यादौ। कमलानिकमलानीतिवदेकं जीवतिपदं दीर्घाविच्छिन्नलक्षक
२ मितिन। तत्रशास्त्रीयद्वित्वं कर्मव्यतीहारस्य क्रियाविनिमयः नित्यमेवेदंद्वित्वं। वाहुलकं तु समासवद्भावस्यैवतदाह। वहुलग्रहणादिति। अतएवान्यश
ब्दस्यसमासवद्भावरहितमेवेतरशब्दस्यतत्सहितमेवोदाहरणंभाष्ये। परस्परशब्देपरस्पराश्चेति वार्त्तिकप्रयोगात्समासवद्भावाभावः। अन्यपरेत
रव्यतिरिक्तेषुतुनास्यप्रवृत्तिर्वाहुलकादेव। अन्येषां कर्मव्यतीहारबोधकत्वाच्च। अन्योन्यादौकर्मव्यतिहारः स्फुटएव। अन्योन्यस्मैइति। अन्यस्मैइति
। अन्यस्मैइत्यस्यद्वित्वेपूर्वपदस्यसुपः सौस्म्यसिद्धिः। इतरेतरेषामित्यादौतुएकैकस्मैइत्यत्रोक्तरीत्यासर्वनामत्वं। वार्त्तिकेषुकर्मधारयवत्त्वस्यसंवं
ध अप्रश्नाय समासवदित्युक्तिः। सुब्लुग्विधिनैवसिद्धे समासइत्युक्तिरामेडितानुदात्तत्वबाधेनांतोदात्तार्था। कस्कादित्वादिति। कुप्वोः कःपौचेति
बाधितेतिभावः। सिद्धांतिमतमाह। अन्येत्विति। तदुक्तं। वृद्धैः। नचोदाहरणमादरणीयमिति। तदतिरिक्तोदाहरणाभावइत्येवंपरतयानादरणीय
मित्यर्थः। दलद्वयेइति। समासवद्भावे तदभावे चेत्यर्थः। इतरेतरमित्यादौपूर्वखंडस्य सर्वनाम्नइतिपुंवत्त्वेनयद्यपि सिद्धं। तथाप्युत्तरखंडे टाबभावा
र्थं वाहुलकमावश्यकंक्लीवेचेति। अन्योन्यमित्यत्रपूर्वपदेप्राप्तोद्विरहइत्यर्थः। उत्तरखंडे तुअस्मद्दक्ष्यमाणान्यतमरीत्यापितदभावः। समासेसो
रिति। कृतद्वित्वस्यान्ये न समासेपूर्वखंडस्यसेत्यर्थः। इदमुपलक्षणंपरस्परमित्यत्रपूर्वपदेनपुंसके सोरमभावस्यपरस्परस्मादित्यादौसर्वस्याभा
वेपिसर्वनामत्वस्य च। इतरेतरमित्यत्र चेति। डतरादिसूत्रे सर्वादीनीति सूत्रस्थभाष्यरीत्याविहितविशेषणाददणेत्यन्ये। सोर्लुगेवेति। स्वादेशा
विधानत्त्वनोन्यमित्यादावसमासेचरितार्थमितिभावः। प्रकृतवार्त्तिकेति। स्त्रीनपुंसकयोरिति। वार्त्तिके। अन्योन्यमिमेब्राह्मण्योइतरेतरमिमे कुले राम
इत्यादितत्रोदाहृतं भोजयामितीति। अन्योन्यसंश्रयादिति सर्वस्यद्वेइतिसूत्रस्थभाष्यप्रयोगोपिबोध्यः। अन्योन्यप्रादुर्भवादिति अपादानेइतिसूत्र। ३२
स्थभाष्यप्रयोगेमेकर्मव्यतिहारः स्पष्टएव। अकृच्छ्रइति। तत्रवर्त्तमानयोस्तदर्थकयोरित्यर्थः। पुनस्तदेवेति। अनुवादकविभक्तेन्याय्यत्वादितिभावः। यस्यदाने

क्लेशसंभावने तत्रैव तदभावप्रतिपादनं सफलमित्याशयेनाह। अतिप्रियमिति। यच्चेति। स्वशब्दस्योभयार्थकत्वात्। ज्ञातिधनवाचीतु नगृह्यतेऽनभिधानात् द्वे
इति वीप्सायां यथाशब्दस्यावृत्तौ द्वित्वप्राप्त्या तदपि निपात्यते इति भावः। क्लीवत्वं चेति। तेन ह्रस्वसिद्धिः। चेन कृतद्वित्वस्याव्ययत्वाभावसंग्रहः। ज्ञातेत्यस्य तत्त्वेन
त्वात्षष्ठी न। तृतीये तु यथायथ स्वज्ञातात्या। यथास्वरूपमित्यर्थः। ज्ञाताः सर्वे पदार्था यथायथं यथास्वभावं सर्वे पदार्था ज्ञाता इति वृत्तिसंमतम्। पूर्वपदस्याम्भाव इ
ति। द्वेद्वाविति। द्वित्वे कर्मधारयवद्भावात्सुब्लुकि पूर्वपदावयवस्याकारस्यामादेश इत्यर्थः। आत्वमिति संज्ञात्वादप्राप्तिः। नपुंसकत्वं चेति चेन कृतद्वित्वान्नियत
द्विवचनोत्पत्त्यभावस्य संग्रहः। कर्मवद्भावादन्तोदात्तत्वं। वाच्यमिति। इदं वृत्तौ स्पष्टं। अभिव्यक्तिरप्येवमित्यन्ये। आचतुरमिति। आङ् अभिविधौ। आङ् मर्यादेत्या
व्ययीभावः। शरत्प्रभृतित्वाट्टच्। चतुर्थान्तमिति फलितोऽर्थः। मिथुनीयं त्वनेनान्वयः। मिथुनशब्देन तत्कर्म मैथुनं तदिच्छतीत्यर्थे क्यच्। मिथुनं गच्छतीति।
मिथुनत्वं प्राप्नोतीत्यर्थः। फलितार्थकथनमिदं मिथुनायन्ते इति कण्ड्वादौ पाठः। उपमानार्थाभावात्। द्वंद्वपदद्योत्या मर्यादा तु एतावदेव पशूनामायुरि
त्येवंरूपा। स्वसाहित्येन चतुरोऽभिव्याप्येत्यर्थः। प्रपौत्रपुत्रेणापीति। चतुरोऽभिव्याप्येत्यर्थ इति वृत्तिस्वरसः। अत्यन्तसहचरितत्वेन लोकविज्ञानमत्राभिप्रे
तिः। अत्यन्तसहचरितौ लोकविज्ञातौ द्वंद्वमित्युपसंख्यानमिति वार्तिकात्। तदाह। साहचर्येणेति। तेनेह न। दैत्युधिष्ठिरार्जुनौ द्वंद्वं सञ्चीत्यत्र वीप्सायां द्वि
त्वमन्यत्र स्वार्थे। अन्यत्रापीति। द्वंद्वं युद्धान्यतिवर्तते इति यथा। अत्र द्वयोर्द्वयोरित्यर्थाद्वीप्सायां द्वित्वं। शीतोष्णसुखदुःखक्षुत्तृषाद्वंद्वानि सहते इत्यत्र स्वार्थे
द्वित्वमेकशेषाद्बहुवचनं यथा। वार्थे द्वंद्व इति स्वार्थे द्वित्वं पुंस्त्वं लोकात्। अयं योगविभागो भाष्ये न दृश्यते द्वंद्वं युद्धानीत्यत्र मर्यादावचनेन सिद्धं एवमादि
युद्धे मर्यादा। शीतोष्णादिष्वभिव्यक्ता। सहचरितत्वं शब्दप्रयोगैर्बोध्यं। वार्थे द्वंद्व इति तु संज्ञाशब्दो व्युत्पन्नः अवयवार्थाभानादिति तदाशयः। विस्तर
स्तु बृहच्छब्देन्दुशेखरे द्रष्टव्यः। शब्देन्दुशेखरे स्वल्पे पूर्वमर्द्धमपूपुरत्॥ प्रीयतां तेन भगवान् शिवया सहितः शिवः। भूषितः फणिभाष्ये तत्र लघुः शब्देन्दुशेखरः
॥ सत्ताहृत्कमलेष्वास्तां यावत्फणिफणाधरा॥ ॥ इति शिवभट्टसुतसतीगर्भजनागोजीभट्टकृते लघुशब्देन्दुशेखरे पूर्वार्द्धं समाप्तं॥ श्रीराम॥

॥ इति लघुशब्देंदुशेखरपूर्वार्द्धं समाप्तम् ॥ शुभमस्तुः ॥

श्रीगणेशाय नमः॥ अथ वैदिकेषु विशेषमाह छंदसि पुनः पुनर्वसोर्ईतारे लोके त्विति उडुनावयवभेदे समुदाये रूढत्वादिति भावः एवं विशाखयोरपि द्वेतारे तेन लोके द्विवचनमेव
योगविभागः छंदसीत्यस्योत्तरत्र निवृत्त्यर्थः एवं हि चानुकृष्टत्वान्नोत्तरत्रानुवृत्तिः वतीति वत्प्रत्यये इत्यर्थः मनेरिति आदेशप्रत्यययोरिति षत्वं अनंगत्वादिति अंगस्य सस्येति म
त्राधिकारात् अत्यासत्त्योः गभसंज्ञानिमित्तयोरेकत्वाश्रयणेन भसंज्ञानिमित्तवसुशब्दनिरूपितांगत्वाभावादिति भावः एतद्वार्तिकद्वयं छंदोविषयमिति केचित् संज्ञाद्वय
मिति तत्प्रयुक्तं कार्यमित्यर्थः अयस्मये अयस्मयो विकार इत्यर्थे ह्यवच् छंदसीति मयट् तेषां गिन्त्यनुवृत्तिप्रदर्शनार्थः इंधिभवतिभ्यां चेत्यस्य क्रमप्राप्तप्रथमोपन्यासस्यागे
वीजमाहे धेरिति इति प्रथमोध्यायः॥ हविषि वर्तत इति हूयते तत् होत्रं ततोग्निपदेन षष्ठीतत्पुरुषः अग्नये हूयत इति तत्त्वार्थप्रदर्शनं यवाग्वेति वाक्ये जुहोतिस्त्वागपू
र्वके प्रत्येव वर्तते द्वितीया त्रास्थले सोपसर्गस्य द्विर्वा विभाषोपसर्गे इति व्यवस्थितविभाषया सिद्धे निरुपसर्गापि पमासंमः पूरुषमृगश्चरम ठ इति बहुलग्रहणाच्चेदृम॥
सच्छत्तु व्यत्ययो बहुलमित्यस्यैवायं प्रपंचः अडभाव इति बहुलं छंदस्यमाङ्योगेपीत्युक्तेः सग्धिरिति क्तिनि घसिभसोर्हलि चेत्युपधालोपः समानस्य छंदसीति
सः न च भवतीति अंगं प्रकृत्यंतरं तु सार्वधातुकमात्रविषयमिति बोध्यं हेमंतशिशिर शब्दस्य हेमंतः शिशिरो स्त्रियामित्यमरात् उभयलिंगत्वेपि हेमंतशिशिरे इत्ये
तन्निवृत्तये स्पष्टार्थं हेमंतशिशिराविति अमरस्य प्रमाद इत्यन्ये अहोरात्रे इति रात्रान्हाहा इति पुंस्त्वं प्राप्तं हि लमतंत्र अहोरात्राणि विदधत् घस्लादेशः सेति
लुङ् सनोरिति विहितस्य प्रइति वृङ्वृञोः सामान्येन ग्रहणं आप्राति आपूरणे आङ्पूर्वः मध्यमपुरुषैकवचनं परावर्गिति परापूर्वस्य वृजेः अक्रन्निति कृञः अ
नुगमेनिति गमेर्गमहनेत्युपधालोपः अत्तन्वेदाप्येतरेय ब्राह्मणे सत्वादीह मंत्रग्रहणमिति इति द्वितीयः अकरिति कृञो लुङि तिपि मंत्रे घसेति च्लेर्लुकि सार्व
धातुकगुणे तिप्यो हल्ङ्याब्भ्य इति लोपे रूपं अज्ञुपिंतमिति गुपेर्लुङि तसस्तं तुजादित्वादभ्यासस्य दीर्घः छंदसि निष्टृनिष्टृक्यौ व्यत्ययं विधान्निसः षत्वं निपातनादित्यन्ये
इत्प्रत्ययवर्णयोः दीर्घश्चेति अत एव नुगभावः शिक्षाणीति शासेरित्यन्ये छंदसि वृहद्धुने यजेर्य इति देवशब्दे उपपदे इत्वादिः प्रत्ययस्वरेणांतोदात्तत्वे कृदुत्तरपदप्रकृतिस्व
रेः स्त्रीलिंग एव इदं निपातनं पृच्छेः प्रच्छ ज्ञीप्सायामित्यतः सीव्यतेरिति प्रतिपूर्वो दिव्यादिः प्रसलीति उपपदे इत्यर्थः लोके त्विति व्रश्चो यं [illegible] येनकाप्यों ध्वनो
षणीति गंसनतीति विग्रहः अत्र सनोतेरन इति नकारांतस्य निषेधात्॥



॥ इतिलघुशब्देंदुशेखरपूर्वार्द्धसमाप्तम् ॥ शुभमस्तु ॥

श्रीगणेशाय नमः ॥ अथ वैदिकेषु विशेषमाह छंदसि पुनः पुनर्वसो ई नारे लोके त्विति उडुनावयवभेदे समुदाये रूढत्वादिति भावः एवं विशाखयोरपि द्वित्वारे तेन लोके द्विवचनमेव
योगविभागः छंदसीत्यस्योत्तरत्रानिवृत्त्यर्थः एवं हि चानुकृष्टत्वान्नोत्तरत्रानुवृत्तिः वतीति वत्प्रत्यये इत्यर्थः मनेरिति आदेशप्रत्यययोरिति षत्वं अनंगत्वादिति अंगस्य भस्येति त
त्राधिकारात् अभ्यासत्यांगभसंज्ञानिमित्तयोरेकत्वाश्रयणेन भसंज्ञानिमित्तवसुशब्दनिरूपितांगत्वाभावादिति भावः एतद्वार्तिकद्वयं छंदोविषयमिति कैयटः संज्ञाद्वय
मिति तत्प्रयुक्तं कार्यमित्यर्थः अयस्मये अयसो विकार इत्यर्थे द्व्यचश्छंदसीति मयट् तेषामित्यनुवृत्तिप्रदर्शनार्थः इंधिभवतिभ्यां चेत्यस्य क्रमप्राप्तप्रथमोपन्यासत्यागे
बीजमाह धेरिति इति प्रथमोध्यायः ॥ हविषि विवर्तन इति ह्रयते तत् होत्रं ततोऽग्निपदेन षष्ठीतत्पुरुषः अग्नये ह्रयत इति तदर्थप्रदर्शनं यद्वाग्नेति वाक्ये जुहोतिस्त्यागपू
र्वकप्रक्षेपे वर्तते द्वितीयात्राख्याने सोपसर्गस्य दिवादिर्भावोपसर्गे इति व्यवस्थितविभाषया सिद्धे निरुपसर्गोयमारंभः पुरुषमृगश्चंद्रम इति बहुलग्रहणाच्चंद्रम
सश्चतुर्थी अभ्यस्यो बहुलमित्यस्यैवायं प्रपंचः अडभाव इति बहुलं छंदस्यमाङ्योगेपीत्युक्तेः सग्धिरिति क्तिनि घसिभसोर्हलि चेत्युपधालोपः समानस्य छंदसीति
सः न च भवति अंतरंगत्वं तत्तु सार्वधातुकमात्रविषयमिति बोध्यं हेमंतशिशिर शिशिरशब्दस्य हेमंतः शिशिरोऽस्त्रियामित्यमरादुभयलिंगत्वेपि हेमंतशिशिरे इत्ये
तन्निदर्शनायैव स्पष्टार्थं हेमंतशिशिराविति अमरस्तु प्रमाद इत्यन्ये अहोरात्रे इति रात्राह्नाहाः पुंसीति पुंस्त्वं प्राप्तं क्लीबत्वमत्र अहोरात्राणि विदधत् घस्लादेश इति
लुङ् सनोरिति विहितस्य इति वृङ्वृञोः सामान्येन ग्रहणं आपृणाति आपूर्णे आङ्पूर्वः मध्यमपुरुषैकवचनं परावर्गिति परापूर्वस्य वृजेः अक्रमिति क्रमः अ
नुम्मेनिति गमेर्गमहनेत्युपधालोपः अत्र न वेत्यस्येतरेयजमानेसत्वादिह मंत्रग्रहणमिति इति द्वितीयः अक्रन्निति कृञो लुङि मंत्रे घसेति च्लेर्लुकि सार्व
धातुकगुणे तिपो हल्ङ्यादिलोपे रूपं अजगृभ्णन्निति गुपेर्लुङि जसस्तुं तुजादित्वादभ्यासस्य दीर्घः छंदसि निष्टनिष्टर्क्यौ व्यत्ययं विद्यान्निमः वक्तं निपातनादिति व्यत्ये
न्यप्रत्ययवर्णयोः दीर्घश्चेति अत एव तुगभावः श्रिया इति शासेरित्यस्य उपहूते यजेर्य इति देवशब्दे उपपदे इन्नादिः प्रत्ययस्वरेणांतोदात्तत्वे कृदुत्तरपदप्रकृतिस्व
रः स्त्रीलिंगं एवं दं निपातनं पृच्छेः प्रच्छ ज्ञीप्सायामित्यतः सीव्यतेरिति प्रतिपूर्वोदिन्नादिः त्रसरणीति उपपदे इत्यर्थः लोके त्विति त्रसो यं [illegible] नयेन कायपर्वोध्न गो
षणीति गंसनतीति विग्रहः अत्र सनोतेरन इति नकारांतस्य निषेधात्

ल॰ शा॰ गोसनिशब्दस्य संबनादेशु पाठः करिष्यत इति सनोतेरन् इति सूत्रस्य भाष्याश्रयणे पत्वं न प्राप्नोति तथापि दंत्यस्यैव मूर्धन्यत्वं पाठो वैदिकसंप्रदायात् अत एव प
शे॰ वै॰ दकाले दंत्यमेव पठंति गोसनिमिति यत्तु सुषामादिषु पाठः इति तन्न उक्तसूत्रे तद्भाष्यविरोधात् येपथामिति पंथानं रक्षंतीति हविर्मथंतीति विग्रहः छंदसि सहः लोके तुरा
१ साहमित्यादि प्रयोगाश्चिंत्या इति हरदत्तः वहश्च अस्य लोके प्रयोग इति केचित् विचित्रेति हव्ये नतः हव्यशब्दे उपपदे वहेर्ञ्युट् पादस्यो मध्यस्थेनेत्यर्थः तदाह पादमध्ये नि
ति जनसनखनक्रमगमो विट् जनसनखनेति उपसर्गे सुपि चोपपदे एभ्य उत्पत्तिविट् विड्वनोरित्यत्र विशेषणार्थष्टः वेरपृक्तस्येत्यत्र सामान्यग्रहणार्थश्च अप्सुजा गोजाः सनोति
न्न सनतीति विसा नि खनतीति दधिक्रा मतीति अग्रेगा गच्छतीति दधिक्रा इति सर्वत्र विड्वनोरित्यात्वं अग्रेगा इति सप्तम्या अलुक् अवे यज इति योगविभाग उत्तरार्थः वि
जुप मंत्रे इत्यनुवर्तमाने छंदोग्रहणं स्पष्टार्थं छंदो ब्राह्मणानीति सूत्रबलेन ब्राह्मणे मुख्यछंदस्त्वस्यानंगीकारात् सुधीवेत्यादौ घुमास्थेतीत्वं वनिपि तुकि
त्वाभावनिलत्वस्वरादौ वरे इति चरेलभूशेत्यादि नियमात् प्राप्तः किप्यातिमसूयत इति भावः बहुलग्रहणात्क्वचिन्नापि नृधातः छंदसि लिट् छंदसि लुङ् लङ् ।
लिट् इति धातुसंबंधाधिकारस्थं कसुश्चेति योगविभाग उत्तरार्थः अनंतरस्यैव लिटो यमादेशः लिट इति प्रत्ययानर त्वाभावाय अनयोः कित्वं तु कृत्वं
मिति प्रतिषेधविषय गुणस्य तेरनुरित्यादावित्यादि राणासिजीवानित्यादौ प्रवृत्तिवारणाय ईजान इत्यादौ लिटः कित्वादेव संप्रसारणं सिद्धं अंजे राजिवानित्यादौ
नलोपः पोपिक्तेश्च मुभयथेत्यनेन सार्वधातुकत्वान्ङित्वादेव सिद्धः न चैवमारिवानित्यत्रापि गुणो न स्यात् ऋकारांत प्रश्लेषेण ऋधातोः पुनर्विधानादिति मंत्र
क्वाश्छंदसि क्विपि घायइति व्याख्यानात् कं ड्वादियगंतादपि यमस्य मोनो शाकुनं भरण्युमिति यथा लोके नसूयव इति तु लोहितादिसूत्रभाष्यरीत्या साधु मंत्रे वृषेष
सूत्रे यं च मध्यर्थ प्रथमा वृषुसेचने इष इच्छायां मन ज्ञाने मनु बोधने इत्युभयोर्ग्रहणं विदादीनामपि यथादर्शनं मौ विधातव्य उदात्तवचनमुत्तरार्थं त्वज्यते भावे क्य
